


पंडितश्रीशुभशीलगणिविरचितम्

# श्रीअरजिनचरित्रम्

संपादक : आचार्यश्री जयानंदसूरीश्वरजी म.सा.

॥ श्री आदिनाथाय नमः ॥
॥ प्रभु श्रीमद् विजयराजेन्द्रसूरीश्वराय नमः ॥

## पंडितश्रीशुभशीलगणिविरचितम्

# श्रीअरजिनचरित्रम्


–: दिव्याशीष :–

*आचार्यदेव श्री विद्याचंद्रसूरीश्वरजी*
*मुनिराज श्री रामचंद्रविजयजी*

–: संशोधक :–

*आचार्य श्री मुनिचन्द्रसूरीश्वरजी*

–: संपादक :–

*आचार्य श्री जयानंदसूरीश्वरजी*



–: प्रकाशक :–

*गुरुश्री रामचंद्र प्रकाशन समिति - भीनमाल*

: मुख्य संरक्षक :

(१) *श्री संभवनाथ राजेन्द्रसूरि श्वे. ट्रस्ट* - कंदुलावारी स्ट्रीट, विजयवाडा

(२) मुनिराज *श्री जयानंदविजयजी* आदि ठाणा की निश्रा में वि.सं. २०६५ में शत्रुंजय तीर्थे चातुर्मास एवं उपधान करवाया उस निमित्ते... *लेहर कुंदन ग्रुप* (मुंबई, दिल्ली, चेन्नई, हरियाणा) श्रीमती गेरीदेवी जेठमलजी बालगोता परिवार मेंगलवा.

(३) *एक सद्‌गृहस्थ - भीनमाल*

(४) संघवी उत्तमकुमार, सन्तोषदेवी, कुणाल, मेधा बेटा-पोता रीखबचंदजी ताराजी नागोत्रा सोलंकी परिवार, बाकरा-राज.

R.T. Shah & Co. 9-C, Prince Paladise, 75 Jermiah Road, Near Vepery Police Station, Vepery, Chennai-7.

## -: संरक्षक :-

१. एस. के. नाहर २०१, सुमेर टॉवर, लवलेन, मझगांव-मुंबई.
२. मीलियन ग्रुप, सूराणा, राज., मुंबई, दिल्ली, विजयवाडा
३. एम. आर. इम्पेक्स, लेमीग्टन रोड, मुंबई-७. फोन : २३८०१०८६
४. महाविदेह भीनमालधाम, पालीताणा.
५. कल्पतरु ज्वेलर्स, स्टेशन रोड, थाना, मुंबई.
६. अमृतलाल चीमनलाल दोशी - थराद.
७. अरिहन्त नोवेल्हटी-कालुपुर, अहमदाबाद-तिरचिरापली.
८. मधुबेन कांतिलाल भणशाली, थराद-मुंबई.
९. कांतिलाल केवलजी गांधी, सियाना-विजयवाडा.
१०. लहेर कुंदन ग्रुप, मेंगलवा-दिल्ली-मुंबई-चेन्नई-हरियाणा.
११. 'जय चिंतामणी' संतापेट नेल्लूर-गुडा.
१२. नाकोडा गोल्ड-कालबादेवी, मुंबई-२.
१३. राजरतन गोल्ड प्रोड. अरुंडलपेट, गुन्टूर.
१४. एक सद्गृहस्थ, धाणसा.
१५. कोठारी गुलाबचन्द, डॉ. राजकुमार छगनराजजी-आहोर, अमेरिका.
१६. शांतिरूपचंदजी मिलापचंदजी - जालोर.
१७. शा. शांतिलाल प्रवीणकुमार-रामगोपाल स्ट्रीट, विजयवाडा.
१८. नवकार टाइम, नाकोडा स्टेट, मुंबई-३.
१९. राजेन्द्र मार्केटींग, आहोज, विजयवाडा.
२०. राजेन्द्र ज्वेलर्स, ताडदेव, मुंबई-पांथेडी.
२१. जे. सी. इम्पेक्स प्रा.लि. - नारायण मुदली स्ट्रीट चेन्नई-७६.
२२. शा. हस्तीमलजी भलाजी नागोत्रा सोलंकी परिवार, बाकरा
२३. लहेर कुंदन ग्रुप आराधक गण.
२४. कुंदन ग्रुप - मेंगलवा, चेन्नई, दिल्ली, मुंबई.
२५. शा. सुमेरमलजी नरसाजी-मेंगलवा, मुंबई.
२६. मंगल आर्ट. दोशी बिल्डींग ३-भोईवाडा, भूलेश्वर, मुंबई-२.
२७. श्रीसुपर स्पेअर्स रोड, विजयवाडा-धाणसा.
२८. कलांजली ज्वेलर्स, ब्राडी पेठ, गुन्टूर-आहोर.
२९. शा. प्रतापजी कालूजी कांकरीया, गुन्टूर, मोदरा.
३०. एक सद्गृहस्थ (खाचरौद)
३१. हितेन्द्र मार्केटींग, चेन्नई-बाकरा.
३२. पी. टी. जैन, रोयल सम्राट, मुंबई-६२ धाणसा.
३३. गोल्ड मेडल इंडस्ट्रीज, मुंबई-विजयवाडा.
३४. राज राजेन्द्र टेक्सटाईल्स, मुंबई-गोधरा.
३५. कोठारी मार्केटींग चितुरी कोम्पलेक्ष, विजयवाडा.
३६. अलका स्टील, भवानी पेठ, पूना-५२ धाणसा.

३७. श्रीमती हंजादेवी सुमेरमलजी नागोरी आहोर/बेंगलोर.
३८. श्रीमती मेतीदेवी पेराजमलजी रतनपुरा बोहरा मोधरा.
३९. संघवी इलेकट्रीक कंपनी, आलासण/चेन्नई.
४०. राजेश इलेकट्रीकल्स, राजा बिल्डींग, तिरुनेलवेली
४१. शा. कान्तीलाल मंगलचन्द हरण, दाँसपा.
४२. के. सी. आई. वायर्स प्रा.लि. गोवीन्दाप्पा नायक स्ट्रीट, चेन्नई.
४३. अरुण एन्टरप्राईजेस, ब्राडी, पेठ, गुन्टूर-सायला.
४४. फूलचंद भंवरलाल, गोवीन्दाप्पा नायकन स्ट्रीट, चेन्नई.
४५. मंगल मोती सिन्डीकेट, एम. पी. लेन, बेंगलोर.
४६. बल्लु गगलदास, वीरचंदभाई-थराद.
४७. फेंसी डायमंड, नं. २, ओपेरा हाउस, धानेरा, मुंबई.
४८. देसाई शांतिलाल उत्तमचन्द थराद-मुंबई.
४९. मेघराजजी फूसाजी आइदाप्पा, नायकेन स्ट्रीट, चेन्नई-७९.
५०. श्रीमती बदामीदेवी दीपचन्दजी गेनाजी मांडवला, चेन्नई.
५१. मैसुर पेपर सपलायर्स सुलतानपेट सर्कल, बेंगलोर-५३.
५२. एक सद्गृहस्थ बाकरा (राज.)
५३. माइनोक्स मेटल प्रा.लि., मुंबई, चेन्नई, अहमदाबाद.
५४. श्रीमती प्यारीबाई भेरमलजी जेठाजी श्रीश्रीश्रीमाल अग्नि गौत्र, सुरत.
५५. हीरा नोवेल्टीस, फलोवर स्ट्रीट, बल्लारी.
५६. हालचंदभाई वीरचंदभाई परिवार थराद, सुरत.
५७. ताराचंद अेन्ड कंपनी ए-१८, भारतनगर, ग्रान्ट रोड, मुंबई.
५८. मु. जयानंद वि. की निश्रा में तीन नव्वाणु, तीन परिवार
५९. महावीर पेपर अेन्ड जनरल स्टोर्स, गुन्टूर.
६०. श्री राजेन्द्रा होजीयरी सेन्टर, मामुल पेट, बेंग्लोर.
६१. शा. सुमेरमल मांगीलाल, मामुलपेट, बेंग्लोर.
६२. स्व. सुमटीबाई घेवरचंदजी शेषमलजी श्रीश्रीश्रीमाल चन्द्रावण आहोर.
६३. कान्ति ज्वेलर्स एवं आर. फन. सिटी, घेलादेवजी चौक कल्याण.
६४. भूरमलजी खीमराजजी कटारिया संघवी परिवार आहोर.
६५. एक सद्गृहस्थ - जालोर (राज.)
६६. शा गटमल कपूरचन्दजी छत्रीया वोरा, बाकरा.
६७. श्रीमति सुबटीबाई छगनराजजी कंकु चोपडा, बेंग्लोर.
६८. स्व. विक्रमकुमार नेणचंदजी घेवरचंदजी छत्रीया वोरा, सूराणा.

## सह संरक्षक

१. शा. तीलोकचंद मायाचंद, गुलालवाडी, मुंबई-४.
२. नरेन्द्रकुमार एण्ड कुं. पहला भोईवाडा लेन, मुंबई-२.
३. प्रविण एण्ड कं. बेगम बाजार, हैदराबाद.
४. सुन्दर फर्निचर, ७६४, सदाशीव पेठ, बाजीराव रोड, पूना.

५. सुबोधभाई उत्तमलाल महेता धानेरानिवासी, कलकत्ता.
६. राजेन्द्र स्टील हाउस, ब्राडी पेठ, गुन्टूर.
७. श्री राजेन्द्र टोवर नं. १३, समुद्र मुद्दाली स्ट्रीट, चेन्नई.
८. एम. के. लाइट, ८६७, अविनाशी रोड, कोइम्बटूर.
९. वैभव ए टु झेड डोलर शोप वासवी महल रोड, चित्रदूर्गा.
१०. महेन्द्र ग्रुप, विजयवाडा (आ.प्र.)
११. श्री मानमलजी भीमाजी छत्रिया वोरा कोइम्बटूर.
१२. पीरचंद महावीरकुमार मैन बाजार, गुन्टूर.
१३. जैन इन्टरनेशनल, ६५, गोवींदाप्पा नायकन स्ट्रीट, चेन्नई.
१४. अशोकभाई शांतिलाल शाह बोरीवली मुंबई.
१५. अशोक गोल्ड, ७, काका साहेब गाडमील मार्ग, खेड गली, मुंबई.
१६. एम्पायर मेटल्स इन्डिया, मुंबई.
१७. राजगुरु इन्टरप्राईज, चेन्नई.
१८. श्रीमती जमनादेवी भोमचंदजी भंसाली - भीनमाल मुंबई.
१९. मुकेश टेक्सटाईल्स, रायपुर, अहमदाबाद.

• • •

- **श्री गुरु रामचंद्र प्रकाशन समिति**
  C/o. शा. देवीचंद छगनलालजी
  सुमति दर्शन, नहेरु पार्क के सामने,
  माघ कोलोनी,
  भीनमाल-३४३ ०२९ (राज.)
  फोन : (०२९६९) २२० ३८७

- **श्री आदिनाथ राजेन्द्र जैन पेढी**
  साँथु-३४३ ०२६,
  जिला-जालोर (राज.)
  फोन : (०२९७३) २५४२२१

- **श्री विमलनाथ जैन पेढी**
  बाकरा गाम-३४३ ०२५ (राज.)
  फोन : (०२९७३) २५११२२
  (मो.) ९४१३४६५०६८

- **महाविदेह भीनमाल धाम**
  तलेटी हस्तगिरि लिंक रोड,
  पालिताणा-३६४ २७०.
  फोन : (०२८४८) २४३०१८

- **श्री तीर्थेन्द्रसूरि स्मारक संघ ट्रस्ट**
  तीर्थेन्द्रनगर, बाकरा रोड-३४३ ०२५
  जिला-जालोर (राज.)
  फोन : (०२९७३) २५११४४

- **श्री सीमंधर जिन राजेन्द्रसूरि गुरु मंदिर**
  शंखेश्वर तीर्थ मंदीर के पास,
  शंखेश्वर, जि. महेसाणा

# प्राक्कथनम्

पूज्यपाद आर्यरक्षित सूरीश्वरजी ने समस्त श्रुत को चार अनुयोगो में व्यवस्थापित किया है। उसमें श्री धर्मकथानुयोग बालजीवों की अपेक्षा से आत्मप्रगति में उत्तम निधि है।

प्रस्तुत ग्रन्थ भी यथा नाम ही अठारहवें भगवान **श्रीअरनाथस्वामी** का चरित्र है। जो स्वयं उसी भव में चक्रवर्ती भी थे। कथाकार श्री शुभशीलगणी के विषयमें एवं कथा की विशेषता आदि के विषय में पू. विद्वद्वर्य संशोधनमग्न **आ.श्री मुनिचन्द्रसूरीश्वरजी** ने प्रस्तावना में किया ही है।

इस प्रयास में लगभग संशोधनादि सभी कार्य के लिए धन्यवादार्ह पूज्य आचार्यभगवन्त ही है। उन्होंने ही ज्यादातर शंका स्थान शुद्धि आदि का कार्य किया है।

उपरांत कलिकुंड तीर्थोद्धारक आचार्यश्री राजेन्द्रसूरीश्वरजी म.सा. के समुदायवर्ती **मुनिश्री राजयशविजयजी** ने भी शुद्धिकरण प्रुफ संशोधन में सहायता की है, जिसके लिए वे भी अनुमोदना पात्र है। विद्वद्जन इस वृत्ति में कोई क्षती या अशुद्धि पाएँ, तो अवश्य ज्ञापित करावे।

शुभं भवतु श्री श्रमणसङ्घस्य इसी भावना के साथ

**जयानंद**

## પ્રસ્તાવના

- આ. વિજય મુનિચન્દ્રસૂરિ

પં. શુભશીલ ગણી રચિત 'શ્રી અરજિન ચરિત' પ્રથમવાર જ પ્રગટ થાય છે. તે ઘણા આનંદનો વિષય છે.

આગમ પ્રભાકર મુનિશ્રી પુણ્યવિજયજી મ.સા. હસ્તલિખિત સંગ્રહોમાંથી જે અપ્રગટ અને વિશિષ્ટ ગ્રંથો લાગ્યા તેની પ્રતિલિપિ - નકલ કરાવી લેવડાવતા આવા શતાધિક ગ્રંથોની પ્રતિલિપિઓ 'પ્રાકૃત ટેક્ષ્ટ સોસાયટી' માં (૧૨ ભગતભાગ ન્યૂ શારાદામંદિર રોડ પાલડી અમદાવાદ) સચવાયેલી છે. આ સંસ્થાના ટ્રસ્ટીશ્રી હર્ષદભાઈના સૌજન્યથી અમને આ પ્રતિલિપિની નકલ મળી છે.

આ પ્રતિલિપિ કરેલા ગ્રંથોમાં કમભાગ્યે કઈ હસ્તપ્રતના આધારે આ નકલ કરવામાં આવી છે તેની કોઈ નોંધ મળતી નથી.

પ્રસ્તુત 'અરજિન ચરિત'ની હસ્તલિખિત પ્રત મેળવવા અમે અનેક જ્ઞાનભંડારોમાં તપાસ કરાવી છે પણ ક્યાંયથી અમને એક પણ હસ્તલિખિત પ્રત મળી નથી. હમણાં એવી માહિતિ મળી છે કે- અમદાવાદ દેવસાપાડાના જ્ઞાનભંડારમાં આ ગ્રંથની હસ્તલિખિત પ્રત છે. પણ અમને મળી શકી નથી. માત્ર પ્રતિલિપિ - કે જેને પૂ. જંબુવિજયજી મ.સા.ના સૂચિપત્રમાં પુ.પ્રે. (પુણ્યવિજય પ્રેસ કોપી) તરીકે ઓળખાવી છે - ના આધારે જ સંપાદન કરવામાં આવ્યું છે.

આ.ભ. શ્રી જયાનંદસૂરીશ્વરજી મ.સા., અને એમના શિષ્યગણે આ ગ્રંથના સંપાદનમાં સુંદર રસ લીધો છે અને એક અપ્રગટ ગ્રંથને પ્રગટ કરવાનું સૌભાગ્ય પ્રાપ્ત કર્યું છે.

અમારા સા.શ્રી વિનયપૂર્ણાશ્રીજીએ (સા.શ્રી કુલચન્દ્રાશ્રીજીના શિષ્યા) આ ગ્રંથના પ્રુફો ચીવટપૂર્વક જોયા છે. એમની શ્રુતભક્તિ પણ અનુમોદનીય છે.

### ગ્રંથ અને ગ્રન્થકાર

ગ્રંથ અને ગ્રન્થકાર વિષે ત્રિપુટી મ. આગમ પ્રભાકર પુણ્યવિજય મ. મુનિ મૃગેન્દ્રમુનિજી, મહોપાધ્યાય વિનયસાગરજી, મણીલાલ ન્યાલચંદ શાહ, શ્રી હરિવલ્લભ ભાયાણી, મોહનલાલ દેસાઈ, હીરાલાલ કાપડિયા વગેરે એ જે લખ્યું છે તેના આધારે ઉપયોગી બાબતો જણાવીએ છીએ.

### ગ્રંથકાર

ગ્રંથકારની ગુરુપરંપરા આ પ્રમાણે છે. ૪૫ માં પટ્ટધર આ. જગચ્ચન્દ્રસૂરિ (વિ.સં. ૧૨૪૦ તપગચ્છ બિરુદ પ્રાપ્ત કરનારા) → આ દેવેન્દ્રસૂરિ (સં. ૧૨૭૧-૧૩૨૭) → સોમપ્રભસૂરિ (સં. ૧૩૩૨-૧૩૭૩) → આ. સોમતિલકસૂરિ (સં. ૧૩૭૩-૧૪૨૪) → દેવસુંદરસૂરિ ( સં. ૧૪૨૪-૧૪૫૬) → સોમસુંદરસૂરિ ( સં. ૧૪૫૬-૧૪૭૮)→ મુનિસુંદરસૂરિ ( સં. ૧૪૭૮-૧૫૦૩)

આ.મુનિસુંદરસૂરિના સામ્રાજ્યમાં પં. શુભશીલગણી થયા.

વિક્રમચરિતની પ્રશસ્તિ (પદ્ય ૧૨) માં અને ભરતેશ્વર બાહુબલિ વૃત્તિમાં ગ્રંથકારે આ. મુનિસુંદરસૂરિને ગુરુ તરીકે દર્શાવ્યા છે, 'પંચશતી પ્રબોધ પ્રબંધ'ના મંગલાચરણમાં અને ૧-૨-૩ અધિકારને અંતે આ. લક્ષ્મીસાગરસૂરિને ગુરુ તરીકે દર્શાવ્યા છે. જ્યારે એ જ ગ્રંથના અંતે સોમસુંદરસૂરિ-મુનિસુંદરસૂરિ-જયચન્દ્રસૂરિ-રત્નશેખરસૂરિ-લક્ષ્મીસાગરસૂરિ-

સોમદેવસૂરિ-રત્નમંડનસૂરિશિષ્ય પં. શુભશીલગણિ આ રીતે આ. રત્નમંડનસૂરિને ગુરુ તરીકે નિર્દિષ્ટ કર્યા છે.

'પ્રભાવક ચરિત્ર' (ર. સં. ૧૫૦૪) માં શુભશીલગણિએ પોતાના ૬ ગુરુભાઈનો નામોલ્લેખ કર્યો છે તે નામ આ પ્રમાણે છે. ઉદયનંદિસૂરિ, ચારિત્રરત્નગણિ, રત્નશેખરસૂરિ, લક્ષ્મીસાગરસૂરિ, વિશાલરાજસૂરિ, સોમસુંદરસૂરિ,

પ્રસ્તુત અરજિન ચરિત્રમાં ગ્રંથકારશ્રીએ લક્ષ્મીસાગરસૂરિ, સોમદેવસૂરિ, સુધાનન્દસૂરિ, રત્નમંડનસૂરિ, હેમહંસ ઉપાધ્યાય, શુભરત્ન, સોમજયવિજયનું સ્મરણ કર્યું છે.

વિદ્વાનોની સંભાવના એવી છે કે ગ્રંથકારે નિશ્રાદાતા, વિદ્યાગુરુ અને દીક્ષાગુરુ ત્રણેનો ગુરુ તરીકે ઉલ્લેખ કર્યો છે.

ગ્રંથકાર શ્રીની ગ્રંથ રચનાઓમાં વિ. સં. ૧૪૯૨ થી ૧૫૪૦ સુધીના રચના સંવતો મળે છે.

વિ.સં. ૧૫૭૨માં તેઓશ્રી ચાંપાનેરમાં બાદશાહ મુજફરના દરબારમાં ઉપસ્થિત થઈને ઉપદેશ આપે છે. અને સંઘને થયેલ અન્યાય દૂર કરે છે.

આ જોતાં ગ્રંથકાર શ્રીનું જીવન ૧૫ મા સૈકાના પૂર્વાધથી સોળમાના ઉત્તરાર્ધમાં લગભગ સો વર્ષના વિસ્તારમાં ફેલાયેલું જણાય છે.

ગ્રંથકારશ્રીના જન્મ સમય, જન્મ સ્થળ, દીક્ષા સ્થળ વગેરે કશી વિગત મળતી નથી. 'જૈન પરંપરાનો ઈતિહાસ' ભા. ૩માં પૃ. ૫૧-૫૨ ઉપર શ્રી ત્રિપુટી મહારાજ ગ્રંથકારશ્રીના જીવનનો ચાંપાનેરમાં દરબારમાં જવાનો પ્રસંગ લખ્યો છે. તે નીચે મુજબ છે.

"એ સમયે તપગચ્છના ભ. હેમવિમલસૂરિ સં. ૧૫૪૮ થી ૧૫૮૩ થયા તેમણે સં. ૧૫૭૦માં ઈડરમાં ઉપા. આણંદવિમલ ગણિને આચાર્ય અને પં. રત્નશેખર તથા પં. માણેકસાગરને ઉપાધ્યાય બનાવ્યા, પછી તો સૌ ત્યાંથી વિહાર કરી ખંભાત જતા હતા ત્યારે રસ્તે આવતાં કપડવંજમાં દોશી આણંદજીએ તેમનું બાદશાહી સ્વાગત કરી કપડવંજમાં પધરાવ્યા.

બાદશાહ મુજફરે કોઈના ચડાવવાથી આ હકીકત સાંભળી સં. ૧૫૭૨માં, આ. હેમવિમલસૂરિને ઈર્ષ્યાવૃત્તિથી પકડી લાવી કેદમાં પૂરવાનો હુકમ કર્યો.

ભ. હેમવિમલસૂરિએ ફરી ફરી આવા ઉપદ્રવો ન થાય એ માટે આયંબિલનું તપ કરી, સૂરિમંત્રનો જાપ કર્યો. અધિકાષ્ઠાયક દેવે જણાવ્યુ કે, "આક્ષેપ જૂઠા હોય વિરોધ કરો, ધન પાછું આવશે." આથી આચાર્યશ્રી એ શતાર્થી પં. હર્ષકુલગણિ પં. સંઘહર્ષ-ગણિ, પં. સંયમકુશળ ગણિ અને શીઘ્ર કવિ પં. શુભશીલ ગણિ એ ચાર ગીતાર્થોને આજ્ઞા કરી, ચાંપાનેર મોકલ્યા. તેઓએ બાદશાહ મુજફરને કાવ્ય કલા અને ઉપદેશથી રંજિત કરી ખંભાતના સંઘને ૧૨,૦૦૦ ટકા પાછા અપાવ્યા."

(સં ૧૬૩૬ની તપાગચ્છ લઘુ પોષાળ પટ્ટાવલી, પ્રક. ૫૫, પૃ. ૩૮૧)"

પ્રસ્તુત ઘટનાનો આધાર લઇ આ. યશોવિજયસૂરિ મ.એ (આ. પ્રેમ-ભુવનભાનુ સમુદાય) જવાંમર્દી ભા. ૧-૨ લખ્યા છે.

### શ્રી અરજિન ચરિત્ર

૧૧ સર્ગમાં વહેંચાયેલું લગભગ ૫૦૦૦થી વધુ ગ્રંથાગ્ર ધરાવતું આ ચરિત્ર વિ.સં. ૧૫૨૨માં રચાયાનું ગ્રંથકારશ્રીએ જ આ પ્રમાણે ગ્રંથના અંતે જણાવ્યું કે, -

શ્રી विक्रमार्कनृपात् द्विद्विपञ्चेन्दुमितवत्सरे । शुभशीलगणी चक्रे चरित्रं श्रीअरार्हतः ॥

૧૧ સર્ગમાં ક્રમશઃ શ્લોક સંખ્યા

(૧) ૫૯૩ (૨) ૩૩૪ (૩) ૭ (૪) ૧૧૧૪ (૫) ૫૫૬ (૬) ૪૬૫ (૭) ૫૯૧ (૮) ૪૧૭ (૯) ૩૦૩ (૧૦) ૪૭૭ (૧૧) ૧૯૩

સુભાષિતોનો સાગર આ ગ્રંથ છે. અને સુભાષિતો વિવિધ છંદોમાં છે. પ્રાકૃત અને દેશ્ય ભાષામાં પણ છે.

ગ્રંથકારશ્રીને **હજારો સુભાષિતો કંઠસ્થ હશે** એવું પ્રસ્તુત અરનાથ ચરિત્ર અને ગ્રંથકારના અન્ય ગ્રંથો જોતા સ્પષ્ટ સમજાય છે.

ઘણીવાર એક સુભાષિત આપ્યા પછી વળી એવો બીજો પ્રસંગ આવે તો ફરી એજ સુભાષિત એમણે તે તે પ્રસંગને રસમય બનાવવા આપ્યું છે.

આવા એકથી વધુવાર પ્રયોજાયેલા સુભાષિતો વગેરેની સંખ્યા પચીસથી વધુ છે.

| | | |
|---|---|---|
| सङ्ग्रहैकपरः प्राप | - | ૧.૮૫ / ૨.૨૪૯ |
| कदर्योपात्तवित्तानां | - | ૧.૮૮ / ૨-૨૫૦ |
| विना गुरुभ्यो गुणनीरधिभ्यो | - | ૧.૪૫૨/૨.૧૩૦/૭.૨૧૯ |
| पत्नी प्रेमवती सुतः सुविनयो | - | ૧.૪૪/૨.૫૯/૫.૨૪૬ |
| आरोहन्ती शिरः स्वान्ताः | - | ૧.૪૧૪/૨-૩૧ |
| रिसहेसरसमं पत्तं | - | ૪.૧૨૨/૪-૧૨૮ |
| चत्तारि अट्ठ दस दोय | - | ૪.૨૭૫/૪-૪૭૬ |
| धनदो धनमिच्छूनां | - | ૧.૫૬/૪.૧૦૬૮/૭-૧૫૧/૧૦-૪ |
| मेरु अह उड्डलोआ | - | ૪-૧૮/૫.૮૮ |
| संवट्ट मेह आयंसयाय | - | ૪.૧૯/૫-૮૯ |
| राज्यं सुसम्पदो भोगाः | - | ૧-૧૬૫/૪-૧૦૬૭/૮-૧૭૧ |
| जायंमि जीवलोए | - | ૧.૧૧૮/૬.૨૩૫/૭-૩૦/૭-૩૮ |
| गुरुवंदण महतिविहं | - | ૧.૫૩/૭.૧૬૩ |
| तईअं तु छंदणदुगे | - | ૧-૫૫/૭-૧૬૪ |
| पुरुषः कुरुते पापं | - | ૭-૫૮૦/૧૦-૯/૧૦-૨૧૦ |
| शीलं नाम नृणां | - | ૧-૩૪૫/૭-૫૮૨ |
| शर्वरी दीपकश्चन्द्र | - | ૪-૭૫૨/૭.૫૪૧ |
| दुष्टानां दमनं नयानुगमनं | - | ૭-૨૬૯/૮.૬ |
| लक्ष्मीवन्तो न जानन्ति | - | ૧-૩૦૯/૮.૬૭ |
| भक्ते द्वेषो जडे प्रीति | - | ૧-૩૧૦/૮.૬૯ |
| अज्ञानतिमिरान्धस्य | - | ૨-૧૨૯/૭-૨૧૮ |
| सचित्तदव्वमुज्झण | - | ૧-૫૧/૭.૨૭૪ |

इअ पंचविहाभिगमो - ૧-૫૨/૭.૨૭૫

अनाज्यं भोज्यमप्राज्यं - ૭-૬૧/૭.૨૮૫

रम्यं रूपं करणपटुत्ता - ૨-૪૨/૭.૫૧૪

चत्वारः प्रहरा यान्ति - ૨-૬/૭-૫૨૫

जले तैलं खले गुह्यं - ૪.૩૯૭/૭/૪૯૬

ગ્રંથકારશ્રી જૈનશાસ્ત્રો ઉપરાંત લૌકિક ગ્રંથો, રિતરીવાજોના પણ સારા જાણકાર છે. એટલે -

અહીં જોવા મળે છે.

- પ્રયાણના શુકનો
- પ્રયાણના અપશુકનો
- સ્વપ્ન ફલાદેશ
- પ્રહેલિકાઓ ૭-૫૬૧, ૫૬૨, ૫૬૩
- નવકારગણવાનું ફળ
- સાધુનિંદાનું ફળ

ગ્રન્થકારશ્રીની રચનામાં પૂર્વવર્તિ ગ્રંથની છાયા પણ ક્યાંક ક્યાંક જોવા મળે છે. જેમ કે-

સર્ગ ૧૦ વીરભદ્રકથા શ્લોક ૩૩૩

सुव्रतोवाच ते धर्मस्वसेयं प्रियदर्शना । वत्से ! तिष्ठानया सार्धं, धर्मानुष्ठानतत्परा ॥ ३३३॥

સરખાવો ત્રિશષ્ટિશ.પુ.ચ. ૬/૨/૨૭૨

गणिन्युवाच ते धर्मस्वसेयं प्रियदर्शना । वत्से ! सहानया तिष्ठ, धर्मानुष्ठानतत्परा ॥ २७२॥

આવી રીતે અરજિન ચરિત્ર ૧૦/૩૨૫ અને ત્રિશષ્ટિશ.પુ.ચ. ૬/૨/૨૬૫ માં પણ સમાનતા છે.

## પ્રસ્તુત અરચરિત્રની વિશેષબાબતો

અહીં શ્રીઅરચક્રી ષટ્ખંડસાધના માટે અઠ્ઠમ કરે છે એવી વાત છે.

ત્રિષષ્ટિ શ.પુ.ચ.માં અઠ્ઠમ કર્યાનો ઉલ્લેખ નથી, સેનપ્રશ્ન (૩/૪૧૪) માં તીર્થંકરચક્રવર્તીઓ અઠ્ઠમ કરતા નથી એમ શાંતિનાથ ચરિત્રમાં છે તે જાણવામાં આવ્યું છે. 'વૈરાગ્યભાવના' (લે. ભક્તિવિજયજી) માં પણ, તીર્થંકર ચક્રવર્તી થાય તો તપ કરવો પડે નહીં એવી વાત છે.

અ.ચ. ૪/૧૮૦ માં

प्रयागवट इत्याख्यां लभते साम्प्रतं स च । मिथ्यात्विभिर्ग्रहीतत्वात् जैनैर्न मान्यतेऽधुना ॥

પરમાત્મા ઋષભદેવ ભ. ને કેવલજ્ઞાન થયું તે સ્થળ આજે પ્રયાગવટ તરીકે જાણીતું છે. અત્યારે મિથ્યાત્વીઓનાં કબજામાં હોવાથી જૈનો માનતા નથી.

ત્રિષષ્ટિ શ.પુ.ચ. ૧/૩/૨૪૭ માં સોમયશા રાજાએ સ્વપ્ન જોયું કે શ્રેયાંસકુમારની સહાયથી રુંધાયેલો રાજા છુટ્યો.

अदर्शि सोमयशसा, रातैको बहुयिः परैः । रुद्धः समन्ताच्छ्रेयांससाहाय्याज्जयमीयिवान् ॥

અરનાથચરિત્ર (શુભશીલગણિકૃત) માં (૪/૯૭)

**भूपाङ्गरक्षकोऽपश्यत् स्वप्ने वैरिधृतं भटम् । श्रेयांसो मोचयामास, स्वकीयभुजलीलया ॥**

અહીં રાજાના અંગરક્ષકે સ્વપ્ન જોયાની વાત છે.

ત્રિષષ્ટિ શ.પુ.ચ.(૨/૫/૧૭૮) સગરચક્રીના ૬૦ હજાર પુત્રોને જ્વલનપ્રભદેવે બાળ્યાનું જણાવ્યું છે.

અરનાથચરિતમાં (૪/૪૮૬) બે ઓછા ૬૦ હજાર બાળ્યાનું લખ્યું છે.

**द्वयूनषष्टिसहस्राणि चक्रिपुत्रान् ददाह सः ॥**

અ.ચ. ૪/૩૨ માં વિનીતાનગરી નામસ્થાપન પ્રસંગે પ્રચલિત વાત કરતાં થોડો ફેરફાર છે તે આ પ્રમાણે - ઈન્દ્રે યુગલિયાઓને પાણી લેવા મોકલ્યા. અને પ્રભુને સિંહાસન પર બિરાજમાન કરી ઈન્દ્ર છુપાઈ જાય છે. યુગલિયા પાણી લઈને આવે છે. ચરણાભિષેક કરે છે.

### પં. શુભશીલગણીના ગ્રંથો

૧. વિક્રમાદિત્ય ચરિત્ર ર. સં. ૧૪૯૦
 સંપા. કનકરત્નસૂરિ, યુગદિવાકર ગ્રંથમાલા. મુંબઈ

૨. ભરતેશ્વર બાહુબલીવૃત્તિ (કથાકોષ) ર.સં. ૧૫૦૯
 સંપા. પ્રદ્યુમ્નસૂરિ મ.સા., ભદ્રંકર પ્રકાશન

૩. શત્રુંજયકલ્પવૃત્તિ ર.સં. ૧૫૧૮

૪. ભોજ પ્રબંધ

૫. પ્રભાવક કથા ર.સં. ૧૫૦૪

૬. શાલિવાહનચરિત્ર ર.સં. ૧૫૪૦

૭. પુણ્યધનનૃપકથા ર.સં. ૧૪૯૬

૮. જાવડકથા

૯. અરનાથ ચરિત્ર

૧૦. પંચશતીપ્રબોધ

૧૧. ભક્તામરસ્તોત્ર રહસ્ય

૧૨. અષ્ટકર્મ વિપાક

૧૩. પંચવર્ગસંગ્રહ નામમાલા

૧૪. ઉણાદિનામમાલા

અદ્યાવધિ અપ્રગટ આ અરનાથચરિત્ર ગ્રંથનું અધ્યયન કરી સહુ આત્મકલ્યાણ કરે.

॥ अर्हम् ॥ नमः सर्वज्ञाय ॥

# श्री - अरजिन - चरित्रम्

## प्रथमः सर्गः

येनाऽऽदौ पद्धतिर्धर्म-कर्मणोरवदर्शिता । स एव भगवान्**नाभि**-नन्दनो वः सुखं क्रियात् ॥१॥
सार्वभौमरमां रम्यां, त्यक्त्वा जीर्णतृणादिवत् । गृहीतं चरणं **शान्तिः**, स वोऽव्याद् भवभीतितः ॥२॥
यदुवंशेऽभवन्मुक्ता-फलवद् यः **शिवाङ्गजः** । स श्री**नेमि**जिनो दद्यात्, कल्याणं वो द्विधाऽचिरात् ॥३॥
यस्य नामस्मृतेर्यान्ति, विघ्नान्यद्यापि देहिनाम् । शेषाहिसेवितः **पार्श्वः**, सार्वः स वः शिवं क्रियात् ॥४॥
श्रीसिद्धार्थभवोऽपि श्री**सिद्धार्थ**जनको जिनः । **वीरो** विश्वेश्वरो विश्व-विश्ववन्द्योऽवताद् जगत् ॥५॥
श्रुत्वा किञ्चिद् गुरोरास्यात्, किञ्चिच्च शास्त्रवीक्षणात् । किञ्चित् स्वबुद्ध्यनुसारेण, नत्वाऽऽद्यार्हन्मुखान् जिनान् ॥६॥
प्रणम्य **पुण्डरीका**दीन्, गणनाथाँश्च भावतः । श्री**अरस्य** जिनस्याऽहं, करोमि चरितं ध्रुवम् ॥७॥ युग्मम् ॥
तथाहि—
असङ्ख्यद्वीपमध्यस्थो, लक्षयोजनसम्मितः । **जम्बूद्वीपा**भिधो द्वीपो, वृत्ताकारो विराजते ॥८॥
तस्य मध्ये सुवर्णश्री-सुमनश्रेणिसंश्रितः । भाति **मेरु**-गिरिर्लक्ष-योजनोच्चप्रमाणतः ॥९॥
यतः—
रज्जुमिए तिरिलोए **उद्धारद्धा**इ उदहि **समयमिआ** । दीवुदहि **जंबु**माई **सयंभुर**वणन्नवंता य ॥१०॥
सव्वब्भंतरओ ससि-वट्टो इगलक्खजोयणपमाणो । **जंबु**द्दीवो अडजोअणुच्चवयरमयजगइजुओ ॥११॥
लक्ख ति सोलस सहसा, दो सय सगवीसति कोस धणुहसयं।
अडवीसमूणचउदसअंगुल परिही सि गुणिअमिमं ॥१२॥
तस्य **मेरोर्गिरेः** पार्श्व-द्वये पूर्वाऽपराभिधे । क्षेत्रे **महाविदेहा**ख्ये, भासेते श्रीमनोहरे ॥१३॥
मध्ये **पूर्वविदेह**स्य, धन-धान्यादिशालिनः । भाति **सीता**नदी पञ्च-योजनानां शतं पृथुः ॥१४॥
तस्या एवोत्तरे कूले, **वत्साह्वो** विजयो वरः । नानाग्राम-पुरा-ऽऽरामाऽऽकररम्यो विराजते ॥१५॥
यतः—
पुव्वावर जलहिगया, सगवासांतरे छ वासहरा । जंमुत्तर वित्थिन्ना तन्नामा दाहिणा उ इमे ॥१६॥
भरहं १ हेमवयं २ हरिवास ३ विदेहाइ ४ रम्मयं ५ कमसो । हेरन्नव ६ एरवयं जंमुत्तरओ दु दु समाइं ॥१७॥
हिमव १ महहिमव २ निसहा ३, नीलो ४ रुप्पी ५ अ सिहरि ६ वासहरा ।
खित्ता दुगुणा य समा पुव्वो इअ, वेइवण जुत्ता ॥१८॥
पणसय छवीस छ कला [५२६ कला ६], भरहं १ दससय दुवन्न बार कला ।
हिमवो२ हेमवयं३पणहिअ, **इगवीस** सय पंच कला ॥१९॥

बायाल जोअण सया, दसुत्तरा दस कला महाहिमवो ४ । हरिवासं चुलसीई, सय इगवीसं कलावेगा ५ ॥२०॥
निसहो सोलस सहसा अडसय बायाल दुकल विक्खंभो ६ ।
तित्तीस सहस्स छ सय चुलसी-आ चउ कल विदेहं ॥२१॥
गंगा १ सिंधु २ तह रोहिअंस ३ रोहिअ ४ नई हरि हंता ५ ।
हरि ६ सीओआ ७ अह सग दाहिणओ अह सग उत्तरओ॥२२॥
सिआ १ नारिकंत २ नरकंत ३ रुप्पिकूला ४ सुवन्नकूला य ५। रन्नवइ ६ रन्न ७ दु दु नइ खित्तए हवइ वेअड्ढे ॥२३॥
क्षेत्रे महाविदेहे तु, द्वात्रिंशद् विजयाः स्मृताः । तावन्मिता अयोध्याश्च, कथिताः पूर्वसूरिभिः ॥२४॥
तथाहि—
कच्छ १ सुकच्छ २ महकच्छे ३, कच्छवया ४ वत्त ५ मंगलावत्ते ६ ।
पुक्खल ७ तह पुक्खलवइ ८, वच्छ १ सुवच्छे २ महावच्छे ३॥२५॥
वच्छावइ ४ रम्मे ५ रम्मए अ ६ रमणिज्ज ७ मंगलावइ अ ८ ।
पम्ह १ सुपम्ह २ महापम्ह ३ पम्हवइ ४ संख ५ कुमुअ अ ६ ॥२६ ॥
नलिणे ७, नलिणवइ ८, वप्पे १ सुवप्प २ महावप्प ३ वप्पवइ ४ वग्गू ५ ।
तत्तो सुवग्गु ६ गंधिल ७ गंधिलवइ ८, विजय ३२ अह नयरी ॥२७॥
खेमा १ तह खेमपुरा २, अरिट्ठ ३, रिट्ठवइ ४ खग्गि ५ मंजूसा ६ ।
ओसहिपुरि ७ पुंडरिगिणि ८, सुसीम १ कुंडल २ पराजिया य ३॥२८॥
सपहंकर ४ अंकावइ ५ पम्हवइ ६, सुहा य ७ रयणसवई अ ८ ।
आसुपुरी १ सीहपुरी २ महापुरी ३, चेव विजयपुरी ४ ॥२९॥
अवरावइ ५ अवर ६ असोअ ७, वीअसोआ य ८ विजय १ विजयंती २ ।
सजयति ३ अपराजिअ ४ चक्क ५, खग्गपुर ६ वब्भ ७ उज्झाय ८ ॥३०॥
सीआ १ सीओयाहिं २ दुहा कयं मेरु पुव्व १ अवरेण २ । पुव्वा १ ऽवरं २ विदेहं तहिं महनइ वासहरमज्झे ॥३१॥
**सुसीमायां** पुरि व्योम-**व्यापिनो श्रीजिनालयाः** । शोभन्ते रजनीकान्त-सूर्यकान्तमणीमयाः ॥३२॥
नारीवेणीषु बन्धोऽस्ति, न तु लोकेषु कुत्रचित् । कुट्टनं कणमूटेषु, जनेषु न कदाचन ॥३३॥
छेदोऽस्ति गडुरोगादौ, न प्रजासु कदाचन । दण्डं प्रासादशृङ्गेषु, दृश्यतेऽन्यत्र नो पुनः ॥३४॥
यस्यां प्रातः समुत्थाय, जना जिनेन्द्रसद्मसु । गत्वा नत्वा प्रभुं वर्यवारि-पुष्पैरपूजयन् ॥३५॥
स्नात्रोत्सवं वितन्वाना, गायन्तो मधुरध्वनिम् । ते पुण्यमर्जयन्ति स्म, कल्याणप्राप्तिहेतुकम् ॥३६॥ युग्मम् ॥
यतः—
**त्रैकाल्यं जिनपूजनं प्रतिदिनं, सङ्घस्य सन्माननं, स्वाध्यायो गुरुसेवनं च विधिना, दानं तथावश्यकम् ।**
**शक्त्या च व्रतपालनं वरतपो, ज्ञानस्य पाठस्तथा, सैष श्रावकपुङ्गवस्य कथितो, धर्मो जिनेन्द्रागमे ॥३७॥**
तस्यामेव **सुसीमायां**, पुरि स्वर्गपुरीश्रियाम् । जिष्णौ भूरीश्वराऽनेक-गुरुश्रीपतिभिः पुनः ॥३८॥
वैरिमातङ्गपञ्चास्यः, प्रतापजितभास्करः । न्यायाम्बुजवनादित्यः, सत्यानुकृतधर्मसूः ॥३९॥

धनुर्विद्याजिताशेष-वासवाङ्गजविक्रमः । रूपश्रीनिर्जितानङ्ग-रूपो विबुधसेवितः ॥४०॥
दानेन कर्णसङ्काशः, काशशुभ्रयशोभरः । **प्रजापाला**भिधो भूपः, शशास मेदिनीं नयात् ॥४१। ॥कुलकम्॥
यतः—
**दुष्टानां दमनं नयानुगमनं, स्वीयप्रजापालनं, नित्यं देव-महर्षिपादनमनं, षड्दर्शनीमाननम् ।**
**औचित्याचरणं परोपकरणं, त्यागं सभोगं श्रियाः, कुर्वाणो नृपतिः श्रिया निजपतिः, सत्येव नो मुच्यते ॥४२॥**
तस्याभूत् **पद्मिनी**- नाम्ना, पट्टराज्ञी प्रियंवदा । पुत्रोऽजनि जनानन्दकरः, **पद्मो**ऽभिधानतः ॥४३॥
यतः—
**पत्नी प्रेमवती सुतः सुविनयो, भ्राता गुणालङ्कृतः, स्निग्धो बन्धुजनः सखाऽतिचतुरो, नित्यं प्रसन्नः प्रभुः ।**
**निर्लोभोऽनुचरः सुबन्धुसुमुनिप्रायोपभोग्यं धनं, पुण्यानामुदयेन सन्ततमिदं, कस्याऽपि सम्पद्यते ॥४४॥**
मन्त्रीश्वरोऽभवत्तस्य, भूपस्य **बुद्धिसागरः** । मन्त्रिपुत्रोऽजनिष्टाऽथ, **सोमाह्वः** साम्यभाजनम् ॥४५॥
यतः—
चित्तज्ञः शीलसम्पन्नो, वाग्मी दक्षः प्रियंवदः । यथोक्तवादी स्मृतिमान्, मन्त्री स्यात् सप्तभिर्गुणैः ॥४६॥
पालयन् पृथिवीं पृथ्वीपतिः सुन्यायमार्गतः । रञ्जयामास निःशेष-प्रजा विरञ्चिवद् ध्रुवम् ॥४७॥
एकदा **धर्मघोषाह्वो**, गुरुः स्वक्रमरेणुभिः । पावयन् पृथिवीं तस्याः, पुर्याः पार्श्वं समीयिवान् ॥४८॥
श्रुत्वा गुर्वागमं बाह्यो-द्याने उद्यानपालनात् । ददद्दानं चचालाथ, नन्तुं गुरुपदद्वयम् ॥४९॥
गत्वोद्याने महीपाल-स्तिस्रः प्रदक्षिणाः क्रमात् । दत्त्वा नत्वा गुरोः पादौ, धर्मं श्रोतुमुपाविशत् ॥५०॥
यतः—
सचित्तदव्वमुज्झणमच्चित्तमणुज्झणं मणेगत्तं । इग-साडी-उत्तरासंगु, अंजली सिरसि जिणदिट्ठे ॥५१॥
[चै.वं.भा.गा २०]
इय पंचविहाभिगमो अहवा मुच्चंति रायचिण्हाइं । खग्गं छत्तोवाणह मउडं चमरे अ पंचमए ॥५२॥
[चै.वं.भा.गा. २१]

॥ जिनवन्दनं चैवम् ॥

गुरुवंदण-मह तिविहं, तं फिट्टा छोभ बारसावत्तं । सिरनमणाइसु पढमं, पुण्णखमासमण-दुगि बीअं ॥५३॥
[गु.वं.भा.गा. १]
जह दूओ रायाणं, नमिउं कज्जं निवेइउं पच्छा । वीसज्जिओ वि वंदिय, गच्छइ एमेव इत्थ दुगं ॥५४॥
[गु.वं.भा.गा. २]
तइयं तु छंदण-दुगे, तत्थमिहो आइमं सयलसंघे । बीयं तु दंसणीण य, पयट्ठियाणं च तइयं तु ॥५५॥
[गु.वं.भा.गा. ४]
**धनदो धनमिच्छूनां, कामदः काममिच्छताम् । धर्म एवाऽपवर्गस्य, पारम्पर्येण साधकः ॥५६॥**

**॥ इत्यादि धर्मोपदेशोऽत्र ॥**

दानादिसर्वधर्मेषु, भाव एव विशिष्यते । यतो भावं विना न स्यात्, कल्याणकमला किल ॥५७॥

राजाऽऽचष्ट कथं भावोऽभावादि ज्ञायते नृषु । **धर्मघोष**गुरुः प्राह,शृणुष्वाऽत्र कथानकम् ॥५८॥
तथाहि–
भावाऽभावपरीक्षार्थं, गच्छ **पद्मा**भिधे पुरे । तत्र **सोम-धन**श्रेष्ठि-सद्मनोः सत्वरं नृप ! ॥५९॥
तत्र तयोर्द्वयोः **सोम-धन**योर्मानसस्थितम् । भावाऽभावस्वरूपं तु, सम्यगेवाभिगम्यते ॥६०॥
ततः सम्यक्त्वमूलं तु, श्राद्धधर्मं शिवप्रदम् । लात्वा गुरुपदौ नत्वा, निजावासं नृपो ययौ ॥६१॥
कारयित्वाऽवधूतस्य, वेषं च मन्त्रिपुङ्गवम् । भूपतिश्चालयामास, सद्यः **पद्म**पुरं प्रति ॥६२॥
आदौ **धना**लयद्वारे, गत्वा द्वाःस्थं जगावदः । कुत्रास्ति साम्प्रतं श्रेष्ठी, **धनः** ? सोऽथोक्तवानिति ॥६३॥
किं कार्यं विद्यते तेऽत्र ?, वद प्राघूर्णकाधुना । सोऽवग् बुभुक्षितोऽथाऽह-मागामदनहेतवे ॥६४॥
यतः–
पंथसमा नत्थि जरा, खुहासमा वेअणा नत्थि । मरणसमं नत्थि भयं, दारिद्दसमो वयरीओ नत्थि ॥६५॥
द्वाःस्थः प्राह न कस्यापि, मत्स्वामी ददतेऽदनम् । किन्तु गालिं ददाति स्म, वदन् यथा तथा ध्रुवम् ॥६६॥
नकारमेव मत्स्वामी, पपाठ शास्त्रमध्यगम् । न जानाति दकारं तु, धनान्धलितमानसः ॥६७॥
यतः–
नाक्षराणि पठता किमपाठि प्रस्मृतः किमथवा पठितोऽपि । इत्थमर्थिजनसंशयदोलाखेलनं खलु चकार नकारः ॥६८॥
एवं पृच्छति मन्त्रीशे, **धनः** श्रेष्ठी समागतः । तस्यैवाभिमुखं गत्वा, मन्त्र्ययाचत भोजनम् ॥६९॥
**धनो**ऽवग् भक्षितं गेहं, सर्वं मे याचकैर्जनैः । काष्ठं यथा घुणैश्छेदं, छेदं च भक्ष्यते क्रमात् ॥७०॥
अर्थिनामग्रतः स्थातुं, शक्यते न क्षणं मया । विना न मरणं तेभ्य-श्छुटिर्मम निरीक्ष्यते ॥७१॥
मन्त्र्यवग् विधिना चैके, दातारो हि विनिर्मिताः । याचितारः पुनश्चैके, विहिता एव साम्प्रतम् ॥७२॥
ततो भावं विना श्रेष्ठी, प्राहेति मन्त्रिणं प्रति । यद्यागतोऽसि मे गेहे, पान्थ ! सम्प्रति तर्हि भोः ! ॥७३॥
आगच्छ सदने मे त्वं, जेमनं दीयते मया । दृश्यन्ते याचका लक्ष्मी-चरणा एव साम्प्रतम् ॥७४॥ ॥ युग्मम् ॥
ततो **धनेन** साकं स, व्रजन् पदे पदे क्रमात् । मणि-मुक्ताफलादीनां, पुञ्जान् ददर्श शैलभान् ॥७५॥
शालिमुख्यकणानां तु, मूटकानां सहस्रशः । कुतुपान् घृत-तैलानां, लक्षशो दृष्टवान् स च ॥७६॥
पट्टकूलादि वस्त्राणां, पोट्टलान् लक्षशः पृथून् । मन्त्री पदे पदेऽपश्य-दन्यवस्तु पुनर्बहु ॥७७॥
[1]अधौत्वा चरणौ श्रेष्ठी, मन्त्रिणा सह सत्वरम् । जेमितुं न्यविशद् गेहा-जिरे रूक्षान्नमेव तु ॥७८॥
कोद्रवान्नं यवान्नं च, स्तोकतैलसमन्वितम् । **धनो** जिजेम साकं स, मन्त्रिणा तेन सत्वरम् ॥७९॥
ताम्बूलस्थानके खण्डं, खदिरस्य मितं तदा । आद श्रेष्ठी समं तेन, मन्त्रिणा कृपणाग्रणीः ॥८०॥
ततस्तं मन्त्रिणं नीत्वा, सार्द्धं श्रेष्ठी **धन**स्तदा । हट्टे हट्टे भ्रमन् सायं, यावदुद्ग्राहिणीकृते ॥८१॥
आगतोऽथ गृहे श्रेष्ठी, रब्बां स्वच्छां स्वयं पिबन् । जे[2]मयामास स तं मन्त्रिपुङ्गवं भावनां विना ॥८२॥ युग्मम् ॥
श्रेष्ठिना शयने जीर्णे, दत्ते दूरे स मन्त्रिराट् । सुप्तो व्यचिन्तयच्चित्ते, चरित्रं श्रेष्ठिनस्तदा ॥८३॥
अहो ! सतीदृशे भूरि-विभवे ऽयं **धनः** पुनः । शक्नोति खादितुं नैव, दातुं चार्थिभ्य एव न ॥८४॥

---

१. प्रतौ. अप्रक्षाल्य पादौ. इति ॥ २. प्रतौ. पाययामास इति ॥

यतः—

सङ्ग्रहैकपरः प्राप, समुद्रोऽपि रसातलम् । दाता तु जलदं पश्य, भुवनोपरि गर्जति ॥८५॥

अस्ति जलं जलराशौ क्षारं, तत् किं विधीयते तेन ? । लघुरपि वरं स कूपो यत्रा-ऽऽकण्ठं जनः पिबति ॥८६॥

अतिसञ्चयकर्तॄणां, वित्तमन्यस्य कारणम् । अन्यैः सञ्चीयते यत्ना-न्मध्वन्यैः परिभुज्यते ॥८७॥

कदर्योपात्तवित्तानां, भोगो भाग्यवतां भवेत् । दन्ता दलन्ति कष्टेन, जिह्वा गिलति लीलया ॥८८॥

सिरिहरिअसमं एअं जह पडिकूलेण तेण रायाई । न कुणइ दाणाईअं, एवं विग्घेण जीवो वि ॥८९॥

द्वितीयेऽह्नि **धनः** प्राहा-न्यत्र प्राघूर्णक ! व्रज । मनागद्य मया भोज्यं, दास्यते भवतः पुनः ॥९०॥

तत उत्थाय मन्त्रीशः, **सोम**गेहे गतः क्रमात् । तत्र **सोमे**न सन्मान-दानं चक्रे विशेषतः ॥९१॥

**सोमो**ऽवग् भवता भोज्य-मद्याऽस्मत्सदने ध्रुवम् । ततो गच्छन् बलात् सोऽपि, स्थापितोऽदनहेतवे ॥९२॥

तदा ये ये समायाता, नरा लक्षमिताः क्रमात् । ते सर्वे स्थापितास्तेना-दराद् भोजनहेतवे ॥९३॥

ततः **सोमः** कृतस्नानः, परीतरुचिराम्बरः । देवान् प्रपूज्य सत्पुष्पै-रस्तवीत् स्तवनैर्नवैः ॥९४॥

वितीर्य शुद्धमाहारं, साधुभ्योऽथ सुभावतः । दीनदुःस्थाँश्च सम्मान्य, पुण्यं **सोमः** समर्जयत् ॥९५॥

अथ वर्यतराहारैः, श्रेष्ठी लक्षनरान्वितः । रैभाजनेषु बुभुजे, रुचिरादरपूर्वकम् ॥९६॥

कर्पूरवासिताम्भोभिः, **सोम** आचमनं ललौ । तैः सर्वैर्मानवैः सार्द्धं, ताम्बूलाद्यमभक्षयत् ॥९७॥

**सोमो**ऽथ चित्रशालाया-मुपविश्य सुधर्मिभिः । सार्द्धं धर्मादिवार्त्तां तु, विदधे धर्मधीस्तदा ॥९८॥

तिष्ठत्यह्ने घटीद्वन्द्वे, कृत्वा वैकालिकं पुनः । सायं प्रपूज्य सर्वज्ञं, धर्मौकसि स ईयिवान् ॥९९॥

लात्वा सामायिकं श्रेष्ठी, वन्दित्वाऽथ गुरुक्रमौ । एकचित्तः प्रतिक्रान्तिं, गुरुभिः सह चकृवान् ॥१००॥

यत उक्तं च—

अत्थपयं भावंतो उभओकालं कुणइ पडिक्कमणं । निअसत्तमगूहंतो, ठिओ निसन्नोविन्नो अ ॥१०१॥

पावारंभं पमुत्तूणं, गिह्वित्ता मुहपत्तीअं । वत्थ-कायविसुद्धीए, सीहो पडिक्कमणं करे ॥१०२॥

॥अनुयोगद्वारचूर्णौ ॥

अभ्येत्याथ गृहे स्मृत्वा, नमस्कारशतत्रयम् । सुप्तः प्रातः समुत्थाय, स्मरन् पञ्चनमस्कृतिम् ॥१०३॥

**सोमो** जिनालये गत्वा-ऽर्चित्वा नत्वा जिनेश्वरम् । गुरुपार्श्वे ययौ धर्मं, श्रोतुं सर्वज्ञभाषितम् ॥१०४॥ युग्मम् ॥

**धर्मोपदेशोऽत्र—**

पूजामाचरतां जगत्त्रयपतेः, सङ्घार्चनं कुर्वतां, तीर्थानामभिवन्दनं विदधतां, जैनं वचः शृण्वताम् ।

सद्दानं ददतां तपश्च चरतां, सत्त्वानुकम्पाकृतां, येषां यान्ति दिनानि जन्म सफलं, तेषां सुपुण्यात्मनाम् ॥१०५॥

धर्मं श्रुत्वा विधायाथ, प्रत्याख्यानं यथारुचि । कृत्वा मन्त्रियुतः स्वस्य, सदने समुपेयिवान् ॥१०६॥

स्नानं कृत्वा जिनं पूज-यित्वा नरसहस्रयुग् । वर्याहारैर्जिजेमाथ, **सोमो** दातृशिरोमणिः ॥१०७॥

निरीक्ष्य चरितं **सोम-धनयोः** श्रेष्ठिनोस्तदा । मन्त्रीश्वरस्ततोऽचालीत्, स्वकीयं नगरं प्रति ॥१०८॥

क्रमाच्चलन् स मन्त्रीशः, **सुसीमा**नगरे क्रमात् । आगमत् **सोम-धनयोः**, स्वरूपं मानसे स्मरन् ॥१०९॥

भावा-ऽभावौ ततः **सोम-धनयो**र्मन्त्रिपुङ्गवः । **प्रजापाल**नृपस्याग्रे, न्यवेदयदशेषतः ॥११०॥

ततः प्रभृति भूपालः, **प्रजापालः** स धीसखेः । सुभावतः सदा दान-धर्मं चापोषयद् ध्रुवम् ॥१११॥
यतः—
भावो धर्मस्य हृन्मित्रं, भावः कर्मेन्धनानलः । सुकृत्यान्ने घृतं भावो, भावो वेत्री शिवश्रियः ॥११२॥
भावात् सुकृतलेशोऽपि, नृणां सर्वार्थसिद्धिदः । भ्रष्टानां तु ततो नूनं, सर्वतो भ्रष्टता यतः ॥११३॥
जा दव्वे होइ मई, अहवा तरुणीसु रूववंतीसु । सा जइ जिणवरधम्मे, करयलमज्झट्ठिआ सिद्धी ॥११४॥
तक्कविहूणो विज्जो, लक्खणहीणो अ पंडिओ होइ । भावविहूणो धम्मो, तिन्नि वि नूणं हसिज्जंति ॥११५॥
तत्रान्यदा **गुणाह्वस्य**, श्रेष्ठिनस्तनयाः क्रमात् । चत्वारः **कुन्तलोऽशोको, भीमो शुभङ्करा**भिधः ॥११६॥
क्रमाद् बुधान्तिके पुत्रा-श्चत्वारः पाठिताः सुताः । धर्म-कर्मादिशास्त्राणि, ज्ञातारश्चाभवन् भृशम् ॥११७॥
यतः—
जायम्मि जीवलोए, दो चेव नरेण सिक्खिअव्वाइं । कम्मेण जेण जीवइ, जेण मओ सुग्गइं जाइ ॥११८॥
**शुभङ्करो** वराहारं गृह्णन् चारुतराम्बरः । यथेष्टं ददते दानमर्थिभ्यः स्वकवाञ्छया ॥११९॥
यतः—
दानं भोगो नाशस्तिस्त्रो, गतयो भवन्ति वित्तस्य । यो न ददाति न भुङ्क्ते, तस्य तृतीया गतिर्भवति ॥१२०॥
त्रयोऽपि सोदरा वृद्धा, दानिनं लघुसोदरं । निरीक्ष्यैर्ष्यां वितन्वानाः, पितुः पार्श्वे जगुः सदा ॥१२१॥
असौ **शुभङ्करो** दानं, ददद्देवाऽऽदराद् बहु । स्तोककालाद् गृहं रिक्तं, विभवेन करिष्यति ॥१२२॥
यतः—
इक्षुक्षेत्रं वंशजाली-कदली-विषपादपाः । फले जाते विनश्यन्ति, दुष्पुत्रेण कुलं यथा ॥१२३॥
पिता प्राह भवद्भिर्न, जल्पितव्यमिति ध्रुवम् । मया शनैः शनैः प्रोक्तो, दानादेष निषेत्स्यते ॥१२४॥
यतः—
शनैर्मार्गः शनैः कन्था, प्रासादस्य कृतिः शनैः । शनैर्भेदो जलैर्भूमेः, कृषिपाकः शनैः शनैः ॥१२५॥
**शुभङ्करो**ऽन्यदा प्रौढं, प्रासादं नगरान्तरे । पतितं वीक्ष्य पित्रन्ते, प्राहेति विहिताञ्जलिः ॥१२६॥
प्रासादस्याऽर्हतोऽस्यैव, पतितस्योद्धृतिं द्रुतम् । कर्तुमिच्छाऽस्ति मे तेना-ऽनुज्ञा तात ! प्रदीयताम् ॥१२७॥
यतः—
उद्धारस्य समं पुण्यं, विद्यतेऽत्र न कुत्रचित् । यतः कीर्त्तिकृते नव्यः, प्रासादः कार्यते जनैः ॥१२८॥
प्राप्याऽनुज्ञां पितुर्याव-दुत्तस्थौ स **शुभङ्करः** । तावदन्ये सुताः प्रोचु-स्तातं प्रत्यरुणेक्षणाः ॥१२९॥
दानी ह्येष **शुभङ्करो,** व्ययन् वित्तं यथारुचि । करिष्यति गृहं शून्यं, विभवेन न संशयः ॥१३०॥
अतोऽधुना द्रुतं लक्ष्मीं, विभज्य भवता पितः! । पृथग् विधीयतां गेहात्, **शुभङ्करः** सहोदरः ॥१३१॥
नो चेद् वयं पृथग् सद्यो, भविष्यामस्त्रयो ध्रुवम् । एष **शुभङ्करः** स्वस्य, मध्ये संस्थाप्यतां पुनः ॥१३२॥
धर्मिष्ठं दानिनं पुत्रं, लघुं मत्वा निजान्तिके । स्थापयित्वा सुतानन्यान्, पृथग् चक्रे धनार्पणात् ॥१३३॥
यतः—
**वृक्षं क्षीणफलं त्यजन्ति विहगाः, शुष्कं सरः सारसाः, पुष्पं पर्युषितं त्यजन्ति मधुपा, भ्रष्टं नृपं सेवकाः।**
**निर्द्रव्यं पुरुषं त्यजन्ति गणिका, दग्धं वनान्तं मृगाः, सर्वः स्वार्थवशाज्जनोऽभिरमते, न कस्य को वल्लभः ॥१३४॥**

ततः **शुभङ्करो**ऽन्येद्युर्लक्ष्मीमर्जयितुं निशि । एकाकी चलितो गेहाद्, विदेशं प्रति धर्मधीः ॥१३५॥
यतः—
दीसइ विविहच्छरियं, जाणिज्जइ सुजण-दुज्जणसहावो । विण्णाणं च कलिज्जइ, हिंडिज्जइ तेण पुहवीए ॥१३६॥
यो न निर्गत्य निःशेषामवलोकयति मेदिनीम् । अनेकाश्चर्यसम्पूर्णां, स नरः कूपदर्दुरः ॥१३७॥
अन्येद्युश्चलतस्तस्य, मार्गे सिद्धपुमानथ । मिलितोऽभूत्ततः प्रीति-स्तयोर्मिथो मृदूक्तिभिः ॥१३८॥
यतः—
एको ध्यानमुभौ पाठं, त्रिभिर्गीतं चतुष्पथम् । पञ्च सप्त कृषिं कुर्यात्, सङ्ग्रामं बहुभिर्जनैः ॥१३९॥
वाणी रसवती यस्य, भार्या गुणवती सती । लक्ष्मीर्दानवती यस्य, सफलं तस्य जीवितम् ॥१४०॥
मार्गे यातोस्तयोर्दाव-वह्निर्ज्वालाकरालितः । तथागादभितो दिक्षु, चतसृष्वनिलेरितः ॥१४१॥
यथा तौ चलितुं नेशौ, स्वमृत्युकृतनिश्चयौ । तदैवोत्पाट्य केनापि, मुक्तावन्यत्र निर्भये ॥१४२॥
यतः—
वने रणे शत्रुजलाऽग्निमध्ये, महार्णवे पर्वतमस्तके वा । सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि ।१४३।
गत्वाऽथ रोहणे लक्ष्मी-मर्जयित्वा **शुभङ्करः** । अर्थिभ्यः प्रददत् धर्मं, जैनं वितनुते सदा ॥१४४॥
यतः—
धम्मो मंगलमउलं, ओसहमूलं च सव्वदुक्खाणं । धम्मो बलं च विउलं, धम्मो ताणं च सरणं च ॥१४५॥
अथाध्वनि चलन्तौ तौ, महाटव्यां निपेततुः । **शुभङ्करस्य** लग्ना तृट्, युक्ता बुभुक्षया भृशम् ॥१४६॥
क्षुधातृड्बाधितोऽत्यन्तं, **शुभङ्करो** वणिक्सुतः । न्यपपत विगतप्राण-प्रायः पादपसन्निधौ ॥१४७॥
तदा तत्र मरुद्गेहं, कृत्वा भोज्यादिपूरितम् । पुमानेत्य जगौ सद्य, उत्तिष्ठाम्बु पिब द्रुतम् ॥१४८॥
यथाभिलषिताहार-माहारय पुमान्निह । तव पुण्यात्कृतात्पूर्वा-त्समायातं विलोकय ॥१४९॥
उत्थितः सुहृदं तं चाऽदृष्ट्वा-पिबति नाम्बु सः । ततस्तादृक्सुहृत्तुल्यो, देवो जातो वृषोदयात् ॥१५०॥
ततः सुहृद्युतः सोऽपि, तस्मिन् धवलमन्दिरे । उपविष्टोऽमरीभिस्त-दानीतं लातवान् पयः ॥१५१॥
प्रक्षाल्य वदनांह्रीश्च, मित्रयुक् स **शुभङ्करः** । पपौ नीरं ततः स्वस्थो, बभूवाऽनघमानसः ॥१५२॥
स्थालकच्चोलकाद्येषु[१], भाजनेषु च चारुषु । समेतेष्वबलाहस्तै-र्जेमतुस्तौ यथारुचि ॥१५३॥
विसर्जिते गृहे तस्मिन्नदृष्ट्वा सुहृदं पुनः । दध्यौ **शुभङ्करः** केन, चक्रेऽधुनेन्द्रजालिका ? ॥१५४॥
तदाऽकस्मात् समागत्य, स्फुरद्भूषणयुक्सुरः । लक्षमूल्यान् मणीन् भूरीन्, **शुभङ्कराय** दत्तवान् ॥१५५॥
**शुभङ्करो** जगौ केन, हेतुना मणयो ह्यमी । ददिरे भवतेदानीं ? ततः स निर्जरोऽगदत् ॥१५६॥
**सुसीमा**नगरे पूर्वमिभ्योऽजनि **धना**भिधः । स चान्यदा गुरूपान्ते, धर्ममेवं न्यशामयत् ॥१५७॥
यः कारयति सर्वज्ञसदनं स्वधनव्ययात् । स स्वर्गादिश्रियं भुक्त्वा, मुक्तिसातं समश्नुते ॥१५८॥

---
१. पात्रम् ।

यतः—

प्रासादः प्रतिमा यात्रा, प्रतिष्ठा च प्रभावना । अमार्युद्घोषणादीनि, महापुण्यानि देहिनाम् ॥१५९॥
श्रुत्वेति श्रीगुरूपान्ते, सर्वज्ञसदनं महत् । कारयित्वा जिनेन्द्रस्य, बिम्बं चातिष्ठिपत् क्रमात् ॥१६०॥
तस्याऽर्हतोऽर्चनां कृत्वा, पुष्पैः स पुण्यवान् धनी । जेमति स्म ततो मृत्वा, सोऽहं देवोऽभवं क्रमात् ॥१६१॥
क्रमाद्भूरिषु वर्षेषु, गतेषु तं जिनालयम् । पतितं वीक्ष्य ते जातो-द्धारे धीः साम्प्रतं दृढम् ॥१६२॥
मयाऽवधिविदा ज्ञात्वा, जिनागारोद्धृतौ मतिम् । तवैव साम्प्रतं कर्तु-मुपकारं समागमम् ॥१६३॥
मार्गे ते गच्छतः सिद्ध-पुमान् भूत्वाऽहकं पुनः । मिलितश्चोपकारं च, विधातुं ते वृषोदयात् ॥१६४॥

यतः—

**राज्यं सुसम्पदो भोगाः, कुले जन्म सुरूपता । पाण्डित्यमायुरारोग्यं, धर्मस्यैतत् फलं विदुः ॥१६५॥**

ततो मया दवाग्न्याद्यु-पसर्गा दूरतः कृताः । ददे च भोजनाद्यं ते, वरावासादिनिर्मितेः ॥१६६॥
गच्छ स्वच्छ ! निजावासं, जिनौकस्तत्समुद्धर । विघ्ने सत्यहकं चित्ते, स्मरणीयस्त्वया सदा ॥१६७॥
ततः स स्वपुरेऽभ्येत्य, ददद्दानं यथेप्सितम् । अर्हत्सद्मोद्धृतिं कर्तुं, प्रववृते धनं व्ययन् ॥१६८॥
ददानं विभवं भूरि, सदा **शुभङ्करं** जने । व्ययन्तं द्रविणं चापि, प्रासादस्योद्धृतौ पुनः ॥१६९॥
दर्शं दर्शं जनाः कीर्त्तिं, कुर्वते सादरं द्रुतम् । यतो धर्मादिकृत्येभ्यः, कीर्त्तिः सर्वत्र जायते ॥१७०॥युग्मम् ॥
**शुभङ्करस्य** सर्वत्र, देशेषु प्रसरद्यशः । ज्ञात्वा ते सोदरा द्वेषं, तन्वन्ति स्म **शुभङ्करे** ॥१७१॥
तदा कैश्चित् खलैः प्रोक्तमेवं भूमिपतेः पुरः । भवत्पूर्वजभाण्डारो, यो न्यस्तः पूर्वजैः क्षितौ ॥१७२॥
स एव चटितो हस्ते, **शुभङ्करस्य** निश्चितम् । ततोऽसौ व्ययति स्मैवं, यथेच्छं विभवं घनम् ॥१७३॥युग्मम् ॥
आकार्याऽथ महीपालो, जगौ **शुभङ्करं** प्रति । अस्मत्पूर्वजसम्बन्धी, कोशस्ते चटितोऽस्ति यः ॥१७४॥
स एव दीयतां मह्य-मानीय सदनात् त्वया । नो चेद् विधास्यते दण्ड-श्चौरस्य तव सत्वरम् ॥१७५॥
निर्जरार्पणवृत्तान्ते, प्रोक्ते **शुभङ्करेण** तु । न मेने नृपतिः कोशं, ममार्ग च पुनः पुनः ॥१७६॥
दध्यौ **शुभङ्करो** धर्मे, मया धनं व्ययिष्यते । नृपाय यदि दीयेत, तदा पापाय जायते ॥१७७॥
एवं ध्यायन् यदा नादात्, स्वं[१] भूपाय **शुभङ्करः** । तदा रुष्टो नृपश्चौर-दण्डं तस्यादिशन् नरान् ॥१७८॥
नृपादेशं समासाद्य, क्रुद्धा नृपतिसेवकाः । शूलाक्षेपकृते चेलुः, **शुभङ्करस्य** सत्वरम् ॥१७९॥
नीत्वा **शुभङ्करं** यष्टि-मुष्टिभिर्नृपसेवकाः । ताडयन्तोऽचलन् भूप-मार्गे यमसहोदराः ॥१८०॥
शूलाक्षेपकृते यावत्, **शुभङ्करं** नृपानुगाः । निन्युः पुराद् बहिर्बद्ध्वा, **गौरी**पतिनिकेतने ॥१८१॥
तावत् स निर्जरोऽभ्येत्य, शिलां पुर्या मितां पृथुम् । विकुर्व्याऽवस्थितः पुर्या, ऊर्ध्वं करालरूपभृत् ॥१८२॥
भापयन् जनतां देवो, जगाविति जनान् प्रति । अनया शिलया हन्मि, नृपादिनिखिलाञ्जनान् ॥१८३॥
श्रुत्वेति निखिलो भूप-मुख्यो लोको भयाकुलः । चक्रे शान्त्यादिकृत्यानि, पुररक्षाकृते तदा ॥१८४॥
दृष्ट्वा नृपः शिलां स्फारां, संहारं चात्मनः पुनः । व्याकुलोऽचीकरत् शान्ति-पौष्टिकादिक्रियां भृशम् ॥१८५॥
प्रत्यक्षीभूय देवः स, जगौ भूप ! दुराशय ! । **शुभङ्करस्य** किं विघ्नः, कार्यते सत्यवादिनः ॥१८६॥

---

१. धनम् ॥

मद्दत्तैर्मणिभिर्धर्म-कृत्यानि कुरुते स्म सः । त्वमेवं कुरुषे दण्डं, तस्य किं नास्ति ते भयम् ? ॥१८७॥

मया पूर्वभवेऽकारि, यत्सर्वज्ञनिकेतनम् । तस्योद्धारं करोत्येषो-ऽधुना **शुभङ्करो** धनी ॥१८८॥

ततः **शुभङ्करं** बन्धान्मोचयित्वा नरेश्वरः । सन्मानदानतश्चक्रे, गजारूढं त्वरात्तदा ॥१८९॥

**शुभङ्करो** गजारूढो, ददद्दानमनर्गलम् । यदाऽचलन्महीपाल-कृतोत्सवो गृहं प्रति ॥१९०॥

तदा संहृत्य गीर्वाणः, शिलां तां नृपवर्त्मनि । समेत्य चानमत् पादौ, **शुभङ्करस्य** भक्तितः ॥१९१॥

उक्तं तेन सुरेणैवं, नृपतेरग्रतस्तदा । करिष्यत्यशुभं योऽस्य, तस्मै शिक्षा प्रदास्यते ॥१९२॥

जिनागारशतं त्वं तु, यदि कारय सत्वरम् । लोका अपि जिनावासान्, कारयन्ति बहून् पुनः ॥१९३॥

तदा ते कुशलं पौर-जनानां च प्रजापते ! । पुण्यं प्रजायते स्वर्ग-मुक्तिशर्मप्रदायकम् ॥१९४॥

अङ्गीकृत्य सुरप्रोक्तं, **प्रजापालो** नरेश्वरः । सविशेषं व्यधाद् भक्तिं, **शुभङ्करे** वणिक्सुते ॥१९५॥

ततो राजा जगावस्य, **शुभङ्करस्य** यो जनः । करिष्यति च विघ्नानि, तस्य दण्डः करिष्यते ॥१९६॥

**शुभङ्करे** निजे गेहे, गते सति स निर्जरः । दत्त्वा पुनर्मणीन् भूरीन्, स्वयं स्थानकमीयिवान् ॥१९७॥

**शुभङ्करः** सुरोक्तस्य, प्रासादस्योद्धृतिं पुनः । कारयन् कोटिशो द्रव्य-मव्ययद् वरभावतः ॥१९८॥

राजाऽपि शतशः सार्व-प्रासादानद्रिसोदरान् । अचीकरत् ततोऽन्योऽपि, जनव्रजो जिनालयान् ॥१९९॥

निःस्वीभूताः क्रमात् सर्वे, सोदराः कर्मयोगतः । **शुभङ्करस्य** कुर्वन्ति, सेवां धनादिहेतवे ॥२००॥

यतः—

**विद्यावृद्धास्तपोवृद्धा, ये च वृद्धा बहुश्रुताः । सर्वे ते धनवृद्धस्य, द्वारे तिष्ठन्ति किङ्कराः ॥२०१॥**

यस्यास्ति वित्तं स नरः कुलीनः, स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च माननीयः, सर्वे गुणाः काञ्चनमाश्रयन्ति ॥२०२॥

तस्मिन् जिनालये सार्व-पूजां वितन्वतः सतः । **शुभङ्करस्य** सञ्जातं, केवलज्ञानमन्यदा ॥२०३॥

ततः प्रबोध्य भूयिष्ठ-जनान् भव्यान् महीतले । आयुःक्षये ययौ मुक्तिं, **शुभङ्करो** यतीश्वरः ॥२०४॥

**प्रजापाल**महीशस्य, पञ्च पत्न्योऽभवन् क्रमात् । **श्रीमती-धीमती-लक्ष्मी-रमा-रामा**ऽभिधा वराः ॥२०५॥

**श्रीमत्याः** पट्टराज्ञ्यास्तु, पञ्चाऽभवन् सुताः क्रमात् । **अनङ्गमञ्जरी** नाम्ना, पुत्री चाभून्मनोहरा ॥२०६॥

वर्धमाना क्रमाद् धर्म-कर्मशास्त्राणि भूरिशः । पाठिता पण्डितोपान्ते, भूपेना**ऽनङ्गमञ्जरी** ॥२०७॥

राजाऽथ वीक्षते प्रेष्य, सेवकानन्यनीवृति । सुतायोग्यं वरं वर्य-रूपं सौभाग्यशालिनम् ॥२०८॥

इत**श्चन्द्रपुरे चन्द्र**-भूपस्य **श्री-रमे** प्रिये । अभूतां द्वे मिथः प्रीति-परे लसत्तनुच्छवी ॥२०९॥

प्रथमायाः सुतो **वीरभद्र**नामाऽभवद् वरः । द्वितीयस्याः सुतः **शूर-सेनाह्वो**ऽजनि सद्वपुः ॥२१०॥

**वीरभद्रो** गुरोः पार्श्वे, धर्मं श्रुत्वा जिनोदितम् । सदा गणयते भावान्नमस्कारशतत्रयीम् ॥२११॥

यतः—

जिणसासणस्स सारो, चउदसपुव्वाण जो समुद्धारो । जस्स मणे नमुक्कारो, संसारो तस्स किं कुणइ ? ॥२१२॥

अन्यदा नृपते रत्न-कम्बलं **सूरनैगमः** । उष्णं शीतऋतावुष्ण-काले शीतं प्रदत्तवान् ॥२१३॥

राज्ञाऽथ **वीरभद्राय**, सूनवे कम्बलं ददे । ध्यातवान् **वीरभद्रो**ऽथ, यतये दास्यते मया ॥२१४॥

तपोनिधियतीशाय, तत्राऽऽयाताय भूपभूः । व्यहारयत् सुभावेन, रत्नकम्बलमन्यदा ॥२१५॥

यतः—

वसही-सयणाऽऽसण-भत्त-पाण-भेसज्ज-वत्थ-पत्ताइं । जइ वि न पज्जत्तधणो, थोवावि हु थोवयं देइ ॥२१६॥

इतश्च सूत्रकृत् सिद्ध-विद्यो वने विलोकयन् । षण्मासान्ते वरं काष्ठं, स्वेष्टं सम्प्राप्तवान् क्रमात् ॥२१७॥

कलया तेन काष्ठेन, घोटकं व्योमगामिनम् । सिद्धविद्यो विधायाथ, भूमिपालाय दत्तवान् ॥२१८॥

तदाऽश्वं व्योमगं काष्ठ-मयं दृष्ट्वा नृपान्तिके । याचते **वीरभद्रो**ऽथ, विनयेन कृताञ्जलिः ॥२१९॥

विनयाद्रञ्जितो राजा, **वीरभद्राय** सूनवे । प्रसद्य दत्तवान् व्योमगामिनं घोटकं तकम् ॥२२०॥

यतः—

विनयं राजपुत्रेभ्यः, पण्डितेभ्यः सुभाषितम् । अनृतं द्यूतकारेभ्यः, स्त्रीभ्यः शिक्षेत कैतवम् ॥२२१॥

जह जच्चवाहलाणं, अस्साणं जणवए सुजायाणं । सयमेव खलिणगहणं, अहवा वि बलाभिओगेणं ॥२२२॥

पुरिसज्जाए वि तहा विणीय विणयम्मि नत्थि अभिओगो । सेसम्मि अभिओगो ऊण वयजाए जहा आसे ॥२२३॥

अन्यदा **रमया** राज्ञ्या, याचिते रत्नकम्बले । भूपोऽप्राक्षीत् सुतस्याग्रे, वीक्ष्यते रत्नकम्बलः ॥२२४॥

कुमारोऽवग् मया दत्तो, यतये रत्नकम्बलः । ततो **रमा**ऽऽह भूपाग्रे, कूटमेष प्रजल्पति ॥२२५॥

न दत्तः कम्बलो माम-कीनाय सूनवे त्वया । अस्मायसत्यवादाय, किं व्यतारि नरेश्वर ! ? ॥२२६॥

खगामितुरगारूढं, कुमारं यान्तमम्बरे । **रमा** वीक्ष्य नृपस्याग्रे, प्राहाऽश्वोऽस्य भवेत् कुतः ? ॥२२७॥

घोटकप्राप्तिवृत्तान्ते, कथिते मेदिनीभुजा । राज्ञ्याह भवतः पार्श्वे, ईदृक्षो युज्यते हरिः ॥२२८॥

यतः—

**वाजि-वारण-लोहानां, काष्ठ-पाषाण-वाससाम् । नारी-पुरुष-तोयाना-मन्तरं विद्यते महत् ॥२२९॥**

वर्यवाजि-गजादीनां, वस्तूनां सङ्ग्रहः खलु । युज्यते मेदिनीशस्य, सदनेऽन्यस्य न कर्हिचित् ॥२३०॥

वर्धमानः सुतो ह्येष, ईदृक्षतुरगान्वितः । हत्वा त्वां राज्यमह्नाय[१], भवदीयं ग्रहीष्यति ॥२३१॥

पत्न्यैवं प्रेरितो राजा-ऽऽचष्टेति नन्दनाग्रतः । खगामी घोटको मह्यं, दीयतां भवताऽधुना ॥२३२॥

कुमारो ध्यातवान् राजा, नैव जल्पति कर्हिचित् । सपत्न्या **रमया** मात्रा, प्रेरितश्चेति जल्पति ॥२३३॥

यतः—

हत्थी दम्मइ संवच्छरेण, मासेण दम्मई तुरओ । मिहिलाए किर पुरिसो, दम्मइ पक्खेण दिवसेण ॥२३४॥

कुमारो ध्यातवानत्र, स्थितिर्वर्या न मेऽधुना । तेनाऽतो गम्यते दूर-देशे कुत्रापि साम्प्रतम् ॥२३५॥

एवं विमृश्य यामिन्यां, **वीरभद्रो**ऽसिसंयुतः । काष्ठघोटकमारूढोऽचालीद् व्योम्नि खगामिवत् ॥२३६॥

पश्यन् ग्रामाकरादीनि, स्थानकानि पदे पदे । **वीरभद्रो** महाटव्यां, **भद्रा**नद्यास्तटे ययौ ॥२३७॥

नद्यां यावत् पयो **वीर-भद्रः** पिबति शीतलम् । तत्कूलं तावताऽकस्माद्, ध्रसित्वा पतितं द्रुतम् ॥२३८॥

तत्र रत्ननिधिं प्रादु-र्भूतं वीक्ष्य नृपाङ्गजः । दध्यौ 'वसुन्धरा रत्न-गर्भा' सत्यं प्रगीयते ॥२३९॥

---

१. शीघ्रम् ॥

यतः—

पदे पदे निधानानि, योजने रसकूपिका । पुण्यहीना न पश्यन्ति, बहुरत्ना वसुन्धरा ॥२४०॥

रत्नानि तानि भूपाल-पुत्र आदाय सत्वरम् । जगाम **कुण्डला**पुर्यां, तुल्यायां स्वःपुरीश्रिया ॥२४१॥

विक्रीय तत्र रत्नानि, कतिचिद् विभवं बहुम् । याचकेभ्यो ददद् दानं, दानिमुख्योऽभवत् स च ॥२४२॥

ततो गच्छन् कुमारः स, **सुसीमाया** बहिः क्रमात् । गत्वा विलोकते स्थाने, स्थाने लक्ष्मीं बहुं ध्रुवम् ॥२४३॥

**प्रजापाल**नरेन्द्रस्य, तनया**ऽनङ्गमञ्जरी** । गवाक्षस्थाऽन्यदाऽपश्यद्, **वीरभद्रं** नृपाङ्गजम् ॥२४४॥

**वीरभद्रेण** भूपाल-पुत्री यदा निरीक्षिता । तदा तया हृदि न्यस्तो, हस्तस्तेन करोऽपि च ॥२४५॥

यतः—

रागी बध्नाति कर्माणि, वीतरागो विमुच्यते । जना जिनोपदेशेन, सङ्क्षेपाद्बन्धमोक्षयोः ॥२४६॥

नान्यः कुतनयादाधि-र्व्याधिर्नान्यः क्षयागमात् । नान्यः सेवकतो दुःखी, नान्यः कामुकतोऽन्धलः ॥२४७॥

ततः क्षणात्तया हस्तोऽञ्जनलिप्तः प्रदर्शितः । कुमारो ज्ञातवान् रात्रावाकारयति मामियम् ॥२४८॥

कुमारोऽथ निशीथिन्यां, गत्वा वातायने रहः । गान्धर्वोद्वाहतो राज-कन्यामङ्गीचकार सः ॥२४९॥

कुमारीचेष्टितं धात्री, ज्ञात्वा राज्ञ्यग्रतोऽगदत् । राज्ञ्याऽपि भूपतेरग्रे, कुमारीविहितं जगे ॥२५०॥

पुत्र्या उपरि भूपालो, रुष्टस्तं भूपनन्दनम् । धृत्वा निजानुगैः शूला-क्षेपायाऽथ समादिशत् ॥२५१॥

**वीरभद्र**स्ततो धृत्वा, पुर्या बहिर्नृपानुगैः । नीतः प्रेतवने शूला-क्षेपाय नृपवर्त्मनि ॥२५२॥

शूलाया उपरि क्ष्मापा-नुगा निर्दयमानसाः । **वीरभद्रं** रयाद्यावत्, क्षिपन्ति यमसोदराः ॥२५३॥

वञ्चयित्वाऽथ भूपाला-नुगांस्तावद्वटं क्रमात् । नीत्वा काष्ठाश्वमारूढो, **वीरभद्रो**ऽम्बरेऽचलत् ॥२५४॥

पतिस्वरूपमाकर्ण्य, रुदन्ती करुणस्वरम् । कुट्टयन्ती च हृद् राज-नन्दिनी न्यपतत् क्षितौ ॥२५५॥

इतोऽकस्मात् समागत्य, **वीरभद्रो** नभस्तलात् । भूपे पश्यति तां पत्नीं, नीत्वाऽचालीन्नभोऽध्वनि ॥२५६॥

राजा जगावरे पुत्रि !, दुश्चरित्रविधायिनि ! । कथं त्वमभवो दुष्टे !, मम वंशकलङ्ककृत् ? ॥२५७॥

रे ते नर ! यमो रुष्टो, मत्पुत्र्या हरणे मतिम् । ददौ तेनाऽचिरान्मृत्यु-सदने यास्यसि द्रुतम् ॥२५८॥

यदि ते जीविते वाञ्छा, विद्यते पुरुषाऽधुना । तदा मन्नन्दिनीं मुञ्च, कुरु सेवां मम ध्रुवम् ॥२५९॥

नरोऽवग् मानवैर्भूपैः, स्वकशक्त्यनुसारतः । जल्पनीयं विमृश्यैव, वाञ्छद्भिरात्मनो हितम् ॥२६०॥

यतः—

सहसा विहितं कार्यमनर्थाय प्रजायते । विमृश्य विहितं कार्यं, हिताय भवति ध्रुवम् ॥२६१॥

एवं प्रोच्याऽचलद्राज-जामाता गेहिनीसखः । अब्धिमध्यस्थिते द्वीपे, ययौ प्रौढजिनालये ॥२६२॥

तत्र श्रीमज्जिनं नत्वा, पूजयित्वा सुमैर्वरैः । भावपूजां स्तवैः स्फारै-र्जिनेन्द्रस्य व्यधादिति ॥२६३॥

**॥ अत्र पूजास्तवादिविस्तरः ॥**

प्रासादपार्श्वगोत्तारमण्डपे गेहिनीसखः । **वीरभद्रः** क्षणं धर्म-वार्तां कृत्वा सुखं स्थितः ॥२६४॥

**वीरभद्रे**ऽथ सुप्ते सा, दध्याविति प्रिया तदा । नास्ति नः शम्बलं किञ्चित्, विस्मृतं भूषणादि च ॥२६५॥

यावज्जागर्ति भर्ताऽयं, तावद् गत्वा पितुर्गृहे । आनयिष्याम्यहं सर्वा-भरणानि च शम्बलम् ॥२६६॥

ध्यात्वेति काष्ठतुरग-मारूढाऽ**नङ्गमञ्जरी** । द्रुतं ययौ निजावास-वातायनान्तिके किल ॥२६७॥
मुक्त्वा वातायनोपान्ते, तार्क्ष्यं कर्षितकीलिकम् । भूषणादि त्वराल्लातुं, मध्येगेहं समागता ॥२६८॥
यावद् विभूषणादीनि, लात्वा वातायनान्तिके । आगात्तावद्धृतं तार्क्ष्यं, ज्ञात्वेति व्यलपद् भृशम् ॥२६९॥
अविमृश्य पतिं तत्र, मुक्त्वाऽत्राऽहं समागमम् । मया च मूढया तार्क्ष्यः, कीलितो विदधे न हि ॥२७०॥
यदि भूर्विवरं दत्ते, तदा तत्र विशाम्यहम् । यथा तथा करिष्येऽह-मात्मघातं च पापिनी ॥२७१॥
तस्या विलापमाकर्ण्य, धात्री तत्राऽऽगता सती । पप्रच्छ पुत्रि ! किन्त्वेवं, विलापं कुरुषे भृशम् ॥२७२॥
ततः सा पतिसम्बन्धं, काष्ठाश्वगमनान्तकम् । प्रोच्य हाऽश्वं विना कान्तः, कथं भावी मयाऽपि च ॥२७३॥
कुर्वतीमात्मनो हत्यां, स्वयं चाऽ**नङ्गमञ्जरीम्** । धृत्वा धात्री शयेना[1]ऽऽह, किं मुधा म्रियतेऽधुना ॥२७४॥
पुत्रीं समागतां श्रुत्वा, जननी-जनकौ द्रुतम् । तत्राऽऽयातौ सुताकृत्यं, जज्ञतुर्जल्पतुस्त्विति ॥२७५॥
पुत्रि ! त्वया स्वयं कान्तो-ऽङ्गीकृतो गमितः पुनः । अतः किं क्रियते खेद ?, आत्महत्या पुनः किमु ?॥२७६॥
यतः—
रज्जुग्गह-विसभक्खण-जलजलण-पवेस तण्हछुह दुहओ । गिरिसिरपडणाउ मया सुहभावा हुंति वंतरिआ ॥२७७॥
अनालोच्य द्रुतं कार्यं, कृतं दुःखाय जायते । आलोच्य शनकैः कार्यं, कृतं भवति शर्मणे ॥२७८॥
तेनाऽत्राऽष्ट दिनांस्तिष्ठ, समेष्यति पतिस्तव । स्मर पञ्चनमस्कार-लक्षमेकं स्थिरात्मना ॥२७९॥
स्थिरीकृत्येति तां माता-पितरौ स्वालये गतौ । जगाम धात्र्यपि स्वस्य, स्थानके स्वस्थिताशया ॥२८०॥
गते दिनत्रये धात्री, प्रेषिता मेदिनीभुजा । गत्वा **चानङ्गमञ्जर्याः**, पार्श्वे जगाविति स्फुटम् ॥२८१॥
अहं त्वत्सन्निधौ राज्ञा, प्रेषिता कार्यहेतवे । यदि त्वं न रुषं कुर्या-स्तदा जल्पामि किञ्चन ॥२८२॥
**अनङ्गमञ्जरी** प्राह, तातोक्तं कथयाऽधुना । रोच्यमानं यदि स्यान्मे, तदा चाङ्गीकरोम्यहम् ॥२८३॥
अद्य मध्येगृहं ताव-कीनस्तातो दिनात्यये । यावत् सुप्तस्तु पल्यङ्के, तावदेकः पुमानगात् ॥२८४॥
उपविष्टं स्वपल्यङ्के, राजा ज्ञात्वा च तं तदा । हक्कयामास तस्मान्नो-त्तस्थौ स निर्भयाशयः ॥२८५॥
ततो रुष्टेन भूपेना-दिष्टा हन्तुं तमेव ये । ते सर्वे स्तम्भितास्तेना-ऽनुगा आसन् क्षणादपि ॥२८६॥
ततो राजा स्वयं लात्वा, खड्गं तं हिंसितुं द्रुतम् । यदोत्तस्थौ तदा सोऽवग्, विलोकय निजं बलम् ॥२८७॥
विलोक्य मेदिनीशेन, बलिनाऽपि चतुष्टयम् । का मे शक्तिरहं कोऽस्मि ?, कः परः ? शक्तिरस्य का ? ।२८८।
सबलस्यापि भूपस्या-ऽबलता स्यात् क्वचित् पुनः । एकस्य पार्श्वतोऽन्यः स्याद्-बलिष्ठो बलिनः पुनः ॥२८९॥
यद्यग्रतः समेषि त्वं, पदमेकं च मां प्रति । तदा हतोऽसि भूपाल !, विलोकयात्मनो बलम् ॥२९०॥
आधारस्त्वमसि क्षोण्या-स्ततो मुक्तोऽसि साम्प्रतम् । यदीच्छा जीवितव्ये ते, तदा मे पूरयेप्सितम् ॥२९१॥
भूपालोऽथ बलं तस्य, ज्ञात्वाऽवग् तं नरं प्रति । वीक्ष्यते साम्प्रतं किं ते ?, प्रकाशय प्रसद्य भोः ! ॥२९२॥
पुमान् प्राह सुता**ऽनङ्ग-मञ्जरी** याऽस्ति ते नृप ! । तां मह्यं देहि नो चेद् द्राक्, तव मृत्युर्भविष्यति ॥२९३॥
दध्यौ राजा तु पुत्र्या प्राक्, स्वयमङ्गीकृतः पतिः । तं मुक्त्वा सा तु न प्राणात्ययेऽन्यं वृणुते नहि ॥२९४॥
द्वितीयं तु बली चासौ, पुरुषो याचते सुताम् । किं क्रियते इतो व्याघ्र, इतो नद्यास्तटं पुनः ॥२९५॥

१. हस्तेन ॥

ध्यात्वेति भूपतिर्दध्यौ, वर्यं जातं शुभोदयात् । समायाता सुता पश्चात्परिणीताऽपि यन्नु ॥२९६॥
स जामाता स्थितो दूरे, वारिराशेस्तटे पुनः । व्याघ्राद्यैर्भक्षितो भावी, मृतो वाऽथ क्षुधा स च ॥२९७॥
अस्मायतो नरायाऽद्य, वितीर्या**ऽनङ्गमञ्जरीम्** । आत्मानं रक्षयिष्यामि, सङ्कटादीदृशाद् ध्रुवम् ॥२९८॥
यतः—
समागते मृतिप्राये, विघ्ने धुरिनरैः खलु । अपत्यानि प्रदीयन्ते-ऽग्रतः स्मृतिरिति स्मृता ॥२९९॥
त्यजेदेकं कुलस्याऽर्थे, ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्याऽर्थे, देशत्यागेन दुर्जनम् ॥३००॥
अथ भूपो जगौ तस्य, पुंसोऽग्रे निजसेवकाः । मुच्यन्तां मुत्कलाः पुत्रीं, तुभ्यं मया प्रदास्यते ॥३०१॥
ततस्तेन बलिष्ठेन, पुंसा भूपतिसेवकाः । मुत्कला विहितास्तस्य, प्रणेमुस्ते पदद्वयम् ॥३०२॥
राजाऽथ मयका सार्ध-ममुं नरं तवान्तिके । अप्रेषयत् वृणुष्वातः, पितुर्वचः प्रपालय ॥३०३॥
माता-पित्रोर्वचो नृणां, कुर्वतां योषितामपि । इहामुत्र प्रजायेत, सुखश्रेणी पदे पदे ॥३०४॥
विषमायुध-पाताल-कुमारादिसुखश्रियम् । धत्तेऽसावधिकां रूपलक्ष्मीं जनमनोहराम् ॥३०५॥
एवं प्रोक्ता तया धात्र्या, प्रदत्ते विष्टरे वरे । उपविष्टः पुमान् सोऽपि, शक्रवद् वासवासने ॥३०६॥
ततो भूपाङ्गजाऽधस्तान्, मुखं कृत्वा जगाविति । मातः ! किं नहि जानासि, मदीयं मानसं स्थिरम् ॥३०७॥
नाऽसि त्वं रुचिरा यस्मा-दानीतोऽसौ ममाऽग्रतः । पिताऽपि च प्रभुत्वेन, न जानाति हिताहितम् ॥३०८॥
यतः—
लक्ष्मीवन्तो न जानन्ति, प्रायेण परवेदनाम् । शेषे धराभराक्रान्ते, शेते लक्ष्मीपतिः स्वयम् ॥३०९॥
भक्ते द्वेषो जडे प्रीति-ररुचिर्गुरुलङ्घनम् । मुखे कटुकता नित्यं, धनिनां ज्वरिणामिव ॥३१०॥
यौवनं धनसम्पत्तिः, प्रभुत्वमविवेकिता । एकैकमप्यनर्थाय, किं पुनः स्याच्चतुष्टयम् ? ॥३११॥
परिणीतं पतिं मुक्त्वा, ययाऽन्यः क्रियते पतिः । इहाऽमुत्राऽसुखश्रेणी-स्तस्याः स्त्रियाः प्रजायते ॥३१२॥
यतः—
निन्द्यमादौ नितम्बिन्या, जन्मोच्येत बुधैर्जनैः । कुमार्गं सेवते चेत् सा, तदा किं प्रोच्यते पुनः? ॥३१३॥
यतः—
अणंताओ कम्मरासीओ, जया उदयमागया । तया इत्थित्तणं पावे, सम्मं जाणेइ गोअमा ॥३१४॥
यद्युदेति रविः पूर्वां, मुक्त्वा पश्चिमया दिशा । तथाऽप्यहं करिष्ये नापरं नरं सुरोपमम् ॥३१५॥
तदा स नर आचष्ट, मह्यं पित्रा तवाधुना । दत्ता सती वृणु त्वं मां, प्रपालय पितुर्वचः ॥३१६॥
यद्यहं त्वां बलाद् हृत्वा, गमिष्यामि निजालयम् । तदा करिष्यते किन्नु, त्वया चाबलया बलम् ? ॥३१७॥
राजपुत्री जगौ स्त्रीणां, सतीनां ज्वलनो बलम् । कूपपातोऽथवा कण्ठ-पाशो वा विषभक्षणम् ॥३१८॥
एवं प्रोच्य यदा कुक्षौ, शस्त्रीं क्षेप्तुं नृपाङ्गजा । लग्ना तदा पुमान् **वीरभद्र**रूपोऽभवत्क्षणात् ॥३१९॥
ततः स्वपतिमालोक्य, लज्जिता**ऽनङ्गमञ्जरी** । कृत्वाऽधो वदनं नैवा-ऽजल्पद् धात्र्यापि जल्पिता ॥३२०॥
तमेव पुरुषं जामातरं ज्ञात्वा क्रमान्नृपः । हृष्टः पत्न्यादियुक् तत्र, समायातस्त्वराद् ध्रुवम् ॥३२१॥
जामातरं नरं दृष्ट्वा, भूपोऽपि मुदितोऽवदत् । किमीदृक्षं त्वया रूपं, विहितं ? वद साम्प्रतम् ॥३२२॥

कुमारोऽवग् भवत्पुत्र्याः, शीलादहं नरेश्वर ! । उत्तीर्णो विपदाम्भोधिं, दुरुत्तारमपि ध्रुवम् ॥३२३॥
ऊचे भूपेन को विघ्ना-म्भोधिरुत्तरितस्त्वया ? । कः पिता ते? च का माता ?, कस्यां पुर्यां जनुस्तव ? ॥३२४॥
प्राहाऽथ स पुमान् स्पष्टं, जन्म **चन्द्रपुरे** मम । **चन्द्र**भूपः पिता माता, **श्री**र्नाम्ना शीलशालिनी ॥३२५॥
तयोरहं क्रमाद् **वीरभद्रा**ह्वोऽभवमङ्गजः । अन्यदा मम तातेन, प्रददे रत्नकम्बलः ॥३२६॥
इत्यादि चरितं स्वीयं, वार्द्धिमध्यजिनालयम् । सुप्तान्तं निखिलं प्रोच्य, **वीरभद्रो** जगौ पुनः ॥३२७॥
प्रबुद्धोऽहं भवत्पुत्रीं, काष्ठाश्वं व्योमगं पुनः । अदृष्ट्वा व्याकुलोऽहं तु, द्रष्टुं वनेऽभितोऽभ्रमम् ॥३२८॥
यदा न वीक्षितौ तौ च, तदा ध्यातं मया पुनः । खगविद्यां विना वार्द्धि-मध्यान्निर्यास्यते कथम् ॥३२९॥
यदि मे मम पत्न्यास्तु, शीलं भवति निश्चितम् । तदा मेऽम्भोनिधेर्योग, उत्तारायाऽस्तु सत्वरम् ॥३३०॥
धर्मो मे शरणं भूया-दिति ध्यायन् जिनालये । गत्वा जिनेश्वरं भक्त्या, पुष्पैर्वर्यैरपूजयम् ॥३३१॥
यतः—

सुखी न जानाति परस्य दुःखं, न यौवनस्था गणयन्ति शीलम् ।
आपद्गता निष्करुणा भवन्ति, आर्ता नरा धर्मेपराभवन्ति ॥३३२॥

नेत्राऽऽनन्दकरी भवोदधितरी श्रेयस्तरोर्मञ्जरी, श्रीमद्धर्ममहानरेन्द्रनगरी व्यापल्लताधूमरी ।
हर्षोत्कर्षशुभप्रभावलहरी रागद्विषां जित्वरी, पूजा श्रीजिनपुङ्गवस्य विहिता श्रेयस्करी देहिनाम् ॥३३३॥

ततो बलानके स्थित्वा, नमस्कारशताष्टकम् । अजीगणमहं याव-त्तावदेकाऽबलाऽऽगमत् ॥३३४॥
योजयित्वाऽञ्जलिं साऽवग्, दीनास्या पुरतो मम । अहमस्मि निराधारा, त्यक्ता भर्त्राऽधुना पुनः ॥३३५॥
अङ्गीकृत्य च मां जन्म, स्वकीयं सफलं कुरु । अहं ते छन्दसा[1] शश्वत्, चलिष्यामि नरोत्तम ! ॥३३६॥
कामेन पीडिताऽत्यन्त-महं तथाऽधुना नर ! । यथा भोगं विना प्राणा, यास्यन्ति मम सत्वरम् ॥३३७॥
यतः—

अक्खाण रसणी कम्माण मोहणी, तह वयाण बंभवयं । गुत्तीण य मणगुत्ती, चउरो दुक्खेण जिप्पंति ॥३३८॥
तदा मयोदितं नारी-मन्यस्याङ्गीकरोमि न । परस्त्रीगमने श्वभ्र-पातो भवति भूरिशः ॥३३९॥
मयाऽप्यङ्गीकृता नारी, या पूर्वं राजनन्दिनी । तां मुक्त्वा नाऽपरां प्राणा-त्ययेऽप्यङ्गीकरोमि च ॥३४०॥
नार्याऽपि न नरो मारा-कारोऽ[2]प्यन्यः कदाचन । अङ्गीकार्यः पतिं स्वीयं, मुक्त्वा दुःखे सुखेऽपि वा ॥३४१॥
यतः—

अप्पं धूलिहिं मेलीउं सयण ह दीध उ छार । पगि पगि माथा ढांकण उं जिणि जोइ परनारि ॥३४२॥
देवदाणव-गंधव्वा, जक्ख-रक्खस-किंनरा । बंभयारिं नमंसंति, दुक्करं जे करंति तं ॥३४३॥
त्वं च निरीक्ष्यसे वर्य-कुलवंशसमुद्भवा । अतो भर्त्रोज्झिता शीलं, पालय त्वं शिवप्रदम् ॥३४४॥

शीलं नाम नृणां कुलोन्नतिकरं शीलं परं भूषणं, शीलं ह्यप्रतिपाति वित्तमनघं शीलं सुगत्यावहम् ।
शीलं दुर्गतिनाशनं सुविपुलं शीलं यशः पावनं, शीलं निर्वृतिहेतुरेव परमं शीलं तु कल्पद्रुमः ॥३४५॥

गणयन्ती नमस्कारान्, पूजयन्ती जिनाधिपान् । पालयन्ती सदा शीलं, स्वजनुः सफलीकुरु ॥३४६॥

---
१. इच्छया २. कामदेवसदृशः

एवं धर्मोपदेशस्य, दानाद् विद्याधरी च सा । शीले स्थिरीकृता याव-न्मया कुमार्गमुञ्चनात् ॥३४७॥
तावदेको नरो दिव्य-रूपोऽकस्माल्लसत्कलः । प्रोवाच प्रकटीभूय, पुण्यवांस्त्वमसि ध्रुवम् ॥३४८॥
मया तव मदीयायाः, प्रियायाश्च परीक्षणम् । चक्रे वृक्षान्तरस्थेन, ज्ञातं वृत्तं द्वयोः पुनः ॥३४९॥
ततो मयोदितं कस्त्वं ?, केयं नारी समागता ? । ततोऽवक् स नरः पृष्टो-त्तरमेवं ममाग्रतः ॥३५०॥
**वैताढ्याद्रौ कला**पुर्या-महं विद्याधरो **धरः** । एषा मे प्रेयसी **रूप-माला**ह्वा विद्यते पुनः ॥३५१॥
मया समं कलिं कृत्वा, निर्गत्य स्वगृहाद्रयात् । भवत्पार्श्वे समायाता, त्वया च प्रतिबोधिता ॥३५२॥
अहं वा **प्रतिचक्रा्या**, देव्याः प्रसादतोऽधुना । पत्नीमनागतां ज्ञात्वा, समागामिह सत्वरम् ॥३५३॥
तव शीलस्य माहात्म्यात्, तुष्टोऽहं साम्प्रतं त्वयि । रूपान्तरकरीं विद्यां, व्योमगाऽमोघशास्त्रके ॥३५४॥
विद्यां लाहि प्रसद्य त्वं, विलम्बंकुरु मा क्षणम् । ततो विद्यात्रयीं **वीरभद्रो**ऽलात् खगपार्श्वतः ॥३५५॥ युग्मम् ॥
मया विद्याधरी सा च, पतिव्रतधरा कृता । सोऽपि विद्याधरो ह्येक-पत्नीव्रतधरः कृतः ॥३५६॥
विद्याधरो जगौ **वीर-भद्र** ! त्वया पुरे मम । आगन्तव्यं यथा भक्ति-र्मया विधीयते वरा ॥३५७॥
एवं प्रोच्य खगो **वीर-भद्रं** नत्वा सुभक्तितः । गेहिनीसहितः स्वीय-नगरे समुपेयिवान् ॥३५८॥
ततो गगनगामिन्या, विद्ययाऽम्भोधिमध्यतः । अत्रागममहं भार्या-परीक्षां कृतवान् पुनः ॥३५९॥
पत्न्याः शीलप्रभावेण, तीर्णो मयाऽम्बुधिः क्षणात् । शीलात् किं किं न जायेत, मनोऽभिष्टं नृणां किल ? ॥३६०॥
विशेषतो नमस्कार-गणनाद्विघ्नसन्ततिः । उत्तीर्णा दुष्कराऽप्येव, मया जानीहि भूपते ! ॥३६१॥
**अनङ्गमञ्जरी** चाथ, स्वस्यागमनकारणम् । प्रोच्य प्राह भवान् प्राप्तः, पत्युः शीलान्मया पुनः ॥३६२॥
ततो नृपः **प्रजापालो**, रञ्जितो नन्दिनीपतिम् । सम्मान्य तुरगेभादि-श्रियं तस्मै वितीर्णवान् ॥३६३॥
**प्रजापालो** नृपो **वीरभद्रश्चानङ्गमञ्जरी** । उत्थाय क्षमयामासु-र्मिथः स्वदोषजल्पनात् ॥३६४॥
पुत्रीपत्यागमाद् हृष्टः, **प्रजापाल**नृपस्तदा । **सुसीमायां** पुरि प्रौढं, महोत्सवमचीकरत् ॥३६५॥
ततः सदा नमस्कारान्, गणयन्तो नृपादयः । लोकाः समर्जयामासुः, पुण्यं मुक्तिगमोचितम् ॥३६६॥
आपृच्छ्य श्वशुरं तत्र, **प्रजापाल**-नरेश्वरम् । **वीरभद्रो**ऽचलत् पत्नीयुक्तो भूरिश्रियान्वितः ॥३६७॥
**वैताढ्याद्रौ कला**पुर्यां, **धर**विद्याधरेशितुः । **वीरभद्रो**ऽमिलत्तेन, भोजितो वरगौरवम् ॥३६८॥
**धर**विद्याभृता सार्धं, **वीरभद्रो** विमानगः । शाश्वतानि च चैत्यानि, कतिचिद् वन्दते स्म सः ॥३६९॥
गणयन् प्रत्यहं सप्त-शतीं नमस्कृतेर्मुदा । **वीरभद्रो**ऽचलन्मित्र-मापृच्छ्य गगनाध्वना ॥३७०॥
वन्दमानो जिनान् स्थाने, स्थाने पत्नीसमन्वितः । ययौ **चन्द्रपुरो**द्याने, नानावृक्षमनोहरे ॥३७१॥
श्रुत्वा पुत्रागमं **चन्द्र**-भूपः समेत्य सम्मुखम् । अनैषीत् स्वगृहं पुत्रं, चारूत्सवपुरःसरम् ॥३७२॥
राजाऽथ सूनवे तस्मै, राज्यं दत्त्वा वरोत्सवम् । दीक्षां लात्वा तपस्तप्त्वा, स्वर्गसातमशिश्रियत् ॥३७३॥
यतः—

**एगदिवसंपि जीवो, पव्वज्जमुवागओ अनन्नमणा । जइवि न पावइ मुक्खं, अवस्स वेमाणीओ होइ ॥३७४॥**

इतः **श्रीनगरे मित्र-सेनो** भूपः स्वगोत्रजैः । त्याजितो राज्यमह्नाय[1], शिश्राय रौद्रकाननम् ॥३७५॥
तत्र गत्वा च तान् शत्रून्, निहत्य **वीरभद्रकः** । राज्यश्रियमदाद् **मित्रसेनाय** बहुसैन्ययुक् ॥३७६॥
**वीरभद्रो**ऽथ भूपानां, बहूनां राज्यवालनात् । उपकारं व्यधान्नृणामन्येषां श्रीप्रदानतः ॥३७७॥
**वीरभद्रो** रिपून् भूरीनमोघायुधविद्यया । वशीकृत्य निजं राज्यं, निष्कण्टकमचीकरत् ॥३७८॥
**वीरभद्रो**ऽन्यदा पुर्या, मध्ये प्रौढं जिनालयम् । कारयामास भूयिष्ठविभवव्ययतः खलु ॥३७९॥
द्वासप्तत्याऽधिकं देव-कुलिकानां शतं वरम् । पाषाणैः स्फटिकैस्तस्य, परितोऽचीकरत्तमाम् ॥३८०॥
प्रतिष्ठाया दिने तस्य, **प्रजापाल**नृपादिकान् । भूपानाकारयद् भूरीन्, **वीरभद्रो** महीश्वरः ॥३८१॥
तस्मिन् जिनालये सार्वान्, द्वासप्तत्याऽधिकं शतम् । प्रातिष्ठिपत् नृपो **धर्मघोष**सूरीशपार्श्वतः ॥३८२॥
भोजयित्वाऽखिलं सङ्घं, रसवत्या मनोज्ञया । वर्याम्बरैर्गुरून् भूपो, भावतः पर्यधापयत् ॥३८३॥
**वीरभद्र**स्ततः पट्ट-कूलैः सङ्ख्यातिगैस्तदा । सङ्घं गौरवयामास, **प्रजापाल**नृपान्वितम् ॥३८४॥
यतः—

**गुरुभत्ति खंति-करुणा-वय-जोग-कसाय-दाणजुओ। दढधम्माई अज्जइ, सायमसायं विवज्जयओ ॥३८५॥**
[कर्मग्रन्थ १-५५]

**वीरभद्रो** महीनाथः, **प्रजापाल**नृपादियुग् । **वत्साह्वे** विजये तीर्थ-यात्रां तीर्थेषु चकृवान् ॥३८६॥
**प्रजापालो**ऽपि भूपालः, समागत्य निजे पुरे । अचीकरज्जिनागारान्, सहस्रत्रयसम्मितान् ॥३८७॥
कोटिलक्षमितं द्रव्यं, धर्मस्थानेषु भूपतिः । व्ययन् महीपतिः कीर्तिं, व्यस्तारयन् महीतले ॥३८८॥
यतः—

कीर्त्या यस्य जगत्त्रये, धवलिते, सह्याचले मन्दरे, विन्ध्ये हेमगिरौ हरक्षितिधरे, नो भाति रूपान्तरम् ।
नो चेदर्थिजनाय तेन ददता, स्वर्णं जगत्यूर्जितं, विख्यातः कनकाचलः कथमिव, स्वैरं न विश्राणितः ॥३८९॥

इतः स्वर्णनरं प्राप्य, **प्रजापालो** नृपोऽन्यदा । अनृणां मेदिनीं चक्रे, भूरिलक्ष्मीप्रदानतः ॥३९०॥
अमारिपटहे भूमि-नाथेन वादिते सति । एण-जम्ब्वादयो जीवाः, सुखं तिष्ठन्ति सन्ततम्[2] ॥३९१॥
यतः—

प्रासाद-प्रतिमा-यात्रा-प्रतिष्ठादिप्रभावनाः । अमारिघोषणादीनि, महापुण्यानि भूभुजाम् ॥३९२॥
**प्रजापाले** नृपे राज्यं, कुर्वाणे नयवर्त्मना । न स्तैन्यभीर्द्विषद्भीर्न, दण्डभीर्न नृणां क्वचित् ॥३९३॥
इतः **सूरं** सुतं न्यस्य, राज्ये स्वीये वरोत्सवम् । **वीरभद्रो** व्रतं लात्वा, तपस्तपति सन्ततम् ॥३९४॥
[3]तप्त्वातीव्रं **तप**श्छित्त्वा, कर्मराशिं बहुं क्रमात् । **वीरभद्र**नृपालर्षिः, पञ्चमज्ञानमाप्तवान् ॥३९५॥
**वीरभद्र**नृपालर्षि-र्विहरन् वसुधातले । प्रबोधयन् जनान् भूरीन्, तीर्थङ्करमते क्रमात् ॥३९६॥
स चान्यदा **सुसीमायाः**, पुर्या बहिर्वने वरे । भूरिवाचंयमश्रेणीसहितः समवासरत् ॥३९७॥ युग्मम्
उद्यानेऽथ समायातं, **वीरभद्रं** यतीश्वरम् । श्रुत्वोद्यान[स्य]पालाय, **प्रजापालो** ददौ धनम् ॥३९८॥
भूरिश्रीसङ्घसंयुक्तः, **प्रजापालो**ऽवनीपतिः । गत्वा नत्वा गुरुं धर्म-देशनामशृणोदिति ॥३९९॥

---
१. तत्कालः । २. निरन्तरम् ॥ ३. तप्त्वा तीव्रं तपः

अट्ठविहकम्मबद्धो, जीवो परिभमइ दीहसंसारं । दुक्खाणि अणुहवंतो, उदएणं वेअणिज्जस्स ॥४००॥
जइ कह वि माणुसत्तं लहइ परिनिज्जराइ कम्माणं । तह वि न कुणइ धम्मं रसफरिसवसाणुगो जीवो ॥४०१॥
रत्ता दुट्ठा मूढा जे इत्थ कुणंति पावयं कम्मं । ते जंति नरयलोगं बहुवेअणसंकुलं इम्मं ॥४०२॥
वच्चंति महारंभा महाहिगरणाय परिग्गह महंता । तिव्वकसायपरिणया ते वीय नरयं पवज्जंति ॥४०३॥
पंचाणुव्वयजुत्तो, के इत्थ अकामनिज्जराए य । एवंविहा मणुस्सा, मरीऊण लहंति देवत्तं ॥४०४॥
के इत्थ भवणवासी वंतर जोइसिअ कप्पवासी अ । जोग विसोसणपुणो हवंति अहमुत्तमा दिवा ॥४०५॥
खविऊण केवि कम्मं, जिणधम्माराहण सरलचित्ता । इगदुतिचउभवेसुं, वच्चंति सिवपुरं सिग्घं ॥४०६॥
निर्वाणशर्म वाञ्छद्भि-र्भव्यजीवैः सुभावतः । कर्तव्या भावना **पृथ्वी-चन्द्र**राजर्षिवत् सदा ॥४०७॥
तथाहि—
**अयोध्यायां** पुरि स्वर्ग-सोदर्यां मेदिनीपतेः । **हरिसिंह**स्य पत्न्यासीत्, **पद्माह्वा** शीलशालिनी ॥४०८॥
सुस्वप्नसूचितः **पृथ्वीचन्द्राह्वो** नन्दनोऽभवत् । **मरुत्कु**मारसङ्काशरूपो विनयसुन्दरः ॥४०९॥
यतः—
ते पुत्रा ये पितुर्भक्ताः, स पिता यस्तु पोषकः । तन्मित्रं यत्र विश्वासः, सा भार्या यत्र निर्वृतिः ॥४१०॥
मुनीशदर्शनात् पूर्वं, भवं स्मृत्वाऽन्यदा स च । वैराग्य-वासित-स्वान्तो-ऽजनि गुर्वादिसेवकः ॥४११॥
संसारासारतां पश्यन्, सारां च संयमश्रियम् । **पृथ्वीचन्द्र**कुमारस्तु, बाल्येऽपि धर्मकृत् सदा ॥४१२॥
यथा—
मनसि जरयाऽभिभूता, जायन्ते यौवनेऽपि विद्वांसः । मन्दधियः पुनरपरे, न भवन्ति वृद्धत्वयोगेऽपि ॥४१३॥
आरोहन्ती शिरः स्वान्ता-दौन्नत्यं तनुते जरा । शिरसः स्वान्तमायान्ती, दिशते नीचतां पुनः ॥४१४॥
कुमारो न व्यधाद् वेष-मुद्भटं वनिताकथाम् । न क्रीडां कुरुते सार्धं, कुमारैः सह कर्हिचित् ॥४१५॥
न तुरङ्गम-मातङ्गौ, दमयामास स क्वचित् । बभाण च न शृङ्गार-शास्त्रं संसारवर्धकम् ॥४१६॥
मातापितृपदोपास्ति-परः साधुनिषेवकः । स जिनार्चां व्यधान्नित्यं, धर्मशास्त्रगवेषकः ॥४१७॥
यतः—
धन्यानामिह धर्मकर्मविषया, वाञ्छाऽपि सञ्जायते, धन्यानामिह तत्प्रवृत्तिरचना, केषाञ्चिदेवोद्भवेत् ।
धन्यास्तस्य च यान्ति पारमथवा, धन्याः प्रशंसन्ति ये, धन्यास्तेऽपि च येऽन्यलोकविहितं, धर्मं च न निन्दन्ति ॥४१८॥
लक्ष्मीः परोपकाराय, विवेकाय सरस्वती । सन्ततिः परलोकाय, भवेद् धन्यस्य कस्यचित् ॥४१९॥
दृष्ट्वेदृक्षं सुतं राजा, दध्यौ कथमयं सुतः । राज्यचिन्तां करोत्येवं, भोगसुखपराङ्मुखम् ॥४२०॥
यतः—
नवज्जुवणपारंभे सहलिज्जइ नवसुआण जीअलोए । सिंगारहारिचरिअं रिउविजए उज्जमो धणिअं ॥४२१॥
अतश्चाहं तथा कुर्वे, यथा कन्यापरिग्रहम् । कृत्वा राज्यस्य चिन्तां स, करिष्यति क्रमात्सुतः ॥४२२॥
यतः—
ता छेओ ताव मुणी ता धम्मी ताव उज्जूओ । सोमो जाव घरट्ट व्व नरो न भामीओ दढमहेलाहिं ॥४२३॥

ध्यात्वेति भूपतिस्तत्तद्वाक्यैर्मृदुभिरङ्गजम् । अकाममपि वीवाहं, प्रकर्तुमङ्गयकारयत् ॥४२४॥
ततः षोडशकन्यानां, महतां मेदिनीभुजाम् । विवाहं कारयामास, भूपः पुत्रं वरोत्सवम् ॥४२५॥
वाद्यमाने महातोद्ये, वेश्यावर्गे प्रनर्त्तति[१] । गायति स्त्रीजने **पृथ्वीचन्द्र** एवं व्यचिन्तयत् ॥४२६॥
अहो ! एवंविधे पाणि-ग्रहे संसारवर्धके । अनन्तशोऽपतच्चैष, जनो मल्लक्षणो भृशम् ॥४२७॥
पीत्वा मोहमहामद्यं, घूर्णितो मानवो ह्ययम् । कृत्याकृत्यादिकं नैव, वेत्ति दुष्कर्मयोगतः ॥४२८॥
**गीयं पलावपायं देहपरिस्समकरं सफुडनहं । गुरुभारालंकारा भोगुवभोगा किलेसकरा ॥४२९॥**
जीआण अहो ! मोहो जं कइवयदिणंमि कयंमि संवासे । खिज्जंति मज्झ कज्जे एअं अइनिविडनेहेणं ॥४३०॥
रंभागब्भअसारे, इह संसारे खणंपि नहि जुत्तं । रमिउं विन्नायजिणिंद-समयतत्ताण सत्ताणं ॥४३१॥
निर्बन्धोऽयं विवाहेऽस्मिन्, मात्रादीनां समस्ति यत् । तन्मोहविहितं सर्वं, संसारासातदायकम् ॥४३२॥
मोहपाशेन मात्रादे-र्बद्धोऽहं निबिडो जडः । ईदृक्षे सङ्कटे दुःख-लक्षकोटिप्रदायके ॥४३३॥
विनष्टं नाऽधुना किञ्चित्, जननी-जनकौ यदि । प्रबोध्य संयमं मुक्ति-प्रदं लास्यामि सत्वरम् ॥४३४॥
तदा भूयिष्ठलोकानां, ममाप्यनुग्रहो भवेत् । जननी-जनकादीनां, वचश्च विहितं मया ॥४३५॥
ततस्तासां प्रियाणां, तु पुरो भूपतिनन्दनः । प्रबोधायाऽवदत् धर्म्म-सूक्तानीति सहस्रशः ॥४३६॥
यतः—
इह भोगा विसमिव मुहमहुरा परिणामे दारुणविवागा । सिवनगरमहागोउर-निविडकवाडोवमा भोगा ॥४३७॥
भोगा सुतिक्खबहुदुक्खा लक्खदवहूअवहिंघणसमाणा । धम्मदुम्मउम्मूलणसमीरलहरीसमा भोगा ॥४३८॥
हिमवंतमलयमंदरदीवोदहिधरणिसरिसरासीओ । अहीयरो आहारो छुहीएणाहारीओ हुज्जा ॥४३९॥
जन्नेण जलं पीयं घम्मायवजगडीएण तंपि इहं । सव्वेसु वि अगड-तलाय-नइसमुद्देसु न वि हुज्जा ॥४४०॥
जाणइ य जह मरिज्जइ, अमरंतं पि हु जरा विणासेइ । न य उव्विग्गो लोओ, अहो रहस्सं सुनिम्माओ ॥४४१॥
दुपयं चउप्पयं बहुपयं च अपयं समिद्धमहणं स । अणवकएवि कयंतो हरइ हयासो अपरितंतो ॥४४२॥
न य नज्जइ सो दिअहो मरीअव्वं चेव वसेण सव्वेणं । आसापासपरद्धो न करेइ जहत्थियं बज्झो ॥४४३॥
पत्युरेवं वचः श्रुत्वा, प्रबुद्धा निखिलाः प्रियाः । विषयोपरताः प्रोचुः, कुमारं प्रति सत्वरम् ॥४४४॥
स्वामिन् ! यद् भवता प्रोक्तं, वचो धर्ममयं खलु । तत्कोऽवमन्यते मूढः, संसारसातहेतुकम् ? ॥४४५॥
अधुनैव वयं स्वामिन् !, भवता सह संयमम् । ग्रहीष्यामो विलम्बो न, कार्य आयुर्यतोऽस्थिरम् ॥४४६॥
यतः—
भोगास्तुङ्गतरङ्गभङ्गचपलाः, प्राणाः क्षणध्वंसिनः, स्तोकान्येव दिनानि यौवनसुखप्रीतिः प्रियेषु स्थिरा ।
तत्संसारमसारमेव निखिलं, बुद्ध्वाऽऽत्मपाशक्षये, लोकाऽनुग्रहपेशलेन मनसा, यत्नः समाधीयताम् ॥४४७॥
वज्रकायशरीराणा-मर्हतां यद्यनित्यता । कदलीसारतुल्येषु, का कथा शेषजन्तुषु ? ॥४४८॥
श्रुत्वैतच्च **पृथ्वीचन्द्रो**, जगौ यूयमिमाः प्रियाः । पुण्यवन्त्यो यतो दीक्षा-ग्रहणे भवतां मनः ॥४४९॥
भवतीभिः समं दीक्षा, ग्राह्या निर्वाणशर्मणे । स्थिरं कार्यं मनो यस्मात्, कपिवच्चपलं च यत् ॥४५०॥

१. प्रनृत्यति

यावत् सद्गुरवोऽत्रैवा-गमिष्यन्ति चरित्रिणः । तावत् प्रतीक्ष्यते यस्मा-दुर्लभा गुरवो वराः ॥४५१॥

यतः—

विना गुरुभ्यो गुणनीरधिभ्यो, जानाति धर्मं न विचक्षणोऽपि

विना प्रदीपं शुभलोचनोऽपि, निरीक्षते कुत्र पदार्थसार्थम् ॥४५२॥

पत्नीयुक्तकुमारस्य, मनः संयमग्राहकम् । ज्ञात्वा दध्यौ नृपो जातमन्यथा चिन्तितं मम ॥४५३॥

नृपोऽथ प्रोक्तवान् पुत्र !, यावच्छ्रीगुरवोऽनघाः । इहायान्ति वितन्वाना, विहारं वसुधातले ॥४५४॥

तावद्राज्याभिषेकस्ते, क्रियते मयका अद्य । माता-पितृगुरूणां तु, नोल्लङ्घ्यं नन्दनैर्वचः ॥४५५॥

यतः—

शृण्वन्ति पितुरादेशं, ते केऽपि विरला जनाः । आदिष्टं ये तु कुर्वन्ति, सन्ति ते यदि पञ्चषाः ॥४५६॥

श्रुत्वैतत्तातभणितं, **पृथ्वीचन्द्रो** व्यचिन्तयत् । उल्लङ्घ्यं न वचः सद्भि-र्गुरूणां कर्हिचित्कदा ॥४५७॥

यतः—

निबद्धो पुण पिसुणो लक्खिज्जइ गुरुवरो इहत्थंमि । दुप्पडिआरात्ते गुरुणो न लंघिअव्वा सुपुत्तेहिं ॥४५८॥

ततो भूपोऽखिलामात्य-सामन्तसहितस्तदा । राज्याऽभिषेचनं चक्रे, पुत्रस्य तस्य सत्वरम् ॥४५९॥

**हरिसिंहो**ऽङ्गजं राज्ये-ऽभिषिच्य मुदिताशयः । तिष्ठति स्म सुखं कालं, गमयन्नन्दनान्वितः ॥४६०॥

पित्रौकस्यन्यदा **पृथ्वीचन्द्रे** स्थिते नृपाङ्गजे । आगत्य द्वारपालोऽवक्, श्रूयतां भणितं मम ॥४६१॥

तथाहि :—

एकः पान्थः समायातो, द्वारे त्वदाननेक्षणम् । ईहते **सुधनो** नाम्ना, नैगमो नैगमाग्रणीः ॥४६२॥

अनुज्ञातोऽथ भूपेन, **सुधनो**ऽभ्येत्य भूपतिम् । प्रणम्य मेदिनीनाथ-दत्तासने निविष्टवान् ॥४६३॥

**पृथ्वीचन्द्रो**ऽगदत् कस्माद्देशादिहाऽऽगमस्तव । कुत्र दृष्टं किमाश्चर्यं, भ्रमता भवता वद ॥४६४॥

**सुधनो**ऽवक् पुराद्वर्याद् **गजाह्वा**दागतोऽस्म्यहम् । तत्राऽस्ति श्रेष्ठिराट् **रत्नसञ्चयो** धनदः प्रियः ॥४६५॥

***सुमङ्गला** प्रिया तस्य,* पुत्रश्च **गुणसागरः** । वर्धमानः क्रमात् सोऽपि, पित्राऽपाठि बुधान्तिके ॥४६६॥

श्रेष्ठिनाऽष्टमहेभ्यानां, कन्या अष्टौ मनोहराः । पुत्रपाणिग्रहायैव, मार्गिताः सुन्दरेऽहनि ॥४६७॥

दिनेऽन्यस्मिन् भ्रमन् भिक्षा-कृते एको मुनीश्वरः । श्रेष्ठिनः सूनुना **गुण-सागरेण** निरीक्षितः ॥४६८॥

कुत्राऽपि वीक्षितः साधु-रीदृक्षो मयका पुरा । ध्यायन्नेव स सम्प्राप, सद्यो जातिस्मृतिं स्मृतेः ॥४६९॥

पित्रोक्तं भवतेदानीं, पुत्र ! किं ध्यायते हृदि ? । पुत्रोऽवक् प्राग्भवे दीक्षा, गृहीताऽभून्मया खलु ॥४७०॥

अल्पायुष्काच्चिरं नैव, पालिता सा सुखप्रदा । जातिस्मृत्या मया ह्येतत्, दृष्टं साधुनिरीक्षणात् ॥४७१॥

तेनाऽधुना मया बाल्ये, सत्यायुष्के आश्रयणीया मया दीक्षा । ग्रहीष्यते द्रुतं दीक्षा, संसाराम्बुधितारिणी ॥४७२॥

जातिस्मृत्येदमालोक्य, सम्बन्धः पूर्वसंसृतेः । स्थातुं न शक्यते वृत्तं, विना मयैककं क्षणम् ॥४७३॥

आकर्ण्येति सुतस्येच्छां, रुदती जननी जगौ । त्वमेकोऽसि सुतोऽस्माक-माधारो निखिलश्रियः ॥४७४॥

अतिष्ठति सुते गेहा-ऽऽवासे माता ततो जगौ । एकशः कुरु विवाहं, कन्यानां पाणिपीडनात् ॥४७५॥

कन्यापाणिग्रहात् तासा-माननानां प्रदर्शनात् । अस्माकं कुरु नेत्राणां, साफल्यं नन्दनोत्तम ! ॥४७६॥

ततस्त्वया व्रतं ग्राह्यं, गुरूणां सन्निधौ द्रुतम् । अस्माभिर्नहि कर्तव्यः, प्रतिबन्धस्तवेहिते ॥४७७॥

श्रेष्ठिनाऽथ कनीनां तु, पितृणां सन्निधौ पृथक् । ज्ञापितं मे सुतो दीक्षां, लाता पाणिग्रहादनु ॥४७८॥

ततो जामातृवाञ्छां च, नन्दिनीनां पुरस्तदा । ज्ञापयामास तातश्च, ततः कन्या जगुस्त्विति ॥४७९॥

दीयतां स वरोऽस्माकं, यत् कान्तः स करिष्यति । तदस्माभिर्विधातव्यं, गृहवासादिकं समम् ॥४८०॥

श्रुत्वेति नन्दिनीवाक्यं, पितृभिः[१] श्रेष्ठिसूनवे । विश्राणिताः **कनीरष्टौ**[२], चारूत्सवपुरस्सरम् ॥४८१॥

जायमाने तु विवाहे, मध्ये चतुरिकं[३] तदा । गीतगानादिके चारू-त्सवे भवति सन्ततम् ॥४८२॥

अनित्यतादिकाः सर्वा, भावना भावयन् ध्रुवम् । एकाग्रमानसो ध्यानी, बभूव **गुणसागरः** ॥४८३॥

गृहीत्वा संयमं तीव्रं, तपः कदा करिष्यते । कदा मया गुरूणां तु, विनयश्च विधास्यते ॥४८४॥

एवं ध्यानाधिरूढस्य, **गुणाढ्यसागरस्य** हि । उत्पन्नं केवलज्ञानं, सर्वकर्मव्रजक्षयात् ॥४८५॥

क्रियमाणं सुरैश्चारू-त्सवं तस्य **गुणस्य** च । दृष्ट्वाऽष्टौ कन्यका ध्यान-लीना एव तदाऽभवन् ॥४८६॥

अनित्यं जीवितं लक्ष्मी-रनित्याऽपत्यसन्ततिः । सर्वं विनश्वरं विश्वं, स्वप्नवीक्षणवत् सदा ॥४८७॥

एवं ध्यानाधिरूढानां, तासां स्त्रीणां तदाऽचिरात् । बभूव पञ्चमं ज्ञानं, सर्वकर्मततिक्षयात् ॥४८८॥

पुत्रस्य पुत्रपत्नीनां, केवलज्ञानसूत्सवम् । क्रियमाणं सुरैः दृष्ट्वा, श्रेष्ठिराड् **रत्नसञ्चयः** ॥४८९॥

**सुमङ्गला**प्रियायुक्तः, शुक्लध्यानसमाश्रितः । सर्वकर्मक्षयाज्ज्ञानं, पञ्चमं प्रतिपन्नवान् ॥४९०॥युग्मम् ॥

राज**श्रीशेखरो** भूपः, श्रुत्वा तेषां तनूमताम् । ज्ञानोत्पत्तिं वृषं श्रोतुं, ज्ञानिपार्श्वे समीयिवान् ॥४९१॥

**श्रीशेखरो**ऽपि भूपालो, ज्ञानोत्सवं निरीक्ष्य सः । लब्धवान् केवलज्ञानं, पुण्यपापततिक्षयात् ॥४९२॥

अहमत्र समागच्छ-न्नपि केवलिनां तदा । ज्ञानोत्पत्तिं समाकर्ण्य, गतो वन्दितुमाशु तान् ॥४९३॥

तत्र धर्मं जिनेन्द्रोक्तं, श्रुत्वा केवलिसन्निधौ । **सुधनो**ऽहमिहेदानीं, समागां कार्यहेतवे ॥४९४॥

**सुधन**स्यान्तिके तेषां, **गुणा**दीनां सुधर्मिणाम् । ज्ञानोत्पत्तिं समाकर्ण्य, **पृथ्वीचन्द्रो** व्यचिन्तयत् ॥४९५॥

स सद्गुणपयोराशि-**र्गुणसागर**नैगमः । धन्योऽस्ति येन सम्प्राप्तं, ज्ञानं पञ्चममञ्जसा ॥४९६॥

राज्यमोहस्य जाले हा, मूढस्वान्तोऽभ्रमद्भवे । मृगवत्पतितोऽत्यन्तं, किं कुर्वेऽहं तमोमयः ? ॥४९७॥

उक्तं च–

हा ! कह जाणं तच्चीअ पडीओ हं रज्जुकूडजंतंमि । गुरुजणदखिन्नवसा वसारसा मत्तदंतिव्व ॥४९८॥

कईआ हेलं परिमुक्क सयलभोगोपभोगजोगाणं । धम्मधुरीणमुणीणं मज्झे गुणणं लहिस्सामि ? ॥४९९॥

कईआ गुरुपयपडीओ नाणचरित्ताण भायणं होही ? । कईआ बहुतवकारी निस्संगो हं चरिस्सामि ? ॥५००॥

इति ध्यायन् क्षिपन् कर्म-सन्ततिं स नराधिपः । क्षपकश्रेणिमारूढो, वृक्षं वल्लीवितानवत् ॥५०१॥

शुक्लध्यानाऽसिना कर्म-घनं घात्यं समन्ततः । सञ्छिद्य केवलज्ञान-माप्तवान् विश्वदर्शकम् ॥५०२॥

यतः–

मिच्छे सासणमीसे अविरयदेसे पमत्त अपमत्ते । निअट्टि अनिअट्टि सुहुमुवसम खीण सजोगि अजोगि गुणा ॥५०३॥

अणमिच्छ मीससम्मं अट्ठनपुंसत्थिवेयछक्कं च । पुमवेअं व खवेई कोहाईए संजलणे ॥५०४॥

---

१. पितरः, २. विश्राणितवान् कन्याष्टौ. ३. चवरी भाषायाम्

गइ१ आणुपुव्वि२ दो४ जाई नामं च जाव चउरिंदी८ । आयावं९ उज्जोअं१० थावरनामं च११ सुहुमं च१२ ॥५०५॥
साहारण१३ मपज्जत्तं१४ निद्दानिद्दं च१५ पयलपयलं च१६ । थीणं१७ खवेइ ताहे अवसेसं चयइ अट्ठण्हं ॥५०६॥
वीसमीऊण निअंगे दोहिं, समएहिं केवले सेसे । पढमे निद्दं पयलं नामस्स इमाइ पयडीओ ॥५०७॥
देवगई आणुपुव्वी विउव्वि संघय[ण] पढमवज्जाइं । अन्नयरं संठाणं तित्थयराऽऽहारनामं च ॥५०८॥
चरमे नाणावरणं पंचविहं दंसणं चउविगप्पं । पंचविहमंतरायं खवइत्ता केवली होइ ॥५०९॥
संभिन्नं ण संतो लोगमलोगं च सव्वओ सव्वं । तं नत्थि जं न पासइ भूअं भव्वं भविस्सं च ॥५१०॥
अथ तत्र समेत्येन्द्र-स्तस्य केवलिनस्तदा । प्रणम्य ज्ञानिनं ज्ञानो-त्पत्त्युत्सवमचीकरत् ॥५११॥
सम्प्राप्तकेवलज्ञानं, **पृथ्वीचन्द्रं** स्वनन्दनम् । ज्ञात्वा **सिंहरथो** राजा, तत्राऽऽगाद् गेहिनीयुतः ॥५१२॥
**पृथ्वीचन्द्र**प्रियाः सर्वाः, प्राप्तज्ञानोदयं पतिम् । ज्ञात्वा सम्मदसम्पूर्णा, ययुः केवलिसन्निधौ ॥५१३॥
नत्वा केवलिनं धर्म्मं, श्रुत्वा सद्यस्तमःक्षयात् । आरूढाः क्षपकश्रेर्णी, ज्ञानं प्रापुश्च ताः पुनः ॥५१४॥
उक्तं च—
न वि रंजिओ नारी सुविलासि राजतणइ नवि पडिओ पासि।
पृथ्वीचंद्र नरिंद्र आसथानि सोलराणी सिउं वरीओ नाणि ॥५१५॥
उपसमरसिपूरिओ जस चित्त आठवधू पितृमाताजुत्त । वधूरे उत्तम जाणु चउरीमाहि गुणसागर ताणु ॥५१६॥
**पृथ्वीचन्द्र**स्य भूपस्य, केवलज्ञानमञ्जसा । जातं श्रुत्वा गतस्तत्र, **सुधनो**ऽपि सकौतुकी ॥५१७॥
**हरिसिंहः** प्रणम्याथ, ज्ञानिनं प्रोक्तवानिति । किं स्नेहो मे भृशं जात-स्त्वयि ज्ञानिमतल्लिके ! ॥५१८॥
अथ ज्ञानी जगौ **चम्पा**-पुर्यां **जय**महीपतिः । पत्नी **प्रियमती** पुत्रः, **कुसुमायुध**नामकः ॥५१९॥
**जय**राजा व्रतं लात्वा, पत्नीयुक्तस्तपःपरः । विमाने **विजयाह्वे** तु, सुरोऽभूद् भासुरद्युतिः ॥५२०॥
स **कुसुमायुधः** पुत्रः, दीक्षां लात्वा तपःपरम् । कृत्वा जगाम **सर्वार्थसिद्धनि**र्जरसद्मनि ॥५२१॥
च्युत्वा **विजय**तस्तौ द्वौ, **हरिसिंह**नृपस्त्वकम् । राज्ञी **पद्मावती** जाता, माता मे संसृताविह ॥५२२॥
**सर्वार्थसिद्ध**तश्च्युत्वा, पुत्रोऽहमभवं तव । अतोऽस्ति युवयोः स्नेहो, मयि सम्प्रति निर्भरम् ॥५२३॥
**हरिसिंहः** प्रियायुक्तः, शुक्लध्यानसमाश्रितः । लब्धवान् केवलज्ञानं, विश्वविश्वप्रकाशकम् ॥५२४॥
तयोः केवलिनोस्तत्र, क्रियमाणे महोत्सवे । बोधिबीजमभूद् भूरि-भव्यलोकस्य सत्वरम् ॥५२५॥
पप्रच्छ **सुधनो** नत्वा, **पृथ्वीचन्द्रं** मुनीश्वरम् । अभूज्ज्ञाने कथं ते तु, तुल्यता **गुणसागरे** ॥५२६॥
**पृथ्वीचन्द्रो** जगौ ज्ञानी, प्राग्भवे **कुसुमध्वजः** । पुत्रोऽभूत्सततं धर्म-कर्मकरणतत्परः ॥५२७॥
यद्यत्तपो मया चक्रे, तत्कृतं तेन सूनुना । मम स्नेहोऽभवत्तस्मिन्, तस्य स्नेहोऽभवन्मयि ॥५२८॥
मया सार्धं व्रतं लात्वा, तपोऽनेन कृतं बहु । आयुःक्षये गतः **स्वर्गे**, तपस्वी **कुसुमध्वजः** ॥५२९॥
स्वर्गलोकसुखं भुक्त्वा, च्युत्वा स्वर्गायुषः क्षयात् । **गुणसागर**पुत्रोऽभूत्, **रत्नसञ्चय**सङ्कुले ॥५३०॥
पुण्याऽनुबन्धगं पुण्यं, ममाऽप्यस्याजनिष्ट तु । अतः स्नेहवशाज्जातं, ज्ञानं द्वयोः समं ध्रुवम् ॥५३१॥
आसन् षोडश मे पत्न्यः, प्राग्भवे या मनोहराः । सस्नेहास्ता भवेऽप्यस्मिन्, प्रिया जाता वृषोदयात् ॥५३२॥
ताभिर्हि गेहिनीभिः प्राग्, मया सार्थं व्रतं लले । तपस्तप्त्वा गतं स्वर्गे, बहुसातौघदायके ॥५३३॥

ततश्च्युत्वा **महीपाल**पुत्र्यो भूत्वा समाः पुनः । ममाऽप्यस्मिन्भवे पत्न्यो, बभूवुरमलाशयाः ॥५३४॥
गेहिन्योऽप्यखिलाः प्राप्य, शुक्लध्यानं शुभोदयात् । सम्प्रापुः केवलज्ञानं, पुण्यपापक्षयान्ननु ॥५३५॥
श्रुत्वैतत् प्रतिबुद्धः स, **सुधनो**ऽपि जिनोदितम् । जैनं धर्मं प्रपद्याथ, स्वर्गसौख्यमवाप्तवान् ॥५३६॥
पट्टेऽथ **हरिसिंह**स्य, **हरिसेना**ऽभिधः सुतः । स्थापितोऽखिलसामन्त-मन्त्रिभी रुचिरोत्सवम् ॥५३७॥
**पृथ्वीचन्द्रा**दयः सर्वे, ज्ञानिनो मेदिनीतले । विहृत्यायुःक्षये जग्मुः, सिद्धिपुर्यां तमःक्षयात् ॥५३८॥
**पृथ्वीचन्द्र**नृपालर्षे-श्चरित्रस्य श्रुतेः किल । बोधिः केषां न जायेत, भव्यानां जिनशासने ? ॥५३९॥
निशम्यैवं **प्रजापालः**, **पृथ्वीचन्द्र**कथानकम् । चकार भावतो धर्मं, जैनं शिवसुखप्रदम् ॥५४०॥
राज्यं वितीर्य **पद्माय**, सूनवे शुभवासरे । **प्रजापालो** नृपो दीक्षां, ललौ श्रीसूरिसन्निधौ ॥५४१॥
पठन् शास्त्राणि सूरीश-पार्श्वे कुर्वंस्तपो बहु । सर्वकर्मक्षयं कृत्वा, मुक्तिपुर्यां समीयिवान् ॥५४२॥

**॥ इति प्रजापालभूपसम्बन्धः ॥**

**पद्मो** भूपः प्रजा न्याय-मार्गेण पालयन् सदा । आज्ञां स्वां ग्राहयामास, प्रत्यर्थिपृथिवीपतीन् ॥५४३॥
एकदा **पद्म**भूपालः, श्रीधर्माचार्यसन्निधौ । श्रोतुं धर्ममगात् सम्यक्, कल्याणकमलाप्रदम् ॥५४४॥
वन्दे जन्म मनुष्यसम्भवमहं, किं तद्विहीनं गुणै ?, स्तानेव त्वरितं स्तुमः किमसमां, लक्ष्मीं विना तैर्गुणैः ? ।
तां लक्ष्मीं समुपास्महे किमु तया, दानादिभिर्वन्ध्यया?, दानं स्तौमि वृथैव भावरहितं, भावो हि भद्रं ततः ॥५४५॥
पात्रमुत्तमगुणैरलङ्कृतं, दायकस्तु पुलकं दधत्तनौ । देववत् सुपरिशुद्धपुष्कलं, निष्कलङ्कतपसामिदं फलम् ॥५४६॥
यस्य कुक्षिगतं चान्नं, शास्त्राभ्यासेन जीर्यते । तारयेत् स्वान् परांश्चापि दशपूर्वान् दशाऽपरान् ॥५४७॥
धर्मोपदेशनां प्राप्य, सुरो भासुरसंवरः । उत्थाय विदधे नृत्यं, गुरूणामग्रतो मुदा ॥५४८॥
पप्रच्छ **पद्म**भूपालः, कस्मादयं सुधाशनः । भवतः पुरतो नृत्यं, चक्रे चाऽथ गुरुर्जगौ ॥५४९॥
अनेन प्राग्भवे नीरं, प्रासुकं साधवे ददौ । तेन पुण्येन सञ्जात, ईदृक्षो निर्जरो वरः ॥५५०॥
**पद्म**भूपोऽवदत् कस्मिन्, भवे पुण्यं व्यधादयम् । ततः स ज्ञानवानाह, शृण्वाने भूरिमानवे ॥५५१॥
**काम्पिल्याह्वे** पुरे **शेख**-श्रेष्ठिनोऽभूत्प्रिया **रमा** । अभूत्तयोः सुता **पद्मा**-ऽभिधा ब्राह्मीव कोविदा ॥५५२॥
यतः—
ज्ञानदानाद्भवेज्ज्ञानी, भोगी स्यादन्नदानतः । जीवितव्यस्य दानेन, बह्वायुष्को भवेद् ध्रुवम् ॥५५३॥
उद्वाहसमये तस्या; **धन्य-निष्पुण्यका**ऽभिधौ । नरौ मूल्येन पानीय-पाकादिकर्म कुर्वतः ॥५५४॥
इतः प्रासुकपानीय-कृते वाचंयमद्वयम् । भ्रमद् गृहाद् गृहं श्रेष्ठि-गेहे क्रमात् समागमत् ॥५५५॥
पृष्टं साधुद्वयं ताभ्यां, कर्मकृद्भ्यां मृदुस्वरम् । किमर्थं भ्रम्यते गेहाद्, गेहं सम्प्रति ? प्रोच्यताम् ॥५५६॥
साधुयुग्मं जगौ बाह्यो-द्याने **सुबुद्धि**सूरयः । बालवृद्धादिसत्साधु-युताः साम्प्रतमाययुः ॥५५७॥
तेषां श्रान्तात्मनां लग्ना, तृषाऽतीवातपोदयात् । अतस्तण्डुलपानीय-हेतवेऽत्र समागमम् ॥५५८॥
तदोदितं च **धन्येन**, भक्त्युल्लसितचेतसा । तण्डुलोदकमस्त्येव, कुण्डिकासु ध्रुवं बहुम् ॥५५९॥
साधूनां तृट्छिदे सद्य-स्तण्डुलाम्बु यदृच्छया । आदाय गम्यतां श्रीमद्-गुरूणां सन्निधौ ननु ॥५६०॥
सदनस्वामिना प्रोक्तं, पूर्वं तण्डुलधावनम् । परिष्ठाप्यं यतो रिक्तं, जायते कुण्डिकादिकम् ॥५६१॥

यतः—

ते धन्ना जे केवि हु तुज्झं विरयन्ति भिक्खभुज्जाइं । अम्हाण नत्थि ताइं इहगारो ताइ मंगिन्ह ॥५६२॥

तदा **निष्पुण्यके**नोक्तमेतयोर्देहि मा पयः । यतः कपटिनो ह्येते, वञ्चयन्ति जनान् बहून् ॥५६३॥

**धन्य** आचष्ट मा वादी-रीदृक्पापात्मकं वचः । **निष्पुण्यक !** भवेत् श्वभ्र-पात ईदृक्प्रजल्पनात् ॥५६४॥

यतः—

हसितान्यवक्तां निन्दां, नीता एवाऽवहीलिताः । दद्युर्वाचंयमा भूरिसंसारभ्रमणं नृणाम् ॥५६५॥

एते जङ्गमतीर्थास्तु, सर्वारम्भविवर्जकाः । एतेषां दानतः स्वर्गाऽपवर्गादिसुखं भवेत् ॥५६६॥

**धन्यो** भावनया वारि, प्रासुकं च तयोस्तदा । ददत् समर्जयामास, शुभं कर्म शिवप्रदम् ॥५६७॥

कुर्वन् **निष्पुण्यको** निन्दां, साधूनां दुष्टमानसः । बबन्धाऽरुचिरं कर्म, दुःखलक्षप्रदायकम् ॥५६८॥

मृत्वा द्वावपि **काम्पिल्य**-पत्तने स्वःपुरोपमे । **वसन्त**श्रेष्ठिनः पुत्रौ, युग्मजातौ बभूवतुः ॥५६९॥

तयोः समभवन्नाम, **सुन्दरा-ऽसुन्दरौ** पुनः । पाठितौ द्वौ क्रमात्तेन, तातेन परिणायितौ ॥५७०॥

जनकेऽथ गते स्वर्गे, गृहिणीभ्यां द्वयोः कलिम् । कुर्वतीभ्यां पतिः स्वः स्वः, पृथक् चक्रे वचश्छलात् ॥५७१॥

लक्षं लक्षं तु द्रव्यस्य, भागे जातं द्वयोस्तदा । ज्येष्ठस्य वर्धते द्रव्यं, कनिष्ठस्य च हीयते ॥५७२॥

वर्षप्रान्ते धनं लक्ष-त्रयमानमजायत । **सुन्दरस्या**ऽपरस्याभूत्, दारिद्र्यं धनहानितः ॥५७३॥

वञ्चितोऽहं त्वया सर्व-द्रव्यापह्नुतितः पुरा । एवं वदन् कनिष्ठः स, ज्येष्ठेनाऽमाह कलिं व्यधात् ॥५७४॥

ततो लक्षमितं द्रव्यं, ज्येष्ठाल्ललौ कनिष्ठकः । वर्षप्रान्ते पुनर्जातो, निःस्व एव स्वहानितः ॥५७५॥

ज्येष्ठात् कनिष्ठिकः सप्त-वारान् लक्षमितं धनम् । लायं लायं पुनः क्षीण-द्रव्योऽजन्यशुभोदयात् ॥५७६॥

साधुनिन्दाकृतात् पापात्, कनिष्ठिकः सहोदरः । मुखे कीटादिपातेन, दुःखी तीव्राऽऽमयादभूत् ॥५७७॥

अन्येद्युः **सुन्दरो**ऽस्माकं, पार्श्व आराधनां मुदा । कृत्वा प्रान्ते मृतो देवो-ऽजनिष्ट भासुरद्युतिः ॥५७८॥

ज्ञात्वा धर्मगुरुं मां त्व-वधिज्ञानादिहागतः । अस्माकं पुरतो नृत्यं, कुरुते मुदिताशयः ॥५७९॥

अस्य भ्राता कनिष्ठस्तु, कीदृशो विद्यतेऽधुना । भूपेनेत्युदिते प्राह, गुरुर्भूमिपतिं प्रति ॥५८०॥

यस्त्वयाऽद्य पुरीबाह्योद्याने शटितविग्रहः । दृष्टः श्वा सोऽस्य देवस्य, प्राग्भवीयः सहोदरः ॥५८१॥

मृत्वा स श्वा गमी श्वभ्रे, साधुनिन्दाविधानतः । अतः केनाऽपि साधूनां, कार्या निन्दा कदाऽपि न ॥५८२॥

ततः स निर्जरो नत्वा, गुरूणां चरणद्वयम् । स्वर्गं ययौ ततश्च्युत्वा, मुक्तिगामी भविष्यति ॥५८३॥

श्रुत्वेति श्रीगुरुप्रोक्तं, पुण्य-पापफलं पुनः । दृष्ट्वाऽऽदान्नियमं **पद्मभूप** एवं गुरोः पुरः ॥५८४॥

अतः प्रभृति नो निन्दा, कार्या कस्यापि देहिनः । देयं दानं सुसाधुभ्यः, प्रासुकं शुभभावतः ॥५८५॥

धर्मं सम्यक्त्वमूलं तु, लात्वा **पद्म**महीपतिः । आगतः स्वगृहे श्राद्ध-धर्मं सम्यग् व्यधास्तदा ॥५८६॥

प्रासुकाशनपानीयप्रदानेन च साधुषु । **पद्म**भूपोऽर्जयामास, पुण्यं मुक्तिगमोचितम् ॥५८७॥

**पद्म**भूपोऽन्यदा राज्यं, **महीपालाय** सूनवे । दत्त्वा दीक्षां गुरूपान्ते, ललौ रुचिरभावतः ॥५८८॥

तपस्तप्त्वा चिरं क्षिप्त्वा-ऽखिलां कर्मततिं पुनः । सम्प्राप्य केवलज्ञानं, मुक्तिसातमवाप्तवान् ॥५८९॥

॥ इति पद्मभूपसम्बन्धः ॥

**महीपालो** नृपो राज्यं, कुर्वन् स न्यायमार्गतः । प्रत्यर्थि भूपतीन् वश्य-कार्षीद् दिग्विजयात् क्रमात् ॥५९०॥

**अरस्य** पश्चाद्भव-पूर्वजानां, महीपतीनामभिधानपूर्वम् । पुराऽह्वराज्याप्तिमुखस्वरूपं, श्रुतं न केषां शिवशर्मणे स्तात् ॥५९१॥

**लक्ष्मीसागरसूरीणां** शिष्याणुः **शुभशीलकः** । चरित्रमर्हतोऽरस्य, चकार बोधिहेतवे ॥५९२॥

इति **तपागच्छा**ऽधिराजश्री**लक्ष्मीसागर**सूरिशिष्य-

पं. **शुभशील**-विरचिते श्री**अर**चरित्रे श्री**धनपति**भूपति- भवपूर्वजराजाऽभिधानपुण्यकरणीयसङ्कुलिते

**प्रथमः सर्गः समाप्तः** ॥१॥

● ● ●

**योगसार - द्वितीयः प्रस्तावः**

**तत्त्वसारोपदेशकः**

सर्वेऽपि साम्प्रतं लोकाः, प्रायस्तत्त्वपराङ्मुखाः ।
क्लिश्यन्ते स्वाग्रहग्रस्ता, दृष्टिरागेण मोहिताः ॥ १ ॥

दृष्टिरागो महामोहो, दृष्टिरागो महाभयः ।
दृष्टिरागो महामारो, दृष्टिरागो महाज्वरः ॥ २ ॥

पतितव्यं जनैः सर्वैः, प्रायः कालानुभावतः ।
पापो मत्सरहेतुस्तद्, निर्मितोऽसौ सतामपि ॥ ३ ॥

मोहोपहतचित्तास्ते, मैत्र्यादिभिरसंस्कृताः ।
स्वयं नष्टा जनं मुग्धं, नाशयन्ति च धिग् हहा ॥ ४ ॥

परे हितमतिर्मैत्री, मुदिता गुणमोदनम् ।
उपेक्षा दोषमाध्यस्थ्यं, करुणा दुःखमोक्षधीः ॥ ५ ॥

मैत्री निखिलसत्त्वेषु, प्रमोदो गुणशालिषु ।
माध्यस्थ्यमविनेयेषु, करुणा दुःखिदेहिषु ॥ ६ ॥

धर्मकल्पद्रुमस्यैता, मूलं मैत्र्यादिभावनाः ।
यैर्न ज्ञाता न चाभ्यस्ताः, स तेषामतिदुर्लभः ॥ ७ ॥

अहो विचित्रं मोहान्ध्यं, तदन्धैरिह यज्जनैः ।
दोषा असन्तोऽपीक्ष्यन्ते, परे सन्तोऽपि नात्मनि ॥ ८ ॥

मदीयं दर्शनं मुख्यं, पाखण्डान्यपराणि तु ।
मदीय आगमः सारः, परकीयास्तवसारकाः ॥ ९ ॥

# ॥ द्वितीयः सर्गः ॥

**महीपालो** नृपोऽन्येद्यु-**धर्मघोष**गुरोः पुरः । धर्मं सार्वोदितं मुक्ति-शर्मदं चाशृणोदिति ॥१॥
सुलहो विमाणवासो, एगच्छत्ता य मेइणी सुलहा । दुलहो पुण जीवाणं, जिणिंदवरसासणो बोही ॥२॥
उत्तमाः सुखतो बोध्या, दुःखतो मध्यमाः पुनः । सुखतो दुःखतो वापि, बोधमर्हन्ति नाऽधमाः ॥३॥
व्याकुलेनाऽपि मनसा, धर्मः कार्योऽन्तरान्तरा । मेढीबद्धो बहिर्भ्राम्यन्, घासग्रासं करोति गौः ॥४॥
भवन्ति भूरिभिर्भाग्यै-धर्मकर्ममनोरथाः । फलन्ति यत् पुनस्तेन, तत्सुवर्णस्य सौरभम् ॥५॥
चत्वारः प्रहरा यान्ति, देहिनां गृहचेष्टितैः । तेषां पादे तदर्धे वा, कर्तव्यो धर्मसङ्ग्रहः ॥६॥
उत्थायोत्थाय बोद्धव्यं, किमद्य सुकृतं कृतम् । आयुषः खण्डमादाय, रविरस्तमयं गतः ॥७॥
आकर्ण्येति **महीपाल**भूपो धर्मं जिनोदितम् । अङ्गीकृत्य जनान् भूरीन्, कुर्वन् कारयति स्म सः ॥८॥
यतः—
राज्ञि धर्मिणि धर्मिष्ठाः, ●●●●पापे पापपरा जनाः । राजानमनुवर्तन्ते, 'यथा राजा तथा प्रजाः' ॥९॥
राज्ञः क्रमात् प्रियाः पञ्च-शतानि चाऽभवन् वराः । तासां मध्ये-ऽभवच्चित्ता-ऽभीष्टा **पद्मावती** सती ॥१०॥
**पद्मावत्यन्**यदा चारु-तरस्वप्नेन सूचितम् । प्रासूत तनयं वर्य-दिने पूर्वेव गोष्पतिम् ॥११॥
पुत्रजन्मोत्सवं कृत्वा, सम्मान्य सज्जनान् समान् । सूनो**र्धनपती**त्याह्वां, ददौ सज्जनसाक्षिकम् ॥१२॥
धात्रीभिः पञ्चभिः पाल्य-मानोऽसौ हि दिने दिने । श्वेतपक्षेन्दुवद् वृद्धिं, ययौ **धनपतिः** सुतः ॥१३॥
बाल्ये तुल्यवयोबालैः, समं दीव्यन्निरन्तरम् । न कस्याऽप्यनभीष्टोऽभून्मृदुक्तिजल्पनादिना ॥१४॥
अङ्कादङ्कं व्रजन् सर्व-राजलोकस्य सन्ततम् । प्रमोदं ददतेऽतीव, शुक्लपक्षशशाङ्कवत् ॥१५॥
लेखशालोचितं पुत्रं, मत्वा भूमिपतिः क्रमात् । धर्म-कर्मादिशास्त्राणि, पण्डितान्ते ह्यपाठयत् ॥१६॥
यतः—
सकला अपि कलाः कलावतां, विकलाः पुण्यकलां विना किल । सकला अवयवा वृथा यथा, तनुभाजामकनीनिकं वपुः ॥१७॥
लालयेत् पञ्चवर्षाणि, दश वर्षाणि ताडयेत् । प्राप्ते तु षोडशे वर्षे, पुत्रं मित्रमिवाऽऽचरेत् ॥१८॥
धर्माचार्यान्तिके गच्छन्, धर्मशास्त्राणि भूरिशः । जज्ञौ **धनपतिः** पुत्रः, विनयेनानघमानसः[१] ॥१९॥
यतः—
विज्ञानं किमुतोर्ण्णनाभसुगृहीशुष्कासि हंसादिषु, द्वन्द्वं किं न जलायुलावककुले मेषे तथा कुर्कुटे ।
गीतं नृत्यकला च केकि-पिकयोर्वाक् सारिका-कीरयोः,सद्धर्माचरणे परं चतुरता यद्यस्ति मानुष्यके ॥२०॥
रज्जोरप्युपरि भ्रमन्ति कतिचित्तीव्राऽभियोगान्नरा-स्तर्कव्याकरणादिशास्त्रनिपुणाऽभ्यासस्तु तुल्यं कियत् ।
यद्गाढो विनयः श्रुतं यदमलं यद्वीतरागं मनो, यत्सौजन्यमखण्डितं स हि गुणस्तेनैव विद्वान् पुमान् ॥२१॥
यथोचितं कुमारः स, विनयं नमनादिना । माता-पित्रन्यराजन्यजने वितनुतेतराम् ॥२२॥

१. विनयेनाच्छमानसः ।

यतः—

भवन्ति नम्रास्तरवः फलौद्गमै, र्नवाम्बुभिर्भूमिविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः, स्वभाव एवैष परोपकारिणाम् ॥२३॥

कौशेयं कृमिजं सुवर्णमुपलादूर्वाऽपि गोलोमतः, पङ्कात्तामरसं शशाङ्कमुदधेरिन्दीवरं गोमयात् ।
काष्ठादग्निरहेः फणादपि मणिर्गोपित्ततो रोचना, प्राकाश्यं सुगुणोदयेन गुणिनो गच्छन्ति किं जन्मना? ॥२४॥

पुत्रो **धनपतिः** सर्व-मन्त्रिसामन्तराजिषु । विशेषाद्वल्लभो जातश्चोत्तमगुणोदयात् ॥२५॥

तातादेशाद्बलं लात्वा, गत्वा प्रत्यर्थिभूमिषु । युद्धव्यतिकराच्छत्रून्, वश्यकार्षीदनेकशः ॥२६॥

भूयिष्ठं विभवं नित्यं, ददानं भूपनन्दनम् । निरीक्ष्य कवयः श्लाघा-मेवं तस्य वितन्वते ॥२७॥

यतः—

त्वं द्वित्राणि पदानि गच्छसि महीमुल्लङ्घ्य यान्ति द्विष-स्त्वं बाणान् दश पञ्च मुञ्चसि बहून्यस्त्राणि मुञ्चन्ति ते ।
ते देवीपतयस्त्वदस्त्रनिहतास्त्वं मानुषीणां पति-र्निन्दा तेष्वथ वर्णना त्वयि कथं निर्मापिता भूपज ! ॥२८॥

**धरापाल**महीनाथ-पुत्रीं **धनवतीं** सतीम् । सूनु**र्धनपतिः** पित्रा-देशेन परिणीतवान् ॥२९॥

वार्धक्यमागतं दृष्ट्वा, **महीपालो** नरेश्वरः । जिगृहीषुरभूद् व्रतं, शुद्धं श्रीगुरुसन्निधौ ॥३०॥

यतः

आरोहन्ती शिरः स्वान्तादौन्नत्यं कुरुते जरा । शिरसः स्वान्तमायान्ती, दिशते नीचतां पुनः ॥३१॥

पटु रटति पलितदूतो, मस्तकमासाद्य सर्वलोकस्य । परिभवति जरामरणं, चर धर्मं विरम पापेभ्यः ॥३२॥

**महीपालो**ऽथ भूपालः, सर्वेषु जिनसद्मसु । अष्टाह्निका महश्चक्रे, द्रव्यभावार्चनादिना ॥३३॥

शुभे दिने **महीपालः**, सूनो**र्धनपते**स्तदा । स्कन्धदेशे व्यधाद्राज्य-भारं राजन्यसाक्षिकम् ॥३४॥

दीक्षां लात्वा **महीपालः**, **श्रीधर्मा**चार्यसन्निधौ । तपस्तप्त्वा चिरं मृत्वा, तुर्ये स्वर्गे समागमत् ॥३५॥

**॥ इति महीपालभूपस्वर्गगमनस्वरूपम् ॥**

राजा **धनपति**र्न्याय-मार्गात् प्रपालयन् प्रजाः । प्रत्यर्थिभूपतीन् स्वाज्ञां, ग्राहयामास सत्वरम् ॥३६॥

यतः—

क्रमा**च्छत्रत्रयी[ यं ]प्राण-प्रिया** जाता मनोहराः । तस्य भूमिपतेः पुत्रा, विंशतिश्च गुणाकराः ॥३७॥

अन्यदा पावयन् पृथ्वीं, स्वकीयक्रमरेणुभिः । **सुसीमानगरोद्याने**, **संवराक्ष**-यतीश्वरः ॥३८॥

आजगाम यदा भूरि-साधुश्रेणीनिषेवितः । तावत् तत्राऽऽगतो धर्मं, श्रोतुं **धनपति**र्नृपः ॥३९॥

उपविष्टे क्षमापाले, यथास्थानं जनान्विते । **संवराक्ष**मुनिर्धर्म-देशनामकरोदिति ॥४०॥

तथाहि—

**दानं शीलं तपो भावं, कुरुते यः सदाऽऽदरात् । स एव श्रयते मुक्ति-सुखसातानि मानवः ॥४१॥**

यतः—

रम्यं रूपं करणपटुताऽऽरोग्यमायुर्विशालं, कान्ता रूपावजितरतयः सूनवो भक्तिमन्तः ।
षट्खण्डोर्वीतलपरिवृढत्वं यशः क्षीरशुभ्रं, सौभाग्यश्रीरितिफलमहो ! धर्मवृक्षस्य सर्वम् ॥४२॥

धम्मेण धणं विउलं आउं दीहं सुहं च सोहग्गं । दालिद्दं दोहग्गं अकालमरणं अहम्मेण ॥४३॥
सत्पात्राय ददद्दानं, धर्मं कुर्वन् निरन्तरम् । **मातङ्गस्थावर** इव, सम्पदं श्रयते जनः ॥४४॥
तथाहि—
क्षेत्रेऽस्मिन् भरते **रत्न-पुरे** भूमिविभूषणे । जिनाऽऽगारमहेभ्यौकः-श्रेणिरम्ये मनोहरे ॥४५॥
पराक्रमपराभूत-पुरुहूतबलो बली । **सङ्ग्रामशूर**भूपालः, प्रजाः पाति स्म सन्नयात् ॥४६॥युग्मम् ॥
तस्याऽऽसीत् प्रेयसी शील-शालिनी **चन्द्रलेखिका** । पुत्रोऽजनिष्ट **सामन्त-पालः** सुविनयो नयी ॥४७॥
प्राभातिकीं क्रियां कृत्वा, **महीपालो**ऽन्यदा प्रगे । उपविष्टः सभामध्ये, राज्यचिन्तां व्यधात्तमाम् ॥४८॥
तदाऽकस्मात् स्फुरद्देह-दीप्त्या विद्योतयत् सभाम् । आजगाम मरुद्युग्मं, पुण्य**पुञ्ज**मिवाऽनघम् ॥४९॥
तौ तादृशौ स्फुरद्रूपौ, दृष्ट्वा चमत्कृतो नृपः । पप्रच्छाऽत्र युवां कुत्र, स्थानादागच्छतं खलु ॥५०॥
कुत ईदृग् वरं रूपं, भवतोरजनि स्फुटम् । किं कार्यं विद्यते वां तु, जल्पत मे पुरोऽधुना ॥५१॥
आकर्ण्यैतन्नृपप्रोक्तं, वृद्धो देवो जगौ तदा । तव बोधकृते स्वर्गा-दायाताविह भूपते ! ॥५२॥
भूपोऽवग् हेतुना येन, युष्माभ्यामागतं त्विह । तत्सर्वं कथ्यतां कृत्वा, प्रसादं मयि साम्प्रतम् ॥५३॥
ततो वृद्धः सुरः प्राह, पुरे **कनककूटके** । जिनधर्मपरः श्रेष्ठी, **जिनदासो**ऽभवद्धनी ॥५४॥
तस्याऽजनि प्रिया **शीलवत्याह्वा** शीलशालिनी । जिनाधिपोदिते धर्मे, कुशला जानकीव तु ॥५५॥
सत्स्वप्नज्ञापितः पुत्रो, **धनसमृद्ध**संज्ञया । बभूव शोभने घस्रे, रूपलावण्यसुन्दरः ॥५६॥
वर्धमानः क्रमात् पुत्रो, विमोच्य लेखसद्मनि । तातेन पाठितः कर्म-धर्मशास्त्राण्यनेकशः ॥५७॥
श्रेष्ठी पत्नीयुतः शश्वत्, दानादिधर्ममन्वहम् । कुर्वाणः कारयामास, जनानन्यान् बहूनपि ॥५८॥
*यतः—*
**पत्नी प्रेमवती सुतः सुविनयो, भ्राता गुणालङ्कृतः, स्निग्धो बन्धुजनः सखाऽतिचतुरो, नित्यं प्रसन्नः प्रभुः ।**
**निर्लोभोऽनुचरः सुबन्धुसुमुनिप्रायोपभोग्यं धनं । पुण्यानामुदयेन सन्ततमिदं, कस्यापि सम्पद्यते ॥५९॥**
अन्येद्युस्तत्र **माणिक्य-सूरि**पार्श्वे गतो धनी । **जिनदासो**ऽशृणोद्धर्म-देशनामिति सादरम् ॥६०॥
स्यातां सम्पद्विपत्ती सकलतनुमतां, पूर्वकर्मानुभावा-देकं धार्यं सुधैर्यं विपदि तनुमतां, धैर्यवश्या हि सम्पत् ।
एको मृग्यः परात्मा त्रिभुवनशरणं, मुक्तिदायी परात्मा एकः सर्वत्र रक्षां सृजति विधिवदासेवितो जैनधर्मः ॥६१॥
तैलोदकाऽयोऽनल२ वारि दुग्ध३ लोहोल्लसत्सिद्धरसाः क्रमेण । सद्धर्मरङ्गे भविनां बहूनां, दृष्टान्तभेदं बिभराम्बभूवुः ॥६२॥
चारित्रपरिणामेन, शुद्धेन भविनोऽचिरात् । लभते केवलज्ञानं, **चन्द्रवत्** पातकक्षयात् ॥६३॥
तथाहि—
**श्रीपुरे** प्रवरे **पद्म**-श्रेष्ठिनः **पद्मिनी**प्रिया । **चन्द्राह्व**स्तनयो भूरि-शास्त्रज्ञाताऽजनि क्रमात् ॥६४॥
क्रमान्नटविटादीनां, सार्थे तिष्ठन् व्रजन् सदा । पित्रादिभिः सुत**श्चन्द्रो,** वारितोऽपि न तिष्ठति ॥६५॥
यतः—
**कुसङ्गतेः कुबुद्धिः स्यात्, कुबुद्धेः कुप्रवर्तनम् । कुप्रवृत्तेर्भवेज्जन्तु-र्भाजनं दुःखसन्ततेः ॥६६॥**

**तेजोमयोऽपि पूज्योऽपि, घातिना नीचधातुना । लोहेन सङ्गतो वह्निः, सहते घनताडनम् ॥६७॥**
सर्वथा न(दु)ष्टनैकट्यं, विपदे वृत्तशालिनाम् । वारिहारिघटीपार्श्वे, ताड्यते पश्य झल्लरी ॥६८॥
एवं प्रोक्तोऽपि **चन्द्रः** स, कुर्वन् स्तैन्यं नृपानुगैः । धृतो राजाज्ञया शूलां, प्रक्षेप्तुं चालितोऽध्वनि ॥६९॥
तदा लोकै**र्महीपालं**, विज्ञप्य तस्करं स च । मोचितो नगरं त्यक्त्वा, चचालाऽन्यत्र नीवृतिम् ॥७०॥
गच्छन् मार्गे स चौरस्तु, दध्यावद्य कथं मया । स्तैन्यं विधीयते कस्य, गृहे हट्टेऽथ वा पुनः ॥७१॥
तदा मार्गे सरस्यां तु, सिद्धमर्त्यो भ्रेमार्गतः । उत्तीर्य पादुके सद्य, उत्ततार पदोः स्वयम् ॥७२॥
कण्ठे मुक्त्वा सरस्यां तु, स्नानं कर्तुं स मानवः । प्रविष्टो यावता ताव-**च्चन्द्रो**ऽपश्यच्च पादुके ॥७३॥
स दध्यौ पादुके लात्वा, निर्वाहं करवाण्यहम् । ततोंऽह्र्योः पादुके क्षिप्त्वा, चचाल गगनाऽध्वनि ॥७४॥
ततः पश्चात् स्वपुर्यां तु, समेत्य लोकसद्मसु । स्तैन्यं वितनुते लोके, पश्यत्यपि निरन्तरम् ॥७५॥
धर्तुं न शक्यते कैर्न, राजपुम्भिश्च कर्हिचित् । ततः पुरीजनः सर्वो, दुःखितोऽजनि सर्वतः ॥७६॥
ततः सप्तदिनीमध्ये, कथयिष्यामि तस्करम् । प्रतिज्ञामिति भूपालः, कृत्वा पश्यति सन्ततम् ॥७७॥
पुराद् बहिः सुरावासे, देव्याः कण्ठे विभूषणम् । दृष्ट्वा दध्यौ स चौरस्तु, समेत्यत्र सदा ध्रुवम् ॥७८॥
द्वितीयेऽह्नि नृपो याव-द्रहस्तस्थौ तु निःस्वनम् । तावत् स तस्करोऽभ्येत्य, व्योम्नोत्ततार पादुके ॥७९॥
देवीं नत्वा जगौ स्तेनो, भो देवि ! यदि मे धनम् । भूरि सम्पत्स्यते स्तैन्या-द्भागं दास्ये तदा तव ॥८०॥
प्रोक्त्वै(च्यै)वं यावता स्तेनः, परिधत्ते स्म पादुके । तावदेकां नृपालोऽधात्, द्वितीयां तस्करः पदे ॥८१॥
परीत्तपादुकैकः स, स्तेनो व्योम्नि क्वचित्क्षितौ । ताम्रचूड इवाचालीत्, द्वितीयां पादुकां विना ॥८२॥
चौरस्य पृष्ठतो भूपः, स्तोकसेवकसंयुतः । चचाल तस्करं हन्तुं, हतो हत इति ब्रुवन् ॥८३॥
वाहरां तादृशीं पृष्ठा-दागच्छन्तीं स तस्करः । ज्ञात्वा दृष्ट्वा यतिं सामा-यिकस्य फलमापृच्छत् ॥८४॥
यतिः सामायिकस्यैव, फलं मुक्तिर्निगद्यते । सामायिकं तु समता, सर्वत्रैवोच्यते जिनैः ॥८५॥
यतः—
सामाइवयजुत्तो, जाव मणे होइ नियमसंजुत्तो । छिन्नइ असुहं कम्मं, सामाइय जत्ति आ वारा ॥८६॥
सामाईअम्मि उ कए, समणो इव सावओ हवइ जम्हा । एएण कारणेणं, बहुसो सामाइअं कुज्जा ॥८७॥
**प्रणिहन्ति क्षणार्धेन, साम्यमालम्ब्य कर्म तत् । यन्न हन्यान्नरस्तीव्रतपसा जन्मकोटिभिः ॥८८॥** इत्यादि ॥
ततः सद्यो गृहीत्वा स, सामायिकं मलिम्लुचः । निन्दन् स्वं कर्म चिक्षेप, केवलज्ञानमाप्तवान् । ८९॥
उपविश्य द्रुतं देव-कृते काञ्चनविष्टरे । धर्मोपदेशनां दातुं, लग्नो ज्ञानी स तस्करः ॥९०॥
राजा तत्राऽऽगतस्तस्य, दस्योः स्वरूपमद्भुतम् । दृष्ट्वा श्रुत्वा गिरं वर्यां, जाताश्चर्यो जगाविति ॥९१॥
तवेदृक्षं कुकर्तव्यं, कुर्वतो ज्ञानमत्ययम् । जातं निगद्यतां ज्ञानी, जगौ सामायिकान्मम ॥९२॥
ततः सामायिकस्यैव, फलमाकर्ण्य विस्तरात् । धर्मं जीवदयामूलं, जग्राह शिवशर्मदम् ॥९३॥
ततः स नृपतिर्द्वित्र-सामायिकानि सन्ततम् । ललावन्ये जना एवं, जगृहिरे च भूरिशः ॥९४॥
ततः स तस्करो ज्ञानी, प्रबोध्य भूरिमानवान् । कर्मक्षये ययौ मुक्तिं, बहुभव्यजनाऽन्वितः ॥९५॥

१. आकाशात् ।

भूपोऽपि भूरिशो गृह्णन्, सामायिकानि सन्ततम् । क्षिप्त्वा कर्माऽखिलं प्राप्य, ज्ञानं मुक्तिपुरीं ययौ ॥९६॥
श्रुत्वेति सद्मनो भार-मारोप्य तनये तदा । अष्टाह्निकामहश्चक्रे, **जिनदासो** जिनालये ॥९७॥
भूरिमर्त्ययुतो दीक्षां, जग्राह गुरुसन्निधौ । क्रियाकलापकुशलो, बभूव करुणापरः ॥९८॥
वृक्षाणामिव देवद्रु-र्मानसं सरसामिव । वसूनामिव गीर्वाण-मणिस्तार्क्ष्य इवाविषु ॥९९॥
भूभृतामिव देवाद्रि-रहीनामिव सर्पराट् । यथा स्यात् प्रवरः श्रेष्ठिसुतोऽजनि तथा पुरे ॥१००॥
सदा **धनसमृद्धस्य**, कुव्यवसायं वितन्वतः । वर्धते स्म रमा बह्वी, ज्येष्ठोद्वान इवाम्बुधेः ॥१०१॥
अभ्येत्य हट्टतोऽदत्त्वा, साधुभ्योऽन्नं मनागपि । **जिमति**[1] स्म यदा माता, तदा दध्याविति स्फुटम् ॥१०२॥
पूर्वपुण्याऽनुबन्धेन, प्राप्य बह्वीं श्रियं किल । व्ययति स्म वृषे नैव, भुङ्क्ते स्वयं कृताऽऽदरः ॥१०३॥
पापाऽनुबन्धि तद् द्रव्यं, विज्ञाय भोजनक्षणे । माताऽवग् वासिताऽन्नं त्वं, मा भुङ्क्ष्व नन्दनाऽधुना ॥१०४॥
**जिनदासाङ्गजः** प्राह, त्वमुष्णमन्नमत्र मे । परिवेषयसि प्राज्यं, वासिताऽन्नं किमुच्यते ॥१०५॥
एवं द्वितीयघस्रे तु, तृतीयेऽथ चतुर्थके । जल्पन्तीं जननीं भूयो, भूयः पुत्रो जगाविदम् ॥१०६॥
सन्निपाताऽऽश्रितेव त्वं, ग्रहग्रस्तेव किं ? मुहुः । असम्बद्धमिदं वाक्यं, जल्पन्ती लज्जसे न किम् ? ॥१०७॥
मातस्त्वयोष्ण-भोज्यानि, मोच्यन्ते मम भाजने । वासिताऽन्नं च यच्चोक्तं, न जाने तत्र कारणम् ॥१०८॥
वासिताऽन्नस्य हेतुत्वं, मातः ! कथय मे पुरः । माताऽऽहाऽवसरे वच्मि, कुरुष्व माऽऽग्रहं सुत ! ॥१०९॥
जायतेऽवसरे वृष्टि-र्जायतेऽवसरे कृषिः । जायन्तेऽवसरे पुत्रा, नन्दिनोऽवसरे वराः ॥११०॥
इतश्च श्री**यशोभद्र**-सूरयो भूमिमण्डलम् । बोधयन्तः समाजग्मु-स्तस्योद्याने पुरस्य तु ॥१११॥
तत्राऽऽगतान् गुरुन् श्रुत्वा, श्रेष्ठिनी सुतसंयुता । वन्दनायोल्लसद्भावे[2]-भासुरा समुपाययौ ॥११२॥
वन्दित्वा भक्तितः सूरीन्, यथोचितावनीतले । धर्मं श्रोतुं स्थिता पुत्र-युता सा श्रेष्ठिनी मुदा ॥११३॥
गुरवो जगदुर्जन्म-मानुषं दुर्लभं भुवि । दुर्लभा जिनधर्माऽऽप्ति-र्दुर्लभा भावना पुनः ॥११४॥
प्राग्जन्मजाते सुकृते सति प्रभो, विवेकिभिस्तत्पुनरर्ज्यते नवम् ।
नैवं धनादस्य पुनः कुतोऽर्जनम्, वापः क्व वा प्रेषितबीजभोजिनः ॥११५॥
न श्रीर्मे विपुलाऽजनि न च मता, जाता न वा सूनवो-जाता वा न गुणास्पदं न च मुदं, धत्ते कुटुम्बं मम ।
द्विष्टे भूमिपतिः खलाश्च कुदृशो, देहं रुगार्त्तं सुतो-बाह्यो भूरि ऋणं कृणन्ति गृहिणो, चेतांसि चिन्ता इमाः ॥११६॥
आघ्रातं मरणेन जन्म जरयाऽप्यत्युज्ज्वलं यौवनम्, सन्तोषो धनलिप्सया शमसुखं, प्रौढाङ्गनाविभ्रमैः ।
लोकैर्मत्सरिभिर्गुणा वनभुवो, व्यालैर्नृपा दुर्जनै-रस्थैर्येण विभूतिरप्युपहता, ध्वस्तं न किं केन वा ॥११७॥
देशनान्ते स्वसन्देहं, यावद्वक्ति स नैगमः । तावद् ज्ञानेन तज्ज्ञात्वा, जगादेति स सूरिराट् ॥११८॥
वाषिताऽन्नादने जेम्य-माने सन्देह एव ते । विद्यते यो जनन्युक्तः, स सत्यः श्रेष्ठिपुङ्गव ! ॥११९॥
ततः स श्रेष्ठिसूः प्राह, सन्देहं छिन्धि मे गुरो ! । गुरुराह व्रज स्वच्छ !, **सौभाग्या**ऽभिधपत्तने ॥१२०॥
तत्राऽस्ति **स्थावराह्वा**नो-ऽन्त्यजो योऽन्त्यजपाटके । पृच्छ्यतां तव सन्देहं, स भङ्क्ष्यति न संशयः ॥१२१॥
श्रेष्ठिसूर्ध्यातवान् यद्यत्, जल्पन्ति गुरवः किल । तत्तन्न जायते नून-मन्यथा जिनवागिव ॥१२२॥

---
१. जेमति २. ०वा-प्रतौ ॥

यतः—

मिण गोणसंगुलीहिं गणेह वा दंत चक्कलाइं से । इच्छंति भाणिऊणं कज्जंतु तमेव जाणंति ॥१२३॥

कारणविऊ कयाई सयं कायं वयंति आयरिया । तं तह सद्दहिअव्वं भविअव्वं कारणेण तहिं ॥१२४॥

जो गिण्हइ गुरुवयणं, भण्णंतं भावओ विसुद्धमणो । ओसहमिव पिज्जंतं, तं तस्स सुहावहं होइ ॥१२५॥

एवं ध्यात्वा **यशोभद्र**-गुरोर्वचः स्मरन् बहु । समागत्य निजे गेहे, दध्यौ भूयः स नैगमः ॥१२६॥

अकथ्यमानमाख्यातं, गुरुणा यन्ममाग्रतः । तज्जानेऽहं ममाऽल्पः स्यात्, संसारोऽयं[१] वशे पुनः ॥१२७॥

मात्राऽथो ज्ञानिनाऽनेन, केवलज्ञानशालिना । न जल्पितं ममाग्रे यत्, तदत्रास्त्येव कारणम् ॥१२८॥

यतः—

अज्ञानतिमिराऽन्धस्य, ज्ञानाञ्जनशलाकया । नेत्रमुन्मीलितं येन, तस्मै श्रीगुरवे नमः ॥१२९॥

विना गुरुभ्यो गुणनीरधिभ्यो, जानाति धर्मं न विचक्षणोऽपि ।
विना प्रदीपं शुभलोचनोऽपि, निरीक्षते कुत्र पदार्थसार्थम् ॥१३०॥

ध्यात्वेति जननीं पृष्ट्वा, स्वसन्देहच्छिदे ततः । चलन् जगाम **सौभाग्य**-पत्तने श्रेष्ठिसूः स च ॥१३१॥

क्रयविक्रयसंलग्नलोककोलाहलाकुले । नानामुक्तामणिस्वर्ण-समूहपूरितापणे ॥१३२॥

जिनेन्द्रसदनेभ्यो हिः, पताकाकिङ्किणीरवैः । शब्दायमानगीर्वाण-मार्गे गीतमनोहरे ॥१३३॥

पदे पदे लसत्क्रीडा-नाटकेऽश्वेभसङ्कुले । तस्मिन्पुरे स बभ्राम, विस्मयस्मेरलोचनः ॥१३४॥त्रिभिर्विशेषकम् ॥

मणिमुक्ताफलस्वर्ण-रूप्यताम्रादिसन्ततीः । पश्यन् पदे पदे यातो, **धनसारा**ऽऽपणे स च ॥१३५॥

**धनसारं** गलन्नेत्रं, जर्जराङ्गं वलिश्रितम् । कम्पमानतनुं श्वेत-वालशोभितमस्तकम् ॥१३६॥

बद्धमुष्टिं भृशं गालिं, ददानमर्थिने सदा । विघट्य क्रमुकं घुण्टं, बध्नन्तं वसने पुनः ॥१३७॥

परीत्तप्रजरच्चीरं, निष्ठुरोक्तिपरायणम् । वञ्चयन्तं जनान् भूरीन्, कुयशो विश्रुतं स्फुटम् ॥१३८॥

बर्जरादिकणान् भोक्तुं, प्रथयन्तं निजे गृहे । तैलं स्नेहकृते चाल्पं, स ददर्श वणिक्सुतः ॥१३९॥
पञ्चभिःकुलकम्॥

दध्यौ **धनसमृद्धः** स, लक्ष्म्या दासाग्रणीर्वणिक् । एष एव विराजेत, स्वल्पपुण्योऽधमाशयः ॥१४०॥

यतः—

**न दातुं नोपभोक्तुं वा, शक्तोऽतिकृपणः स्वयम् । किन्तु स्पृशति हस्तेन, नपुंसक इव स्त्रियम् ॥१४१॥**

**अस्ति जलं जलराशौ, क्षारं तत्किं विधीयते तेन । लघुरपि वरं स कूपो, यत्राऽऽकण्ठं जनः पिबति ॥१४२॥**

**अतिसञ्चयकर्तॄणां, वित्तमन्यस्य कारणम् । अन्यैः सञ्चीयते यत्ना-न्मध्वन्यैः परिभुज्यते ॥१४३॥**

अधः क्षिपन्ति कृपणा, वित्तं तत्र यियासवः । सन्तस्तु गुरुचैत्यादौ, तदुच्चैः फलकाङ्क्षिणः ॥१४४॥

उक्तं च—

विघट्य घुण्टं क्रमुकं रदाग्रैर्बध्नन्ति चैकं वसनाञ्चले स्वे ।
पितामहत्वं कृपणेषु नाम, वहन्ति मूढा विभवेषु सत्सु ॥१४५॥

---

१. प्रतौ तु "संसारो ऽयं वशे" इति लिखितम् संशोधकेन उपर्युक्तः पाठो लिखितः ।

सत्यामपि श्रियि प्रायः, कृपणा मूढबुद्धयः । नास्ति नास्तीति जल्पन्तो, नादन्ति न ददत्यपि ॥१४६॥
ततो **धनसमृद्धो**ऽवग्, भो श्रेष्ठिन् ! कृपणोत्तम ! । **स्थावरस्या**न्त्यजस्यौको, विद्यते कुत्र पाटके ॥१४७॥
क्रयविक्रयसञ्जात-चेताः शून्यमनुष्यवत् । श्रेष्ठी प्रोवाच किं पण्यं, गृह्णासि जल्प साम्प्रतम् ॥१४८॥
**समृद्धो**ऽवग् मया गेहं, **स्थावर**स्यैव पृच्छ्यते । **धनसार**स्ततः प्राह, कार्यं किं जल्पनैस्तव ॥१४९॥
अस्माच्च पाटकाद्दूरं, **मातङ्गाऽभिध**पाटके । चञ्चिण्या वामतः पार्श्वे, विद्यते **स्थावरा**लयः ॥१५०॥
तस्येति वचनं श्रुत्वा, **स्थावरा**ऽन्त्यजमन्दिरे । गत्वा स **स्थावरं** धर्म-ध्यानसत्कं ददर्श च ॥१५१॥
स्थापनाचार्य-सन्यस्तदृष्टिः सामायिकाऽऽदरः । गणयन् पञ्चनमस्कारान्, करात्तजपमालिकः ॥१५२॥
दृष्ट्वा स ध्यातवात् धर्म-मूर्तिरेष निरीक्ष्यते । गुरुणा प्रेषितोऽस्यान्ते, सुधर्मवृद्धिहेतवे ॥१५३॥
वणिक् प्राहेदमोकः किं, **स्थावर**स्यास्य ? जल्प्यताम् । मौनी स **स्थावरो** हस्त-संज्ञया तं न्यवीविशत् ॥१५४॥
प्रतिमां पारयित्वा स, वन्दित्वाऽञ्जलियोजनात् । उपवेशाय तस्यैवा-सनमादरतो ददौ ॥१५५॥
पप्रच्छाऽत्र किमर्थं त्वं, कुतः समागतो वद । वणिग् जगौ स्वकार्यं तु, गुरूक्तमन्त्यजाग्रतः ॥१५६॥
**स्थावरो** ध्यातवान् पार्श्वे, ममैष गुरुणाऽत्र यत् । प्रेषितः कारणं तत्र, विद्यते विपुलं खलु ॥१५७॥
यतोऽहं मूर्खमुख्योऽस्मि, ज्ञानिनो गुरवः पुनः । एष धर्माऽर्थिकोऽत्राऽऽगाद्, गुरुवाग्विहिताऽऽदरः ॥१५८॥
मत्वेति प्राह मातङ्ग-स्त्वं मे साधर्मिकोऽसि यत् । अतः प्राघूर्णकोऽद्यात्र, भव दास्येऽहमुत्तरम् ॥१५९॥
मम गृहे न भोक्तुं ते, युक्तं हीनस्य जातितः । ततो वणिग्गृहे भोज्यं, दास्येऽहं तव सत्तम ! ॥१६०॥
तत उत्थाय गत्वा स, **धनसारा**पणे त्वरात् । भोजनं दापयामास, तस्य साधर्मिकस्य तु ॥१६१॥
प्रादाय भोजनं तस्या-नुमोदनापरः स च । अन्त्यजः स्वगृहेऽभ्येत्यो-पविष्टः सदनाङ्गणे ॥१६२॥
**धनसारो**ऽन्त्यजप्रोक्त-मर्द्धं धान्यं निजालये । तस्यादनकृते प्रैषी-दहो ! लोभान्धता खलु ॥१६३॥
यदा **धनसमृद्धो**ऽगात्, भोक्तुं कृपणमन्दिरे । तदा श्रेष्ठिप्रियाऽज्ञासी-त्पितृव्यनन्दनं निजम् ॥१६४॥
पृष्टः सोऽथ तया भ्रातः !, कस्माद्देशादिहाऽऽगतः । कस्याङ्गजोऽसि किं कार्यं, प्रोच्यतां स जगावथ ॥१६५॥
पुरात् **कनककूटा**ऽऽख्यात्, **जिनदासा**ङ्गजोऽहकम् । कार्याऽर्थं **स्थावर**स्यान्ते, मातङ्गस्य समागमम् ॥१६६॥
साऽवक् पितृव्यपुत्रस्त्वं, प्राघूर्णोऽस्मद्गृहे भव । त्यज मातङ्गभोज्यं स, जगाद भगिनीं प्रति ॥१६७॥
साधर्मिकान्त्यजस्यैव, ममाऽद्यास्तु च भोजनम् । प्रातः स्थास्यामि चेद् भोज्यं, करिष्यामि तदा तव ॥१६८॥
कृत्वाऽथ भोजनं सद्यो-ऽन्त्यजालयान्तिके स च । यावद्यातोऽश्रुणोत्ताव-त्करुणस्वररोदनम् ॥१६९॥
ततः स पृष्टवान् पार्श्व-स्थितान् लोकान् किमत्र तु । रुद्यते मनुजैरुच्चैः, स्वरं तेऽथ जगुस्तदा ॥१७०॥
शूलार्त्या **स्थावरो**ऽद्याशु, पञ्चत्वं गतवान् खलु । तेन तद्गेहिनी बाढं, रोदिति स्वजनान्विता ॥१७१॥
ततो दध्यौ **धनो**ऽहं तु, गुरुणा यस्य सन्निधौ । प्रेषितः स मृतिं यातः, करवायधुना किमु ॥१७२॥
यद्यहं वासरे याते-ऽभविष्यमिहागतः । तदा भग्नोऽभवन्मे तु, सन्देहश्चिरकालजः ॥१७३॥
क्षणाद्दध्यौ स यद्भाव्यं, यथा भवति देहिनाम् । तत्तथा जायते शक्यं, नान्यथा कर्तुमीश्वरैः ॥१७४॥
यतः—
भवितव्यं भवत्येव, नालिकेरफलाम्बुवत् । गन्तव्यं गतमेव स्या-द्गजभुक्तकपित्थवत् ॥१७५॥

दैवमुल्लङ्घ्य यत्कार्यं, क्रियते फलवन्न तत् । सरोऽम्भश्चातकेनाऽऽत्तं, गलरन्ध्रेण गच्छति ॥१७६॥

**यद्धात्रा निजभालपट्टलिखितं, स्तोकं महद् वा धनं,**
**तत्प्राप्नोति मरुस्थलेऽपि नितरां, मेरौ ततो नाधिकम् ।**
**तद्धीरो भव वित्तवत्सुकृपणां, वृत्तिं वृथा मा कृथाः,**
**कूपे पश्य पयोनिधावपि घटो, गृह्णाति तुल्यं जलम् ॥१७७॥**

ततोऽतिविमनाः सोऽपि, समेत्य भगिनीगृहे । प्रणम्य भगिनीं प्राह, चलिष्यामि पुरं प्रति ॥१७८॥
स्वसाऽवग् भवता कल्ये, कृत्वा भोज्यं ममालये । चलितव्यं जगौ सोऽथ, कृपणो रुष्यते पतिः ॥१७९॥
भगिन्यवक् पतिं रुष्टं, गिराऽनुकूलयाम्यहम् । एवं स्वसाऽऽग्रहं कृत्वा-ऽतिष्ठिपत्स्वं सहोदरम्[1] ॥१८०॥
प्रगे सा स्वापणे गत्वा, पत्युः पार्श्वे जगाविति । भ्राताऽऽगतोऽस्ति मे तेन, घृतखण्डादि दीयताम् ॥१८१॥
पत्न्याः श्रुत्वा वचस्तादृग्, लक्ष्मीगमनहेतुकम् । सकोपः श्रेष्ठिराट् प्राह, मुग्धे ! त्वं किमसि प्रिये ! ॥१८२॥
यद्यर्पयामि तुभ्यं चेत्, घृतादि कमलाऽखिला । तदा गता मम प्राणाऽपहारैकनिबन्धनम् ॥१८३॥
कान्ताऽवग् दीयतामद्य, घृतादिकं प्रसद्य मे । पतिः प्राह प्रसादेना-ऽनेनाऽलं व्रज सद्मनि ॥१८४॥
तद्विस्मृतं तवेदानीं, भ्राता मे यः समागतः । निष्कासितो मया गेहा-दभक्तो मध्यवासरे ॥१८५॥
पुरा **विहारिते**[2]ऽन्नाद्ये-ऽधिके साधुभ्य आदरात् । यत् त्वां काष्ठैर्हतः[3]स्तत्ते, विस्मृतं स्मारयाम्यहम् ॥१८६॥
यत् त्वया स्वेच्छया लात्वा, सुमानि पूजितो जिनः । यदा तदा मयाऽघाति, भवन्ती तच्च विस्मृतम् ॥१८७॥
एकदा व्ययिते द्रम्म-द्विके त्वया जिनालये । मृतप्रायोऽभवं दन्त-सङ्कटात्तच्च विस्मृतम् ॥१८८॥
आदौ काष्ठानि विपिना-दानीयानीय सन्ततम् । मम विक्रयतः शीर्षे, खल्वाटत्वमजायत ॥१८९॥
कुर्वतो मे कृषिं पूर्वं, कर्कशाश्मसहोदरौ । हस्तावजायेतां घृष्टा, नखा अपि समे भृशम् ॥१९०॥
पत्नी प्राह यदि भ्राता, यात्यभक्तो गृहात्तव । तदाऽऽत्मनो गृहस्यैव, शोभा यात्ययशो भवेत् ॥१९१॥
श्रेष्ठ्यवग् यदि ते स्नेहो, बान्धवे विद्यते भृशम् । तदाद्य वल्लकैस्तैल-युतैर्भवतु भोजनम् ॥१९२॥
पत्न्यवग् घृतपूरैस्तु, भोजनं यस्य दीयते । तस्य तैलयुतं भोज्यं, दीयते साम्प्रतं कथम् ? ॥१९३॥
योऽर्जितं विभवं नैतं, दत्तेऽर्थिभ्यः स्वकाय वा । तस्य श्रीर्निष्फला सर्वा, जायतेऽसातमेव च ॥१९४॥
यतः—
धम्मि न वेचइ रूअडो, मिंठो ग्रास न खाइ । राइलि चोर पलेवणइ धण पिक्खंतो जाइ ॥१९५॥
उपरवाडइ हाथकावकि दीसइ जमतणउ । नवि संबल नवि साथ घडीमाहि गमांतरूं ॥१९६॥
गामंतरं संसारि करिसिइ पण वलिसिइ नहीं । संबलई ण पसारि लेसिउ नहीं तो लांघिसो ॥१९७॥
जीवकडेवर इम भणइ मइं हूं तइं करि धम्म । हूं माटी तूं रयणमय हारिम माणुसजम्म ॥१९८॥
श्रेष्ठी प्राह प्रिये ! यद्यद्, भवत्या प्रोच्यतेऽधुना । तत्तदूषरभूवाप, इव सर्वं भविष्यति ॥१९९॥
उक्तं च :—
जलशीतनिदाघक्षुत्तृषा-जनितात्कष्टराद्यदर्जितम् । वद पत्नि ! मयाऽथ हेलया, द्रविणं किम् व्ययते मुधैव तत् ।२००।

१. अयं तु पितृव्यपुत्रः न सहोदरः, अतः कथमिदं घटेत । २. प्रलिलीमिते प्रतिलाभिते । ३. काष्ठैरहंस्तत्ते इति समीचिनम् ।

श्रुत्वेति श्रेष्ठिराट्पत्नी, मौनभाग् निजमन्दिरे । अभ्येत्य प्रातिगेहात् सा, घृतादि समुपानयत् ॥२०१॥
घृतपूरादि पक्तुं सा, यावल्लग्नाऽभवन्मुदा । तावच्छ्रेष्ठ्यागमद् हट्टाद्, गृहे कृपणशेखरः ॥२०२॥
पृष्टा तेन प्रिया वल्लाः, किं त्वया प्रगुणीकृताः । पत्नी प्राह प्रतीक्ष्यतां, घृतपूरो विधीयते ॥२०३॥
वल्लान्मुक्त्वाऽद्य भुङ्क्ष त्वं प्राघूर्णकसंयुतः । घृतपूरा यतो भ्रातृ-हेतवे विहिता मया ॥२०४॥
उक्तं च तया—
अपि त्वया नाथ ! लवं विलम्ब्य, भ्रात्रा समं भोजनमद्य कार्यम् ।
पते ! यतो मोदकशालिदालिसत्का कृता ते रसवत्यभीष्टा ।२०५।
वाचं च श्रुत्वेति वक्षः स्वं, मुष्ट्या निहत्य कर्कशम् । गत्वा मध्येगृहं दध्यौ, गता मे कमला समा ॥२०६॥
दुःखं दधद् भृशं लक्ष्मीः, गता गतेति मे गृहात् । दैव दैवेति जल्पंश्च, सुष्वाप शयने स च ॥२०७॥
किं करोमीति कस्याग्रे, पूत्करोमि प्रियेदृशी । ध्यायन्नेवं मुखं वास-च्छादितं चक्रिवांस्तदा ॥२०८॥
गता गतेति स ध्यायन्, लक्ष्मीरद्य मदालयात् । **धनसारो** द्रुतं मुक्तः, प्राणैर्निस्व इव श्रिया ॥२०९॥
यतः—
एकस्यैकं क्षणं दुःखं, मार्यमाणस्य जायते । सपुत्रपौत्रस्य पुन-र्यावज्जीवं गते धने ॥२१०॥
अर्थानामर्जने दुःख-मर्जितानां च रक्षणे । आये दुःखं व्यये दुःखं, धिग्द्रव्यं दुःखभाजनम् ॥२११॥
क्लेशाय विस्तराः सर्वे, सङ्क्षेपास्तु सुखावहाः । परार्थं विस्तराः सर्वे-त्यागमात्महितं विदुः ॥२१२॥
गोशतादपि गोक्षीरं, मानं मूटशतादपि । मेदिनी मञ्चकस्थानं, शेषाः परपरिग्रहाः ॥२१३॥
सारां रसवतीं वर्यां, विधाय घेवरादिकाम् । भोजनाय वचोभिस्तं, कोमलैः समजूहवत् ॥२१४॥
प्रत्युत्तरमददानं, कान्तं मत्वा व्यचिन्तयत् । रुष्टोऽधुना पतिः सान्त्व-याम्यतो मृदुवाक्यतः ॥२१५॥
गत्वा मध्येगृहं पत्नी, जगौ स्वामिन्पदोस्तव । लग्नाऽस्मिन्नपराधं मे, क्षमस्वोत्तिष्ठ भुङ्क्ष्व हि ॥२१६॥
मुञ्च रोषं कुरुष्व त्वं, घृतपूरादिभोजनम् । अतः परं त्वदीयोक्तं, वल्लकादि च रध्यते ॥२१७॥
एवं प्रोक्तः पतिर्वक्ति, न यदाऽऽस्यं तदा च सा । अपसार्याऽम्बरं याव-द्वीक्षते श्रेष्ठिराड्मुखम् ॥२१८॥
तावत्फेनं मुखे वीक्ष्य, पत्युः प्राणान्गतान्दृढम् । पत्नी दध्यौ कथं रक्ष-णीया श्रीर्भूधवान्तिकात् ॥२१९॥
अपुत्रोऽसौ मृतः कान्तो, गर्भो मे विद्यतेऽधुना । कदाचिन्नन्दनो भावी, तदा वर्यं भविष्यति ॥२२०॥
कपाटयुगलं द्वारे, दत्त्वा साऽवक् सहोदरम् । उत्तिष्ठ भोजनं भ्रातः !, कुरु ते भावुकोऽधुना ॥२२१॥
सुप्तोऽस्ति हृदये पीडा, वर्ततेऽथ तया तदा । सोदरो जेमितो वर्य-घृतपूरैर्लसत्तमैः ॥२२२॥युग्मम् ॥
भुक्ते सहोदरे प्राह, भगिनी सोदरं प्रति । भावुको भवतोऽकस्मात्, स्वर्गलोकं गतोऽधुना ॥२२३॥
न कदाचिद्ददौ दानं, न भुङ्क्ते स्म स्वयं पुनः । वल्लतैलादृते भोज्यं, न कृतं पर्वणि क्वचित् ॥२२४॥
मया विनिर्मितं भोज्यं, घृतपूरादिकं स्फुटम् । विज्ञाय हृदयस्फोटात्, परलोकं गतः स च ॥२२५॥
चतुःकोटीश्वरोऽप्येष, स्वं दरिद्रं वदन् जने । भवतो भावुको नैव, विश्रामं लातवान् क्वचित् ॥२२६॥
विज्ञायाऽपुत्रिणं प्राणै-र्मुक्तं ते भावुकं नृपः । ग्रहीष्यति श्रियं सर्वा-मुपायोऽतो विधीयते ॥२२७॥
यावत्कोऽपि न वेत्त्यत्र, मृतं ते भावुकं स्फुटम् । तावद् गर्तान्तरे क्षिप्त्वा, छन्नं प्रलिप्यते ननु ॥२२८॥

अन्यदद्य मया लब्धं, स्वप्नं वर्यतमं च यत् । तेन विज्ञायते पुत्रो, भविष्यति ममाऽचिरात् ॥२२९॥
यावत्प्रसूयते पुत्रो, मया तावदिह स्फुटम् । तिष्ठाऽहं करवै कञ्चि-त्प्रपञ्चं धनरक्षणे ॥२३०॥
सोदरं स्थापयित्वाथ, प्रेष्य हट्टे निजेऽथ सा । लोकाग्रे प्रोचुषी कान्त-श्चटितो वहनेऽधुना ॥२३१॥
अर्जयित्वा श्रियं बह्वीं, समेष्यति पुरान्तरे । एवं प्रोक्त्वा सशृङ्गारा, तस्थौ सा श्रेष्ठिगेहिनी ॥२३२॥
भर्त्ता वार्धौ गतो लक्ष्म्यै, जल्पन्तीति जनान् प्रति । गमयामास भूयिष्ठ-कालं शृङ्गारधारिणी ॥२३३॥
विदग्धा सा वदन्तीति, सम्प्राप्ते समयेऽन्यदा । अजीजनत् सुतं वर्य-लक्षणं रुचिरेऽहनि ॥२३४॥
बालोऽपि जातमात्रोऽवग्, भो ! भो ! मातुल ! मातुल ! । आगच्छाऽत्र मदीयोक्तं, कुरुष्व मा विलम्बय ॥२३५॥
आकर्ण्येति शिशोर्वार्णीं, **धनसार**प्रिया तदा । हट्टादाकारयत्सद्यः, सोदरं सख्युपान्ततः ॥२३६॥
सशङ्को मातुलो हट्टाद्, यावदागान्निकेतने । तावच्छिशुर्जगौ मातृ-भ्रातर्मात्तङ्गपाटके ॥२३७॥
गच्छ चिञ्चणिकापार्श्वे, वामे **स्थावर**कालये । तस्य पत्न्या अपत्यानि, बहूनि सन्ति साम्प्रतम् ॥२३८॥युग्मम्॥
पुनस्तया सुतोऽद्यैव, जनितो विद्यते खलु । गृहे त्वद्य तदीयेऽन्नं, समस्ति न मनागपि ॥२३९॥
धान्यं विना मुधा प्राणा-स्तस्या यास्यन्ति निश्चितम् । रूपकान् पञ्च तस्यै त्वं, देहि मातुल ! सत्वरम् ॥२४०॥
यतः—
पञ्च नश्यन्ति पद्माक्षि !, क्षुधार्तस्य न संशयः । तेजो लज्जा मतिर्ज्ञानं, मदनश्चापि पञ्चमः ॥२४१॥
लज्जामुज्झति सेवतेऽन्त्यजजनं, दीनं वचो भाषते, कृत्याकृत्यविवेकमाश्रयति नो, नापेक्षते सद्गतिम् ।
भण्डत्वं विदधाति नर्त्तनकलाभ्यासं समभ्यस्यते, दुष्पूरोदरपूरणव्यतिकरे, किं किं न कुर्याज्जनः ॥२४२॥
भागिनेयोदितं कृत्वा, मातुलस्त्वरितं तदा । आगत्यावक् शिशो ! ताव-कीनोक्तं विहितं मया ॥२४३॥
भागिनेयो जगौ मातृ-भ्रातर्मामुपलक्षसि ? । मातुलेनोदितं नैवो-पलक्षयाम्यहं शिशो ! ॥२४४॥
शिशुः प्राह **यशोभद्र-सूरिणा** ज्ञानिना पुरा । **स्थावरस्यान्त्य**जस्यान्ते, यस्य त्वं प्रेषितोऽसि हि ॥२४५॥
वासितान्नस्य सन्देह-च्छिदे स **स्थावरो**ऽस्म्यहम् । साधर्मिकस्य दानेन, जातः श्रेष्ठितनूभवः ॥२४६॥ युग्मम् ॥
दत्तदानाऽनुमोदेन, निबद्धमनुजोऽधुना । चतुःकोटीधनस्येशो-ऽभूवं पुत्रो वणिग्वर ! ॥२४७॥
यतः—
दानेन चक्रित्वमुपैति जन्तुर्दानेन देवाधिपतित्वमुच्चैः । दानेन चञ्चत्तमकीर्तिवृद्धिर्दानं भवोत्तारणयानपात्रम् ॥२४८॥
सङ्ग्रहैकपरः प्राप, समुद्रोऽपि रसातलम् । दाता तु जलदः पश्य, भुवनोपरि गर्जति ॥२४९॥
कदर्योपात्तवित्तस्य, भोगो भाग्यवतां भवेत् । दन्ता दलन्ति कष्टेन, जिह्वा गिलति लीलया ॥२५०॥
स श्रेष्ठी **धनसार**स्तु, चतुःकोटिधनेश्वरः । अदत्त्वा धनमर्थिभ्यो, घृतपूरादनश्रुतेः ॥२५१॥
अकस्माद्धृदयोत्पन्न-श्वासको जीवितोज्झितः । अन्त्यजस्य सुतो जातः, **स्थावरस्य** मृतस्य तु ॥२५२॥युग्मम् ॥
कृतपूर्वभवोत्पन्न-विभवादिह **संसृतौ** । प्राप्तभूरिधनः श्रेष्ठि-सुतोऽभूवं मनोहरः ॥२५३॥
त्वं पूर्वस्मिन्भवे **वीर-पुरे सोमा**ऽभिधो वणिक् । उपार्ज्य विभवं दूर-विषयाद्वलितोऽन्यदा ॥२५४॥
**कलाकेलिपुरो**द्याने, रद्धमन्नं यदा त्वया । तदाऽकस्माद्यतिद्वन्द्वं, मध्याह्ने समुपागमत् ॥२५५॥
प्रासुकमन्नमानन्दात्, तस्मै दत्त्वा तदा त्वकम् । बुभुजे तेन पुण्येन, भवेऽत्र धनवानभूः ॥२५६॥

यतः—

अन्नोपाश्रय-भैषज्य-वस्त्र-पात्रादिदानतः । अवष्टम्भोऽनेकधा स्या-दन्नदानं विशेषतः ॥२५७॥

सासाईतंपि जलं पत्तविसेसेण अंतरं गुरूअं । अहिमुहिपडिअं गरलं, सिप्पउडे मुत्तियं जायइ ॥२५८॥

सैव भूमिस्तदेवाम्भः, पश्य पात्रविशेषतः । आम्रे मधुरतामेति, कटुत्वं निम्बपादपे ॥२५९॥

पूर्वसंसृतिसम्भूत-पुण्यप्राप्तधनोच्चयः । साध्वादिभ्योऽन्नदानं त्वमदत्त्वा स्फारसि[1] यत्सदा ॥२६०॥

ततश्च वासितान्नं त्वं, पुत्र ! भुङ्क्ष्व[2] कथं सदा । भोजनावसरे भूयो, भूयो मात्रेति जल्पितः ॥२६१॥

**धनसारो**ऽपि पूर्वस्मिन्, भवे देवगृहेऽन्यदा । चतुर्द्रम्मसुमै**रादि**-देवमर्चितवांस्तदा ॥२६२॥

तेन पुण्येन सञ्जात-श्चतुष्कोटीश्वरो धनः । इह दानमदत्त्वा च, मातङ्गतनयोऽभवत् ॥२६३॥

गुरुणाऽपि भवानत्र, प्रेषितो बोधहेतवे । भवाब्धितारकाः सन्ति, गुरवः सकृपा यतः ॥२६४॥

पूर्वपुण्योपभोगेन, **धनसारो** यथा धनी । दुःखानां भाजनं जज्ञे, तथा भावी भवानपि ॥२६५॥

[3]प्रोच्येति विरते बाले, जल्पनात् मातुलः स च । दध्यौ न कोऽपि वदत्येवं, बालो जन्मक्षणे क्वचित् ॥२६६॥

माता भ्रातृयुता पुत्र-जन्मोत्सवं विधाय सा । सूनोः **शङ्कर**नामेति, ददौ सज्जनसाक्षिकम् ॥२६७॥

वल्लभः सर्वलोकाना-मुदारप्रकृतिस्तदा । रिङ्खन् लालां वमन् लल्लां, वाणीं जल्पन् स **शङ्करः** ॥२६८॥

**धनसार**धनाधीशे, जाते तस्मिन् शिशौ सति । आपृच्छ्य भगिनीं मातुः, पादावर्चितवान् स च ॥२६९॥

**स्थावरा**ऽन्त्यजसम्बन्धं, स च मातुः पुरस्तदा । प्रोच्य दानपरो जातो, बाढं **धनसमृद्धकः** ॥२७०॥

पोषयन् दानधर्मं स, चर्चयन् जननीपदौ । बालजल्पनसम्बन्धं, ज्ञातुमिच्छति सन्ततम् ॥२७१॥

क्रमाद् **धनसमृद्धस्य**, ददतो दानमन्वहम् । बभूवुर्नन्दनाः पञ्च, धर्मकर्मपरायणाः ॥२७२॥

उत्थाय शयनात्स्मृत्वा, नमस्कारान् सुताश्च ते । गच्छन्ति प्रथमं देव-गृहे नन्तुं जिनालये[4] ॥२७३॥

ततो गुरुक्रमौ नत्वा-ऽभ्येत्य स्वसदने ततः । प्रणमन्ति पदौ मातु-स्ततोऽन्यं कार्यमादधुः ॥२७४॥

बालजल्पनसम्बन्धं, ज्ञातुं **धनसमृद्धकः** । यावदिच्छुरभूत् तावद्, वनपालो जगाविति ॥२७५॥

विहरन्तोऽवनीपीठे, **श्रीयशोभद्रसूरयः** । भूरिसाधुयुता एयु-रुद्याने **सुन्दरा**ऽभिधे ॥२७६॥

ततो **धनसमृद्धः** स, मात्रादिपुत्रसंयुतः । ययौ श्रोतुं जिनेन्द्रोक्तं, धर्मं शिवसुखप्रदम् ॥२७७॥

त्रिः प्रदक्षिणयन् श्रेष्ठी, नत्वा गुरुपदाम्बुजम् । स्थाने यथोचिते धर्मं, श्रोतुं [स] समुपाविशत् ॥२७८॥

तथाहि—

**जन्म लब्धमिदमुज्ज्वले कुले, प्रीतिरस्ति सहसा गुणिष्वपि ।**
**धर्म एष विमलः कुलक्रमादागतश्च जिननाथदेशितः ॥२७९॥**

**भव्यभावमवगम्य लक्षणैरर्थिनां च विनयादिभिः परम् ।**
**उत्तरोत्तरगुणोपलब्धये, तत्त्वबिन्दुरुपदिश्यते सताम् ।२८०।**

**शिक्षयन्ति गुरवः पदे पदे, दर्शयन्ति शिवसद्मवर्तिनीम् ।**
**रोचते च रुचिरं विवेकिनां, भव्यजन्तुनिवहाय तत्स्वयम् ॥२८१॥**

---

१. स्फायसे । २. भुङ्क्षे । ३. आदर्शे क्वचित् 'प्रोक्त्वा' क्वचित् 'प्रोच्य' इति पाठः दृश्यते । अस्माभिः सर्वत्र 'प्रोच्य' इति पाठः कृतः ॥ ४. जिनाधिपम् ।

अत्थो अधम्मो अ तहेव कामो, एए तओ लोगतया हवंति ।
सुत्तत्थ जुत्ताइं सुभासिआइं, धम्मत्थकामेसु पवेइआइं ॥२८२॥
धम्मेण अत्था पउरा भवंति, कामाय देवा सुरसाणुसाणं ।
धम्मं चरित्ता रिसओ महप्पा, ठाणाणि पत्ता अयरामराणि ।२८३।
देशनान्ते स्वसन्देह-च्छिदे **धनसमृद्धकः** । प्रोवाच **धनसारस्य**, जातमात्रोऽङ्गजस्तदा ॥२८४॥
यद्वासितस्य भुक्तस्य, सन्देहं मे बभञ्ज सः । तत्कथं जल्पितं तेन, जातमात्रेण जल्पता ॥२८५॥[युग्मम्]
सूरिराचष्ट यज्जात-मात्रः स बालको जगौ । तत्सत्यं भागिनेयेन[1], जानीहि **धनसमृद्धक** ! ॥२८६॥
**स्थावरो** यश्चतूरूपै-र्भोजनं धर्मिणस्तव । दापयामास तेनाऽभू-च्चतुःकोटिधनेश्वरः ॥२८७॥
**धनसारस्य** पुत्रः स, लावण्यतनुवैभवः । बभूव कृतगीर्वाण-सान्निध्यो दानशेखरः ॥२८८॥
**स्थावरश्च** यदा तुभ्यं, दानं प्रदाप्य वेगतः । यातः स्वसदने ताव-द्वक्षःपीडाऽभवद्भृशम् ॥२८९॥
**स्थावरेण** ततः सार्व-मतदेवः स्मृतः क्षणात् । आगतोऽवग् कथं धर्मिन् !, ध्यातः कार्यं वदाऽधुना ॥२९०॥
आचष्ट **स्थावरो** वक्षः-पीडा प्राणापहारिका । विद्यते साम्प्रतं तेन, कदा मेऽस्ति मृतिर्वद ॥२९१॥
स देवोऽवग् घटीयुग्म-मध्ये ते मरणं ध्रुवम् । भविष्यति कुरुष्व त्वं, ध्यानं जैनमतोदितम् ॥२९२॥
स्थावरोऽवग् त्वयाऽग्रे तु, भवे जातस्य मे मुखे । अवतीर्याऽपाकार्यश्च, वासितान्नस्य संशयः ॥२९३॥
कुत्र मे गमनं भावि, जल्प निर्जर ! साम्प्रतम् । देवोऽवग् **धनसारस्य**, भविष्यति सुतः क्रमात् ॥२९४॥
ततः प्रसन्नवचसा, तेनैवामृतभोजिना । **शङ्करस्या**नने सद्यो-ऽवतीर्य जननक्षणे ॥२९५॥
भवतो वासिताऽन्नस्य, संशयो भिन्नवान्ननु । अतो दानं प्रदातव्यं, पात्रेभ्यो भवता वणिक् ! ॥२९६॥[युग्मम्]
अनित्यो विभवः सर्वः, कुटुम्बमपि तादृशम् । जीवितं चपलं भोगा-श्चञ्चला गजकर्णवत् ॥२९७॥
संसारे भ्रमतां सर्व-जीवानां क्षणमेककम् । दृश्यते न सुखं मुक्ति-पुरीमृते क्वचित्कदा ॥२९८॥
यतः—
सत्त्वेषु मैत्रीं गुणिषु प्रमोदं, क्लिष्टेषु जीवेषु कृपापरत्वम् ।
मध्यस्थभावं विपरीतवृत्तौ, सदा ममाऽऽत्मा विदधातु देव ! ॥२९९॥
शरीरतः कर्तुमनन्तशक्तिं, विभिन्नमात्मानमपास्तदोषम् ।
जिनेन्द्रकोशादिव खड्गयष्टिस्तव प्रसादेन ममाऽस्तु शक्तिः ॥३००॥
दुःखे सुखे वैरिणि बन्धुवर्गे, योगे वियोगे भवने वने वा ।
निराकृताशेषममत्वबुद्धिः, समं मनो मेऽस्तु सदापि नाथ ! ॥३०१॥
बोधिः समाधिः परिणामशुद्धिः,स्वात्मोपलब्धिः शिवसौख्यसिद्धिः ।
चिन्तामणिं चिन्तितवस्तुदाने, त्वां वन्द्यमानस्य ममाऽस्तु देव ! ॥३०२॥
संयोगतो दुःखमनेकभेदं, यतोऽस्तु ते जन्म वने शरीरी ।
ततस्त्रिधाऽसौ परिवर्जनीयो, यियासुना निर्वृतिमात्मनीनाम् ॥३०३॥

१. भागिनियस्ते

*गतसारेऽत्र संसारे, सुखभ्रान्तिः शरीरिणाम् । लालापानमिवाऽङ्गुष्ठे, बालानां स्तन्यविभ्रमः ॥३०४॥*

**यशोभद्र**गुरोर्वाक्य-मिति श्रुत्वा सुतेषु च । भारमारोप्य स सप्त-क्षेत्रेषु धनमव्ययत् ॥३०५॥

अष्टाह्निकामहः सर्वो[१]-ससि कृत्वा सविस्तरम् । *जग्राह संयमं जानन्, संसारासारतां तदा ॥३०६॥युग्मम् ॥*

विनयी गुरुशुश्रूषां, कुर्वन् शास्त्रं भणन् सदा । एकादशाङ्ग्यभूद्भद्रस्वभावः स **धनो** मुनिः ॥३०७॥

सदा कुर्वन् विहारं स, प्राप्तसूरिपदः क्रमात् । बोधयन् भूतलं चाथ, **सौभाग्यपुर**मीयिवान् ॥३०८॥

पुरोद्याने समायातं, **धनसमृद्ध**मन्यदा । श्रुत्वा स **शङ्करो** भागि-नेयो नन्तुमुपागतः ॥३०९॥

सोऽथ सूरीश्वरो धर्म-देशनां पापनाशिनीम् । दातुं समुद्यतो जातो, वाण्या मधुरया तदा ॥३१०॥

यतः—

**दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवे, गर्भवासे नराणां,**

**बालत्वे चाऽपि दुःखं मलमलिनवपुः, स्त्रीपयःपानमिश्रम् ।**

**तारुण्ये चापि दुःखं भवति विरहजं, वृद्धभावोऽप्यसारः,**

**संसारे रे मनुष्या! वदत यदि सुखं, स्वल्पमप्यस्ति किञ्चित् ।३११।**

सूक्ष्मबादरद्विभेदजन्तुषु, प्रेक्ष्य बाधमनुपेक्ष्य ये दयाम् । कुर्वते हितमितर्जुभाषिणो, नावतीर्णमथ गृह्णतेण्वपि ॥३१२॥

कोहाभिभूआ न सुहं लहंति, माणंसिणो सोगपरा हवंति ।

मायाविणो हुंति परस्स वेसा लुद्धा महिच्छा नरई लहंति ।३१३।

श्रुत्वेति वचनं तस्य, भागिनेयः स **शङ्करः** । प्रपेदे चरणं मोक्ष-सातसन्ततिहेतवे ॥३१४॥

यतः—

तावद् भ्रमन्ति संसारे, पितरः पिण्डकाङ्क्षिणः । यावत्कुले विशुद्धात्मा, यतिः पुत्रो न जायते ॥३१५॥

भागिनेयो मुनिस्तीव्रं, तपः कुर्वन् निरन्तरम् । वैयावृत्त्यं गुरोश्चक्रे, करुणावासिताशयः ॥३१६॥

क्रमाद् द्वावपि कुर्वाणौ, तपस्तीव्रं निरन्तरम् । मातुलो भागिनेयश्च, **सौधर्मे** ययतुर्दिवि ॥३१७॥

तावेव भगिनीपुत्र-मातुलौ निर्जरौ दिवः । इहाऽऽयातौ तवोपान्ते, **सङ्ग्राम**भूमिनायक ! ॥३१८॥

आवां तावपि गीर्वाणा-वीदृग्रूपतनुच्छवी । जानीहि मेदिनीनाथ !, प्राक्तत्पुण्यभरोदयात् ॥३१९॥

अतस्त्वया न कर्तव्यं, वासितं भोजनं मनाक् । ततो दानं वितीर्यैव, भोक्तव्यं नान्यथा पुनः ॥३२०॥

एवं प्रबोध्य भूपालं, **सङ्ग्राम**भूपनामकम् । ययतुस्त्रिदशावासे, भूयिष्ठसुखभासुरे ॥३२१॥

ततश्च्युतौ सुरावासात्, तौ देवौ **पद्म**पत्तने । अभूतां **धनदेवस्य**, पुत्रौ **सोम-वना**ऽभिधौ ॥३२२॥

तत्र श्राद्धवृषं कृत्वा, लात्वा चारित्रमात्मना । तपस्तप्त्वा शिवं प्रान्ते, जग्मतुः कर्मणां क्षयात् ॥३२३॥

सोऽपि **सङ्ग्रामभूपालो**, ददद् दानं सदार्थिने । प्रान्ते चारित्रमादाय, स्वर्गसौख्यमवाप तुः [च] ॥३२४॥

ततश्च्युतो **रमापुर्यां**, भूपो भूत्वा**ऽरिमर्दनः** । पालयित्वा भुवं दीक्षां, जग्राहाऽनघवैभवः ॥३२५॥

सर्वकर्मक्षयं कृत्वा, भूमिपालो**ऽरिमर्दनः** । कल्याणनगरीं प्रापा-ऽनेक साधुसमन्वितः ॥३२६॥

**॥ इति स्थावरमातङ्ग-धनसमृद्धकथा ॥**

श्रुत्वा **धनपति**र्भूपो, धर्मं सर्वज्ञभाषितम् । राज्ये **भीमा**ऽभिधं पुत्रं, स्थापयामास सूत्सवम् ॥३२७॥

**संवराक्षयतेः** पार्श्वे, दीक्षां **धनपति**र्नृपः । राज्यं तृणमिव त्यक्त्वा, जग्राहाऽनघमानसः ॥३२८॥

१. सार्वौकसि

षष्ठाष्टमादिकं तीव्रं, तपः कुर्वन् स संयतः । विंशतिस्थानकान्येवं, चकार विधिपूर्वकम् ॥३२९॥
तथाहि—
अरिहंत१ सिद्ध२ पवयण३, गुरु४ थेर५ बहुस्सुए६ तवस्सीसु७ ।
वच्छल्लयाइ एसिं, अभिक्ख नाणोवओगे अ८ ॥३३०॥
दंसण९ विणये१० आवस्सए अ११, सीलव्वए१२ निरइआरो१३ ।
खणलवतव१४ च्चिआए१५, वेयावच्चे१६ समाही अ१७॥१३१॥
अपुव्वनाणगहणे१८, सुअभत्ती१९ पवयणे पभावणया२० । एएहिं कारणेहिं, तित्थयरत्तं लहइ जीवो ॥१३२॥
पुरिमेण पच्छिमेण य, एए सव्वेवि फासीआ ठाणा ।
मज्झिमएहिं जिणेहिं, एगं दो तिन्नि सव्वे वा ॥३३३॥ इत्यादि ॥
आद्ये **धनपतेः** क्षोणी-पतेः पश्चात्तने भवे । सत्य[1]प्राप्तिरभून्मुक्तिसुखसम्प्रातिहेतुका ॥३३४॥

**इति तपागच्छा**ऽधिराज-श्री**लक्ष्मीसागरसूरि**शिष्य-
पं. **शुभशील**-विरचिते **श्रीअरनाथ**चरित्रे
श्री**धनपति**भूप-सम्यक्त्वप्राप्तिशोभिते
**द्वितीयः सर्गः ॥२॥**

● ● ●

**योगसार - द्वितीयः प्रस्तावः**
**तत्त्वसारोपदेशकः**

तात्त्विका वयमेवान्ये, भ्रान्ताः सर्वेऽप्यतात्त्विकाः ।
इति मत्सरिणो दूरोत्,- सारितास्तत्त्वसारतः ॥ १० ॥
यथाहतानि भाण्डानि, विनश्यन्ति परस्परम् ।
तथा मत्सरिणोऽन्योन्यं, ही दोषग्रहणादूधताः ॥ ११ ॥
परं पतन्तं पश्यन्ति, न तु स्वं मोहमोहिताः ।
कुर्वन्तः परदोषाणां, ग्रहणं भवकारणम् ॥ १२ ॥
यथा परस्य पश्यन्ति, दोषान् यद्यात्मनस्तथा ।
सैवाजरामरत्वाय, रससिद्धिस्तदा नृणाम् ॥ १३ ॥
रागद्वेषविनाभूतं, साम्यं तत्त्वं यदुच्यते ।
स्वशंसिना कूव तत् तेषां, परदूषणदायिनाम् ॥ १४ ॥
मानेऽपमाने निन्दायां, स्तुतौ वा लोष्ठुकाग्चने ।
जीविते मरणे लाभा,-लाभे रङ्के महद्धिके ॥ १५ ॥
शत्रौ मित्रे सुखे दुःखे, हृषीकार्थे शुभाशुभे ।

---
१. श्रुते

## ॥ तृतीयः सर्गः ॥

प्रपाल्य चरणं सम्यग्, यतिर्धनपतिश्चिरम् । देवोऽभून्नवमे ग्रैवेयके भासुरदेहभृत् ॥१॥
एकत्रिंशत्पयोराशीनायुस्तत्र सुरालये । नयमानः सुरः सौख्य-लीनोऽत्यन्तमजायत ॥२॥
यतः—
दो साहि सत्त साहिअ दस चउ दश सत्तर अयराइं जा सुक्को ।
इक्किक्कमहिअ मित्तो जाइगतीसुवरिगेविज्जे ॥३॥
तित्तीस-णुत्तरेसुं सोहम्माइसु इमा ठिई जिट्ठा । सोहम्मे ईसाणे जहन्न-ट्ठिइ पलिअ महियं च ॥४॥
दो साहि सत्त दस चउदस सत्तर अयराइं जा सहस्सारो । तप्परओ इक्किक्कं अहिज्जाणुत्तरंचउक्के ॥५॥
इगतीस सागराइं सव्वट्ठे पुण जहन्न ठिइ नत्थि । इत्यादि ॥

जीवो **धनपतेः** सौख्यं, भुञ्जंस्तत्र सुरालये ।
एकत्रिंशत्पयोराशीन्यावत्तस्थौ समाहितः ॥६॥

द्वितीयेऽथ भवे ग्रैवे-यके नवमनामके । एकत्रिंशत्पयोराशीन्, यावत्सुख्यभवत्प्रभुः ॥७॥

**इति श्रीतपागच्छाधिराजश्रीलक्ष्मीसागरसूरिशिष्य-**
**पं. शुभशीलगणिविरचिते श्रीअरजिनेश्वरचरिते**
**श्रीधनपतिभूपस्वर्गगमनसूचितः**
**तृतीयः सर्गः समाप्तः ॥३॥**

• • •

**योगसार - द्वितीयः प्रस्तावः**

**तत्त्वसारोपदेशकः**

सर्वत्रापि पदेकत्वं, तत्त्वं तद् भेद्यतां परम् ॥ १६ ॥
अष्टकस्यापि योगस्य, सारभूतमिदं खलु ।
यतो यमादिव्यासोऽस्मिन्, सर्वोऽप्यस्यैव हेतवे ॥ १७ ॥
क्रियते दधिसाराय, दधिमन्थो यथा किल ।
तथैव साम्यसाराय, योगाभ्यासो यमादिकः ॥ १८ ॥
अद्य कल्येऽपि कैवल्यं, साम्येनानेन नान्यथा ।
प्रमादः क्षणमप्यत्र, ततः कर्तुं न साम्प्रतम् ॥ १९ ॥
किं बुद्धेन किमीशेन, किं धात्रा किमु विष्णुना ।
किं जिनेन्द्रेण रागाद्यै,- र्यदि स्वं कलुषं मनः ? ॥ २० ॥

## ॥ चतुर्थः सर्गः ॥

अथ **श्रीअरनाथस्य,** जन्मस्थानान्वयादिकम् । सङ्क्षेपात्प्रोच्यते भव्य-जन्तुबोधकृते मया ॥१॥
यतेः श्री अरनाथस्ये-क्ष्वाकुवंशेऽभवज्जनुः । अत इक्ष्वाकुवंशस्य, सम्बन्धः प्रोच्यते मया ॥२॥
**जम्बू**द्वीपस्य **भरत**खण्डमध्ये विराजते । **वैताढ्याह्वो** गिरी रूप्य-मयो व्योमगराजितः ॥३॥
हिमवत्पर्वताद्गङ्गा-सिन्धू वैताढ्यपर्वतम् । विभिद्य दक्षिणाम्भोधिं, गच्छतश्च पृथक् पृथक् ॥४॥
ततोऽभूद्भारतं खण्डं, षड्भिः खण्डैर्विराजितम् । तेष्वनार्यं स्मृतं खण्ड-पञ्चकं म्लेच्छवासितम् ॥५॥
गङ्गासिन्ध्वन्तरे मध्यखण्डे जिनेश्वरादयः । त्रिषष्टिः पुरुषोत्तंसाः, जायन्ते धर्मशालिनः ॥६॥
तत्राऽवसर्पिणीकाले, सुषमादुःषमाह्वके । गङ्गा-सिन्ध्वन्तरे मध्य-खण्डे युगलिकालिनि ॥७॥
आसन् कुलकरा सप्ता-ऽऽदिमो **विमलवाहनः १ ।२ चक्षुष्मांश्च ३ यशस्वी च, ४ अभिचन्द्रः ५ प्रसेनजित् ॥८॥**
**६ मरुदेवश्च ७ नाभिश्च, पत्न्यस्तेषां क्रमादिमाः । १ चन्द्रयशा २ श्चन्द्रकान्ता, ३ सुरूपा ४ प्रतिरूपका** ॥९॥
**५ चक्षुकान्ता ६ ऽजनिष्ट श्री-कान्ता ७ च मरुदेविका ।** वज्रऋषभनाराच-सङ्घाताः प्रियसंयुताः ॥१०॥
**मरुदेवा**ऽन्यदा **नाभि**-पत्नी सुप्ता सुखं निशि । चतुर्दश महास्वप्ना-नेवं ददर्श सुन्दरान् ॥११॥
वृषेभ-सिंह पद्मा-सृग्, चन्द्रः सूर्यो ध्वजो घटः । साराम्बुधि-विमानौ च, रत्नोच्चय-विभावसू ॥१२॥
तदा सर्वार्थसिद्धाह्वा-द्विमानान्निर्जरश्च्युतः । **मरुदेव्या** लसत्कुक्षाववततार शुभोदयः ॥१३॥
आषाढमासि कृष्णाया-श्चतुर्थ्या रजनीपतौ । उत्तराषाढनक्षत्रं, भुञ्जाने विलसत्क्षणे ॥१४॥
चैत्रमासि सिताऽष्टम्यामाषाढभस्थिते विधौ । असूत **मरुदेवा** तु, युग्मं नारीनृरूपकम् ॥१५॥युग्मम् ॥
षट्पञ्चाशत्कुमार्योऽथ, समेत्य वर्यसूतिकम् । चक्रुः स्वस्वप्रभोर्वैया-वर्त्यकर्मविधानतः ॥१६॥
तत इन्द्राश्चतुःषष्टिः, स्व-स्वस्थानकतो मुदा । एत्य मेरौ प्रभुं नीत्वा, व्यधुः स्नात्रोत्सवं ध्रुवम् ॥१७॥
मेरु अह१ उड्ढलोआ२ चउदिसि रुअगाउ६ अट्ठपत्तेअं । चउं विदिस७ मज्झरुगा, ८उ इंति प्पन्नदिसि कुमरी ॥१८॥ टिप्पणी ॥
संवट्ट १ मेह २ आयंसयाय ३ भिंगार ४ तालिअंताय ५ । चामर ६ जोई ७ रक्खं करिंति एअं कुमारीओ ॥१९॥
लोकानां व्यवहारस्या-ऽभावान्नाभिर्जनुर्महम् । न चकार प्रभोस्तस्मिन् काले युगलिमध्यतः ॥२०॥
वृषः स्वप्नेऽखिलस्वप्नराशौ चादौ निरीक्षितः । **मरुदेव्याश्च** पुत्रस्य, **वृषभे**त्यभिधाऽभवत् ॥२१॥
अरएण तईएणं इमाइ उस्सप्पिणीह तुह जम्मे । फुरिअं कणगमएणं व कालचक्किक्क पासम्मि ॥२२॥
देशोने हायने जाते, शक्रोऽभ्येत्य सुरालयात् । इक्षोरिच्छां प्रभोर्ज्ञात्वाऽनैषीदिक्षुं जिनान्तिके ॥२३॥
इक्षावङ्गीकृते शक्र-हस्ताच्च स्वामिना तदा । प्रभोर्वंशस्य देवेश, इक्ष्वाकुरिति दत्तवान् ॥२४॥
इतोऽकस्मात्फलं ताल-तरोः पतच्च युग्मिनम् । निनाय परलोकं तु, तच्छीर्षे पतनात्तदा ॥२५॥
ततो युगलिनीं नाभि-कुलकृत् वृषभप्रभोः । पत्न्यर्थं स्थापयामास, युग्मिनो पार्श्वतस्ततः ॥२६॥
भोगयोग्यं प्रभुं ज्ञात्वाऽभ्येत्येन्द्रो गेहिनीसखः । द्वयोः कन्योः करग्राहं, कारयामास सूत्सवम् ॥२७॥

षट्सु लक्षेषु पूर्वाणां, गतेषु स्वामिजन्मनः । सुतं **सुमङ्गला** सूते, **भरतं भारती**युतम् ॥२८॥
**सुनन्दा** सुषुवे **बाहु-बलिनं सुन्दरी**युतम् । ततो हर्षोऽभवच्छ्रीमद्-**वृषभ**स्य विशेषतः ॥२९॥
ततः **सुमङ्गलै**कोना-पञ्चाशद्युगलीं क्रमात् । पुत्रपुत्रीस्वरूपं तु, प्रासूत रुचिरे क्षणे ॥३०॥
राज्ययोग्यं प्रभुं मत्वा, शक्रोऽभ्येत्यादिमाद्दिवः । जगौ युगलिनां पार्श्वे, राजा नः स्थाप्यतेऽनघः ॥३१॥
ततो युगलिनो भूरीन्, बिशपत्राणि[१] भूरिशः । दत्त्वा नेतुं जलं शक्रो, प्रैषीत् सरोवरादिषु ॥३२॥
इतः शक्रः प्रभुं दिव्य-वस्त्राभरणभूषितम् । कृत्वान्यस्योच्चके स्थाने, वृक्षान्तरे रहः स्थितः ॥३३॥
नीत्वा नीरं त्वरागत्य, तत्रैव युग्मिनस्तदा । सालङ्कारं प्रभुं दृष्ट्वा, दध्युरेवं पुनः पुनः ॥३४॥
प्रभोः शीर्षे जलक्षेपाद्, विभूषणादि विनङ्क्ष्यति । ततः प्रभोः पदोर्मूले, चिक्षेपुर्युग्मिनस्तदा ॥३५॥
दृष्ट्वा तान् युग्मिनश्चारु-विनयाद्वासवो जगौ । विनीता युग्मिनश्चैते, **विनीता**ऽत्र पुरी वरा ॥३६॥
असौ प्रभुस्तु युष्माकं, स्वामी संस्थापितो मया । अतः परं भवद्भिश्च, धार्याऽऽज्ञा सुखहेतवे ॥३७॥
जंमि तुमं अहिसित्तो जत्थय सिवसुक्खसंपयं पत्तो । ते अट्ठावयसेला सीसा मेला गिरिकुलस्स ॥३८॥
धन्ना सविम्हयं तेहि झत्तिकयरज्जमज्जणो हरिणा । चिरं धरिअ नलिणपत्ता ऽभिसेह सलिलेहिं दिट्ठो सि ॥३९॥
हक्कारादिषु नीतिषु, व्यतिक्रान्तासु तैस्तदा । नवीना नीतयोऽन्याश्च, ग्राहिताः प्रभुणा पुनः ॥४०॥
अश्वगोहस्तिनःकक्ष-स्थिताद् युग्मिसमीपतः । राज्यहेतोः प्रभुर्गेहात्, ग्राहयामास भूरिशः ॥४१॥
उग्रा भोगाश्च राजन्याः, क्षत्रियाश्च चतुर्विधाः । आरक्षगुरुमित्राणि, क्षत्रियाः स्थापिताः क्रमात् ॥४२॥
प्रभौ कुलकरे राज्ञि, कन्दमूलफलाशिनः । पुष्पपत्रादिनः केचित्, जाता युगलिनः क्रमात् ॥४३॥
अन्ने तस्मिंस्तदा भुक्ते, तेषां दुष्यति चोदरम् । घर्षयित्वाऽशनं भुङ्क्ष्व, शयैरिति जगौ प्रभुः ॥४४॥
वनधान्यं ततः क्लिन्नं, कृत्वा नीरैः प्रभूदिताः । खादन्ति युग्मिनस्तेषां, तथाऽप्युदरदुःखनम् ॥४५॥
वनधान्यं ततः कक्षा-मुखोष्णस्थानकेषु च । मोचं मोचं प्रभुप्रोक्ताः, खादन्ति ऋजवश्च ते ॥४६॥
इतः कालविशेषेण, वंशानां घर्षतो मिथः । उत्पन्नं वह्निमैक्ष्योचु-र्भीतास्तत्स्वामिनः पुरः ॥४७॥
बहिरेकः समायातो, राक्षस औषधं समम् । अस्माकं भक्षयति स्म, स्वामिंस्ततो मृता वयम् ॥४८॥
पूर्वं गता मरुद्वृक्षा, अस्माकं दुष्कृताऽऽगमात् । अधुना भक्षितं सर्व-मौषधं तेन रक्षसा ॥४९॥
प्रभुः प्राह न भीः कार्या, भवद्भिरौषधं निजम् । क्षिप्त्वा राक्षसमध्ये तु, भक्षणीयं स्वशर्मणे ॥५०॥
ततस्ते यावता तस्मि-न्मुञ्चन्त्यौषधमात्मनः । तावत्स सकलं भस्मी-चक्रे तेषां च पश्यताम् ॥५१॥
ततस्ते युग्मिनः प्रोचुः, प्रभो ! निखिलमौषधम् । मुक्तं तस्मिन् स भुङ्क्ते स्म, पश्चाद्दत्ते मनाग् नहि ॥५२॥
ततः प्रभुर्गजारूढो-**ऽयोध्या**मध्ये व्रजंस्तदा । अनैषीन्मृत्तिकापिण्डं, कुम्भिकुम्भे च मुक्तवान् ॥५३॥
स्वामी कुञ्जरकुम्भोर्ध्वं, कृत्वा कुम्भं मृदा तया । प्राहैवं भवता कार्यः, कुम्भो मृत्तिकया दृढः ॥५४॥
एवं च पाचनीयोऽयं, वह्निनाऽस्मिन् निजौषधम् । क्षिप्त्वा पाच्यं पयःक्षेपात्, भक्षणीयं ततो जनैः ॥५५॥
घटो लोहोऽम्बरं चित्रं, कृषिकर्म च पञ्चमम् । आदौ वः प्रभुणा प्रोक्तं, कृत्वा च दर्शितं स्वयम् ॥५६॥
एकैकस्मादतः शिल्पात्, शतं शतमजायत । अतः पञ्चशती जाता, शिल्पानां च प्रभूदितात् ॥५७॥

---
१. कमलपत्राणि

यान-स्यन्दन-चापेषु, दोरयन्त्र-हलादि च । मुशलोदूखलाराम-गोकुलादिस्थितिं तदा ॥५८॥
हट्टरैसिद्धि रुप्यादि-निष्पत्तिं वैद्यकर्म च । अश्वेभशिक्षणं चापि, प्रभुर्दर्शितवान् क्रमात् ॥५९॥युग्मम् ॥
शिल्पानि साम्प्रतं यानि, यानि वीक्ष्यन्त एव च । तान्येव प्रभुणा चादौ, दर्शितानि ततोऽभवन् ॥६०॥
शिल्पानि प्रभुणा पूर्वं, दर्शितानि कियन्ति[१] च । भरतेन ततोऽन्यैश्च, ज्ञातानि दर्शितानि च ॥६१॥
उक्तं च :-
आहारे१ सिप्प२ कम्मे अ३ मामणाय४ विभूसणा५ ।
लेहे६ गणीए७ अ रूवे अ८ लक्खणे९ माण१० पोयए११ ॥६२॥
ववहारे१२ नीइ१३ जुद्धे अ१४, ईसत्थे १५ उवासणा१६ ।
तिगिच्छा१७ अत्थसत्थे अ१८, बंधे१९ घाए अ२० मारणा २१ ॥६३॥
जत्तू२२ सव२३ समावाए२४, मंगले२५ कोउगेई अ२६ ।
वत्थे २७ गंधे अ२८ मल्ले अ२९, अलंकारे३० तहेव य ॥६४॥
चोलो३१ वण३२ विवाहे अ३३, दत्तिआ३४ मडयपूअणा३५ ।
कावणा३६ थूभ३७ सद्दे अ३८, छेलावणय३९ पुच्छणा४० ॥६५॥
[अ.रा.को. भाग-२/११५२]

उक्तं च-
पुरग्रामखलक्षेत्र-हट्टादीनां स्थितिं तदा । मार्गे कूपतटाकादि-वृत्तिः प्राकारसद्मनाम् ॥६६॥
मञ्चकासनरैरूप्य-ताम्रपित्तलधातवः । दर्शिताः प्रभुणा लोके, प्रववर्तुश्च सर्वतः ॥६७॥
पूर्वाणां विंशतिलक्षा, कुमारत्वेऽभवत्प्रभोः । राज्ये लक्षास्त्रीषष्टिश्च, पूर्वाणामभवन्पुनः ॥६८॥
ततः सारस्वतो देवा, एत्य प्रोचुः प्रभोः पुरः । प्रभो जय जय त्वं च, धर्मतीर्थं प्रवर्तय ॥६९॥
यतः-
सारस्सय१ माइच्चा२, वह्नी वरुणाय४ गद्दतोयाय५ । अमिआ६ अव्वावाहो७, अग्गिच्चा८ चे वरिट्ठाय९ ॥७०॥
एए देवनिकाया, भयवं बोहिंति जिणवरिंदं तु । सव्वजगजीवहियियं, भयवं तित्थं पवत्तेह ॥७१॥
ततो राज्यम**योध्याया, भरताय** प्रभुर्ददौ । राज्यं **तक्षशिला**याश्च, स्वामी **बाहुबले**रदात् ॥७२॥
अन्येषां नन्दनानां तु, यथायोग्यं प्रभुस्तदा । विभज्य दत्तवान् देशा-**नङ्गादी**नि पृथक् पृथक् ॥७३॥
कोटिरेका सुवर्णस्य, लक्षाण्यष्टौ दिने दिने । वर्षं यावद्ददौ स्वामी, याचकेभ्यो व्रतक्षणे ॥७४॥
शतकोटित्रयं हेम्नां, कोट्योऽष्टाशीतिरेव च । पुनरशीतिलक्षाणि, वर्षे प्रभुः प्रदत्तवान् ॥७५॥
यतः-
एका हिरन्नकोडी अट्ठेवय अणूणगा सय सहस्सा । सूरोदयमाईअं दिज्जइ जाया य रासीओ ॥७६॥
तिन्नेव य कोडिसया अट्ठासीइं च हुंति कोडीओ । असीयं च सयसहस्साए अं संवच्छरे दिन्नं ॥७७॥
चैत्रस्य बहुलाष्टम्यामपराह्णे महीभुजाम् । सहस्रैश्चतुर्भिः सार्धं, सुदर्शनासनस्थितः ॥७८॥
कृताऽष्टमतपा भूप-देवेशविहितोत्सवः । **आदिदेवो** व्रजन्मार्गे, सिद्धार्थोद्यानमीयिवान् ॥७९॥ युग्मम् ॥

१. कति ध्रुवम् ।

भूपभूविहितात्साता-सनादुत्तीर्य नाभिभूः । उत्तार्यालङ्कृतान् सर्वान्, सिद्धास्तीर्थं ननाम च ॥८०॥
ततः कोलाहले शक्रवारिते प्रभुणा स्वयम् । चतुर्मुष्टिकृते लोचे, वासवः प्रोक्तवानिति ॥८१॥
तिष्ठतात्पञ्चमी मुष्टिः, शोभाहेतोस्तव प्रभोः । इन्द्रा-ऽनुग्रहतो मुष्टि-र्लोचस्य पञ्चमी स्थिता ॥८२॥
ततः **कच्छ-महाकच्छ**मुख्यैर्धरणिनायकैः । सहस्रैश्चतुर्भिर्मुष्टिः, पञ्चमी रक्षितेशवत् ॥८३॥
पूर्वार्जितान्तरायस्य, कर्मणा **वृषभः** प्रभुः । भिक्षामलभमानस्तु, भ्रमति स्म पुरात्पुरम् ॥८४॥
**कच्छादय**स्तदा भिक्षां, विना-ऽतीव बुभुक्षिताः । मुक्त्वा प्रभुं वने भूयस्तापसा जटिनश्च ते ॥८५॥
अन्नदानं प्रभुर्नाऽदा-दीक्षादानक्षणे पुरा । अतो जना न जानन्ति, दातुमन्नं तदा पुनः ॥८६॥
इतो दूरागतौ भृत्यौ, **नमिश्च विनमिः** प्रभोः । स्वामिदीक्षाक्षणे दत्तः, दानस्यावसरे तदा ॥८७॥
याचेते **भरतं** राज्यं, न तौ वृषभसेवकौ । ततः पार्श्वे प्रभोर्गत्वा, राज्यं मार्गयतः सदा ॥८८॥
आत्तासी द्वौ प्रभोः पार्श्वे, तिष्ठन्तौ तौ दिवानिशम् । क्षणमेकं प्रभोः पार्श्वं, न मुञ्चतः सुभक्तिकौ ॥८९॥
प्रभुर्मौनावलम्बी तु, यदा वक्ति मनाग् न हि । तदा तुष्टः प्रभोर्भक्त्या, शेषाहिश्च तयोर्भृशम् ॥९०॥
नीत्वा तौ भुजगाधीशो, वैताढ्ये पर्वते वरे । दक्षिणोत्तरयोः श्रेण्योः[1], ताभ्यां [राज्यं]दत्ते स्म मोदतः ॥९१॥
खगामिन्यादयो विद्या, भूरिसहस्रसंमिताः । ताभ्यां नमिविनमिभ्यां, शेषाहिः प्रददौ क्षणात् ॥९२॥
दक्षिणोत्तरयोः श्रेण्योः, षष्टिः पञ्चाशदद्भुताः । वासयामासतुस्तौ तु, पुरीर्मनोहराः क्रमात् ॥९३॥
ग्रामे पुरे पुरे ग्रामे, व्रजन् भिक्षाकृते प्रभुः । ययौ **गजपुरो**द्याने, नानावृक्षालिशालिनि ॥९४॥
तत्र **बाहुबलेः** पौत्रः, **सोमयशस्**तनूभवः । **श्रेयांसाह्वो** नृपो राज्यं, कुरुते न्यायनिष्ठुरः ॥९५॥
**श्रेयांसो** मलिनं धूल्या, मेरुं सुधोज्ज्वलं व्यधात् । सुप्तः सुखं निशीथिन्यां, स्वप्नमेवं व्यलोकयत् ॥९६॥
भूपाङ्गरक्षकोऽपश्यत्, स्वप्ने वैरिधृतं भटम् । **श्रेयांसो** मोचयामास, स्वकीयभुजलीलया ॥९७॥
सूर्यमण्डलतोऽधस्तात्, पतन्तं करसञ्चयम् । **श्रेयांसः** स्थापयामास, तत्रेतीभ्यो व्यलोकयत् ॥९८॥
प्रातः स्वप्ने निजे प्रोक्ते, भूपेनेभ्यभटौ तदा । दृष्टं निजं निजं स्वप्नं, जल्पतः स्म प्रभोः पुरः ॥९९॥
**श्रेयांसः** प्रोक्तवान् स्वप्ना-दस्मान्मङ्गलसन्ततिः । भविष्यति ममाऽन्येषां, लोकोनां वस्तु निश्चितम् ॥१००॥
इतः **श्रेयांस**भूपालो, प्रभुं गृहाद् गृहं क्रमात् । भ्रमन्तं वीक्ष्य सस्मार, भवान् पूर्वानिति ध्रुवम् ॥१०१॥
उक्तं च **वसुदेवहिण्डौ** ।

यदा ईसाणे देवलोए सिरिप्पहे विमाणे भयवं । ललितांगो जाओ ताहे सिज्जंसो सयंपहा देवी ॥१॥ पुव्वभवणिस्सामिआ पुव्वविदेहे । पुक्खलावई विजये लोहग्गले नयरे भयवं वयरजंघो आसी । ताहे सिज्जांसो सिरिमईभज्जा ॥२॥ तओ उत्तरकुरुए भयवं मिहुणगो । सिज्जंसो तस्सेव मिहुणीआ ॥३॥ तओ सोहम्मे कप्पे दुवे देवा ॥४॥ तओ भयवं अवरविदेह विज्जपुत्तो । ताहे सिज्जंसो पुण क्षुण्णसिट्ठिपुत्तो केसवो नाम छद्धओ मित्तो ॥५॥ तओ दु अच्चूए देवा ॥६॥ तओ पुंडरीकिणीए णयरीए भयवं वयरनाभो सिज्जंसो तस्स सारही ॥७॥ तओ दुवे देवा सव्वट्ठसिद्धिविमाणो ॥८॥

तओ इह रिसहनामा अहयं सिज्जंसो नाम, एष स्वामी तु भिक्षार्थं, भ्रमति स्म गृहाद् गृहम् ।
लोका अन्नं प्रदातुं तु, न जानन्ति मनागपि ॥१०२॥

---

१. मुणिणोवि तदल्लीणा नमिविनमी खेहराहि वा जाया । गुरुआणचलणसेवा न निप्फला दोहोइ कइआवि ॥

प्रभोरन्नं विना वर्ष-मेकं जातं कुकर्मतः । अतोऽहं पारणं शुद्धा-ऽऽहारेण कारयामि तम् ॥१०३॥
एवं ध्यात्वोत्थितः स्वामि-पादौ नत्वा महीपतिः । यावद्भक्ति घटा इक्षु-रसपूर्णाः शतं तदा ॥१०४॥
आनीताः प्राभृते केन-चिन्नरेण महीभुजे । तावत्तान् नृपतिर्नीत्वा, करेऽवग् स्वामिनं प्रति ॥१०५॥युग्मम् ॥
अमुमिक्षुरसं शुद्धाहारं प्रसद्य मय्यपि । लाहि पारणकं सद्यः, कुरुष्व मां कृतार्थय ॥१०६॥

**॥ अत्र कविघटना ॥**

यावत्प्रभुः शयं वामेतरं प्रसारयत्यहो ! । तावत्स प्रोक्तवान् भूपाऽऽदिदेवयोः पुरस्त्विति ॥१०७॥
इन्द्रचन्द्रनरेन्द्राणां, प्रत्यक्षं पश्यतामिह । अङ्गुष्ठेन सुधापानं, कारितः शैशवे मया ॥१०८॥
वंशस्थापनसमये, शक्रहस्तान्मयेक्षवः । स्वीकृताश्छत्रचक्रादि-लक्षणानामहं निधिः ॥१०९॥
महता महेन पाणिग्रहणं कन्ययोः कृतम् । मयैव स्थापितो राज्ये, **भरतो** भरताह्वये ॥११०॥
केदारतीर्थव्यापार-भाग्यमुद्रादिधारकः । पूजाभोजनसज्झाय-दानानां कारकोऽस्म्यहम् ॥१११॥
वर्षावधिमहादान-सन्तोषितजगन्त्रयः । सोऽहं स्वल्परसस्यार्थे-ऽधो भवामि कथं नृप ! ॥११२॥
तदैव प्राह वामोऽपि, करो रे वाक्यडम्बर ! । रे निर्लज्ज ! मुधाऽऽत्मानं, व्याख्यासि प्रसभं किमु ॥११३॥
यतः-
परेण परिविख्यातो, निर्गुणोऽपि गुणीभवेत् । शक्रोऽपि लघुतां याति, स्वयं प्रख्यापितैर्गुणैः ॥११४॥
गृहीत्वा खेटकं ह्यग्रे-ऽहं भवामि रणे तदा । खड्गमुद्धृत्य यात्येष, पश्चाद् भीतो रणाङ्गणे ॥११५॥
अङ्कानां गुणनं वामे, यातो वामे खरः शुभः । रोगादौ वामसंस्था हि, वामे सोमे कृतं शुभम् ॥११६॥

**॥ इत्यादि घटना बह्वी विद्यते ॥**

यदा भिक्षां न लातः स्म, हस्तौ वामेतरौ पृथक् । तदा **श्रेयांस** आचष्ट, युवां स्थः सुहृदौ ध्रुवम् ॥११७॥
कार्यतां पारणं स्वामी, भवद्भ्यां त्वरितं ननु । सञ्जाते केवलज्ञाने, युवयोर्भावि माननम् ॥११८॥
द्रव्यक्षेत्रादिसामग्री-मिति तौ प्रेक्ष्य पारणम् । प्रभोर्हस्तद्वयं चैकी-भूयाऽकारयदञ्जसा ॥११९॥
तेनेक्षुरसपूरेण, वपुः पल्लवितं प्रभोः । वर्षान्ते दग्धवृक्षस्य, पयोदपयसा यथा ॥१२०॥
उक्तञ्च-
रसो रसाया आधारो, रसः सस्यफलादिषु । एसो धातुषु शस्यः स्या-द्रसमूलमिदं जगत् ॥१२१॥
रिसहेससमं पत्तं, निरवज्जमिक्खुरससमं दानं । सेयांससमो भावो, हविज्ज जइ मग्गीअं हुज्जा ॥१२२॥
भद्दसे सेयंसस्स जेण तवसोसीओ निराकारो । वरिसं ते निव्वेवीओ मेहेण वणदुमो तंसि ॥१२३॥
वैशाखस्य तृतीयस्यां, प्रभोरजनि पारणम् । अतोऽद्यापि तृतीया साऽक्षताख्या मान्यते जनैः ॥१२४॥
तदा देवैः सुवर्णानां, सार्द्धा द्वादशकोटयः । वृष्टाः **श्रेयांस**भूपस्य, गेहाऽजिरक्षितौ दिवः ॥१२५॥
यतः –
अद्धतेरस कोडी उक्कोसा तत्थ होइ वसुहारा । अद्धतेरस लक्खा जहन्नीआ होइ वसुहारा ॥१२६॥
यत्राऽभवत्प्रभोर्वर्ष-प्रान्ते पारणकं किल । मणीहेममयं पीठं, तत्र भूपो व्यधाद्वरम् ॥१२७॥

उक्तं च –
रिसहेससमं पत्तं, निरवज्जमिक्खुरससमं दाणं । सेयांससमो भावो हविज्ज जइ मग्गीअं हुज्जा ॥१२८॥
प्रभोः पारणकं दृष्ट्वा, सर्वे भूपादयो जनाः । अन्नं दातुं प्रवृत्ताश्च, याचकेभ्यो निरन्तरम् ॥१२९॥
विहरन्नन्यदा स्वामी, **बहलीविषये** वरे । **तक्षशिला**पुरोद्याने, सन्ध्यायां समवासरत् ॥१३०॥
उद्यानपालनात् स्वाम्या-गमं श्रुत्वा दिनात्यये । दध्यौ **बाहुबलिः** प्रात-र्विस्तरान्नंस्यते प्रभुः ॥१३१॥
ततः स नगरीशोभां, कारयित्वा नरेश्वरः । वर्याभरण-रोचिष्णु-र्लसत्परिच्छदाऽन्वितः ॥१३२॥
वाद्यमाने महानान्द्ये, गीयमानगुणोच्चयः । प्रात**र्बाहुबलि**र्नन्तुं, पुरोद्याने ययौ क्रमात् ॥१३३॥ युग्मम् ॥
विहारकरणात्प्रात-रदृष्ट्वा **वृषभं** प्रभुम् । रुरोदोच्चस्वरं **बाहु-बलिर्गृह्ण**न् जिनाभिधाम् ॥१३४॥
अलक्षाऽप्रतिबद्धस्त्व-मरागिन्नतनुः पुनः । एकशो दर्शनं देहि, स्वकं स्वसेवकस्य तु ॥१३५॥
**बाहुबलिः** प्रभोः कायो-त्सर्गस्थाने महत्तमम् । प्रभुपादुकसंयुक्तं, धर्मचक्रं व्यधापयत् ॥१३६॥
हायनानां सहस्रं त्व-नार्यभूमौ प्रभूत्तमः । विहरन्नुपसर्गालीः, सेहेऽनार्यजनैः कृता ॥१३७॥
यतः–
बहुली अंड बइल्ला जोणगविसओ सुवन्नभूमीअ ।आहिंडिया भगवया उसभेण तवं चरंतेणं ॥१३८॥
बहली अजोणगा पल्लगाय जे भयवया समणुसङ्घा । अन्नेवि मिच्छजाई ते तईया भद्दया जाया ॥१३९॥
विहरन्नन्यदा**ऽयोध्या**-पुर्या बहिर्वने वरे । न्यग्रोधपादपस्याधः, प्रभुर्ध्यानपरोऽभवत् ॥१४०॥
शुक्लध्यानाऽसिना कर्म-शत्रून् विदारयन्प्रभुः । क्षपणश्रेणिमारूढः, केवलज्ञानमाप्तवान् ॥१४१॥
फाल्गुनस्याऽसिते पक्षे, एकादश्यां तिथौ पुनः । पूर्वाह्णे केवलज्ञानं, बभूव **वृषभप्रभोः** ॥१४२॥
तदाऽभ्येत्य चतुःषष्टि-सुराः स्थानान्निजान् निजात् । चक्रुर्वप्रत्रयं रत्न-स्वर्ण-रूप्यमयं महत् ॥१४३॥
इता**ऽयोध्यापुरी**मध्ये, **भरतस्या**ऽऽयुधौकसि । सहस्रयक्षसंसेव्यं, चक्रं प्रादुरभूद्वरम् ॥१४४॥
यतः –
आयुहवरसालाए, उप्पन्नं चक्करयणं भरहस्स । जक्खसहस्सपरिवुडं, सव्वरयणामयं चक्कं ॥१४५॥
प्रभोः केवलवित्प्राप्तिं, वनपालो यदाऽवदत् । तदाऽऽगाद्युगपच्चक्रो-त्पत्तिवार्ता नृपाग्रतः ॥१४६॥
द्वयोर्वर्धापनां श्रुत्वा, चक्री दध्याविदं हृदि । आदौ चक्रमथ स्वामी-चरणावर्चयाम्यहम् ॥१४७॥
क्षणाद्दध्यौ नृपो मूढो-ऽहकमेवमचिन्तयम् । ताते सम्पूजिते चक्रं, पूजितं जायते यतः ॥१४८॥
चक्रोत्पत्तिः प्रभोः पाद-प्रसादादभवन्मम । चक्रमिह सुखं दत्ते, प्रभुरत्र परत्र च ॥१४९॥
ध्यात्वेति **भरतः** सद्यो, **मरुदेवीं** गजाश्रिताम् । कृत्वाऽचालीत्प्रभोर्नन्तुं, धर्मं श्रोतुं च मुक्तिदम् ॥१५०॥
दृग्गोचरागते वप्र-त्रये **भरत** ऊचिवान् । मातर्निशम्यतां देव-दुन्दुभीनां वरध्वनिम् ॥१५१॥
यादृशी विद्यते ऋद्धि-र्भवत्सूनोर्मनोहरा । न तादृक् कोटिभागेऽपि, समस्ति मम निश्चितम् ॥१५२॥
पुरा मातस्त्वया प्रोक्तं, त्वं राज्यं कुरुषे सुखम् । मम पुत्रो भृशं दुःखं, सहते शीततादिना ॥१५३॥
न त्वया क्रियते चिन्ता, मम सूनोस्तु या मनाक् । [1]कोटाकोट्यः सुराः सेवां, कुर्वन्ति **वृषभप्रभोः** ॥१५४॥

---

१. कोटिशोऽपि ।

देवदुन्दुभिसंरावान्, श्रुत्वा मातुः प्रभोस्तदा । हर्षाश्रुमुञ्चनाद् दृष्ट्योः, पटलं दूरतो गतम् ॥१५५॥
पश्यन्ती **मरुदेवी** तु, प्रभोर्ऋद्धिं महत्तमाम् । ध्यायन्त्यनित्यताभावं, क्षिपन्ती कर्मणां ततिम् ॥१५६॥
क्षपकश्रेणिमारूढा, शुक्लध्यानसमाश्रिता । सम्प्राप पञ्चमं ज्ञानं, सर्वविश्वावलोककृत् ॥१५७॥ युग्मम् ॥
तदाऽऽयुषःक्षयात्माता, **मरुदेवी** महामनाः । सर्वकर्मक्षयान्मुक्ति-नगरीं प्रययौ क्षणात् ॥१५८॥
यतः –
हत्थिम्मि समारूढा, रिद्धिं दट्ठूणमुसभसामिस्स । तक्खण सुहझाणेणं, मरुदेवी सामिणी सिद्धा ॥१५९॥
तत्रैत्य तत्क्षणाद्देवाः, केवलज्ञानसिद्धयोः । **मरुदेव्या** महश्चक्रुर्हर्षाद्वैतपरायणाः ॥१६०॥
**मरुदेव्या**स्तनोर्वह्नि-संस्कारं **भरतो** व्यधात् । क्षीराब्धौ चिक्षिपुर्देवास्तद्भस्म सिद्धभक्तितः ॥१६१॥
उक्तं च –
सूनुर्युगादीशसमो न विश्वे, भ्रान्त्वा क्षितौ येन शरत्सहस्रम् ।
यदर्जितं केवल-रत्नमग्र्यं, स्नेहात्तदेवाऽर्प्यत मातुराशु ॥१६२॥
**मरुदेवा** समानाऽम्बा, याऽगात्पूर्वं किलेक्षितुम् । मुक्तिकन्यां तनूजाऽर्थं, शैवं मार्गं खिलं चिरात् ॥१६३॥
श्रीनाभिपत्नीसदृशी न माता, प्रायो न भूता न च भाविनी च ।
पूर्वं ययौ या शिवमन्दिरे रयात्, तदाऽऽत्मजार्थं किल मुक्तिकन्याम् [विलोकितुम्] ॥१६४॥
अत्राऽन्तरे प्रपूर्यायुः, **श्रीनाभिकुलकृत्** क्रमात् । नागलोके ययौ नाग-कुमारेषु मृतिं गतः ॥१६५॥
उसभ पीआ नागेसु, सेसाणं सत्त हुंति ईसाणे । अट्ठ य सणंकुमारे, माहिंदे अट्ठ बोधव्वा ॥१६६॥
हर्षशोकाऽऽकुलो गत्वा, **भरतः** प्रभुसन्निधौ । त्रिः प्रदक्षिणयाञ्चक्रे, प्रभोर्बलिविधानतः ॥१६७॥
तत्र नत्वा प्रभोः पादौ, **भरतः** सपरिच्छदः । धर्मं श्रोतुमुपाविष्टः, स्थाने यथोचिते तदा ॥१६८॥
तदा **श्रीवृषभः** शोकं, ज्ञात्वा **भरत**चेतसि । शोकाऽपनोदकृद्धर्म-देशनां विदधेतराम् ॥१६९॥

**॥ अत्राऽङ्गारकारकादीनां कथावतारः ॥**

धर्मोपदेशमाकर्ण्य, **भरतस्य** महीपतेः । **पुण्डरीकः** सुतश्चाद्यः, प्रबुद्धो व्रतमग्रहीत् ॥१७०॥
**भरतस्य** सुताः पञ्चशतान्यापुस्तदा व्रतम् । सप्तशती प्रपौत्राणां, **भरतस्या**ऽपि तत्क्षणे ॥१७१॥
**ब्राह्मी** प्रभोः सुता चाद्या, जग्राह संयमश्रियम् । अन्या अपि तदा पुत्र्यो, **भरतस्य सहस्रशः** ॥१७२॥
**पुण्डरीका**दिकान् लब्ध-संयमान् स्वसहोदरान् । दृष्ट्वा **भरत**पुत्रोऽपि, **मरीचिः** संयमं ललौ ॥१७३॥
अन्येऽपि भविनस्तत्राऽवसरे मानवाः खलु । मुक्त्वा गेहश्रियं दीक्षां, जगृहुर्भूरिशः पुनः ॥१७४॥
तत्र चतुर्विधं सङ्घं, स्थापयन् **वृषभ**प्रभुः । **पुण्डरीकस्य** गणभृत्पदवीं प्रथमं ददौ ॥१७५॥
ततस्त्र्यशीतिर्गच्छेशाः, स्थापिताः प्रभुणा क्रमात् । त्रिपदीं दत्तवान् स्वामी, सर्वेषां गणधारिणाम् ॥१७६॥
चतुरष्टगणाधीशाः, **पुण्डरीका**दयस्तदा । द्वादशाङ्गीं व्यधुः स्वस्व-ज्ञानावृत्तिक्षयाद् ध्रुवम् ॥१७७॥
देवा **भरत**चक्री च, सर्वेषां गणधारिणाम् । भूरिलक्ष्मीव्ययाच्चक्रुः, पदस्थापनिकोत्सवम् ॥१७८॥
तस्मिन्वटतरौ देवाः, प्रभोर्ज्ञानमहोत्सवम् । व्यधुस्तस्मात्तरुः सोऽपि, पूज्योऽभून्नाकिनामपि ॥१७९॥
**प्रयागवट** इत्याख्यां, लभते साम्प्रतं स च । मिथ्यात्विभिर्गृहीतत्वात्, जैनैर्न मान्यतेऽधुना ॥१८०॥

प्रणम्याऽथ प्रभुं भक्त्या, समेत्य **भरतो** गृहे । चक्रे चक्राऽर्चनां देव-देवपूजापुरस्सरम् ॥१८१॥
शक्रादयः सुराः सर्वे, प्रणम्य चरणौ प्रभोः । **नन्दीश्वरे** जिनान्नत्वा, स्वं स्वं स्थानं समाययुः ॥१८२॥
अथ नत्वा युगादीशं, स्मृत्वा पञ्चनमस्कृतिम् । देशान्साधयितुं **नाभि**-पुत्रपुत्रोऽचलत् पुरात् ॥१८३॥
प्रथमं **मागधे** तीर्थे, गत्वा तत्स्वामिनं दृढम् । बाणप्रक्षेपतः स्वाज्ञां, ग्राहयामास चक्रराट् ॥१८४॥
गत्वाऽथ **वरदामा**ऽऽख्ये, तीर्थे तत्स्वामिनं क्षणात् । जित्वा **प्रभासतीर्थे**ऽगात्, जिगाय तत्पतिं स च ॥१८५॥
सिन्धुप्रपाततीर्थादि-नाथान् कृत्वा स्वसेवकान् । भरतश्चक्रराड् गच्छन्, **वैताढ्य**पर्वते ययौ ॥१८६॥
**वैताढ्य**स्थं **नमिं** जित्वा, **विनमिं** च खगेश्वरम् । वर्षैर्द्वादशभिश्चक्री, चक्रे स्वसेवकान् क्रमात् ॥१८७॥
**नमे**र्विद्याभृतः पुत्रीं, स्त्रीरत्नं **भरतो** नृपः । प्राप्य तस्यै ददौ पट्ट-राज्ञीपदं प्रमोदतः ॥१८८॥
कृत्वाऽष्टमं ततश्चक्री, गुहामुद्घाट्य तामसीम् । साधयामास खण्डानि, त्रीणि तत्र स्थितानि च ॥१८९॥
प्राप्य **गङ्गा**तटे चक्री, निधीन्नव सुराऽऽश्रितान् । ववले भूरिभूपालश्रेणीनिषेवितक्रमः ॥१९०॥
षष्ट्या वर्षसहस्रैस्तु, साधयित्वा रिपून्नृपः । चलन्निजपुरोपान्ते, समागाद्रुचिरोत्सवम् ॥१९१॥
षष्टिं वर्षसहस्राणि, कृत्वाऽऽचाम्लानि **सुन्दरी** । **भरता**ऽनुज्ञया दीक्षां, जग्राह प्रभुसन्निधौ ॥१९२॥
यदा चक्रमणिः शस्त्रशालायां समुपैति न । तदा चक्र्यशृणो**द्बाहु-बले**र्भ्रातुरनागमम् ॥१९३॥
दूतप्रेषणतो नाऽऽगाद्, यदा **बाहुबलि**र्नृपः । तदाऽगाद् **भरतस्तक्ष-शिला**नगरसन्निधौ ॥१९४॥
यदा न **भरत**स्याज्ञां, लाति **बाहुबलि**र्नृपः । तदा तयोरभूद्युद्धं, महद् भूयिष्ठहायनान् ॥१९५॥
भूयिष्ठजनसंहारं, वीक्ष्येन्द्रः प्राह तौ प्रति । कुर्वतोर्युवयोर्युद्धं, संहारो विद्यते नृणाम् ॥१९६॥
अतोऽङ्गाङ्गेन सङ्ग्रामो, भवद्भ्यां क्रियतां मिथः । दृष्टिमुष्टिमुहादण्ड-शस्त्रादिमोचनात्किल ॥१९७॥
ततश्चादौ दृशोर्युद्धं, हारितं **भरतेन** तु । जितं **बाहुबलि**नेति, घोषितं निर्जरैस्तदा ॥१९८॥
सिंहनादाद् भृशं युद्धे, जायमाने द्वयोस्तदा । ऊचे सुरैर्जितं **बाहु-बलि**नाऽन्येन हारितम् ॥१९९॥
बाहुबलेन युद्धे तु, जायमाने द्वयोस्ततः । ऊचे सुरैर्जितं **बाहु-बलि**नाऽन्येन हारितम् ॥२००॥
शस्त्रमोचनयुद्धे तु, जायमाने द्वयोस्तदा । ऊचे सुरैर्जितं **बाहु-बलि**नाऽन्येन हारितम् ॥२०१॥
जायमाने दण्डयुद्धे, द्वयोः सोदरयोस्तदा । ऊचे सुरैर्जितं **बाहु-बलि**नाऽन्येन हारितम् ॥२०२॥
सर्वत्र सर्वयुद्धे तु, जायमाने द्वयोस्तदा । ऊचे सुरैर्जितं **बाहु-बलि**नाऽन्येन हारितम् ॥२०३॥
ततोऽतिरुषितश्चक्री, मुष्टिं सर्वबलेन तु । शीर्षे **बाहुबले**र्बाढं, मुमोच दोर्बलाद् ध्रुवम् ॥२०४॥
चक्रिमुष्ट्या हतो **बाहुबलिः** शीर्षे दृढं तदा । जानुदघ्नोऽगमद्भूमि-मध्ये कर्दमपङ्कवत् ॥२०५॥
ततो निर्गत्य मुष्टिं स्वा-मुत्पाट्य **भरता**ऽनुजः । यदा मुञ्चति शीर्षे तु, चक्रिणोऽथ सुरा जगुः ॥२०६॥
"मा मुञ्च मुष्टिमुर्वीश !, मुष्ट्याऽनया स्वसोदरः[१] । गमिष्यति यमाऽऽवासं, कृपां कुरु सहोदरे ॥२०७॥"
श्रुत्वेति च तया मुष्ट्यो-त्पाट्य स्वशीर्षवालकान् । लात्वा दीक्षां स्वयं तस्थौ, कायोत्सर्गे स भूपतिः ॥२०८॥
**भरतो**ऽथ समेत्यांह्री, नत्वा **बाहुबले**र्जगौ । गृहाणेदं समं राज्यं, भ्रातुः कुरु कृपां मयि ॥२०९॥

---

१. इदं वर्णनं त्रिषष्टी- चरित्रे नास्ति तत्र स्वयं चिन्तितर्मस्ति,

मया मौढ्यतया सार्द्धं, त्वया चक्रे रणं बहु । दुष्करा विद्यते दीक्षा, तीव्रतपोविधानतः ॥२१०॥
एवं प्रोक्ते यदा मौनं, नाऽमुञ्चद् **भरता**ऽनुजः । यदा तदा ददौ राज्यं, चक्री **सोमाय** सूनवे ॥२११॥
**भरतो**ऽथ समागत्या-**ऽयोध्यायां** पुरि सत्वरम् । नृपैरचीकरच्चक्री, स्वस्मिन् चक्राऽभिषेचनम् ॥२१२॥
इतो **बाहुबलिः** कायो-त्सर्गस्थो ध्यातवानिति । विना ज्ञानं प्रभोः पार्श्वे, गम्यते यदि साम्प्रतम् ॥२१३॥
तदा पूर्वात्तचारित्रात्, सोदराणां नतिर्मया । कृता विलोक्यते मे तु, मानक्षतिर्भविष्यति ॥२१४॥
एवं मानगजारूढो, मुनि**र्बाहुबलि**स्तदा । वर्ष यावत् स्थितः कायो-त्सर्गे क्षुत्-तृट्प्रबाधितः ॥२१५॥
मानकुञ्जरमारूढं, मत्वा **बाहुबलिं** प्रभुः । बोधितुं तं सुतं[१] **ब्राह्मी-सुन्दर्यौ** श्रागचालयत् ॥२१६॥
गत्वा तत्र च ते साध्व्यौ, प्रोचतुस्तं मुनिं प्रति । गजादुत्तरयेदानीं, भो भो सोदर ! सोदर ! ॥२१७॥
श्रुत्वेति भगिनीवाक्यं, स स्वं मानगजस्थितम् । ज्ञात्वा गन्तुं प्रभोः पार्श्वे, यावच्चालयति क्रमौ ॥२१८॥
तावद्वा**हुबलिः** प्राप्य, केवलज्ञानमञ्जसा । गत्वा पार्श्वे प्रभोश्चक्रेऽभितः प्रदक्षिणात्रयम् ॥२१९॥
ततो **बाहुबलि**ज्ञानि-सभायां समुपाविशत् । यतो न वन्दते ज्ञानी, ज्ञानिनोऽन्यानपि ध्रुवम् ॥२२०॥
अन्यदा **भरतो** भृत्वा-ऽन्नेनानःशतपञ्चकम् । आनीय स्वामिनः पार्श्वे, जगादेति कृताञ्जलिः ॥२२१॥
जिनाऽन्नं गृह्यतामेत-त्पारणाय तपस्विनाम् । प्रभुः प्राहाऽऽदिमान्तार्ह-द्वारके छत्रभूभुजाम् ॥२२२॥
आहारः कल्पेत भोक्तुं, साधूनां नहि भूपते ! । ततः खिन्नोऽभवद्भूपो, यदाऽवग् **वृषभ**स्तदा ॥२२३॥ युग्मम् ॥
श्रमणोपासका ये स्युः, श्राद्धा धर्मपराः सदा । तेषां भक्तं प्रदीयेत, कल्याणसुखहेतवे ॥२२४॥
ततश्चक्री निजावासे, श्राद्धानणुव्रताऽऽश्रितान् । साधुशुश्रूषकान् स्वान्नै-र्भोजयामास भूपतिः ॥२२५॥
सङ्ख्यातीतेषु तेष्वेव, भुञ्जानेषु निरन्तरम् । सूपकारा न शेकुश्च, राद्धुमन्नं बहुत्वतः ॥२२६॥
ततो रत्नेन काकिण्या, तेषामणुव्रतात्मनाम् । कण्ठे रेखात्रयं चक्रे, चक्रिणा च पृथक् पृथक् ॥२२७॥
तेभ्यो दर्शनचारित्रज्ञानधारिभ्य आदरात् । **भरतेन** ददे भोज्यं, भूरिकालं स्वशर्मणे ॥२२८॥
**भरता**दनु भूपालै**रादित्य**प्रमुखैः क्वचित् । हेमरूप्यदुकूलाद्यैस्तेषां रेखात्रयं कृतम् ॥२२९॥
नवमस्यार्हतस्तीर्थे, क्षयं याते सति क्रमात् । तैः साधूपासकैरात्तो, गृहवासो बलाश्रयात् ॥२३०॥
ततः स्वचिन्तितो धर्मः, सारम्भैस्तैः प्रवर्तितः । क्रमात्ते ब्राह्मणा जाता, लोके ब्रह्मप्रकाशनात् ॥२३१॥
एकदा **भरतो**ऽप्राक्षीत्, प्रभोः पार्श्वे कृताञ्जलिः । अर्हच्चक्र्यादयः के के, भविष्यन्त्युत्तमा नराः ॥२३२॥
प्रभुः प्राहा**ऽजितः** सार्वः, **सम्भवो**ऽथा**ऽभिनन्दनः** । **सुमति**स्तीर्थकृत्**पद्म-प्रभः सुपार्श्व**तीर्थकृत् ॥२३३॥
**चन्द्रप्रभ**स्ततः **पुष्प-दन्तः शीतल**तीर्थपः । **श्रेयांसो वासुपूज्य**श्च, **विमला**ऽ**नन्त**तीर्थपौ ॥२३४॥
**धर्मः शान्ति**जिनः **कुन्थु-ररो मल्लि**जिनाधिपः । **मुनिसुव्रत**तीर्थेशो, **नमि-नेमी** जिनेश्वरौ ॥२३५॥
**पार्श्वो वीरो** भविष्यन्ति, क्रमादेते जिनेश्वराः । **सगरो मघवां**चक्री, **सनत्कुमार**चक्रिराट् ॥२३६॥
**शान्तिः कुन्थुररश्च**क्री, **सुभूमो-महपद्मकः** । **हरिषेणो जयो ब्रह्म-दत्तो**ऽमी चक्रिणः स्मृताः ॥२३७॥
**त्रिपृष्ठश्च द्विपृष्ठश्च, स्वयंभू-पुरुषोत्तमौ** । ततश्च पुरुषात्सिहः, **पुण्डरीक**स्ततः पुनः ॥२३८॥

---

१. नाभिसुलं

**दत्त-लक्ष्मण-कृष्णश्चेद्भ**विष्यन्ति क्रमादिमे । वासुदेवाः स्मृता एवं, **अचलो विजयस्ततः** ॥२३९॥
**भद्र-सुप्रभो**नामानौ, **सुदर्श**नो भविष्यति । **आनन्द-नन्दनौ पद्म-बलदेवौ** बला इमे ॥२४०॥
**अश्वग्री**वोऽथ **तारक-मेरकौ मधुकीटभः** । **निशुम्भ-बलिनौ** प्रौक्तौ, **पृथुराजो** भविष्यति ॥२४१॥
**रावणश्च जरासन्धः**, प्रतिकृष्णा इमे पुनः । त्रिषष्टिः पुरुषा एते, भविष्यन्ति महीतले ॥२४२॥
श्रुत्वैत**द्भरतो**ऽप्राक्षी-न्नाथाऽस्मिन् संसदन्तरे । चतुर्विंशतिकायां यो-ऽस्यां च भावी जिनादिकः ॥२४३॥
स एव विद्यते साधु-र्भूपो वा मानवोऽसुरः । ततः स्वामी समाचष्ट, **भरतं** चक्रिणं प्रति ॥२४४॥
यो भवन्नन्दनो नाम्ना, **मरीचिः** संयमं ललौ । सोऽधुना चरणाद् भ्रष्टो, गच्छाद् बाह्यो मया कृतः ॥२४५॥
स च वप्रत्रयाद्बाह्य-देशस्थोऽखण्डयद् व्रतम् । स्नानोपानत्-शिरच्छत्र-धारणाद्यविधेः पुनः ॥२४६॥
परं कुर्वन् सुस्वाध्यायं, ददानो धर्मदेशनाम् । प्रबोध्य मनुजान् वक्ति, धर्मोऽस्ति प्रभुसन्निधौ ॥२४७॥
ततस्ते मनुजा एत्या-ऽस्मत्पार्श्वे केचन व्रतम् । लान्ति केचन सम्यक्त्वं, केचिद् धर्मं स्वशक्तितः ॥२४८॥
स **मरीचि**र्भवारण्ये, भ्रमन्व्रतविराधनात् । अन्तराऽन्तरतो विष्णु-राद्यो भावी **त्रिपृष्ठकः** ॥२४९॥
विदेहे **मूक**पुर्यां स, **मरीचिः प्रियमित्रकः** । षट्खण्डनायको भावी, शुभकर्मोदयात्पुनः ॥२५०॥
चतुर्विंशो जिनो **वीरो**, **भरते**ऽस्मिन्भविष्यति । दुरन्तकर्मराशीनां, समस्तानां क्षयाद् ध्रुवम् ॥२५१॥
श्रुत्वेति **वृषभो**पान्ते, गत्वा **मरीचि**सन्निधौ । त्रिः प्रदक्षिणीकृत्य[स], चक्री नत्वेत्यवक् च तम् ॥२५२॥
मयाऽथ स्वामिनः पार्श्वे, शृण्वता धर्मदेशनाम् । तावकाग्रभवानेवं, शुश्रुवे पृच्छता प्रभुम् ॥२५३॥
भरतेऽस्मिन्भवानाद्यो, विष्णुर्भावी **त्रिपृष्ठकः** । विदेहे **मूकपुर्यां** च, त्वं च चक्री भविष्यसि ॥२५४॥
तथाऽस्मिन्भरतेऽन्त्योऽर्हन्, **वीरनामा** भविष्यसि । एवं भाविस्वरूपं ते, ज्ञात्वा वन्दे तव क्रमौ ॥२५५॥
त्रिदण्डधारिणं त्वां तु, न वन्दिष्येऽधुनाऽहकम् । किन्तु भाविजिनत्वेन, भवन्तं प्रणमाम्यहम् ॥२५६॥
यतः –

जे अईआ सिद्धा, जे भविस्संति णागए काले । संपई ए वट्टमाणा, सव्वे तिविहेण वंदामि ॥२५७॥
एवं नत्वा गते पश्चा-**द्भरते** स्वगृहे तदा । आहत्य धरणीं पद्भ्यां, हृष्टो **मरीचि**रूचिवान् ॥२५८॥
यद्यहं प्रथमो विष्णु-र्भविष्यामि च चक्रराट् । अन्त्यो **वीर**जिनश्चापि, ततः श्लाघ्यं कुलं मम ॥२५९॥
आद्यो विष्णुरहं भावी, सार्वभौमोऽप्यहं पुनः । पितामहोऽस्ति मे नाभिपुत्रोऽतो मे कुलं वरम् ॥२६०॥
उक्तं च :–

जइ वासुदेवपढमो मूआएविदेह चक्कवट्टित्तं । चरमो तित्थयराणं अहा कुलं उत्तमं मज्झ ॥२६१॥
**मरीचिः** सोऽन्यदा ग्लानी-भूतः प्रध्यातवानिति । यद्येको मेऽभवच्छिष्यो, वैयावृत्त्यं करोति सः ॥२६३॥
तदैव **कपिलो** धर्मं, श्रुत्वा बुद्धो जगाविति । कुत्राऽस्ति रुचिरो धर्मः, स्वर्गापवर्गदायकः ॥२६३॥
मरीचिः प्रोक्तवानत्र, धर्मोऽस्ति प्रवरः पुनः । श्रुत्वेति **कपिलः** शिष्यो, **मरिचे**रभवत्तदा ॥२६४॥
अनेन दुष्टवचसा, मदं कुलस्य कुर्वता । **मरीचि**नाऽर्जितं पापं, नीचभवादिदायकम् ॥२६५॥
जातिमदं वितन्वानो, मरीचिस्तापसस्तदा । नीचजातिभवं भावि, दुष्कर्मोपार्जयत्तमाम् ॥२६६॥

इतः **श्रीवृषभः** पूर्व-लक्षं विहृत्य भूतले । अष्टापदमहातीर्थे, सुरार्च्यः समवासरत् ॥२६७॥
सहस्रैर्दशभिर्वाचं-यमैश्चारित्रिभिः समम् । कृत्वा षट् क्षपर्णी स्वामी, तत्र निर्वाणमीयिवान् ॥२६८॥
प्रभोः प्रभुतनूजानां, शेषाणां च तपस्विनाम् । चितात्रयं व्यधू राज-देवा दाहाय वर्ष्मणाम् ॥२६९॥
चितासु तासु जाज्वल्य-मानासु माहनैस्तदा । गृहीतो ज्वलनः पूजा-हेतोः प्रभुसुभक्तितः ॥२७०॥
तेषां कृपीटयोनीनां, त्रयाणामभिधाः क्रमात् । स्युर्दक्षिणाऽऽहवनीयगार्हपत्यस्त्रयोऽग्नयः ॥२७१॥
दंष्ट्राः प्रभोः सुरैर्नीताः, पूजायै स्वस्वताविषे । रक्षा च **भरत**क्ष्मापादि-भिरात्ता शुभाय च ॥२७२॥
प्रभोर्मुक्तिगमस्थाने, नामतः सिंहनिसद्यां । प्रासादं विदधे चक्री, चतुर्द्वारं मनोहरम् ॥२७३॥
तन्मध्ये प्रतिमा मान-प्रमाणाः सकलार्हताम् । **ऋषभ**प्रमुखाणां तु, प्रातिष्ठिपन्महीपतिः ॥२७४॥
चत्तारि अट्ठ दस दोय, वंदिया जिणवरा चउवीसं । परमट्ठनिट्ठिअट्ठा, सिद्धा सिद्धिं मम दीसंतु ॥२७५॥
यतः –
उसभो पञ्च धणुस्सय नव पासो सत्तरयणीओ वीरो । सेसट्ठ पंच अट्ठ य पत्ता दस पंच परिहाणी ॥२७६॥
**पुण्डरीक**गणाधीशं, **शत्रुञ्जये** शिवं गतम् । श्रुत्वा **भरत**चक्रीशो, भूरिसङ्घयुतो ययौ ॥२७७॥
भक्त्या तीर्थं प्रणम्याथा-ऽऽकारयद्रैमयं गृहम् । तन्मध्ये **ऋषभा**स्य, **पुण्डरीक**गणेशितुः ॥२७८॥
प्रतिमे रूप्यरैमय्यौ, चक्री प्रातिष्ठिपद्वरे । ततः स्नात्रोत्सवं चक्रे, शक्रादिभूपसंयुतः ॥२७९॥
राज्यं भूरितरं कालं, कुर्वन् **भरत**चक्रिराट् । एकदाऽन्तःपुरे सर्वा-ऽऽभरणस्तस्थिवान् क्षणम् ॥२८०॥
तदाऽऽत्मनस्तनूमात्रे, मुकुरे स्वतनुं समाम् । पश्यच्चक्री निजाच्छीर्षा-त्स्वयं मौलिमतीतरत् ॥२८१॥
ततोऽन्यभूषणादीनि, देहादुत्तारयन्नृपः । स्वां तनुं दवदग्धाभा-मैक्ष्येति ध्यातवान् स च ॥२८२॥
अहो ! देहादिकं सर्वं, वस्तु क्षणविनश्वरम् । विद्यतेऽतः कथं रागस्तस्मिन् विज्ञैर्विधीयते ॥२८३॥
यतः –
सम्पदो जलतरङ्गविलोला, यौवनं द्विचतुराणि दिनानि ।
शारदाऽभ्रमिव चञ्चलमायुः, किं धनैः ? कुरुत धर्ममनिन्द्यम् ।२८४।
इत्यादि ध्यायतस्तस्य, चक्रिणोऽन्तःपुरान्तरे । घातिकर्मक्षयाज्जातं, केवलज्ञानमञ्जसा ॥२८५॥
तदैत्य निर्जराः साधु-लिङ्गं तस्मै ददुस्तदा । केवल्युत्सवमद्वैतं, विदधुर्मुदिताशयाः ॥२८६॥
भूपा दशसहस्राणि, भरतान्ते **वृषं** तदा । श्रुत्वा ललुर्व्रतं केचि-च्छ्राद्धधर्मं प्रपेदिरे ॥२८७॥
**भरतः** केवली कुर्वन्, विहारं भूमिमण्डले । बोधयामास भूयिष्ठ-भव्यलोकान् मतेऽर्हतः ॥२८८॥
**भरत**स्य पदे राजा-**ऽऽदित्यो भरत**नन्दनः । उपविष्टः प्रजा न्याया-ऽध्वना पालयति स्म सः ॥२८९॥
पूर्वलक्षं समाः कृत्वा, विहारं **भरतो** यतिः । प्रबोध्य भविनोऽनेकान्, ययाव**ष्टापदे** गिरौ ॥२९०॥
मासक्षपणपर्यन्ते, श्रवणस्थे निशाकरे । शेषकर्मक्षयात्मुक्तिं, **भरतः** समुपेयिवान् ॥२९१॥
तदा भूरिसहस्राणि, साधवो **भरता**ऽनुगाः । अलञ्चक्रुः क्रमान्मुक्ति-पुरीं सर्वतमःक्षयात् ॥२९२॥
तदा तत्र सुरा एत्य, निर्वाणमहिमां पृथुम् । **भरत**स्य व्यधुर्नाना-गीतनृत्यपुरःसरम् ॥२९३॥
कौमार्ये पूर्वलक्षाणां, सप्तसप्ततिसम्मिताः । मण्डलीके ततो वर्ष-सहस्रं **भरत**स्य च ॥२९४॥
एकसहस्रवर्षोन-पूर्वलक्षाणि षट् पुनः । चक्रवर्तिपदेऽभूवन्, पूर्वलक्षं च केवले ॥२९५॥ युग्मम् ॥

पूर्वलक्षाश्चतुर्युक्ता-ऽशीतिं सर्वाऽऽयुषः क्रमात् । प्रपाल्य **भरतः** सिद्धिं, जगाम पातकक्षयात् ॥२९६॥
तत्राऽऽ**दित्ययश**शा भूपो-ऽभ्येत्य कृत्वा महोत्सवम् । प्रासादं कारयामास, **वृषभस्य** महेशितुः ॥२९७॥
ततः **सूर्ययशाः** खण्ड-त्रयं प्रपालयन्नयात् । बभार मुकुटं तात-तातसत्कं स्वमस्तके ॥२९८॥
अष्टम्यादिषु निःशेष-पर्वसु क्षितिनायकः । विशेषाद्विदधे धर्म-कृत्यानि शिवहेतवे ॥२९९॥
**शत्रुञ्जय**महातीर्थे, भूत्वा सङ्घपतिः स्वयम् । यात्रां विस्तरतश्चक्रे, व्ययन् भूरिधनं मुदा ॥३००॥
**महायशः** सुतं राज्ये, निवेश्य **सूर्यभूपतिः** । लात्वा दीक्षां तपस्तप्त्वा, ययौ शिवपुरीं क्रमात् ॥३०१॥
एवं **चातिबलो** राजा, **बलभद्र**महीपतिः । **बलवीर्य**नृपो **दण्ड-वीर्यो**ऽभूवन्नृपः क्रमात् ॥३०२॥
**दण्डवीर्य**नृपो लक्ष-कोटिप्रमाणमानवान् । यातः **शत्रुञ्जये** भोज-यित्वा भुङ्क्ते स्म च स्वयम् ॥३०३॥
भूरिसङ्घं विकुर्व्यापि, देवैरेत्य सुराऽचलात् । चालितोऽप्यचलन्नैव, **दण्डवीर्यो** निजाऽऽग्रहात् ॥३०४॥
एतैर्भूपैः प्रभोः सत्को, मुकुटोपि महत्तमः । शीर्षे धृतश्च चारित्रं, लात्वा याऽतं शिवं क्रमात् ॥३०५॥
एतैः शत्रुञ्जये यात्राः, कृत्वा भूरिनरान्वितैः । प्रासादाः कारितास्तीर्थे, कैलासा-ऽचलसोदराः ॥३०६॥
स्वामिनो **द्राविडे** पुत्रे, गते कैवल्यपत्तने । **द्राविडिर्वालिखिल्ल**श्च, तत्पुत्रौ नृपती ततः ॥३०७॥
**द्राविडिर्मिथिलापुर्यां**, राज्यं चकार सन्नयात् । **वालिखिल्लः** करोति स्म, राज्यं **चम्पा**ऽभिधे पुरे ॥३०८॥
**वालिखिल्लं** श्रिया कीर्त्या, सेनया च स्वतोऽधिकम् । वीक्ष्य **द्राविडि**भूपालो, द्वेषं चक्रे सहोदरे ॥३०९॥
क्रुद्धं सहोदरं वृद्धं, स्वहन्तारं कृपोज्झितम् । विज्ञाय **वालिखिल्लो**ऽपि, द्वेष्यभूत्सोदरे भृशम् ॥३१०॥
यतः —

पितरं मातरं बन्धुं, मित्रं भार्यां सुतं गुरुम् । लोभग्रस्तो न मन्येत, भूतार्त्त इव मानवः ॥३११॥
ततो द्वेषपरौ द्वौ तु, सोदरावपि सन्ततम् । गरलव्याप्तदुग्धाऽऽभं, मानसं चक्रतुः क्रमात् ॥३१२॥
दुर्जनश्लेषितस्वान्तौ, भिन्नप्रीतिपरस्परम् । हन्तुं तौ वाञ्छतः स्मैवा-ऽन्योऽन्यं धर्मपराङ्मुखौ ॥३१३॥
कोटयः पञ्च पत्तीनां, दश लक्षा रथाः पुनः । कुम्भिनामयुतं तार्क्ष्य-लक्ष्याण्येकोनविंशतिः ॥३१४॥
**वालिखिल्ल**नृपस्याऽऽसन्, **द्राविडे**रपि भूपतेः । अधिकं कटकं जातं, **वालिखिल्ल**बलात्पुनः ॥३१५॥
उभयोर्बलयोः स्वस्व-स्थानकाच्चलतोः सतोः । शीर्षं स्वं कम्पयामास, शेषोऽपि भारपीडितः ॥३१६॥
बलोत्थितरजोराज्या, व्याप्ते नभोऽङ्गणेऽभितः । न दृश्येते शशाङ्कार्कौ, स्वीयोऽन्योऽपि च मानवः ॥३१७॥
निगोदः पूर्यते जीवै-र्यथा तथा महीतलम् । तदोभयोर्महाचम्वोरश्वेन सुभटादिभिः ॥३१८॥
योजनानां त्रयाणां चा-न्तरे महीशयोर्द्वयोः । सेनयोश्च स्थितिर्याता, पृथ्वी समुद्रसेतुवत् ॥३१९॥
वाद्यमाने रणाऽऽतोद्ये, दारुणे द्वौ सहोदरौ । युध्यतः स्माऽथ **भरत-बाहुबली** इवाऽधिकम् ॥३२०॥
तुरगास्तुरगैः सार्धं, रथा रथैर्नरा नरैः । गजा गजैः समं युद्धं, कुर्वाते तत्र सङ्गरे ॥३२१॥
नदन्ति रणतूर्याणि, श्रुत्वा कातरवक्षसि । त्रासो भवति धीराणां, स्थिरता जायते कथम् ॥३२२॥
इतः समागतो वर्षा-कालो गर्जद्गजेन्द्रवत् । पूरयामास पानीय-स्थानानि सकलान्यपि ॥३२३॥
इतोः विमलधीर्मन्त्री, समेत्य **द्राविडान्तिकम्** । जगौ स्वामिन्निह स्थाने, स्थिताः सन्ति यतीश्वराः ॥३२४॥
श्रुत्वेति **द्राविडक्ष्माप**, उत्थाय तत्क्षणात्तदा । **धर्मघोषगुरुं** तत्र, ववन्दे विधिपूर्वकम् ॥३२५॥

**उपदेशोऽत्र ।**

संझरागजलबुब्बुओवमे, जीविए जलबिंदुचंचले ।

जुव्वणे वइवेग[नइवेग] संनिभे, पावजीव किमियं न बुज्झसे ॥३२६॥

स्तोकघस्रसुखस्यार्थमविवेकी जनः पुनः । भ्रातरं पितरं पुत्रं, मित्रं पत्नीं निहन्ति च ॥३२७॥

तेन पापेन जन्तुः स, गतः श्वभ्रेऽतिदुःखदे । सहते वेदनास्तीव्रा, भूयिष्ठसागरोपमान् ॥३२८॥

अपारभवपाथोधौ, पतिता मनुजा अघात् । सहन्ते दुःखसङ्घातं, स्थाने स्थाने गता अपि ॥३२९॥

सञ्चरन्तं जनं मार्गे, शुभे विषमवाजिनः । तथोन्मार्गे नयन्त्येव, यथा दुःखी भवेच्चिरम् ॥३३०॥

विषयैर्विजितो जन्तुः, सञ्चरन् स्वेच्छयाऽभितः । इहाऽमुत्र च दुःखानि, लभते संसृतौ चिरम् ॥३३१॥

युगपत्पञ्चभिर्घोरै-र्विषयैर्विषसन्निभैः । पातितो भवपाथोधौ, सहते वेदनां जनः ॥३३२॥

उक्तं च :–

कषाया वैरिणः कामं, पुण्यं स्वं पूर्वसञ्चितम् । पश्यतां देहिनां नूनं, हरन्ति तस्करा इव ॥३३३॥

जं अज्जिअं चरित्तं, देसूणाए पुव्वकोडीए । तंपि अ कसायमित्तो, हारेइ नरो मुहुत्तेणं ॥३३४॥

मनसाऽपि स्मृता हिंसा, भवेद्दुःखौघदायिनी । सा पुनर्विहिता सम्यग्, नरकं नयते जनम् ॥३३५॥

ये राज्यादिसुखेष्वार्ताः, जीवान् हिंसन्ति निर्दयम् । ते स्वं भवे भवे घ्नन्ति, पूर्वार्जितैनसा खलु ॥३३६॥

नरकान्तस्य राज्यस्य, कृते को मानवः खलु । हन्ति स्वसोदरादींश्च, जीवान् जीवितकाङ्क्षिणः ॥३३७॥

श्रीरनित्या मतिश्चापि, शरीरं च विनश्वरम् । एतेषां हेतवे को ना, हन्ति जन्तून् निरागसः ॥३३८॥

श्रुत्वेति श्रीगुरोरास्याद्, **द्राविड**क्षितिनायकः । सद्यः सम्प्राप्तवैराग्यो, जगत्पश्यति नश्वरम् ॥३३९॥

जायमाने रणे घोरे, मुक्त्वाऽश्वं पदिको नृपः । क्षन्तुं स्वबान्धवं वाण्या, गुरोः स **द्राविडो**ऽचलत् ॥३४०॥

आयान्तं सोदरं क्षन्तुं, ज्ञात्वा लोकमुखात्तदा । **वालिखिल्लो**ऽपि मातङ्गा-दुत्ततार नमच्छिराः ॥३४१॥

एकत्रैत्य मिथो मिथ्यादुष्कृतं शुद्धचेतसा । दत्तः स्म सोदरौ पाद-पतनाऽऽलिङ्गनाऽऽदिभिः ॥३४२॥

**वालिखिल्लो** जगौ भ्राता, राज्येनानेन मे सृतम् । गृहाणेदं समं राज्यं, मां मोचय भवादतः ॥३४३॥

तव पूज्यस्य यच्चक्रे-ऽपराधः पापिना मया । क्षम्यतां स त्वया सद्यः, प्रसन्नीभूय सोदर ! ॥३४४॥

कनिष्ठसोदरस्यैवं, भक्ति दृष्ट्वाऽतिहर्षितः । **द्राविडः** प्रोक्तवान् वाण्या, धर्मपीयूषपुष्टया ॥३४५॥

सप्ताङ्गं राज्यमेतद्धि, जातं मम विषोपमम् । यतो जीवा रणेऽनन्ताः, समकालं मया हताः ॥३४६॥

अहं **बाहुबलि**क्ष्माप, इव सम्प्रति संयमम् । ग्रहीष्यामि कुरुष्व त्वं, राज्यमेतत् कृपां कुरु ॥३४७॥

**वालिखिल्लो** जगौ भ्रातः !, किं मां पातय संसृतौ । अहमेव ग्रहीष्ये तु, संयमं शिवशर्मदम् ॥३४८॥

इत्थं संप्राप्तवैराग्यौ, सोदरौ तौ तदा भृशम् । राज्ये स्वं स्वं सुतं सद्यः, स्थापयामासतुर्मुदा ॥३४९॥

अष्टाह्निकामहं कृत्वा, श्रीसर्वज्ञनिकेतने । सप्तक्षेत्र्यां व्ययन्तौ स्वधनं भूरि सहोदरौ ॥३५०॥

बहुभिर्नरपैः कोटि-मितैर्जनादिभिः समम् । धर्मघोषगुरूपान्ते, ललतुः संयमश्रियम् ॥३५१॥

ततस्तौ सोदरौ तीव्र-तपसः खड्गधारया । छिन्दन्तौ कर्मवल्ल्यौघं, विहरेते स्म भूतले ॥३५२॥

पूर्वलक्षत्रयं दीक्षां, प्रपाल्य सिद्धपर्वते । **द्राविडो वालिखिल्लश्च**, ययतुर्नन्तुमर्हतः ॥३५३॥

तत्राऽऽदिमं जिनं नत्वा, राजादन्यास्तरोः[१] पुनः । दत्त्वा प्रदक्षिणास्तिस्रः, कुर्वाते तौ तपो घनम् ॥३५४॥
तौ **कार्तिक**स्य राकायां, कृतमासोपवासकौ । दशकोटिमितैर्वाचं-यमैः संसेवितक्रमौ ॥३५५॥
भूत्वा ध्यानपरौ दग्ध-कर्मेन्धनौ तपोग्निना । लभेते केवलज्ञानं, लोकालोकप्रकाशकम् ॥३५६॥
क्रमादायुःक्षये **शत्रु-ञ्जये**ऽद्रौ तौ मुनीश्वरौ । ययतुर्निर्वृत्ति सार्द्धं, दशकोटितपस्विभिः ॥३५७॥
**सौधर्मेश**स्तदाऽभ्येत्य, तेषां सिद्धिगमोत्सवम् । कृत्वा **सिद्धा**ऽभिधं तीर्थ-मित्येवं नाम दत्तवान् ॥३५८॥
उक्तं च :-
कार्तिके पूर्णमास्यां तु, कृत्तिकास्थे निशाकरे । मुनयः केवलेनैते, सिद्धिं **शत्रुञ्जये** ययुः ॥३५९॥
यथा चैत्रस्य राकायां, **पुण्डरीको**ऽगमच्छिवम् । कार्तिकस्य तथैवैते, मुनयः प्रययुः शिवम् ॥३६०॥
यात्रया तपसा देवा-र्चनाद्देवनतेः पुनः । कार्तिके मासि पुण्यं स्या-दनन्तं शिवहेतुकम् ॥३६१॥
कार्तिके मासि क्षपणं, कृतं कर्म क्षिपेच्च तत् । यन्न श्वभ्रे शतैः गतैः, क्षिप्यते जन्तुभिर्ध्रुवम् ॥३६२॥
केनाऽप्युपवासेन, कार्तिक्यां विमलाचले । ब्रह्म-योषिद्-भ्रूणहत्यापातकान्मुच्यते नरः ॥३६३॥
यः कुर्यात्कार्तिकीरात्रौ, जिनेन्द्रस्य महोत्सवम् । स भुक्त्वा स्वर्गसौख्यानि, लभते पदमव्ययम् ॥३६४॥
सर्वेषामिह मासानां, पूर्णिमासु महोत्सवम् । यः कुर्यात्**पुण्डरीका**द्रौ, स याति परमं पदम् ॥३६५॥
पूर्वकोटौ गतायां तु, चक्रिणो **भरता**दनु । **द्राविडो वालिखिल्लश्च**, यातः **शत्रुञ्जये** शिवम् ॥३६६॥
इक्ष्वाकुवंश एवाऽऽसन्न-सङ्ख्याता महीभुजः । भेजुर्मुक्तिं तथा सर्व-सिद्धार्थस्वर्गगामिनः ॥३६७॥
**अयोध्यायां** प्रभोर्वंशे, इक्ष्वाकाह्वे मनोहरे । असङ्ख्यातेषु भूपेषु, जातेषु धर्मशालिषु ॥३६८॥
वैरिघूकतमोऽराति-**जितशत्रु**र्महीपतिः । धर्मकर्मणि निष्णातो, बभूवाऽतुलवीर्यवान् ॥३६९॥ युग्मम् ॥
युवराजोऽभवत्तस्य, **सुमित्राह्वः** सहोदरः । जितशत्रोरभूत्पत्नी, **विजया** शीलशालिनी ॥३७०॥
अन्यदा सुखसुप्ता सा, मध्यरात्रे लसत्क्षणे । चतुर्दशमहास्वप्ना-नित्यपश्यद् गजादिकान् ॥३७१॥
कुम्भि-सिंह-वृषाम्भोज-वासा दाम शशी रविः । ध्वज-कुम्भौ सरः- सिन्धू, विमान-रत्न-वह्नयः ॥३७२॥
राधश्वेतत्रयोदश्यां, रोहिणीस्थनिशाकरे । अनुत्तरविमानाद्याऽनुत्तरा-ऽसङ्ख्यशर्मणः ॥३७३॥
च्युत्वा निशीथसमये, विजयाकुक्षिपल्वले । अवातरत् प्रभुर्हंस, इव देवसरोवरे ॥३७४॥ युग्मन् ॥
तदोद्द्योतो महानासीत्, जगदुद्द्योतकारकः । नारकाणामपि सुखमभूद् द्विघटिकावधि ॥३७५॥
इतः **सुमित्रभूपस्य**, नाम्ना पत्नी **यशोमती** । चतुर्दश महास्वप्नान्, ददर्श **विजयेव** तु ॥३७६॥
**यशोमत्या**स्तदा कुक्षौ, कोऽपि पीवरपुण्यवान् । जीवः समागमत् स्वर्गात्, च्युत्वा स्वायुःक्षयात्पुनः ॥३७७॥
पृष्ट्वा स्वप्नविचारं तु, प्रभाते स्वप्नपाठकाः । उत्पत्तिं जगदुः सार्व-चक्रिणोश्च द्वयोः क्रमात् ॥३७८॥
पूर्णे मासि तु माघस्य, शुक्लाष्टम्यां शुभे क्षणे । रोहिणीस्थविधौ पुत्रं, **विजया**-ऽसूत सुन्दरम् ॥३७९॥
स्वस्वस्थानात् ककुप्कन्याः, षट्पञ्चाशत् धुतासनाः । तत्राऽभ्येत्य व्यधुर्वैयावृत्त्यं प्रभोर्मुदाञ्चिताः ॥३८०॥
यतः -
मेरु अह उड्ढलोआ चउविदिसि मज्झरुअगाओ अट्ठ पत्तेअं ।
चउविदिसि मज्झरुअगा, उद्धुंति छप्पन्न दिसिकुमरी ॥३८१॥

१. रायणवृक्ष इति भाषायाम्

संवट्टमेह आयंसयाय३, भिंगार तालीअंटाय । चामर जोइरक्खं, करंति एअं कुमारीओ ॥३८२॥
ततः स्वासनकम्पेन, चतुःषष्टिः सुरेश्वराः । विज्ञायाऽथ प्रभोर्जन्म, चेलुः स्वस्वसुरालयात् ॥३८३॥
निद्रां मात्रन्तिकेऽभेत्य, दत्त्वाऽवस्वापिनीं हरिः । नीत्वा करे प्रभुं पञ्च-रूपभृत् स्वर्गिरौ ययौ ॥३८४॥
तत्र स्नात्रोत्सवं सर्वे, शक्राः स्वस्वाऽधिकारतः । चक्रुरानीय पानीयं, क्षीरोदाब्धेः प्रभोः शिशोः ॥३८५॥
ततः प्रभुं हरिर्मातुः, पार्श्वे मुक्त्वा प्रमीलिकाम् । अपहृत्य ययौ स्वर्गे-ऽन्येऽपि शक्रा निजास्पदम् ॥३८६॥
प्रातः पुत्रजनुर्मत्वा, **जितशत्रु**नरेश्वरः । जन्मोत्सवं व्यधाच्चेत-श्चमत्कारकरं नृणाम् ॥३८७॥
गर्भस्थिते प्रभौ भूपो, माताऽपि केनचित्क्वचित् । न जिताऽतो**ऽजिते**त्याख्यां, सूनोश्चक्रे मुदाऽन्यदा ॥३८८॥
पञ्चाशल्लक्षकोटीषु, सागरेषु गतेष्वथ । आद्याज्जिनादभूत्सार्वो, द्वितीयो**ऽजित**तीर्थकृत् ॥३८९॥
पञ्चविंशतियुग्लक्ष-कोटयो निर्जराऽधिपाः । **ऋषभा-ऽजित**योर्मध्ये, बभूवुः प्रथमद्युवि ॥३९०॥
अतोऽभ्येत्य हरिः स्वर्गात्, पुनः पुनः प्रभुं सदा । कुमाररूपमाधाय, रेमे तु प्रभुणा समम् ॥३९१॥
**यशोमत्यपि** सम्पूर्णे, मासेऽत्र पूर्णदोहदा । प्रासूत तनयं वर्य-लक्षणं रुचिरक्षणे ॥३९२॥
कृत्वा जन्मोत्सवं तस्य, सूनोः **सुमित्रभूपतिः** । **सगरे**त्यभिधां चक्रे, सर्वसज्जनसाक्षिकम् ॥३९३॥
धात्रीभिः पञ्चभिः पाल्य-मानौ तौ नन्दनौ क्रमात् । वर्धमानौ मुदं धत्तो, मातापित्रोः स्म सन्ततम् ॥३९४॥
जानन्नपि प्रभुर्मातृ-पित्रनुग्रहहेतवे । बुधोपान्ते पठन् शास्त्रं, पाठयामास चाऽपरान् ॥३९५॥
**सगरो**ऽपि बुधोपान्ते, मुक्तः पित्रा पठन् सदा । शस्त्रशास्त्रकलाः सर्वा, अधीते स्माऽल्पकालतः ॥३९६॥
यतः –
जले तैलं खले गुह्यं, पात्रे दानं मनागपि । प्राज्ञे शास्त्रं स्वयं याति, विस्तारं वस्तुशक्तितः ॥३९७॥
क्रमाद्यौवनमारूढः, कुमारो**ऽजित**नामकः । उपयेमे कनीर्मातापित्रनुग्रहहेतवे ॥३९८॥
पित्रा भूयिष्ठभूपानां, कन्यका रूपसुन्दराः । कुमारः **सगर**श्चारू-त्सवेन परिणीतवान् ॥३९९॥
कुमारत्वे**ऽजितः** पूर्व-लक्षानष्टादश क्रमात् । व्यतिचक्राम सत्सात-लीनो दोदुन्देववत् ॥४००॥
**जितशत्रु**नृपो राज्य-योग्यं पुत्रमवेत्य च । राज्ये न्यस्य सुतं दीक्षां, ययावैशानताविषे ॥४०१॥
यतः –
उसभ पीआ नागेसु, सेसाणं सत्त हुंति ईसाणे । अट्ठ य सणंकुमारे, माहिंदे अट्ठ बोधव्वा ॥४०२॥
**सुमित्रो**ऽपि सुतं स्वीयं, **सगरं** स्वपदे क्रमात् । न्यस्य लात्वा व्रतं कृत्वा, तपः स्वर्गसुखं श्रितः ॥४०३॥
**अजितो** भूपतिः पृथ्वीं, पालयन् न्यायवर्त्मना । राजन्वतीं व्यधात्सर्व-लोकसुखप्रदानतः ॥४०४॥
सुरा अपि सदाऽभ्येत्य, दिव्यभोगप्रदानतः । प्रभुं सम्प्रीणयामास, साहाय्यकरणात्सदा ॥४०५॥
**अजिता**ऽनुज्ञया शश्व-त्**सगरो** रोगवर्जितः । विषयान्साधयामास, बहून् भूरिबलान्वितः ॥४०६॥
पाति पृथ्वीं प्रभौ देशे, नेतयो न भयं क्वचित् । सुखाऽऽसक्ताः प्रजाः सर्वा, बभूवुश्च निराकुलाः ॥४०७॥
पूर्वलक्षास्त्रिपञ्चाशत्, सागरा**नजितो** नृपः । राज्यं निष्कण्टकं चक्रे, ततश्च ध्यातवानिति ॥४०८॥
पुत्रमित्रकलत्रादि-पाशैर्बद्धो भवे भवे । पक्षिवत्स्वेच्छया धर्मे, रन्तुं न लभते जनः ॥४०९॥
एवं चिन्तयति श्रीम**दजिते** मेदिनीपतौ । लोकान्तिकाः सुरा एत्य, प्रोचुः प्रोच्चस्वरंत्विति ॥४१०॥

प्रभो ! जय जय स्वामिन् !, धर्मतीर्थं प्रवर्तय । नन्द नन्द चिरं धर्मं, प्रकाशय प्रकाशय ॥४११॥
स्वामी ततो निजं कार्यं, धर्मतीर्थप्रकाशकृत् । ज्ञात्वा **सगर**माकार्य, प्रोवाचेति कृतादरम् ॥४१२॥
इदं राज्यं गृहाण त्व-महं चारित्रमात्मसात् । करिष्यामि भवांश्चक्री, यतो भविष्यसि ध्रुवम् ॥४१३॥
**सगराय** निरीहाया-ऽनिच्छते राज्यमञ्जसा । बलाद्राज्यं ददौ **स्वाम्य-जितः** पराजितेन्द्रियः ॥४१४॥
ततः स्वामी स्वपुत्रेभ्यो, राज्यं यथोचितं तदा । दापयामास **सगर**-समीपाद् धर्मकर्मकृत् ॥४१५॥
शक्रा धूताऽऽसनाद्दीक्षा-मनो ज्ञात्वा**ऽजितस्य** च । दीक्षामहोत्सवं कर्तुं, समीयुः सपरिच्छदाः ॥४१६॥
स्वामी ततश्च सुस्नातो, दिव्यभूषणभूषितः । **सुप्रभा**शिबिकाऽऽरूढः, सुरा-ऽसुरनमस्कृतः ॥४१७॥
**सगरेण** सुराधीशैः, क्रियमाणमहोत्सवः । सहस्राम्रवणेऽशोक-तरोरधः समागमत् ॥४१८॥
उत्तीर्य वाहनात्तस्माद्, विमुच्याऽऽभरणादिकम् । दधत्स्कन्धे वरं शक्र-दत्तं स्वामी विभासते ॥४१९॥
उच्चखान विभुः केशान्, क्लेशानिव स्वमस्तकात् । पञ्चभिर्मुष्टिभिस्तांश्च, शक्रः क्षीरोदधौ न्यधात् ॥४२०॥
निषिद्धे सुरराजेन, तुमुले सकलेऽभितः । स्वीचक्रे सर्वसावद्य-त्यागं त्रिधा त्रिधा प्रभुः ॥४२१॥
समं राज्ञां सहस्रेण, जगृहे स्वामिना व्रतम् । सन्त्यज्य सकलां लक्ष्मीं, जीर्णवस्त्रतृणौघवत् ॥४२२॥
माघश्वेतनवम्यां भे, रोहिण्यां रजनीकरे । उत्तराह्णे षष्ठतपा-श्चतुर्थज्ञानमाप सः ॥४२३॥
यतः —
तिहिं नाणेहिं समग्गा, तित्थयरा जाव हुंति गिहिवासे । पडिवन्नंमि चरित्ते, चउनाणी जाव छउमत्थे ॥४२४॥
स्वस्वस्थाने गते सर्व-शक्रादिभूमिनायके । विहारं कृतवान् स्वामी, कर्मक्षपणहेतवे ॥४२५॥
**अयोध्या**नगरे **ब्रह्म-दत्त**स्यैव निकेतने । जातं पारणकं चारु, परमान्नात्प्रभोस्तदा ॥४२६॥
सार्धद्वादशरैकोटीर्ववृषुस्तत्र निर्जराः । प्रभोः पारणकस्थाने, स्तूपं ब्रह्मा व्यधात्तदा ॥४२७॥
आर्या-ऽनार्यादिदेशेषु, विहरन्निर्ममः प्रभुः । सहते स्मोपसर्गौघं, दुष्टदेवादिनिर्मितम् ॥४२८॥
द्वादशाब्दीं व्यतिक्रम्या-ऽयोध्याया**मजितो** जिनः । सहस्राम्रवणे सप्त-च्छदवृक्षतलेऽगमत् ॥४२९॥ युग्मम् ॥
तत्र गोदोहनासीनः, प्रभुर्धर्मपरायणः । पौषश्वेतद्वादश्यां भे, रोहिण्यां पश्चिमे दिने ॥४३०॥
अवाप केवलज्ञानं, लोकालोकविलोककम् । तदा तत्राऽऽगताः शक्रा-श्चतुःषष्टिमिता दिवः ॥४३१॥ युग्मम् ॥
तत्र वप्रत्रये स्वर्ण-रूप्यरत्नमये कृते । योजनप्रमिते चञ्च-च्चतुर्द्वारविराजिते ॥४३२॥
उपविष्टः प्रभुर्मध्ये-वप्रं योजनया गिरा । भव्यान् बोधयितुं जैन-धर्मं जीवदयामयम् ॥४३३॥
इतः **सगर**भूपस्या-ऽऽयुधौकसि मनोहरे । चक्ररत्नं समुत्पन्नं, कान्तिनिर्जितसूर्यभम् ॥४३४॥
द्वयोर्वर्द्धापने सार्ध-मागते **सगरो** नृपः । मत्वा धर्मपरं चक्रि-श्रीदं नन्तुं प्रभुं ययौ ॥४३५॥
प्रदक्षिणात्रयं कुर्वन्, बलिमुच्छालयंश्च खे । वन्दित्वा स प्रभोरग्रे, यथास्थानं न्यवीविशत् ॥४३६॥

**॥ उपदेशः ॥**

धर्म एव सदा सेव्यः, स्वर्गमुक्तिसुखप्रदः । विना धर्मं भवेऽपारे, भ्रमन्ति ? मनुजा बहु ॥४३७॥
इत्यादि धर्मोपदेशः ॥
देशनान्ते प्रभुः सङ्घं, चतुर्द्धाऽस्थापयत्क्रमात् । ततो गणधरान् पञ्च-नवतिं प्रमितान् पुनः ॥४३८॥

धर्मं प्रपद्य **सगरः**, समेत्य निजसद्मनि । चक्रे पूजां व्यधान्नाना-फलपुष्पोपहारतः ॥४३९॥
शस्त्राऽऽगारात्स्वयं चक्रे, निर्गते **सगरो** नृपः । तदनु प्रस्थितस्तस्मिन्, वासरे सबलो बली ॥४४०॥
छत्रेभाऽश्व-मणी-दण्ड-चर्म-काकिणी-वर्द्धिकान् । पुरोधःप्रमुखान् लात्वा, चचाल **सगरो**ऽध्वनि ॥४४१॥
सृष्ट्यां चरन् रिपून् जेतुं, पूर्वाब्धौ **मागधं** सुरम् । बाणेनाऽऽजूहवद्भूपो, द्विषड्योजनतो नृपः ॥४४२॥
**मागधा**त्प्राभृते रत्न-पुञ्जमादाय भूपतिः । पारणं चकृवान् भूरि-साधर्मिकसमन्वितः ॥४४३॥
अष्टाऽह्निकामहं कृत्वा, भूपश्चक्राऽनुगस्ततः । दक्षिणाम्भोनिधेस्तीरे-ऽस्थापयच्छिबिरं स्वयम् ॥४४४॥
तत्र वार्धकिना वासे, विहिते विहिताऽष्टमः । बाणक्षेपणतस्तत्रस्थितं देवमसाधयत् ॥४४५॥
तद्दत्तप्राभृतं रत्ना-दिकं लात्वा नृपस्ततः । प्रतीच्यब्धौ **प्रभासे**शं, वशीचक्रे च पूर्ववत् ॥४४६॥
ततः **सिन्धु-महासिन्ध्वो**स्तटं प्राप्य च दक्षिणम् । तपः कृत्वा तयोर्नाथा-वसाधयन्महीपतिः ॥४४७॥
उत्तरप्रागृदिशा गच्छन्, **वैताढ्या**द्रौ ययौ स च । असाधयत्तपः कृत्वा, **वैताढ्य**स्वामिनं खगम् ॥४४८॥
**सगरा**देशतः सिन्धु-वार्धि**वैताढ्य**पार्श्वगान् । भूपालान्साधयामास, सेनानीः प्राभृतग्रहात् ॥४४९॥
ततश्चक्री व्रजंश्चक्रा-ऽनुगो **वैताढ्य**भूभृतः । मनोरमे वने चक्रं, न्यवेशयद्विशारदः ॥४५०॥
कृताऽष्टमे तपे भूप सेनानीभ्यां यथाविधि । भूपादेशाद् गजारूढः, सेनानीरचलत्ततः ॥४५१॥
सेनानीर्दण्डरत्नेन, तमिस्त्रायाः कपाटकौ । अताडयत्तथा सद्यो, यथोद्घाटयतः स्म तौ ॥४५२॥
ततो निर्गच्छता वह्निहेतिना ज्वलनोद्भयात् । पश्चात्पदाश्वचलनात्सेनानीर्दूरतो ययौ ॥४५३॥
कपाटोद्घाटनोदन्ते, सेनान्या कथिते नृपः । गजरत्नसमारूढ-स्तमिस्त्राद्वारमागमत् ॥४५४॥
कुम्भिकुम्भे समारोप्य, मणिरत्नं लसद्द्युति । चक्री चक्राऽनुगस्तस्या, द्वारदेशे स्थितः क्षणम् ॥४५५॥
काकिण्या मणिना तत्र, योजने योजने गतः । मण्डलान्यालिखन्तत्र, निम्नगोन्निम्नगे ययौ ॥४५६॥
वार्धकिकृतपद्यायां, स्थित्वा नद्यौ तके नृपः । उत्तीर्य प्रययौ द्वारं, तमिस्त्रायाः पदा क्रमात् ॥४५७॥
प्राच्यद्वाराररद्वन्द्वे, सद्य उद्घटिते सति । चक्र्युदग्भरतस्यार्धं, ययौ साधयितुं रिपून् ॥४५८॥
तत्र म्लेच्छरिपून् चक्री, जित्वा क्षुद्र**हिमाचले** । नितम्बे दक्षिणे सेनां, स्थापयामास लीलया ॥४५९॥
चक्री रथस्थितो बाणं, स्वनामाऽङ्कं तदाऽक्षिपत् । शैलस्य स्वामिनः पार्श्वे, द्विमुनीन् योजनानि तु ॥४६०॥
चक्रिनामाऽङ्कितं बाणं, दृष्ट्वा कृत्वा रुषं धुरि । ततोऽभ्येत्याऽचलत्स्वामी, तस्मै प्राभृतकं ददौ ॥४६१॥
ततश्च**र्षभ**कूटाद्रौ, गत्वा चक्राऽनुगो नृपः । काकिण्या मणिना स्वाह्वाक्षरश्रेणीमलीलिखत् ॥४६२॥
वैताढ्यभूभृतो याम्यो-त्तरश्रेणीपती खगौ । जित्वा चक्रिवत् तत्रैवा-ऽस्थापयत् तौ निजाविव ॥४६३॥
*तत्र श्रेणितटद्वन्द्व-स्थितान् प्रत्यर्थिभूपतीन् । जित्वा नृपाज्ञया सेना-पतिरागान्नृपान्तिके* ॥४६४॥
ततो भूमीपतिः खण्ड-प्रपाताऽऽह्वां गुहां तदा । तमिस्त्रावत् समुल्लङ्घ्य, ययौ दक्षिणदिक्तटम् ॥४६५॥
ततः कृताऽष्टमतपा, गङ्गापश्चिमरोधसि । प्रापन्नव निधींश्चक्री, गङ्गारोधःप्रपाततः ॥४६६॥
ततो नृपाज्ञया गङ्गा-नद्या दक्षिणदिक्तटे । गत्वा तत्र स्थितान् शत्रून्, जिगाय शिबिराधिपः ॥४६७॥
षट्खण्डस्थ नृपान् सर्वान्, **सगर**श्चक्रराट् क्रमात् । पञ्चत्रिंशत्सहस्त्राब्द्या-**ऽयोध्या**यां समुपागमत् ॥४६८॥

द्वात्रिंशता सहस्रैश्च, भूपैर्मुकुटवर्धनैः । पक्षैश्च तन्मितैश्चक्रे, तस्य राज्याभिषेचनम् ॥४६९॥
लक्षैश्चतुरशीलिनां-रथकुञ्जरवाजिनाम् । पत्तिभिः कोटिभिः शश्व-त्सेव्यते **सगरः** स्म सः ॥४७०॥
अन्तःपुर्यश्चतुःषष्टि-सहस्रा रूपसुन्दरीः । बभूवुश्चक्रिणस्तासां, सेविका द्विगुणाः पुनः ॥४७१॥
अन्येद्युः **सगर**क्ष्माप-पुत्रा **अष्टापदे** गिरौ । ययुर्नन्तुं युगादीशं, दण्डरत्नादिसंयुताः ॥४७२॥
**आदिदेवा**दिपुत्रेण, कारितस्य जिनौकसः । त्रिः प्रदक्षिणयन्तस्ते, दक्षिणद्वारमाययुः ॥४७३॥
प्रविश्य दक्षिणद्वारा, तत्र तान् चतुरोऽर्हतः । **शम्भवा**दीन् मुदा नेमुः, स्तुवन्ति स्म यथोक्तिभिः ॥४७४॥
ततोऽष्टौ जिनपान्नेमुः, पश्चिमककुभि स्थितान् । कौबेर्यां दश सर्वज्ञान्, ऐन्द्रयां च **वृषभा-ऽजितौ** ॥४७५॥
यत :—
चत्तारि अट्ठ दस दोय, वंदिआ जिणवरा चउव्वीसं । परमट्ठनिट्ठिअट्ठा, सिद्धा सिद्धिं मम दिसंतु ॥४७६॥
प्रासादं जगदीशस्य, दर्शं दर्शं च ते जगुः । धन्यं स **भरतो** जज्ञे, येनाऽयं कारितो महान् ॥४७७॥
तत्राऽन्येषु जिनौकस्सु, चक्रवर्तिसुतास्तदा । नेमुर्जिनान् लसत्पुष्पै-रपूजयंश्च सादरम् ॥४७८॥
**सगरस्य** सुतो वृद्धो, **जह्नुः** प्राह स्वबान्धवान् । अस्तीदं रैमयं **नाभि**-पुत्रसद्म मनोहरम् ॥४७९॥
अग्रे लोका भविष्यन्ति, लोभिनो धर्मवर्जिताः । प्रासादात्कनकं छेदं, छेदं लास्यन्ति ते पुनः ॥४८०॥
अतोऽस्माभिर्विधीयेत, खातिका भूभृतोऽभितः । भ्रियते स्वर्नदीपाथःप्रवाहेणाऽभितो भृशम् ॥४८१॥
ततस्तैर्दण्डरत्नेन, योजनप्रमिता पृथुः । आरब्धा खातिका सद्यः, खनितुं तरसा भुवम् ॥४८२॥
अधस्तात्खन्यमानायां, खातिकायां क्षितेश्च तैः । दण्डरत्नेन निन्येऽथ, गङ्गावाहो महत्तमः ॥४८३॥
खातिकायां मरुन्नद्या, वाहेन पतता तदा । कर्दमो न्यपतत् मध्ये-गेहं पातालवासिनाम् ॥४८४॥
पतन्तं कर्दमं मत्वा-ऽवधिना ज्वलनप्रभः । तत्रैत्य तान् जगौ चक्रि-पुत्रा ! मेदं विधीयताम् ॥४८५॥
अनिवृत्तेषु तेष्वेव, तस्मात्कृत्याद्रुषाऽरुणः । द्व्यूनषष्टिसहस्राणि, चक्रिपुत्रान् ददाह सः ॥४८६॥
तदैत्य हरिणा प्लाव्य-मानां वीक्ष्य क्षितिं समाम् । स्वशक्त्या स्वर्नदीवाहं, सद्यो न्यवर्तयद् ध्रुवम् ॥४८७॥
चक्रिपुत्राऽनुगास्ते तु, कुर्वाणा आत्मनो वधम् । द्विजरूपभृता सङ्क्र-न्दनेनेति निवारिताः ॥४८८॥
भ्रमताऽनन्तसंसारे, जीवेन मानुषं जनुः । दुःखेनापि ततो न स्वं, हन्यतेऽङ्गं विचक्षणैः ॥४८९॥
एक एवाङ्गवानेति, यात्येकश्च सुखासुखे । लभते नहि कस्याऽपि, कोऽपि स्वीयोऽस्ति संसृतौ ॥४९०॥
इत्यादि जल्पिते सङ्क्र-न्दनेन ते नृपाऽनुगाः । मरणाद्विरता रोदं, रोदं तस्थुस्तदा भृशम् ॥४९१॥
यावत्ते चलिताः सर्वे-**ऽयोध्यां** प्रति नृपानुगाः । इन्द्रस्तावत्प्रबोधाया-**ऽयोध्यायां सगरस्य** तु ॥४९२॥
[1]पञ्चवर्षशतायुष्कं, गतासुं बालकं करे । कृत्वा विप्रस्य रूपेण, चक्र्यन्तेऽभ्येत्य चावदत् ॥४९३॥ युग्मम् ॥
मेदिनीरक्षकस्त्वं तु, विज्ञैरेव निगद्यसे । अतो वाऽव प्रजा नीय-माना यमेन सत्वरम् ॥४९४॥
अद्याऽहं मुषितः सर्वं, त्वयि रक्षति मेदिनीम् । यमेन निर्घृणेनाऽऽशु, रक्ष रक्षाऽद्य मां पुनः ॥४९५॥
राज्ञोक्तं तव किं विप्र !, यमेन हरितं वद । सोऽवग् मे नन्दनो ह्येको, हृतोऽस्म्यतो मृतोऽस्म्यहम् ॥४९६॥
औषधानां प्रदानेन, मन्त्रतन्त्रादियोगतः । पुत्रो मे जीव्यतां चक्रि-स्त्वमायातो महीमिमाम् ॥४९७॥

१. त्रिषष्टि ग्रन्थे इदं वर्णनं नास्ति

ततश्चक्री बहून् वैद्यान्, समाकार्यौषधादिकैः । उपचारं व्यधात्तैश्च, न जिजीव स च ध्रुवम् ॥४९८॥
वैलक्षे भूधवे जाते, वैद्यरूपधरो हरिः । आगाद्यदा तदा चक्री, वैद्यं प्रति जगावदः ॥४९९॥
जीव्यतां बालको ह्येष, सुष्ठ्वौषधप्रदानतः । यद्यत्त्वं याचसे तत्त-न्मया प्रदास्यते धनम् ॥५००॥
ततो बालस्वरूपं स, विलोक्याऽऽह नृपं प्रति । पूर्वे यस्य गृहे कोऽपि, न मृतो जनकादिकः ॥५०१॥
तस्य गेहात् समानीत-भस्मना शिशुरेष च । रूक्ष्यतेऽङ्गेषु सर्वत्र, तदा ह्येष प्रजीवति ॥५०२॥
तादृग्भस्मकृते भूमी-पतिना स्वाऽनुगा घनाः । प्रेषिता नगरस्यान्तो, भ्रमद्भिः भस्म नाऽऽपि तैः ॥५०३॥
ततो मुक्तगलो विप्रो, रुरोदोच्चस्वरं भृशम् । ततश्चक्री जगौ विप्र !, मृतः कोऽपि जिजीव न ॥५०४॥
अतो मुक्त्वा शुचं धर्म-कृत्यं कुरु समाहितम् । यतो धर्माद्भवेन्नैव, शोकः प्राणजुषां खलु ॥५०५॥
यतः —
जगत्पूज्या वज्रकायाः, योगीन्द्रा जिननायकाः । परलोकगतास्तस्मात्, कः शोकोऽत्र विधीयते ॥५०६॥
सप्तधातुनिबद्धं यत्, क्षुत्-तृट्-शीता-ऽऽतपादिभिः । पीड्यते तत्र देहे का, स्थिरता मूर्खकल्पिता ॥५०७॥
भ्रातृ-पुत्र-कलत्राद्याः, सर्वेऽपि स्वार्थहेतवे । मिलन्ति विघटन्ते च, स्वार्थाऽभावे च निश्चितम् ॥५०८॥
एवं वदति चक्रीशे, विप्राग्रे बोधहेतवे । पुत्राऽनुगा रुदन्तस्ते, चक्रिपार्श्वे समागमन् ॥५०९॥
चक्रिणोक्तं कथं त्वेवं, भवद्भी रुद्यते भृशम् । ततस्ते स्वस्वनाथानां, मृत्यूदन्तं जगुः स्फुटम् ॥५१०॥
श्रुत्वैतत्पुत्रमरण-स्वरूपं चक्रिराट् तदा । लोठं लोठं क्षितौ चक्रे, रोदनं रोदयन्परान् ॥५११॥
ततो विप्रो जगौ चक्रिन् !, बोधयन् मां मृते सुते । रोदिषि त्वं सुतौ द्वौ ते, जीवन्तौ स्तोऽधुना किल ॥५१२॥
अहमेकसुतोऽभूवं, सोऽपि मृत्युं गतोऽधुना । अतस्त्वं द्विसुतो मुक्त्वा, शुचं धर्मं कुरुष्व भो ॥५१३॥
चक्री जगौ सुतो ह्येको, नाऽऽयातोऽत्राधुना मम । जह्नुभगीरथौ सुतौ, तेन प्रादुष्कृतौ तदा ॥५१४॥
मुक्ते शोके महीशेन, शक्ररूपधरो द्विजः । जगौ स्वागमनोदन्तं, चक्रिणः पुरतस्तदा ॥५१५॥
जीवानां रक्षणाद्दीर्घा-युषो जीवा भवन्ति हि । जीवानां हिंसनात्स्वल्पा-युषो जायन्त एव च ॥५१६॥
**अष्टापद**गमोदन्तं, तयोः सून्वोः समीपतः । श्रुत्वा चक्री जगौ नैवाऽकार्यं कार्यं विपश्चिता ॥५१७॥
उन्मार्गे चलतां नृणां, भूपानां मरुतामपि । जायन्ते विपदो बह्व्यः, परत्राऽत्र न संशयः ॥५१८॥
केचिज्जगुः सुतौ **जह्नु-भगीरथा**ऽभिधौ तदा । पूर्वपुण्यानुयोगेन, न हतौ तेन तत्र च ॥५१९॥
अनित्यतां विदन् चक्री, धर्मकर्मपरायणः । राज्यचिह्नानि त्यक्त्वाऽजितजिनाधीशं, वन्दितुं समुपागमत् ।५२०।
चक्री धर्मं निशम्याऽवग्, भगवन् ! केन कर्मणा । युगपत्तनया एते, मरणं समुपागताः ॥५२१॥
**अजितार्हन्** जगौ पल्यां, किराता दुर्दमा दृढम् । आसन् षष्टिसहस्राणि, परद्रव्यापहारकाः ॥५२२॥
तेषां मध्ये दयावन्तौ, विद्येते द्वौ किरातकौ । न कुर्वाते स्म तौ स्तैन्यं, जल्पतः स्माऽनृतं न च ॥५२३॥
एकदा सिद्धभूमिध्रे, सङ्घं गच्छन्तमैक्ष्य ते । लुलुञ्चुश्च यदा तेषां, पुरस्ताविति जल्पतः ॥५२४॥
एते पुण्यधनाः श्राद्धाः, स्वं धनं धर्मकर्मसु । व्ययन्ति स्म ततो नैते, लुट्यन्ते धर्ममिच्छुभिः ॥५२५॥
एकदा **भद्दिलापुर्याः**, स्वामिनोऽभ्येत्य तत्र च । ग्रामज्वालनतो भस्मी-कृतास्ते च किरातकाः ॥५२६॥
तत्र मृतिं गतास्ते तु, साम्यदायिककर्मतः । चूडल्लिका बभूवुश्च, ततः श्वभ्रे गताः पुनः ॥५२७॥

भ्रमन्तस्तेऽथ संसारे, किराता अभवन् पुनः । तत्र साध्वन्तिके धर्मं, श्रुत्वा व्यधुर्वृषं सदा ॥५२८॥
तेन पुण्येन ते पुत्रा, द्वयूनं षष्टिसहस्रकम् । अभूत्तेनैव पापेना-ऽभवन्नल्पायुषोऽधुना ॥५२९॥
आभ्यां तत्र कृतं पापं, नैव तेषां कुसङ्गतः । एतौ गत्वाऽष्टमे स्वर्गे, तव पुत्रौ बभूवतुः ॥५३०॥
श्रुत्वेति चक्रिपुत्राभ्यां, चक्रिणा च विशेषतः । जिनधर्मस्तथा चक्रे, यथा स्याच्छिवशर्म च ॥५३१॥
क्रमेण **सगरश्च**क्री, यात्रां **शत्रुञ्जया**दिषु । कृत्वा शत्रुञ्जये तीर्थो-द्धारं चाकारयत्पुनः ॥५३२॥
**भगीरथं** सुतं राज्ये, न्यस्य चक्री विरागवान् । **जह्नु**पुत्रयुतो दीक्षां, ललाव**जित**सन्निधौ ॥५३३॥
तदा राजसहस्रं तु, सगराच्चक्रिणो ह्यनु । संयमं जगृहुः श्रीम**दजिता**र्हत्पदान्तिके ॥५३४॥
बाल्येऽष्टादशपूर्वाणां, लक्षा राज्ये त्रिपञ्च च । पूर्वाङ्गसहिताश्छद्म-भावे द्वादश हायनाः ॥५३५॥
पूर्वाङ्गोनं पूर्वलक्ष-मेकं द्व्यब्दविवर्जितम् । स्वामिनः केवलज्ञानं, बभूवा**ऽजित**नायके ॥५३६॥ युग्मम्॥
लक्षा द्वासप्ततिः पूर्वाः, प्रपाल्यायुः प्रभुः पुनः । सहस्रसाधुयुग् मुक्तिं, ययौ **सम्मेत**भूधरे ॥५३७॥
**सगरो**ऽपि क्रमात्प्राप्य, केवलज्ञानमुज्ज्वलम् । प्रबोध्य भविनो भूरीन्, प्रययौ निर्वृतिं क्रमात् ॥५३८॥
तदैक्ष्वाक्वन्वये भूपा, असङ्ख्याता शिवं ययुः । असङ्ख्याता अगुः स्वर्गे, कृतराज्या मनस्विनः ॥५३९॥

**सङ्क्षेपादजितनाथ सगरचक्रिसम्बन्धः,**

ततः कश्यपगोत्राद्यै-क्ष्वाकुवंशे जिनेश्वराः । चतुर्दशाऽभवन् विश्व-सेविताः, **सम्भवा**दयः ॥५४०॥
तत इक्ष्वाकुवंशेषु, **मघवा** चक्रिराडभूत् । ततः **सनत्कुमारश्च**, चक्री **शान्ति**स्ततोऽभवत् ॥५४१॥
ततः **कुन्थु**रभूच्चक्री, तीर्थकृत्श्रीविराजितः । **कुन्थु**नाथादनु प्रौढेक्ष्वाकुवंशे महत्तमे ॥५४२॥
**हस्तिनागपुरे** वर्ये, **प्रजापाल**-नरेशितुः । **प्रभावती** प्रिया जाता, पुत्रः **पद्माभिधो**ऽभवत् ॥५४३॥
**मतिसागर**मन्त्रीश-नन्दनो **बुद्धिसागरः** । सेवते सन्ततं **पद्म-रथं** भूपतिनन्दनम् ॥५४४॥
भूपपुत्रः सदा मन्त्रि-सूनुना सूक्तजल्पनैः । गमयन् समयं वेत्ति भानोरस्तोदयौ न हि ॥५४५॥
यतः —
[1]संसारकटुवृक्षस्य, द्वे फले अमृतोपमे । सुभाषितरसास्वादः, सङ्गतिः सज्जने जने ॥५४६॥
चन्दनं शीतलं लोके, चन्दनादपि चन्द्रमाः । चन्द्र-चन्दनयोर्मध्ये, शीतला साधुसङ्गतिः ॥५४७॥
राजपुत्रोऽन्यदा मन्त्रि-पुत्रेण सहितो निशि । देशान्तरनिरीक्षार्थं, चचाल घोटकश्रितः ॥५४८॥
यतः —
यो न निर्गत्य निःशेषामालोकयति मेदिनीम् । अनेकाऽऽश्चर्यसम्पूर्णां, स नरः कूपदर्दुरः ॥५४९॥
दीसई विविहच्छरिअं, जाणिज्जइ सुअण-दुज्जणविसेसो । अप्पाणं च कलिज्जइ, हिंडिज्जइ तेण पुढवीए ॥५५०॥
ग्रामाद् ग्रामं पुरीं पुर्या, वनाद्वनं विलोकयन् । रुद्राटव्यां सरस्तीरे, ययौ देवगृहान्तिके ॥५५१॥
तस्मिन्देवगृहे श्रीमद्-युगादिजिननायकम् । प्रणम्य रुचिरैः स्तोत्रै-रस्तवीन्नृपनन्दनः ॥५५२॥
यतः —
स्त्रीहन्ता बालहन्ता वा, गोघ्नो विश्वासघातकः । परस्वहरणोद्युक्तो, मित्रघ्नः पारदारिकः ॥५५३॥

१. संसारविषवृक्षस्य द्वे एव रसवत्फले [ पाठान्तरम् ]

एकेन प्रणिपातेन, जिनाऽधिष्ठितचेतसा । सर्वपापविनिर्मुक्तः, स गच्छेत्परमं पदम् ॥५५४॥

किं कर्पूरमयं सुधारसमयं, किं चन्द्ररोचिर्मयं, किं लावण्यमयं महामणिमयं, कारुण्यकेलीमयम् ।

विश्वाऽऽनन्दमयं महोदयमयं शोभामयं चिन्मयं, शुक्लध्यानमयं वपुर्जिनपतेर्भूयाद् भवालम्बनम् ॥५५५॥

स्तुत्वेति श्रीजिनं भूप-पुत्रो जिनौकसो बहिः । समेतोऽवग् ममातीव, लग्ना तृट् प्राणहा सुहृद् ! ॥५५६॥

**बुद्धिसारो** जगौ तिष्ठ, त्वमत्रार्हद्गृहान्तिके । आनेष्यामि जलं शीघ्रं, दूरादपि जलाशयात् ॥५५७॥

**बुद्धिसारे** गते नीरा-ऽऽनयनाय जलाशयात् । एका दिव्याऽबला चेटी-युता तत्र समागमत् ॥५५८॥

गत्वा देवगृहे बाला, शुचीभूता वरैः सुमैः । प्रभुं प्रपूज्य भूपाल-सूनोरन्ते समागमत् ॥५५९॥

दृष्ट्वा राजसुतं राज-कुमारी मारपीडिता । ज्ञार्तुमिच्छुर्धियस्तस्य, परीक्षाऽर्थं व्यधादिति ॥५६०॥

ददौ चादौ शयं भूमौ, दक्षिणं चाऽथ नेत्रयोः । ततो दन्ते तत पद्मे, ततो वक्षसि कन्यका ॥५६१॥

सा ततश्चोल-माञ्जिष्ट-रागं प्रदर्श्य सत्वरम् । पश्चादंह्रिर्ययौ स्वीय-स्थानके दिव्यरूपभृत् ॥५६२॥

ततो राजकुमारस्य, तयाऽपहृतचेतसः । शून्यं चित्तमभूत् सीता-ऽपहारे रामभूपवत् ॥५६३॥

मन्त्रिपुत्रः समानीय, नीरं प्राहेति भूपजम् । पिब वारि भव स्वस्थ-श्चल्यतेऽतोऽग्रतोऽधुना ॥५६४॥

शून्यो भूपाङ्गजो वारि, यथा तथाऽक्षिपद् वृथा । स्तोकं पीत्वा जगौ नैव, यदा तदा सुहृज्जगौ ॥५६५॥

भूपाङ्गज ! कथं शून्य-चित्तः सम्प्रति वीक्ष्यसे । ततोऽवग् भूपभूः कन्या-ऽऽगमोदन्तमशेषतः ॥५६६॥

ममेच्छा विद्यते तस्याः, पाणिग्रहेतु सत्वरम् । न ज्ञायते च साऽऽयाता, कुतः कुत्र गता पुनः ॥५६७॥

ततो मन्त्रिसुतः कन्या-कृतं ज्ञात्वा जगौ तदा । करिष्येऽहं तथा कन्या, यथाऽऽशु त्वां वरिष्यति ॥५६८॥

यतः –

उदीरितोऽर्थः पशुनाऽपि गृह्यते, हयाश्च नागाश्च वहन्ति नोदिता ।

[1]अनूक्तमप्यूहत एव पण्डितः, परेङ्गितज्ञानफला हि बुद्धयः ॥५६९॥

भूप(मन्त्रि)भूः प्रोक्तवान् चक्रे, तया किं वद मन्त्रि(भूप)भूः । जगौ भूपसुतः साव-धानस्तच्चेष्टितं शृणु ॥५७०॥

भूमौ हस्तं ददत्याऽथ, तयेति ज्ञापितं स्त्रिया । भूमिहस्तपुरं स्वर्ग-तुल्यं मे विद्यते पितुः ॥५७१॥

ददत्या नेत्रयोर्हस्तं, ज्ञापितं कन्यया तया । नेत्राऽभिधो नृपो राज्यं, कुरुते तत्र मे पिता ॥५७२॥

ददत्या दन्तयोर्हस्तं, तयेति ज्ञापितं तदा । पत्नी दन्तवती तस्य, माता मम च निश्चितम् ॥५७३॥

ददानया शयं पद्मे, तयेति ज्ञापितं तव । **पद्मावती** त्वहं कन्या, विद्यते [विद्ये च] तस्य भूपतेः ॥५७४॥

स्ववक्षसि शयं सा च, ददाना त्वामिदं जगौ । त्वमेव हृदये मेऽतः, परं नान्यः पतिर्ध्रुवम् ॥५७५॥

रसं चौलं प्रदर्श्यैव, यच्चाऽगात्तव तत्क्षणात् । अतस्तस्या भृशं रागो, विद्यते त्वयि भूपभूः ॥५७६॥

भूपपुत्रो जगौ कन्या, पित्रदत्ता कथं प्रिया । जायतेऽतोऽस्ति किं तस्या, मम पाणिग्रहोऽधुना ॥५७७॥

यतः –

किवणाण धणं नागाण फणी केसराणि सीहाणं । कुलबालाण जुव्वण अत्तो अमुआण घिप्पंतो ॥५७८॥

सीहस्स केसरि सद्दहउ रसणाइ सुहडस्स । मणिविसहं आसीविसह को घिप्पइ अमुअस्स ? ॥५७९॥

मन्त्रिसूनुर्जगौ बुद्धि-मता कृपणवैभवः । गृह्यते केसरः सिंहा-ज्जीवतोऽहेश्च तन्मणिः ॥५८०॥

---

१. अनुक्तमप्यूहति पण्डितो जनः [ इति पाठान्तरम् ]

ततः पृच्छन्पुरं तच्च, मन्त्रिसूयुग् नृपाङ्गजः । भूमिहस्तपुरोपान्ते, ययौ स्तोकैर्दिनैरपि ॥५८१॥
विना मालिकया राज-पुत्र्याश्चित्तविचेष्टितम् । न ज्ञायते ततस्तस्या, गृहे तौ ययतुः क्रमात् ॥५८२॥
यतः —
भिक्षुका दासिका धात्री, मालिका रजिका पुनः । वेश्या दुष्टाङ्गना राजपुत्र्या जानन्ति मानसम् ॥५८३॥
स्थाने मालिकया दत्ते, स्थितौ तौ मणिमेककम् । ददतुर्मालिकायै तु, स्वकार्यशुद्धिहेतवे ॥५८४॥
मन्त्रिणा मालिका पृष्ट्वा, ज्ञातं कन्योदितं समम् । ततश्चोचे त्वया भूप-पुत्र्याः पार्श्वे गमिष्यते ॥५८५॥
प्रोक्तं मालिकया राज-पुत्र्यन्ते याम्यहं सदा । मन्त्रिपुत्रो जगौ तर्हि, वक्तव्यं च त्वयेति हि ॥५८६॥
वने देवगृहोपान्ते, स्थितो यो त्वयेक्षितः । सोऽत्राऽऽयातोऽस्ति मद्गेहे, विद्धीति भूपनन्दिनि ! ॥५८७॥
ततः सा मालिका मन्त्रि-पुत्रोदितमशेषतः । राजकन्यान्तिके गत्वा, जगादेति कृतादरम् ॥५८८॥
श्रुत्वेति भूपपुत्री सा, विधाय भ्रकुटीं भ्रुवोः । श्रीखण्डाक्तौ शयौ तस्या, गल्लयोर्ददते दृढम् ॥५८९॥
हक्किता च तया पश्चा-दागत्य मालिका पुनः । कपोलौ दर्शयामास, तादृशौ शोणितावपि ॥५९०॥
दृष्ट्वा तौ भूपभूः खिन्नो, यियासुरभवद्यदा । तदा मन्त्री जगौ मित्र !, स्थिरस्य श्रीः प्रजायते ॥५९१॥
घस्रान् दश प्रतीक्षस्व, श्वेतपक्षस्य भूपभूः । चन्दनाक्ता यतोऽङ्गुल्यो, दश दत्तास्तया स्त्रियः ॥५९२॥
दशाहोभ्योऽथ सा मन्त्रि-नुन्ना तत्र यदागमत् । कुङ्कुमाक्ताङ्गुलीभिश्च, तिसृभिस्ताडिता तया ॥५९३॥
पश्चात्तामागतां तादृग्रूपां वीक्ष्य नृपाङ्गजः । यावत्खिन्नोऽभवत्तावन्मन्त्रिपुत्रो जगाविति ॥५९४॥
अस्ति रजस्वला कन्या, ततोऽज्ञापि तया तव । दिनानां त्रितयं स्थेयं, भवता साम्प्रतं सुखम् ॥५९५॥
चतुर्थ दिवसे भूयो, गता सा मालिका पुनः । बद्ध्वा रज्ज्वा दृढं पूर्व-द्वारान्निष्काशिता तया ॥५९६॥
हक्किता च तया पश्चा-दागता कन्यकाविकृतम् । मालिकाऽवग् यदा मन्त्री, तदेत प्रोक्तवान् रहः ॥५९७॥
तयाऽथ ज्ञापितं रात्रौ, पूर्वद्वारा नृपाङ्गजः । यदेष्यति तदा भक्तिं, करिष्येऽहं यथोचिताम् ॥५९८॥
ततो भूपाङ्गजः पूर्व-द्वारा कन्यान्तिके ययौ । ततो द्वाभ्यां स्वचित्तस्था, वाञ्छा निवेदिता मिथः ॥५९९॥
ज्ञात्वा मन्त्रिधियं भूपा-ङ्गजोपान्तात्कनी जगौ । कल्ये मया करिष्येत, गौरवं मन्त्रिणस्तव ॥६००॥
ततः पश्चात्समेत्याऽव-क्कुमारः कन्यकोदितम् । ततो मन्त्र्यवदत् वाञ्छा, पूर्णा तव नृपाङ्गज ! ॥६०१॥
ततोऽग्रेतनघस्रे तु, पोलिकाऽऽज्यसिताद्रिता । लड्डुकश्च तया प्रातः, प्रेषितौ सन्निधौ तयोः ॥६०२॥
मन्त्रिणा च कुमाराय, पोलिका प्रददे तदा । लड्डुकश्च स्वयं भुक्तो, मन्त्रीशसूनुनाऽचिरात् ॥६०३॥
मन्त्रिपुत्रकृतं ज्ञात्वा, दध्याविति नृपाङ्गजा । स मन्त्री बुद्धिमान् धन्यो, यस्याऽस्ति बुद्धिरीदृशी ॥६०४॥
ततस्तयोदितं मन्त्रि-सूनोरग्रे च कन्यया । न मे पिता कुमाराय, मां दास्यति मनागपि ॥६०५॥
अतस्तस्याः कुरुष्व त्वं, यथा मे भूपसूनुना । सार्धं पाणिग्रहः सद्यो, भविष्यति धिया तव ॥६०६॥
मन्त्री जगौ त्वया प्रोच्यमेवं मातुः पितुः पुरः । दुष्यत्येवोदरं बाढं, मरणं मेऽतो भविष्यति ॥६०७॥
विहितेषूपचारेषु, तावत् क्रु(रो)द्यं त्वया भृशम् । यावत्पूगीफलं राज-पुत्रो मुञ्चति ते पुरः ॥६०८॥
इत्यादि धिषणां दत्त्वा, राज-पुत्र्या स मन्त्रिराट् । पश्चादेत्य कुमाराग्रे, जगौ सङ्केतकं तकम् ॥६०९॥
इतः शूलोद्भवां पीडां, जल्पन्ती राजनन्दिनी । क्रन्दति स्म तदा राज्ञो-पचाराः कारिता घनाः ॥६१०॥

यदा नाऽभूद् गुणस्तस्या-स्तदाऽभूद्दुःखितो नृपः । आकार्य गणकार्दीश्च, पप्रच्छ रोगशान्तये ॥६११॥
यतः –
रोगिणां सुहृदो वैद्याः, प्रभूणां चाटुकारिणः । मुनयो दुःखदग्धानां, गणकाः क्षीणसम्पदाम् ॥६१२॥
वैद्या वदन्ति कफपित्तमरुद्विकारं, सांवत्सरा ग्रहगतं प्रवदन्ति नित्यम् ।
भूतोपसर्गनिपुणा प्रवदन्ति भौतं, सन्तो वदन्ति हि पुरा कृतमेव कर्म ॥६१३॥
ततो ज्योतिष्किको भूत्वा, जल्पन् शुभाशुभे जने । मन्त्री ज्ञातो महीशेना-ऽऽनीतश्च निजसन्निधौ ॥६१४॥
प्रोक्तं भूमीभुजा वीक्ष्य, लग्नं सम्प्रति जल्प्यताम् । कथं यास्यति मे पुत्र्याः, शूलं प्राणापहारकम् ॥६१५॥
लग्नं विलोक्य दैवज्ञो, जगौ क्रमुकमेककम् । कन्याकरे विमुञ्चन्तु, नराः पौराः समेत्य तु ॥६१६॥
येन पूगीफले मुक्ते, पुत्र्या हस्ते नरेण तु । शूलं नश्यति तस्मै चे-द्दीयते कन्यका त्वया ॥६१७॥
तदाऽस्यास्त्वरितं शूलं, स्फिटिष्यति न संशयः । न दीयते कनी चेत्सा, तदा पञ्चत्वमेष्यति ॥६१८॥
ततो भूपोदितैर्भूपा-नुगै र्जल्पद्भिरित्यलम् । पटहो वाद्यते पुर्या, मध्ये चतुष्पथादिषु ॥६१९॥
येन पूगीफले मुक्ते, भूपपुत्र्याः शये खलु । शूलं यास्यति तस्यैतां, पुत्रीं दास्यति भूपतिः ॥६२०॥
ततो हृष्टा जनाः पूगीफलं भूपसुताशये । विमुच्याऽस्फुटिते शूले, यान्ति कृष्णमुखाः पुनः ॥६२१॥
एवं दिनत्रये जाते, कुमारः क्रमुकं यदा । भूपपुत्र्याः शयेऽमुञ्चत्, तदा कन्यकयोदितम् ॥६२२॥
शूलं मेऽस्य कुमारस्य, शयस्पृष्टफलेन तु । गतं केन न केनाऽत्रा-ऽऽगम्यं पुंसाऽधुना पुनः ॥६२३॥
ततो राजा जगौ पुत्रि !, वृणुष्व त्वममुं वरम् । दिवसोक्तः पतिर्ह्येष, विधिना ज्ञापितस्तव ॥६२४॥
पुत्र्योदितं तदा तात-वचः प्रमाणमेव मे । यतो न पुत्रपुत्रीभ्यां, लङ्घनीयं पितुर्वचः ॥६२६॥
यतः –
वंरं वरयते कन्या, माता वित्तं पिता कुलम् । इच्छन्ति स्वजना बन्धून्, मिष्टान्नमितरे जनाः ॥६२७॥
ततो भूमीभुजा स्फारोद्वाहं वितन्वता सता । कुमाराय ददे पुत्री, भूरिलक्ष्मीसमन्विता ॥६२७॥
कुमारेणोदितं पत्न्याः, पुरा एवं तदा रहः । यावद्विलोक्य भूपीठं, कियदागम्यते मया ॥६२८॥
तावत्त्वया पितुर्गेहे, स्थातव्यमत्र सुस्थया । पत्न्या पत्युर्वचो मान्यं, देवता वचनं यथा ॥६२९॥
मानयित्वा प्रियां तस्मा-दापृच्छ्य मेदिनीपतिम् । कुमारो मन्त्रियुग् देशान्, वीक्षितुं चलितस्ततः ॥६३०॥
गच्छन्तौ तौ क्रमात् पद्मवने नरचतुष्टयम् । विद्याः संसाधयच्चारुप्रभावाढ्या ददर्शतुः ॥६३१॥
तदा तत्र ज्वलद्वह्निकुण्डोर्द्ध्वं पादुकाद्वयम् । कन्थैका लकुटं वर्यं, कच्चोलकं च निर्ययुः ॥६३२॥
तदाऽऽकाशस्थिता देवी, जगादेति च तान् प्रति । यद्यस्ति भवतां सत्त्वं, तदाऽत्राऽऽगम्यतां द्रुतम् ॥६३३॥
पादुकासंसृतैर्व्योम्नि, गम्यते व्योमगैरिव । कन्था संसेविता दत्ते, तुरङ्गादिकवाहनम् ॥६३४॥
लकुटो मार्गितो दत्ते, दीनारशतपञ्चकम् । भोज्यं यथेप्सितं दत्ते, याचितं सत्कचोलकम् ॥६३५॥
तदा ते कातरास्तत्र, चत्वारः साधका नराः । भ्रमन्तः परितः शेकु-र्न प्रवेष्टुं विभावसौ ॥६३६॥
ततस्ते जगदुर्विद्या-ऽस्माभिर्मासचतुष्टये । प्रकटीभूय दत्ते न, वस्तूनां च चतुष्टयम् ॥६३७॥

१. कन्या वरयते रूपं, माता वित्तं पिता श्रुतम् । बान्धवाः कुलमिच्छन्ति, मिष्टान्नमितरे जनाः ॥

पादुकाद्यैश्चिरं काल-मस्माकं जायते सुखम् । न परं सत्त्वमस्त्येव, येन सिध्यति वाञ्छितम् ॥६३८॥
एवं प्रोच्य च ते याव-च्चेलुः स्वं नगरं प्रति । तदा राजकुमारोऽवग्, भवद्भिः स्थीयतां स्थिरम् ॥६३९॥
सिद्धा विद्या कथं पुम्भि-रर्त्यज्यते बहुकालतः । ते नरा जगदुः कोऽस्ति, यः कुण्डं सत्त्ववान् विशेत् ॥६४०॥
आनीय त्वरितं वस्तु-चतुष्कं नो ददाति च । कुमारोऽथ ज्वलत्कुण्डे, प्रविष्टः सात्त्विकाग्रणीः ॥६४१॥
अक्षताङ्गो ज्वलत्कुण्डा-ल्लात्वा वस्तुचतुष्टयम् । कुमारो दत्तवांस्तेषां, नराणां निःस्पृहस्तदा ॥६४२॥
तैस्तदा भूपपुत्राय, बलात्कच्चोलकं ददे । ततः कच्चोलकाद्भोज्यं, चित्तेष्टं लभते स्म सः ॥६४३॥
ततो मन्त्रियुतो गच्छन्, कुमारः सात्त्विकाग्रणीः । नद्यां यावत्प्रविष्टः स, तावद्वल्लीं ददर्श च ॥६४४॥
नीरवाहाऽभिमुख्येन, यान्तीं तां वीक्ष्य भूपभूः । एषा चित्रकवल्ली तु, भाग्ययोगाच्च लभ्यते ॥६४५॥
तामादायाऽथ तां सम्यगाराध्य प्राप्य वैभवम् । ददते दानमर्थिभ्यो-ऽनिशं धनदवत् स च ॥६४६॥
यतः –
प्रतिपच्चन्द्रं सुरभी, नकुलो नकुलीं पयश्च कलहंसः । चित्रकवल्लीं पक्षी सूक्ष्मं धर्मं सुधीर्वेत्ति ॥६४७॥
कामकुम्भ-मरुद्वृक्ष-चित्रकलतिकादयः । पदार्थाः पुण्यतः पुंसां, सर्वे भवन्ति निश्चितम् ॥६४८॥
ततो देशान् बहून् भ्रान्त्वा, कुमारो माररूपभृत् । तां कन्यकां समादाया-ऽचलन्मन्त्रिसुताऽन्वितः ॥६४९॥
क्रमादेत्य पुरे स्वीये, मातुः पितुः पदाम्बुजम् । नत्वा स्वगमनोदन्तं, प्रोक्तवान् मन्त्रिपार्श्वतः ॥६५०॥
कच्चोलकप्रभावेण, लक्षशो मनुजास्तदा । कुमारो जेमयामास, वर्षे भोजनदानतः ॥६५१॥
बलाच्चित्रकवल्लीं स, मन्त्रिपुत्राय दत्तवान् । यतो मित्रं निजाऽऽत्मानमिव मन्येत सज्जनः ॥६५२॥
राज्ये **पद्मरथं** पुत्रं, न्यस्य **प्रजापति**र्नृपः । लात्वा दीक्षां गुरूपान्ते, तपश्चक्रेऽतिदुष्करम् ॥६५३॥
आराधयन् व्रतं शुद्ध-क्रियां कुर्वन् निरन्तरम् । मृत्वा प्रान्तेऽभवत् स्वर्गे-ऽच्युते भासुरदेहभाक् ॥६५४॥
ततश्च्युत्वा स मानुष्यं, जन्म प्राप्य तमःक्षयात् । **प्रजापति**महीपाल-जीवो मुक्तिपुरीं ययौ ॥६५५॥
भूपः **पद्मरथो** बुद्धि-सारमन्त्रिधिया चलन् । साधयामास विषयान्, बहून् भूरिद्विषज्जयात् ॥६५६॥
एकदा केनचित्कीरो, रमणीयो महीभुजे । ढौकितोऽथ नृपस्तस्मै, ददौ भूरि धनं तदा ॥६५७॥
शिक्षितोऽथ शुको राज्ञा, विद्वानासील्लसद्वचाः । क्रमाज्जातिस्मृतिर्जाता, तस्य कीरस्य कर्मणा ॥६५८॥
**विज्ञचूडामणि**रिति, तस्य नाम ददौ नृपः । राजाऽपि नयते कालं, शृण्वन् सूक्तानि कीरतः ॥६५९॥
पञ्जरे रैमये तिष्ठन्, भोज्यं दत्तं महीभुजा । आस्वादयन्सुखं कालं, नयते स्म लसद्वचाः ॥६६०॥
राज्ञोक्तं भो शुक ! ज्ञानिन् !, यादृश्यस्ति प्रियाऽत्र मे ।
तादृशी भक्तियुक् पत्नी, भाविन्यन्या न वा मम ॥६६१॥
शुकोऽवग् वङ्गदेशेऽस्ति, **श्रीपुरे भीम**भूपतिः । तस्य पत्नी **कलाकेलि**-र्विद्यते रविसन्निभा ॥६६२॥
तयोः सप्ततनूजाना-मुपर्यासीत् सुता क्रमात् । तस्या जन्मोत्सवे जाते, **लक्ष्मी**रित्यभिधाऽभवत् ॥६६३॥
वर्धमाना क्रमात्पित्रा, तथाऽपाठि स्वनन्दिनी । यथा सरस्वतीवोक्ति-युक्तिभिर्जल्पति स्म सा ॥६६४॥
सा भूपनन्दिनी **लक्ष्मी**-स्तव भार्या भविष्यति । पुण्यैः किं किं न जायेत, जीवानां वाञ्छिताऽतिगम् ॥६६५॥
इतो **वङ्गाभिधे** देशे, **भीम**भूपतिनन्दिनी । पप्रच्छ सारिकां विज्ञां, काष्ठपञ्जरसंस्थिताम् ॥६६६॥

मत्तुल्योऽस्ति वरः क्वैव, सारिके ! प्रोच्यतां त्वया । सारिकाऽवग् **गजपुरे**, भूपः **पद्मरथो**ऽस्ति सः ॥६६७॥
न्यायी प्रतापवान् शान्तो, दान्तो दाता दयानिधिः । जिनभक्तः सदाचारी, रूपस्वी सुकृती पुनः ॥६६८॥
भूपः **पद्मरथः** सोऽपि, भर्ता तव भविष्यति । यावज्जीवं समस्त्येव, ततस्तव सुखं वरम् ॥६६९॥
सुताया वाञ्छितं कान्तं, कान्तं **पद्मरथं** नृपम् । ज्ञात्वा **भीमरथः** पुत्र्या, वरं तं वाञ्छति ध्रुवम् ॥६७०॥
ततो निजान् नरान् प्रेष्य, पुत्र्याश्चित्तेप्सितं नृपः । भूपं **पद्मरथं** सद्यो, ज्ञापयामास सत्वरम् ॥६७१॥
भूपः **पद्मरथ**श्चित्तेप्सितं योगमवेत्य च । मेने **भीम**नृपप्रोक्त-मिदं वैद्योपदिष्टवत् ॥६७२॥
गृहीतेऽथ वरे लग्ने, भूपः **पद्मरथः** सुखम् । प्रययौ **श्रीपुरे** रम्ये, गीर्वाणपुरसोदरे ॥६७३॥
भीमेन भूभुजा चारू-त्सवं वितन्वता सता । **लक्ष्मीं** पुत्रीं ददौ **पद्म-रथाय** मेदिनीभुजे ॥६७४॥
करस्य मोचने राज्ञा, ताक्ष्यैभरैमुखं धनम् । जामात्रे नृपति**र्भीमो**, ददौ सम्मानपूर्वकम् ॥६७५॥
मुत्कलाप्याऽपि पित्रादीन्, **लक्ष्मी** राजसुता तदा । सारिकां तां ललौ सार्धं, स्वक्रीडासुखहेतवे ॥६७६॥
भूपः **पद्मरथो लक्ष्मीं**, प्रियां तां परिणीय श्राग् । स्वपुरे समगाद्दूर्य-प्रवेशोत्सवपूर्वकम् ॥६७७॥
शुकस्य पञ्जरे तस्मिन्, सारिकां रुचिराकृतिम् । **पद्मरथ**प्रिया **लक्ष्मी**-श्चिक्षेप सत्वरं ध्रुवम् ॥६७८॥
सुरूपां सारिकां दृष्ट्वा, मोहितः शुक ऊचिवान् । यौवनं चञ्चलं चास्ति, सम्भोगः क्रियतामतः ॥६७९॥
त्वां दृष्ट्रवा रूपरोचिष्णुं, जातोऽहं कामविह्वलः । अतस्त्वं च मया सार्धं, भुङ्क्ष्व भोगशर्म च ॥६८०॥
रुष्टाऽथ सारिकाऽऽचष्ट, रे निर्लज्ज ! शुकाऽधम ! । एवं किं जल्पितं पाप-वचो दुर्गतिहेतुकम् ॥६८१॥
नाऽहं वाञ्छां करोम्येषा, पुरुषस्य मनागपि । शुकोऽवक् पुरुषे नार्या, वाञ्छा भवति निश्चितम् ॥६८२॥
सारिकाऽवग् नरा नारी-घातका निर्दया भृशम् । कुर्वाणा पातकं नैव, जानन्ति परुषाशयाः ॥६८३॥
शुकोऽवग् योषितो दुष्टा, निष्कारुण्याशया पुनः । अनृतं साहसं मायां, कुर्वत्यो नैव विन्दते ॥६८४॥
यतः –
अनृतं साहसं माया, मूर्खत्वमतिलोभता । अशौचं निर्दयत्वं च, स्त्रीणां दोषाः स्वभावजाः ॥६८५॥
विवादं सारिका-कीरौ, कुर्वाणौ वीक्ष्य तत्क्षणात् । एत्य पूर्वप्रिया भूपावप्राष्टां वद कारणम् ॥६८६॥
सारिकाऽऽह शुको ह्येष, निर्लज्जो मां समीहते । अतो भवन्ति पापिष्ठाः, पुरुषा निष्कृपाशयाः ॥६८७॥

**॥ यतः सुभाषितान्यत्र ॥**

**एलापुरे धनश्रेष्ठी,** तत्पत्नी **मदना**ऽजनि । तयोः सुतः **कलाकान्तो**, गतोऽन्येद्यु**र्धरापुरे** ॥६८८॥
तत्राऽन्यदा **हर**श्रेष्ठि-पुत्रीं **पद्मावतीं** वराम् । परिणीय पुरे स्वीये, समागाद् रुचिरोत्सवम् ॥६८९॥
ततो मासे गते पित्रा, तस्या आननकं कृतम् । स्वेच्छया हिण्डते **पद्मा-वती** पितृनिकेतने ॥६९०॥
क्रमाद्धने मृते ताते, **कलाकान्तः** स्ववाञ्छया । दीव्यन्द्यूतकरैः सार्धं, निर्धनं स्वगृहं व्यधात् ॥६९१॥
अदृष्ट्वा गृहनिर्वाहं, **कलाकान्तो** विना प्रियाम् । समानेतु प्रियां यातः, श्वशुरस्य गृहेऽन्यदा ॥६९२॥
कतिचिद्दिवसांस्तत्र, स्थित्वा साऽऽभरणां प्रियाम् । लात्वा श्वेस्वशुरमापृच्छ्य, चचाल स्वालयं प्रति ॥६९३॥
भूरिभूषणसंयुक्तां, प्रियां निरीक्ष्य लोभगः । भूषणानि समादातुं, स वाञ्छति पदे पदे ॥६९४॥
मार्गे व्रजन् पतिः प्राह, पत्नीं प्रति शनैः शनैः । अत्र चौरभयोऽस्त्येव, च्छन्नं स्थेयं ततः क्वचित् ॥६९५॥

भूषणादीनि देहात् त्व-मुत्तार्याऽर्पय मेऽधुना । क्षिप्यन्ते रहसि स्थाने, स्तेना लान्ति न वान्यथा ॥६९६॥
मुग्धस्वभावतः साऽदात्, पत्ये भूषणसञ्चयम् । स च पत्नीं छलात् कूपे, प्रचिक्षेपाऽतिनिर्दयः ॥६९७॥
ततो व्रजन् पुरे कस्मिन्, द्यूतं दीव्यन् विटादियुक् । **कलाकान्तो**ऽभवद् द्रव्य-रिक्तो द्रविणहारणात् ॥६९८॥
**कलाकान्तो** भ्रमन् शून्यचित्तः कदाचिदन्यदा । अचालीत् श्वशुरस्यौकः, प्रति कर्मनियोगतः ॥६९९॥
इतः कूपान्तिके पुम्भि-रागतैर्नीरहेतवे । तां दृष्ट्वा कर्षिता पुण्याद्, भगिनीति कृता च तैः ॥७००॥
भ्रमन्त्यथ पितुर्गेहे, समेता जनकादिभिः । पृष्टा पुत्रि ! कथं त्वीदृग्, दशा गात्रेऽथ साऽवदत् ॥७०१॥
मार्गे चौरैर्हृतं सर्वं, भूषणाद्यं हतः पतिः । अथवाऽस्ति धृतः सम्यग्, नैव ज्ञातं मया ननु ॥७०२॥
तैर्भूषणाऽपहारेण, कृता त्वेवंविधा त्वहम् । समागां जनकावासे, भ्रमन्ती मेदिनीतले ॥७०३॥
नारीणां शरणं कान्तो-ऽथवा जनकमन्दिरम् । तदा तया स्वकान्तस्य, दोषो न जल्पितो मनाक् ॥७०४॥
पित्रोक्तं तनयेऽत्र त्वं, तिष्ठ धर्मपरा सुखम् । ततः सा स्वपितुर्गेहे, स्थिता धर्मं व्यधात्सदा ॥७०५॥
इतो भ्रमन् **कलाकान्त**, आयातः श्वशुरालये । पत्नीं वीक्ष्य सशङ्कोऽभू-द्यावत्तावत्प्रिया जगौ ॥७०६॥
मा भैषीस्त्वं पते ! तिष्ठ-ऽधुनाऽत्र सुखितो भृशम् । तदा पुत्रीपतिं दृष्ट्वाऽऽगतं हृष्टं कुटुम्बकम् ॥७०७॥
ततः सा निजकान्तस्य, कुर्वाणा भक्तिमादरात् । न दोषं स्वपतेः कस्य, पुरोऽप्रकटयत् क्वचित् ॥७०८॥
शुकोऽवग् वारिधेर्वीचि-गणना क्रियते क्वचित् । स्त्रीदोषाणां न केनापि, पारः सम्प्राप्यते जनैः ॥७०९॥
तथाहि :-
**कल्याणनगरे सोमदत्तस्य** श्रेष्ठिनः क्रमात् । **सोमश्री**र्गेहिनी जाता, **चन्द्राह्वो**ऽभूत्सुतस्तयोः ॥७१०॥
**चन्द्रो लक्ष्मीपुरे लक्ष्मीधरे**भ्यनन्दीनीं **रमाम्** । परिणीयाऽऽगमत्स्वीय-गृहे सूत्सवपूर्वकम् ॥७११॥
क्रमेण स्वपितुर्गेहे, गता **रमा** निजेच्छया । रममाणा सदा सार्धं, सखीभिर्बहुभिर्भृशम् ॥७१२॥
**रमा** यौवनमारूढा, सुरूपं दधती सती । मन्यते स्म तृणं सर्व-नारीणां रूपमेव च ॥७१३॥
यतः -
यौवनमुदयकाले, दधाति विरूपकेषु लावण्यम् । दर्शयति पाककाले, निम्बः फलस्याऽपि माधुर्यम् ॥७१४॥
अन्यदा **रमया** पितृ-मन्दिरे स्थितया प्रगे । **समुद्राह्वो** नरो रूप-शाली दृष्टः पथि व्रजन् ॥७१५॥
ततस्तस्यान्तिकाद्भोग-सुखं वाञ्छति नित्यशः । यतोऽस्ति यौवने मार-विकारो दुःशको नृणाम् ॥७१६॥
यतः -
सुस्नातं पुरुषं दृष्ट्वा, सुगन्धं मलवर्जितम् । क्लिद्यन्ति योनयः स्त्रीणा-मामपात्रमिवाम्भसः ॥७१७॥
घृतकुम्भसमा नारी, पुरुषो वह्निसोदरः । ततो नरेक्षणात्स्त्रीणां, क्लिन्ना भवन्ति योनयः ॥७१८॥[१]
ततो निजाऽभिलाषं तु, **समुद्रो** ज्ञापितस्तया । तेन मुग्धस्वभावेन, तस्या मेने वचस्तदा ॥७१९॥
रहो **रमा समुद्रेण**, सार्धं भोगसुखं सदा । गृह्णाना मन्यते नैव, परलोकभयं मनाक् ॥७२०॥
यतः -
**रमायाश्चन्द्रकान्तो**ऽथा-ऽऽनयनार्थं समागतः । आगतं स्वपतिं दृष्ट्वा, जाता चिन्तापरा च सा ॥७२१॥

---

१. वह्निकुण्डसमा नारी, घृतकुम्भसमः पुमान् । तस्माद् घृतं च वह्निं च, नैकत्र स्थापयेद् बुधः ॥ इति पाठान्तरम् ।

ततस्तया स्वसख्येग्रे, प्रोक्तं मे रमणोऽधुना । आगादानयनार्थे च, भूयिष्ठाऽनेहसा किल ॥७२२॥
ततो मम **समुद्रस्य**, मिलनं चास्ति दुःशकम् । ततस्तथा कुरुत्वं मे, मिलनं तस्य जायते ॥७२३॥
ततः सखी **समुद्राग्रे**, प्राहाऽऽगमद्रमापतिः । तेन **रमा** शुभोद्याने, निशीथिन्यां समेष्यति ॥७२४॥
त्वया तत्र समागम्यं, मिलनाय मम द्रुतम् । एवं ज्ञापितमस्त्येव, **रमया** मम पार्श्वतः ॥७२५॥
**रमा** रात्रौ प्रियं प्राप्तनिद्रं ज्ञात्वा शनै रहः । सभूषणाऽचलद् गन्तुं, **समुद्रस्यैव** सन्निधौ ॥७२६॥
यान्तीं साभरणां तां च, रात्रौ दृष्ट्वा मलिम्लुचाः । दध्युरेषा दुराचारा, याति कुत्सितकर्मणे ॥७२७॥
यतः –
पतिं त्यक्त्वा तु या नारी, गृहादन्यत्र गच्छति । विटं च रमते नित्यं, स्वैरिणीं तां परित्यजेत् ॥७२८॥
इतस्तत्राऽऽगतः पूर्वं, **समुद्रो** मुग्धधीर्नरः । दष्टोऽहिना मृतिं यातः, पूर्वार्जिताऽशुभोदयात् ॥७२९॥
**रमा** कामार्दिता तत्राऽऽगत्य सुप्तं **समुद्रकम्** । मन्वानाऽवक् प्रियोतिष्ठ, वार्त्ताद्यं क्रियतेऽधुना ॥७३०॥
यदा सोऽवग् मनाग् नैव, तदा साऽऽलिङ्गनादिकम् । कुर्वाणा तन्मुखं स्वैरं, चुम्बति स्म पुनः पुनः ॥७३१॥
तदा तत्रान्तिकस्थेन, यक्षेणाऽभ्येत्य तत्क्षणात् । त्रोटिता नासिका तस्या, दुष्टकर्माऽभियोगतः ॥७३२॥
पश्चाद्रमा समागत्य, पत्युः पार्श्वे जगाविति । पत्याऽनेनाऽधुना नासा, त्रोटिता मे दुरात्मना ॥७३३॥
श्रुत्वैतद् वचनं तस्या, एत्य तत्र नृपानुगाः । दृष्ट्वा च रुधिराक्ताङ्गं, **चन्द्रं** प्रोचुश्च तं प्रति ॥७३४॥
रे पापिन् ! रे दुराचार !, किं स्त्रीरत्नं विनाशितम् । जल्पन्त इति ते यष्टि-मुष्टिभिस्तमताडयन् ॥७३५॥
ततो लात्वा नृपाऽनुज्ञां, शूलायां क्षेपितुं च तम् । यदा नृपाऽनुगाश्चेलु-स्तदा **चन्द्रो** जगावदः ॥७३६॥
न विश्वसेत् कृष्णसर्पस्य, खड्गहस्तस्य वैरिणः । आचारभ्रष्टचित्तस्य, स्त्रीचरित्रं न विश्वसेत् ॥७३७॥
कवयः किं न पश्यन्ति, किं न पश्यन्ति योगिनः । मद्यपाः किं न कुर्वन्ति, किं न कुर्वन्ति योषितः ॥७३८॥
ततो यक्षो नभस्थोऽवग्, **रमा** दुश्चारिणी खलु । **चन्द्रो**ऽयं निष्कलङ्कोऽस्ति, सुकृती सकृपोऽपि च ॥७३९॥
ततो **रमा** दुराचारा, कृत्वैतत् पापिनी पुनः । निष्कासिता पुराद् दूरे, मृत्वाऽऽगाद्दुर्गतिं पुनः ॥७४०॥
**चन्द्रो**ऽथ मानितो वर्य-वस्त्रदानादिना तदा । जगाम **कमलापुर्यां**, संसाराऽसारतो स्मरन् ॥७४१॥
यतः –
प्रजानां पालनं सम्यग्, राज्ञः स्वर्गस्य कारणम् । अरक्षन्नरकं याति, तस्माद्रक्ष्याः प्रजाः सदा ॥७४२॥
साधूनां पालनं सम्यग्, दुष्टानां निग्रहस्तथा । एष राज्ञः परो धर्मः, परत्रेह च शर्मणे ॥७४३॥
प्रजापीडनसन्तापात्, समुद्भूतो हुताशनः । राज्ञः श्रियं कुलं प्राणान्, दग्ध्वा[ऽपि] न निवर्तते ॥७४४॥
श्रुत्वेति भूपतिः **पद्म-रथस्तां** सारिकां सतीम् । स्थापयित्वा पृथक् स्वर्ण-पञ्जरे सुखिनी व्यधात् ॥७४५॥
भूपः **पद्मरथो** राज्यं, पालयन् न्यायवर्त्मना । राज्यश्रियं ददौ **मेघ-वाहनाया**ऽथ सूनवे ॥७४६॥
स्वयं सर्वज्ञगेहेषु, विधायाऽष्टाह्निकामहम् । **चन्द्रशेखरसूरीश**-पार्श्वे जग्राह संयमम् ॥७४७॥॥युग्मम्॥
ततः **पद्मरथः** साधु-स्तीव्रं तपस्तपन् सदा । जगामाऽच्युतगीर्वाणा-ऽऽलये भूरिसुखप्रदे ॥७४८॥
प्रिये द्वे अपि भूपाल-पृष्ठौ लात्वा व्रतं पुनः । तपस्तप्त्वा चिरं स्वर्गे, चतुर्थे ययतुः क्रमात् ॥७४९॥
**मेघवाहन**भूपालः, कुर्वन् राज्यं नयाऽध्वना । अनेकान् वैरिणो वश्य-कार्षीत् स्वयं भुजाबलात् ॥७५०॥

तस्य पत्नी **रमा** शील-शालिनी रतिसन्निभा । **वीरसेनाऽभिधः** पुत्रो, विनीतो धर्मकर्मकृत् ॥७५१॥
यतः –
शर्वरीदीपकश्चन्द्रः, प्रभाते दीपको रविः । त्रैलोक्यदीपको धर्मः, सुपुत्रः कुलदीपकः ॥७५२॥
स एव पुत्रः पुत्रो यः, कुलमेव न केवलम् । पितुः कीर्तिं च धर्मं च, गुणांश्चाऽपि विवर्धयेत् ॥७५३॥
पितुः पार्श्वेऽन्यदा प्राह, पुत्रोऽनृणा मही यदि । क्रियते स्म तदा जन्म, सफलं जायते पुनः ॥७५४॥
पिताऽऽचष्ट यदि स्वर्ण-पुंसः सिद्धिर्भवेद् ध्रुवम् । स्वर्धेनुः स्वस्तरुः स्वर्गौः, स्वर्मणिर्वा भवन्ति च ॥७५५॥
तदा भूरनृणीकर्तुं, शक्यते धनदानतः । ऋणरिक्तो जनः सर्वै-**र्जिनैश्च** क्रियते ध्रुवम् ॥७५६॥
ततः पितरमापृच्छ्य, बालोऽपि **वीरसेनकः** । आराधितुं मरुद्वृक्ष-मुपविष्टो जिनालये ॥७५७॥
मनोवाक्कायसंयोग-मेकीकृत्य महीशभूः । तथा तस्थौ यथा स्वर्ग-तरुस्तस्याऽऽगमद् गृहे ॥७५८॥
प्राह स्वर्गतरुः किं ते, कुमार ! वीक्ष्यतेऽधुना । कुमारोऽवक् कुरु तथा, यथा स्यादनृणा मही ॥७५९॥
ततः स्वस्तरुराचष्टे-तिष्ठ त्वं भूपनन्दन ! । एष्याम्यहं भवद्गेहे, कल्ये प्रत्युषसि ध्रुवम् ॥७६०॥
अनृणां मेदिनीं कर्तुं, यावद् धनं दिने दिने । विलोक्यते मया तावद्, देयं तव(न) साधिकम् ॥७६१॥
तत उत्थाय सर्वज्ञं, नत्वा गत्वा निजालये । स्वस्तरोस्तुष्टिसम्बन्धः, पितुः पार्श्वे जगौ स च ॥७६२॥
ततः पारणके तेन, कृते निर्जरपादपः । आगत्यावक् कुरुष्व त्वं, मेदिनीमनृणां सुखम् ॥७६३॥
**मेघवाहनभूपो**ऽथ, ग्रामं प्रति पुरं प्रति । दायं दायं धनं भूरि-जनेभ्यो मुखमार्गितम् ॥७६४॥
प्रेष्य स्वसचिवान् स्वीयं, विषयं निखिलं स च । अनृणं विदधे दुःस्थ-नृभ्योऽदाच्च श्रियं बहुम् ॥७६५॥ युग्मम् ॥
इतश्च गोत्रिभिः कल्प-वृक्षं भूरितरं धनम् । ददानं राज्यश्रीं वापि, तस्य लातुं विचिन्तितम् ॥७६६॥
ध्यातं च तैः पितापुत्रौ, धर्मिष्ठौ करुणापरौ । युद्धं न कुरुतः स्मैव, समेत्य संमुखं पुनः ॥७६७॥
मत्वेति गोत्रजैरेकी-भूत्वा संनह्य भूरिभिः । राज्यं लातुं समायातं, तस्याशु मेदिनीपतेः ॥७६८॥
ज्ञापितं गोत्रिभिश्चाद्य, **मेघवाहनभूपते** ! । यदि ते विद्यते शक्ति-स्तदा युद्धं कुरु द्रुतम् ॥७६९॥
नो चेत्त्यज तदा राज्यं, गच्छ दूरे सुतान्वितः । हनिष्यसेऽन्यथा त्वं तु, युद्धं कुर्वद्भिरञ्जसा ॥७७०॥
गोत्रिप्रोक्तं निशम्येति, पितापुत्रौ परस्परम् । प्रोचतुर्युद्धतो जीव-संहारो जायते ध्रुवम् ॥७७१॥
जीवानां वधतः श्वभ्रे-ऽनन्तासुखततिप्रदे । सहते वेदनां शीता-ऽऽतपाद्यां तनुमांश्चिरम् ॥७७२॥
यतः –
नरएसु जाइं अइकक्खडाइं, दुक्खाइं परमतिक्खाइं । को वण्णेही ताइं ?, जीवंतो वासकोडीवि ॥७७३॥
गोत्रविध्वंसतोऽनन्तं, पापमेव प्रजायते । अतः स्वोदरपूर्णाय(पूर्त्यर्थं), कः पापं कुरुते पुमान् ॥७७४॥
भूरिश्रीधनधान्यादि-मातृपितृसुहृत्तमैः । पापकर्ता नरः श्वभ्रे, पतन्न रक्ष्यते क्वचित् ॥७७५॥
अनित्यस्यास्य देहस्य, निस्वरस्य(निःसारस्य) च तुष्टये । आवाभ्यां न करिष्येत, पापं दुर्गतिहेतुकम् ॥७७६॥
यतः –
गोशतादपि गोक्षीरं, मानं मूटशतादपि । मन्दिरे मञ्चकस्थानं, शेषं परपरिग्रहः ॥७७७॥
अतस्त्यक्त्वा द्रुतं राज्यं, वनवासो विधीयते । निःस्पृहस्य वने वासः, स्वर्गादप्यधिको भवेत् ॥७७८॥

ताभ्यामिति विनिश्चित्य, राज्यं दत्त्वा च गोत्रिणे । प्रयातं वनवासाय, ध्यायद्भ्यां च भवस्थितिम् ॥७७९॥
तदा स कल्पवृक्षोऽपि, पश्यतां गोत्रिणामपि । **मेघवाहन**पृष्ठौ तु, चचालाऽनुगवद् वृषात् ॥७८०॥
कुमारेणोदितं स्वर्द्रो !, स्वस्थानं त्वं व्रजाऽचिरात् । स्वर्वृक्षोऽवग् मम स्थानं, युवयोः क्रमणौ ध्रुवम् ॥७८१॥
ततः सुतयुतो राजा, गत्वा कोमलकानने । स्थितोऽथ ददते दानं, नृभ्यो भूरि मुखेप्सितम् ॥७८२॥
तत्रैव तिष्ठतोः पितृ-सून्वोः सूनोर्र्रृषेः सुतः । **मधुनामा**ऽभवन्मित्रं, रामस्य लक्ष्मणो यथा ॥७८३॥
**वीरसेनो**ऽन्यदा तेन, मित्रेण सह कानने । रममाणः कनीमेकां, ददर्श यक्षसद्मनि ॥७८४॥
कन्याऽपि **वीरसेनं** तं, वीक्ष्य दध्याविदं हृदि । यद्ययं मे करावङ्गी-करोति स्म तदा वरम् ॥७८५॥
ततो यक्षं प्रणम्यैव, साऽगान्मलयपर्वते । स्वचित्तचिन्तितं **मेघ-केतोः** पितुः पुरोऽवदत् ॥७८६॥
**मेघकेतुः** समायातं, **मेघवाहन**नन्दनम् । **वीरसेना**ऽभिधं वर्यं, वरं जज्ञौ कनीहितम् ॥७८७॥
**मेघकेतु**स्ततस्तत्र, गत्वाऽथ **मेघवाहने** । आलाप्य मण्डयामास, प्रीतिं तेन समं दृढम् ॥७८८॥
**वीरसेनाय** पुत्रीं स्वां, दत्त्वा भक्त्या वरोत्सवम् । **मेघकेतु**रभूत्स्वस्थः, पुत्र्युद्वाहविधानतः ॥७८९॥
एकदा काननं पश्यन्, **वीरसेनो** नृपाङ्गजः । ददर्शैकं पुरं स्फारं, तन्मध्ये प्राविशत्पुनः ॥७९०॥
एकस्मिन् सदने नारी-मेकां करुणनिःस्वनम् । रुदतीं वीक्ष्य सोऽप्राक्षीत्, समीपस्थं नरं त्विति ॥७९१॥
कस्माद्धेतोरियं नारी, रुरोद करुणस्वरम् । स प्राहाऽस्मिन् पुरे रुष्टो-ऽसुर एकोऽभवद् भृशम् ॥७९२॥
स च सङ्ख्यातिगान् मर्त्यान्, हन्ति दिने दिने सदा । ततो बलिविधानेन, प्रीणितो मनुजैः स च ॥७९३॥
तदा प्रोक्तं जनैरेवं, मृतेषु नृषु भूरिषु । भविष्यति पुरं ह्येत-दुद्वसं मारणान्नृणाम् ॥७९४॥
उद्वसे नगरे जाते, किं त्वं भोक्ता ततो वद । अतो दिने दिने ह्येको, नरो भक्ष्यस्त्वया क्रमात् ॥७९५॥
यक्षेण मानिते सर्व-जननामाङ्कितास्तदा । लेखाः क्षिप्ता घटे लौके-र्लक्षशो जीवितेच्छुभिः ॥७९६॥
यस्मिन् दिने समायाति, यस्य लेखः स मानवः । याति यक्षालये तस्मा-त्तमत्ति निर्दयः स च ॥७९७॥
अथाऽस्या एकपुत्रायाः, सूनोर्लेखो विनिर्गतः । अतोऽसौ रु(रो)दिति प्रोच्चैः, सूनोर्मरणदुःखिता ॥७९८॥
श्रुत्वैतद् भूमिभुक्पुत्रः, कृपाकरचिताशयः । नार्याः पुत्रकराल्लात्वा, पटलीमचलल्लघु ॥७९९॥
वध्यस्थाने समेत्याऽस्थात्, निर्भयो वीरसेनकः । यक्षस्तत्राऽऽगतो यावत्तावत् प्राहेति भूपभूः ॥८००॥
आदौ भक्षय मे हस्तौ, ततः पादौ ततः शिरः । ततो वक्षस्ततो जानू, ततो जङ्घे यथारुचि ॥८०१॥ ॥ युग्मम् ॥
श्रुत्वैतद् यक्ष आचष्ट, वक्ष्येवं निर्भयः कथम् । सोऽवक् परोपकाराया-ऽऽगतोऽहं वृद्धयोषितः ॥८०२॥
यक्षः प्राहोपकारः को, राजपुत्रो जगौ ततः । य एकस्यैव जीवस्य, प्राणान् ददाति मानवः ॥८०३॥
तस्य स्वर्गाऽपवर्गादि-सुखानि स्युः करे किल । प्राणिहिंसापरो जीवो, दुःखौघं नरकं श्रयेत् ॥८०४॥
यतः —
यो दद्यात्काञ्चनं मेरुं, कृत्स्नां चैव वसुन्धराम् । एकस्य जीवितं दद्या-न्न तु तुल्यं युधिष्ठिर ! ॥८०५॥
किं कायेन सुपुष्टेन, बलिना चिरजीविना । यो न सत्त्वोपकारी स्यात्, जीवन्नपि निरर्थकः ॥८०६॥
परार्थे जीवितं यस्य, तस्यैव किल जीवितम् । काकोऽपि स्वोदरपूर्तिं, कुरुतेऽन्यस्य का कथा ॥८०७॥
ततो यक्षो वचस्तस्य, श्रुत्वा भीतो भवाज्जगौ । अतः परं मया नैको, जीवो हिंस्यः कदाचन ॥८०८॥

त्वमुत्तिष्ठ व्रज स्वच्छ !, स्वस्थाने सुकृतं कुरु । अहं ब्रुडन् भवाम्भोधौ, रक्षितो भवताऽधुना ॥८०९॥
अतः परं गुरुस्त्वं मे, त्वं मे मित्रं पिताऽपि च । त्वं मे भ्राताऽथ याचस्व, वीक्ष्यते यत्तवाऽधुना ॥८१०॥
राजपुत्रो जगौ मे न, कार्यं केनाऽपि विद्यते । एक एवाऽस्तु मे जीव-रक्षाधर्मो भवे भवे ॥८११॥
निर्लोभं तं महीपाल-पुत्रं ज्ञात्वा स यक्षराट् । एकं विषहरं रत्नं, दत्त्वा स्वस्थानके ययौ ॥८१२॥
एकदेन्द्रः सभामध्ये, प्राहेति मरुतां पुरः । **मेघवाहन**भूपालो, **वीरसेन**सुतान्वितः ॥८१३॥
प्राणात्ययेऽपि न जीवं, हन्त्येकमपि कर्हिचित् । जीवहिंसाभयात्यक्तं, राज्यं ताभ्यां तृणौघवत् ॥८१४॥
श्रुत्वैतन्निर्जरो ह्येको-ऽभ्येत्य तत्र सुरालयात् । व्रजतो **वीरसेनस्या**-ऽसंख्यान् जीवान् विचकृवान् ॥८१५॥
दृष्ट्वा जीवानसङ्ख्यातान्, **वीरसेनः** कृपापरः । प्रमार्ज्योर्वीं स्थितस्तस्मिन्, स्थानके दिनसप्तकम् ॥८१६॥
ततोऽपसारिते जीव-समूहे मरुता तदा । पश्यन् भूमिं चचालाग्रे, **वीरसेनः** कृपापरः ॥८१७॥
ततोऽग्रे गच्छतस्तस्याभिमुखं स सुरस्तदा । खड्गमुत्पाट्य हन्तुं तं, दधावाऽतिखरस्वरः ॥८१८॥
सोऽथ कृत्वा नमस्कारो-च्चारं तत्र स्थितो जगौ । जहि मां त्वमहं न त्वां, हनिष्यामि स्वचेतसा ॥८१९॥
ममाऽयं खण्डशो देहं, करिष्यति नृपादिकः । तं हन्तुं कायवाक्चित्तैः, समीहेऽहं कदापि न ॥८२०॥
एवं परीक्ष्य गीर्वाणो, **मेघवाहन**भूपतिम् । पितृसून्वोः पुरो भूत्वा, सुररूपो जगाविति ॥८२१॥
यादृग् जीवदयाधर्मो, भवतोर्विषये किल । वर्णितो देवराजेन, तादृगेव मयेक्षितः ॥८२२॥
अतोऽहं भवतोस्तुष्टो, याच्यतां स्वसमीहितम् । तासां(भ्यां)प्रोक्तं न वाञ्छाऽस्ति, राज्यादौ सारवस्तुनि ॥८२३॥
एक एवाऽऽर्हतो धर्मो, विद्यते वां दयामयः । अतः किं वाञ्छ्यते-ऽन्यच्चा**ऽस्मद्**भ्यां तवान्तिकेऽधुना ॥८२४॥
निरीहमानसौ जीव-रक्षाकरणतत्परौ । तौ मत्वा स सुरो यात-स्तद्गोत्रिनृपसन्निधौ ॥८२५॥
तद्गोत्रिभूपतेर्देहे, व्यथां व्यधात्तथा भृशम् । यथा प्राणा वितन्वन्ति, परलोके प्रयाणकम् ॥८२६॥
उपचारेषु भूयस्सु, विहितेषु तस्य(च) भूपतेः । व्यथाऽधिकाऽधिकाऽत्यन्तं, बभूव प्राणहारिका ॥८२७॥
ततो भूपो जगौ योऽयं, (यद्) याचते मम सन्निधौ । तस्य तं तं (तत्तद्) ददाम्येव, रोगस्फेटनतोऽधुना ॥८२८॥
स सुरः प्रकटीभूत्वा(भूय), जगौ गोत्रिरिपोः पुरः । जीवितं वाञ्छसि त्वं, चेदिहाऽमुत्र सुखं पुनः ॥८२९॥
तदा गत्वा वने **मेघ-वाहनं** सुतसंयुतम् । सन्मानय पदौ नत्वा, क्षमस्व स्वं कृतं तमः ॥८३०॥
आनीयाऽत्र पुरे राज्ये, निवेश्य पैतृके पुनः । **मेघवाहन**भूपालं, सपुत्रं श्रय सन्ततम् ॥८३१॥
तदा ते देहतो याति, व्यथा प्राणापहारिका । नो चेत्ते सकुटुम्बस्य, यथा मृत्युं प्रदास्यति ॥८३२॥
भूपोऽथ प्रोक्तवान् नाऽहं, शक्नोम्युत्थातुमत्र च । कथं तत्र समागत्य, करिष्येऽहं वचस्तव ॥८३३॥
*सुरः प्राह नृपोत्तिष्ठ, शक्तिस्तेऽत्र भविष्यति । **मेघवाहन**भूपस्य,* ससूनोः पत पादयोः ॥८३४॥
ततो गोत्रिनृपो याव-दुत्थितः स्थानकान्निजात् । तावद्देहव्यथा यातो-पशान्ति तस्य देहतः ॥८३५॥
ततस्तत्र वने गत्वा, **मेघवाहन**भूपतिम् । नत्वा क्षान्त्वा जगौ गोत्रि-भूपालो विहिताञ्जलिः ॥८३६॥
गृहाण त्वं निजं राज्यं, सपुत्रः पालय क्षितिम् । अहं तव पदोपास्तिं, करिष्येऽतोऽनुगादिवत् ॥८३७॥
**मेघवाहन** आचष्ट, कार्यं राज्येन मे नहि । त्वं स्वेच्छया प्रजाः पाहि, कुरु राज्यं समाहितः ॥८३८॥

यतः –

ततो बलात्स गोत्रिक्ष्मा-पतिः **श्रीमेघवाहनम्** । आनीय स्वपुरे प्राह, त्वं राज्यं लाहि निश्चितम् ॥८३९॥

ततः सनन्दनो **मेघ-वाहनो** निःस्पृहोऽपि सन् । उपविष्टो निजे राज्ये, नतश्च गोत्रिभूधवैः ॥८४०॥

तदा तत्राऽऽगतः कल्पवृक्षो भूपं जगाविति । अहं भृत्योऽस्मि ते दानं, देयं त्वया मत्रा (यथा) रुचि ॥८४१॥

स सुरः प्रकटीभूय, प्राहेति सर्वभूभुजाम् । योऽस्मिन् भूमिपतौ द्वेषं, विधास्यति नृपादिकः ॥८४२॥

*तस्यैत्याऽहं सुरावासात्, शिष्ट्यां(शिक्षां) दास्येऽसुहारिकाम् ।*

अतः केनाऽपि नाऽस्याऽऽज्ञा, लङ्घनीया हितेच्छुना ॥८४३॥

एवं प्रोक्त्वा(च्य) सुरे याते, स्वर्गे स **मेघवाहनः** । निष्कण्टकं व्यधाद्राज्यं, सुखं भुङ्क्ते स्म चाऽन्वहम् ॥८४४॥

विषापहाररत्नेन, स्थावरं जङ्गमं विषम् । उत्तारितं नृपालेन, तेन भूयिष्ठभूस्पृशम् ॥८४५॥

**मेघवाहन**भूपालो, **वीरसेनं** निजाङ्गजम् । स्वराज्ये न्यस्य चारित्रं, जग्राह गुरुसन्निधौ ॥८४६॥

शुद्धां क्रियां वितन्वानो, **मेघवाहन**संयतः । तपः कृत्वाऽच्युते स्वर्गे, गतः क्रमाच्छिवं गमी ॥८४७॥

**वीरसेनो** महीं रक्षन्, गृह्णन् पूर्वागतं करम् । जनताः सुखिनीश्चक्रे धर्मकर्मैकतत्परः ॥८४८॥

यतः –

**वीरसेनो**ऽन्यदा शत्रु-ञ्जये तीर्थे नतेः फलम् । श्रुत्वा सङ्घं बहुं यात्रा-कृते चाऽऽकारयन् मुदा ॥८४९॥

**वीरसेनः** पुरे ग्रामे, जिनेन्द्रसदनेषु च । कुर्वन् स्नात्रोत्सवं शत्रु-ञ्जये तीर्थे समागमत् ॥८५०॥

तत्रा**ऽऽदिजिन**नाथस्य, स्नात्रं कृत्वाऽर्चनां पुनः । ध्वजादिदानतश्चक्रे, राजा सङ्घयुतो महम् ॥८५१॥

ततो **रैवतके** शैले, गत्वा **नेमिजिनेश्वरम्** । नत्वाऽथ पूजयित्वा च, ववले स महीपतिः ॥८५२॥

ततः पश्चात् समागच्छन्, मार्गे सङ्घं समं नृपः । भुक्ताम्बरादिदानेन, प्रीणयामास सादरम् ॥८५३॥

**वीरसेन**नृपः सङ्घं, विसर्ज्य स्वपुरीं प्रति । सूत्सवं स्वपुरेऽभ्येत्य, चिरं राज्यं चकार सः ॥८५४॥

क्रमात् स्वं नन्दनं **भीम-सेनं** राज्ये निजे पुनः । न्यस्य दीक्षां ललौ **वीर-सेनो**ऽपि शिवहेतवे ॥८५५॥

गुरूक्तविधिना दीक्षां, पालयन् यतनापरः । मृत्वा प्रान्तेऽगमत्स्वर्गे, पञ्चमेऽनघशर्मदे ॥८५६॥

भुक्त्वा स्वर्गसुखं भूरि-कालं प्राप्य नृजन्म च । स्तोकैर्भवैर्गमी मुक्ति-पुर्यां पापवृषक्षयात् ॥८५७॥

एवमिक्ष्वाकुवंशे चाऽसङ्ख्या आसन् महीधवाः । तेषु केचिद् गताः स्वर्गे, केचिच्छिवसुखं श्रिताः ॥८५८॥

क्रमाद् **गजपुरे** वर्ये, इक्ष्वाकुवंशसम्भवः । नाम्ना **प्रजापति**र्भूपो, बभूवाऽनघशर्मवान् ॥८५९॥

तस्य भूमिपतेः पत्नी, बभूव **सुन्दरी** सती । मन्त्री **सारमति**र्नाम्ना-ऽजनि लोकनृपेप्सितः ॥८६०॥

**प्रजापते**र्महीशस्य, **हीराह्वो** नन्दनोऽभवत् । शस्त्रशास्त्रकलाः सर्वाः, स च शिक्षितवान् क्रमात् ॥८६१॥

**वैरसिंहम**हीशस्य, नन्दिनीं **तिलकश्रियम्** । पितुरादेशतो **हीरः**, परिणिन्ये वरोत्सवम् ॥८६२॥

**प्रजापति**महीपालो, **हीराय** सूनवेऽन्यदा । राज्यं दत्त्वाऽऽयुषःप्रान्ते, स्वर्गसौख्यमवाप्तवान् ॥८६३॥

**हीरभूपो**ऽन्यदा भूरि-देशभूपान् निजद्विषः । साधयित्वाऽगमत्स्वीय-नगरे रुचिरोत्सवम् ॥८६४॥

अन्यदा नगरोद्याने, धर्ममूर्तिगुरूत्तमान् । आगतान् नरपोऽश्रौषीत्, वनपालाऽऽननात् तदा ॥८६५॥

दानं यथोचितं तस्मै, वितीर्य **हीर**भूपतिः । वन्दितुं प्रययौ सार-परिवारसमन्वितः ॥८६६॥

संसारसागरोन्मज्ज-ज्जनोत्तारणनौसमा । देशना गुरुभिश्चक्रे, भव्याङ्गिबोधहेतवे ॥८६७॥
तथाहि :–
देवपूजा गुरूपास्ति, तीर्थयात्राऽर्हतां नतिः । विना भावं भवन्त्येव, न मुक्तिसुखहेतवे ॥८६८॥
उक्तं च :–
निच्चं नो तंबोलां(निच्चुणो तंबोलो), पासेण विणा न होई जह रंगो ।
तह दाण-सील-तव-भावणाओ, अहलाओ सव्वं भावविणा ॥८६९॥
मणिमंतओसहीणं जंतय तंताणदेवयाणं पि । भावेण विणा सिद्धी, न हु कस्सय दीसई लोए ॥८७०॥
सुहभावणावसेणं, पसन्नचंदो मुहुत्तमित्तेणं । खविऊण कम्मगंठिं, संपत्तो केवलं नाणं ॥८७१॥
चोलरङ्गं विना वस्त्रं, सूक्ष्मसूत्रमपि क्वचित् । रज्यमानं न दत्ते स्म, शोभां चित्तप्रमोददाम् ॥८७२॥
भावं विना न सिध्येत, चिन्त्यमानो मनोरथः । विप्रसूनोरिवाऽन्येषां, जनानामपि कर्हिचित् ॥८७३॥
तथाहि :–
**पद्माऽ**भिधे पुरे राजा, **दृढसेनो** नृपोऽभवत् । अच्युतभूमिदेवस्य, पुत्रोऽजनि **गुणाकरः** ॥८७४॥
स पाठितोऽपि तातेन, शास्त्राणि भूरिशः क्रमात् । द्युतव्यसनसंसक्तो-ऽभवत् कुसङ्गतेः क्रमात् ॥८७५॥
पित्राऽथ हक्कितः पुत्र, एवं निर्लज्ज ! निर्गुण ! । गमिष्यसि कुलं स्वीयं, नामाऽपि द्यूततोऽधुना ॥८७६॥
अतस्त्वं व्यसनं ह्येतत्, त्यजाऽनर्थविधायकम् । द्यूतादिह भवेद् द्वेष्यः, पुत्रोऽपि जनकादिषु ॥८७७॥
एवं पित्राऽऽदिभिः पुत्रो, हक्कितः स गुणाकरः । निर्गतः स्वगृहा**च्चम्पा-पुर्याः** पार्श्वे समीयिवान् ॥८७८॥
शून्यदेवकुले तत्र, दृष्ट्वैकं योगिनं वरम् । नमश्चक्रे महीदेव-पुत्रो **गुणाकरः** स च ॥८७९॥
योगिनोक्तं पुमन् ! स्थानात्, कस्मादिह समागतः । किं दृश्यतेऽधुना दीन-मुखो निवेद्यतां त्वया ॥८८०॥
ततः स्वनिर्गमोदन्तं, विप्रः प्रोक्त्वा(च्य) जगाविदम् । अहं बुभुक्षितोऽत्यन्तं, ततः प्राणा व्रजन्ति मे ॥८८१॥
योगी जगौ कपालस्थं, भोजनं भुङ्क्ष्व मेऽधुना । विप्रोऽवग् न कपालस्थं, भोज्यं भुङ्क्ष्या(भक्षा)मि कर्हिचित् ।८८२।
ततो दीनं द्विजं दृष्ट्वा, योगिनी यक्षिणी स्मृता । समागता जगौ योगि-न्नादेशं देहि मेऽधुना ॥८८३॥
योगी जगौ द्विजस्यास्य, दिव्यं भोज्यं स्वशक्तितः । निष्पाद्य भवनं देहि, यथा स्यात्पुण्यमावयोः ॥८८४॥
ततः शीघ्रं तया देव्या, रचिते दिव्यसद्मनि । नीत्वा स भोजितो दिव्य-रसवत्या यथेप्सितम् ॥८८५॥
ततः सच्चन्दनालेपा-त्ताम्बूलादिप्रदानतः । रञ्जितोऽथ तथा मेने, स्वर्गसौख्याऽधिकं सुखम् ॥८८६॥
प्रोक्तं विप्रेण हे देवि !, अस्ति को रमणस्तव । देव्योक्तो व्रियते कान्तो, मया चित्तेप्सितो ह्यतः ॥८८७॥
इत्युक्त्वा यक्षिणी विद्यु-दिवाऽगाद् गगनाध्वना । ततो देवीकृतं सद्म, शक्रधन्वेव निर्ययौ ॥८८८॥
ततो विप्रो वरीतुं तां, यक्षिणीमीहते हृदि । यत एवं द्विजो दीना-ननोऽभवद्भृशं ततः ॥८८९॥
योगिनोक्तं कथं भुक्त-दिव्यभोज्योऽपि दीनवाक् । दृश्यसे त्वं कथं विप्र !, सोऽथ स्वचिन्तितं जगौ ॥८९०॥
यदि मे यक्षिणीयोगो, जायते साम्प्रतं द्रुतम् । तदा स्याज्जीवितं नो चेत्, प्राणा यास्यन्ति निश्चितम् ॥८९१॥
योगी जगौ सदा विद्या-बलेन यक्षिणी स्मृता । आयाति सन्निधौ मेऽत्र, प्रोक्तं च कुरुतेऽखिलम् ॥८९२॥
विप्राऽऽचष्ट कृपां कृत्वा, तां विद्यां वितराऽऽशु मे । यथाऽहं विद्यया नेष्ये, यक्षिणीं निजसन्निधौ ॥८९३॥

तस्मै दत्त्वा च तां विद्यां, योगिनोक्तं द्विजाऽधुना । एकचित्तः पयोमध्ये, स्थित्वा साधय सात्त्विक ! ॥८९४॥
एकचित्तः पयोमध्ये, भूत्वा विप्रो यदाऽस्मरत् । तां विद्यां तावता सर्वं, मायामयं प्रपश्यति ॥८९५॥
तस्मिन्व्यतिकरे माया-मयेऽनेनोदिते ततः । योग्याह वह्निकुण्डे त्वं, प्रवेशं कुरु सत्वरम् ॥८९६॥
ततः सा यक्षिणी ताव-कीनाऽन्तेऽभ्येत्य तत्क्षणात् । करिष्यति त्वदीयोक्तं, सन्दिह्यं न त्वयाऽत्र नु ॥८९७॥
विप्रः प्राह कुटुम्बस्य, मिलित्वा भवदीरितम् । करिष्येऽहं गदित्वेति, सोऽगात्कुटुम्बसन्निधौ ॥८९८॥
चिरकालाऽऽगतं तं तु, वीक्ष्य **गुणाकरं** द्रुतम् । लगित्वाऽथ गले तस्य, रुदत् पित्रादिकं जगौ ॥८९९॥
वत्सैतानि दिनानि त्वं, कुत्र गत्वा स्थितो वद । अस्माकं किं ददद् दुःखं, त्वद्वियोगसमुद्भवम् ॥९००॥
अतः –
मातरं पितरं वापि, ये निन्दन्ति नराऽधमाः । न तेषां जायते स्वर्ग-गतिश्च साधुवादता ॥९०१॥
**गुणाकरो** जगौ मोहो, वृथैव क्रियते जनैः । न कोऽपि कस्य विद्येत, परलोकगतौ क्वचित् ॥९०२॥
कस्य माता पिता कस्य, भार्या कस्य सुतोऽथवा । जातौ जातौ हि जीवानां, भविष्यन्त्यपरे परे ॥९०३॥
श्रोत्राणि सततं यस्य, प्रवहन्ति गिरेरिव । कफमूत्रपुरीषाद्यैः, स देहः किमु शुध्यति ॥९०४॥
इत्यादि जल्पता तेन, संसाराऽसारतां तदा । स्थापिता स्वकुटुम्बस्य, पुरतो द्विजसूनुना ॥९०५॥
उक्तं चाऽहं ज्वलद्वह्नि-कुण्डे विद्यासुसिद्धये । प्रविशामि कदाचिच्चेद्, भस्म स्यां दैवयोगतः ॥९०६॥
तदा शोको न कर्तव्यो, भवद्भिर्निखिलैरिह । विद्या चेत्सिस्यते (सेत्स्यति) मे हि, तदा वर्यं भविष्यति ।९०७।
इत्युक्त्वा संशयं कुर्वन्, गत्वा योग्यन्तिके स च । प्रविष्टः प्रज्वलद्वह्नि-कुण्डे विद्यां स्मरन् स च ॥९०८॥
यदा न यक्षिणी तत्रा-ऽऽगता विद्यास्मृतेर्भृशम् । तदा विप्रो जगौ योगिन् !, नाऽऽयाति यक्षिणी कथम् ॥९०९॥
योगी जगौ भवच्चित्तं, द्विधा जातं च संशयात् । यथोक्तं भवता दृष्ट्वा, कुटुम्बं प्रविशाम्यहम् ॥९१०॥
संशयं कुर्वतः पुंसो, धर्मे विद्यादिसाधने । चिन्तितं न हि सिध्येत, कृतेऽप्युपकृते घने ॥९११॥
यथोक्तं भवता दृष्ट्वा, कुटुम्बं ज्वलनेऽहकम् । प्रविशामि तदा चक्रे, संशयः कार्यनाशकृत् ॥९१२॥
एवं धर्मं वितन्वाना, कुर्वते संशयं यके । त एव नेप्सितं सौख्यं, लभन्ते मनुजाः क्वचित् ॥९१३॥
ये संशयं विना धर्म-कृत्यानि कुर्वते जनाः । त एव चिन्तितां लक्ष्मीं, लभन्ते **नरपाल**वत् ॥९१४॥
**एलापुर्यां** धनक्षोणी-पतेः पालयतोऽवनीम् । सेवां कर्तुमगादेको राजपुत्रोऽतिदूरतः ॥९१५॥
राज्ञो **भूपति**मार्गादौ, गच्छतोऽग्रे स सन्ततम् । त्वरितं पदिको भूत्वा, याति भक्तितरङ्गितः ॥९१६॥
राजा यं ददते ग्रासं, सायं स निष्ठितिं व्रजेत् । तदाऽन्ये जगदुर्लोका, यद्यन्यं सेवते (से) नृपम् ॥९१७॥
तदा तव बहुग्रासो, भवत्येव न संशयः । श्रुत्वैतन्मानसे नैव, तदुक्तं धरते हृदि ॥९१८॥
अश्वाऽऽरूढोऽन्यदा राजा, क्रीडायै कानने ययौ । खेलयंस्तुरगं तेन, नीतोऽश्वेनाऽतिदूरतः ॥९१९॥
परिवारोऽखिलः खिन्नः, स्थितः पश्चात्तदैव सः । अजानन् नगरीमार्गं, राजाऽथ दुःखितोऽभवत् ॥९२०॥
अथ राज्ञस्तृषा लग्ना, बुभुक्षा वाऽसुहारिका । तदाऽकस्मात्स भृत्येना-ऽभ्येत्य भूपो नतो वने ॥९२१॥
प्रणते सेवके तस्मिन्, राज्ञोक्तं त्वमगाः कथम् । सोऽवक् तार्क्ष्यपदान्येव, पश्यन्नत्राऽऽगमं त्विह ॥९२२॥

ततो राज्ञोदितं प्राणा-स्तृषा यास्यन्ति मेऽधुना । ततः स त्वरितं गत्वा, कुत्राऽपि दूरदेशतः ॥९२३॥
आनीयाऽऽमलकद्वन्द्वं, ददे भूमीभुजे स च । राजाऽथ स्वस्थितो जातो, भक्षणात्फलयोर्द्वयोः ॥९२४॥[युग्मम्]
राजाऽवक् किं तवाऽवस्थे-दृशी सम्प्रति दृश्यते । भृत्यो जगौ नहि स्वामी, तुष्यति स्म धनार्पणात् ॥९२५॥
यतः —
समीहितं यन्न लभामहे वयं, प्रभोर्न दोषस्तव कर्मणो मम ।
दिवाऽप्यूलूको यदि नावलोकते, तदाऽपराधः कथमंशुमालिनः ? ॥९२६॥
यो मे गर्भस्थितस्यापि, वृत्तिं कल्पितवान् विधिः । शेषवृत्तिविधानाय, स किं मूढोऽथवा मृतः ॥९२७॥
यावत्पुण्योदयः पुंसां, तावत्सर्वोऽपि किङ्करः । पुण्यच्छेदे भवन्त्येव, जनकाद्या अपि द्विषः ॥९२८॥
आयुः कर्म च वित्तं च, विद्या निधनमेव च । पञ्चैतानि च सृज्यन्ते, गर्भस्थस्यैव देहिनः ॥९२९॥
परं मृत्युर्न मां स्वीया-ऽऽवासे नयति साम्प्रतम् । स्वामिनाऽपि न दृष्टिभ्यां, वीक्षितोऽहं कदाचन ॥९३०॥
राज्ञोक्तं भवतः सर्वं, भविष्यति समीहितम् । गम्यते च पुरे स्वीये, तदा वर्यं भवेद् द्रुतम् ॥९३१॥
तेन दर्शितमार्गेण, राजा स्वपुरमागतः । तस्मै वस्त्रादिकं चाऽदात्, सन्मानदानपूर्वकम् ॥९३२॥
राजपुत्रोऽन्यदा प्राह, भूपस्य पुरतस्त्विति । इतोऽहं निर्गतो **भीमा**-ऽभिधेऽगां काननेऽन्यदा ॥९३३॥
तत्र भासुररत्नाना-ममूल्यानां चयो महान् । मयेक्षितस्ततस्तं च, लातुं यदोद्यतोऽभवम् ॥९३४॥
तदाऽकस्माज्ज्वलद्वह्नि-ज्वाला सर्वककुब्गता । रत्नानां परितो भूत्वा, स्थिता भयकरा नृणाम् ॥९३५॥
रत्नोपरि स्थिता चैका, देवी प्रोवाच मां प्रति । यद्यस्ति साहसं चित्ते, तदाऽत्राऽऽगम्यतां द्रुतम् ॥९३६॥
रत्नराशिममुं सर्वं, तुभ्यं दास्याम्यहं द्रुतम् । ततो मणिभिरेतैस्ते, सुखं चाजन्म जायते ॥९३७॥
मया तु कातरत्वान्न, प्रवेशो विदधेऽनले । ततो दध्यौ नृपोऽनेनो-पकारोऽकारि मे महान् ॥९३८॥
अतोऽहं कानने तत्र, गत्वा भावान्नमस्कृतीन् । गणयन् ज्वलने सद्यः, प्रविशामि च तादृशम् ॥९३९॥[युग्मम्]
रत्नराशिं गृहीत्वाऽहं, दत्त्वाऽस्मै सेवकाय च । भविष्याम्यनृणोऽप्यद्य, पुण्यं च मे भविष्यति ॥९४०॥
तत उत्थाय भूपालो, राजपुत्रयुतो द्रुतम् । गत्वा तत्र वने रत्न-पुञ्जमीक्षितवान् तथा ॥९४१॥
स्मृत्वा भावान्नमस्कारं, तादृशे ज्वलने यदा । प्रविष्टो नृपतिर्वह्नि-स्तदोपशान्तिमापिवान् ॥९४२॥
ततो देवी जगौ भूप !, तुष्टाऽहं तव साहसात् । रत्नराशिरयं दत्त-स्तुभ्यं लाहि त्वमेव तु ॥९४३॥
रत्नराशिं समानीय, सर्वं निजपुरे क्रमात् । ददौ महीपतिस्तस्मै, भृत्यायाऽनृणहेतवे ॥९४४॥
अमात्योऽवक् कथं रत्न-राशिरस्मै ददे नृप ! । भृत्यकृतोपकाराद्यं, राजाऽवग् मन्त्रिणः पुरः ॥९४५॥
ततः स सेवको याव-ज्जीवं सर्वात्मना सदा । सिषेवे भक्तितो भूपं, सर्वाऽवस्थासु निश्चितम् ॥९४६॥
एवं ये भावतो धर्मं, कुर्वते जिनपोदितम् । तेषां स्वर्गापवर्गादि-सुखं भवति हस्तगम् ॥९४७॥
ये पालयन्ति सम्यक्त्वं, मूलश्राद्धवृषं समम् । भावतस्ते सुपर्वादि-मुक्तिसातं श्रयन्ति तु ॥९४८॥
तथा **हीर**नराधीशो, धर्मं सम्यक्त्वशालिनम् । गृहीत्वा पालयामास, भूरिभव्यसमन्वितः ॥९४९॥
हीरभूपाऽमरीपत्नी, सम्भवा **कमला** सुता । **भीमेभ्यरमया** पुत्र्या, समं प्रीतिं व्यधाद् दृढम् ॥९५०॥
प्रतिज्ञां चक्रतुस्ते तु, भूपेभ्यतनये इति । आवयोरेक एवाऽस्तु, वरो विचक्षणो वृषी ॥९५१॥

तस्मिन्पुरेऽन्यदा **भीम**-महेभ्यनन्दिनी **रमा** । वातायनस्थिता पुर्याः, शोभां विलोकते स्म सा ॥९५२॥
तदा **केलिपुरा**त्तत्रा-ऽऽगतः कृष्णेभ्यनन्दनः । **चन्द्रचूडो** गवाक्षस्थां, **रमां** कन्यां ददर्श सः ॥९५३॥
तां दृष्ट्वा ध्यातवान् सोऽथ, यद्येषा मे प्रिया भवेत् । तदा स्यात् सफलं जन्म, नो चेदस्तु मृतिर्मम ॥९५४॥
कन्यकाऽपि तमालोक्य, दध्यावेष पतिर्मम । जायते चेत्तदा जन्म, सफलं नान्यथा पुनः ॥९५५॥
इतः पित्रा सुतायास्तु, **भीमेन पद्मपत्तने** । **पद्मेभ्यवीरपुत्रेण**, सहोद्वाहोऽथ मेलितः ॥९५६॥
**रमा** चक्रेश्वरीं देवीमाराध्याऽवक् कृताञ्जलिः । यदि तुष्टासि मे तर्हि, **चन्द्रचूडो**ऽस्तु मे पतिः ॥९५७॥
देवी प्राह त्वया चिन्ता, नेयं कार्या मनागपि । भविष्यति क्रमादेष, रमणो दैवयोगतः ॥९५८॥
इतश्च **चन्द्रचूडेन**, चण्डिकाऽऽराधिता सती । प्रादुर्भूय जगौ ते किं, **चन्द्रचूड !** विलोक्यते ॥९५९॥
**चन्द्रचूडो** जगौ देवि !, तथा कुरु यथा मम । **भीम**पुत्री **रमा** भार्या, जायते त्वत्प्रसादतः ॥९६०॥
ततश्चण्डिकया तस्मै, दत्ते द्वे गुटिके वरे । उक्तं चाऽऽस्येऽनया क्षिप्त-मात्रया स्त्री नरो भवेत् ॥९६१॥
अन्यया क्षिप्तया वक्त्रे, नरः स्यात्प्रमदा किल । **चन्द्रचूड**स्ततः कन्या, जाता गुटिकयैकया ॥९६२॥
**चण्डिका** वृद्धभूदेवो, भूत्वा तां कन्यकां करे । कृत्वा भीमान्तिके गत्वा-ऽऽशीर्वादं दत्तवान् ध्रुवम् ॥९६३॥
**भीमो**ऽवक् तव किं कार्यं, विप्रोऽवक् कन्यकाऽस्ति मे । अस्याश्चरणबन्धेन, पुरं द्रष्टुं न शक्यते ॥९६४॥
अतश्चेयं कनी गेहे, तव तिष्ठति साम्प्रतम् । **भीमेन** मानिते विप्रः, स्वस्थाने जग्मिवांस्तदा ॥९६५॥
भीमेभ्येन सुतोपान्ते, मुक्ता विप्रकनीनिका । इतो लग्नदिने **वीरः**, परिणेतुं च तामगात् ॥९६६॥
विप्रपुत्र्याः पुरः प्राह, **रमा**ऽस्ति दुःखमेव मे । द्विजपुत्री जगौ किं ते, दुःखं सम्प्रति विद्यते ॥९६७॥
**रमा**ऽवक् **चन्द्रचूडस्या**-ऽचिन्ति पाणिग्रहो मया । अन्यथा ज्वलतो मेऽस्तु, शरणं वा व्रतं पुनः ॥९६८॥
विप्रपुत्री जगौ ताव-कीनेच्छा दुःशका ध्रुवम् । यतश्चाऽयं वरः प्राणि-ग्रहं कर्तुं समागमत् ॥९६९॥
**रमा** तदाऽसिपत्रीं तु, क्षिपन्ती हृदये दृढम् । करे धृत्वा जगौ विप्र-पुत्रीति तिष्ठ साम्प्रतम् ॥९७०॥
ततस्तां गुटिकामास्या-त्कर्षयित्वाऽपरां पुनः । क्षपयित्वा मुखे सा च, **चन्द्रचूडो**ऽभवत्क्षणात् ॥९७१॥
चिन्तितं तं वरं दृष्ट्या, दृष्ट्वा रमा जगावदः । कथं तव मया पाणि-ग्रह एव करिष्यते ॥९७२॥
ततः सङ्केतमाधाय, **चन्द्रचूड**स्तया समम् । चक्रे गुटिकया कन्या-रूपं तत्र स्थितस्तदा ॥९७३॥
**रमा** पित्रन्तिके प्राह, विप्रपुत्रीमिमामहम् । परिणेष्ये वरं **वीरं**, नैवाऽत्राऽपि समागतम् ॥९७४॥
ततः कन्यकया कन्या, परिणीता बलात्तदा । ततो द्वे तिष्ठतः स्मैक-गृहे प्रीतिपरे मिथः ॥९७५॥
तदैवाऽसारसंसारं, मत्वा **वीरो** विरागवान् । चारित्रं लातवान् **धर्म-घोषसूरी**श्वरान्तिके ॥९७६॥
पालयित्वा व्रतं सम्यग्, विहिताऽऽराधनाक्रमः । मृत्वा प्रान्तेऽगमद्देव-लोके तुर्ये सुखप्रदे ॥९७७॥
ततो लोका वितन्वाना, आश्चर्यमेतदेव तु । यतो न कन्यया कन्या, परिणीताऽस्ति कर्हिचित् ॥९७८॥
आधानसम्भवं सम्यग्, **रमाया** वीक्ष्य मानवाः । जगुरेषा **रमा** पुंसा(सो)-ऽन्यस्य सङ्गं व्यधात् ध्रुवम् ॥९७९॥
ततो यो यो जनः प्राहा-ऽसतीं **रमा**मिमां ध्रुवम् । तस्य तस्य मुखं वक्रं, जायते कूटजल्पनात् ॥९८०॥
एषा **रमा** सती योषि-देवं यो वक्ति मानवः । तस्य तस्याऽऽननं जात-मवक्रं देवताकृतम् ॥९८१॥
ततो लोका जगुश्चैषा, सती सती **रमा** ध्रुवम् । ततोऽसूत सुतं काले, पूर्णे **रमा** शुभे क्षणे ॥९८२॥

अनागतमितः **कृष्ण**-महेभ्योऽवेत्य नन्दनम् । दुःखितो मरणा-ऽवस्थो, ययौ पुत्रवियोगतः ॥९८३॥

**चन्द्रचूडो** पदा-ऽभ्येत्या-ऽत्राऽऽस्यं मे दर्शयिष्यति । तदा मयाऽदनं कार्यं, द्विर्वारं **कृष्ण** ऊचिवान् ॥९८४॥

पित्रा कृतां प्रतिज्ञां तु, निशम्य **चन्द्रचूडकः** । उत्सुकोऽभूत्पितुः पार्श्वे, गन्तुं मिलनहेतवे ॥९८५॥

**चन्द्रचूडः** कनीरूपः, प्राहाग्रे श्वशुरस्य तु । अहं पितुर्गृहे यामि, प्रेष्यतां नन्दिनी निजा ॥९८६॥

श्वश्रूवाहे कृते पित्रा, **रमा**पत्नीयुता कनी । मुत्कलाप्याऽखिलं श्वश्रू-वर्गं श्रागचलत्तदा ॥९८७॥

**कलाकेलिपुरे**ऽभ्येत्य, तातेत्युक्त्वा पितुः पदौ । कनीरूपधर**श्चन्द्र-चूडः** पत्नीयुतोऽनमत् ॥९८८॥

**कृष्णः** प्राह न मे पुत्री, समस्त्येका च पूर्वतः । अतस्त्वयोच्यते कूटं, कथं तातेति जल्पनात् ॥९८९॥

कन्याऽऽचष्ट सुतोऽहं ते, **चन्द्रचूडा**ऽभिधानतः । अतस्त्वया विमुच्यतां, प्रतिज्ञा पूर्वनिर्मिता ॥९९०॥

**कृष्णो**ऽवक् **चन्द्रचूडो** मे, पुत्र एष्यति मद्दृशोः । तदैव त्यक्ष्यते कन्ये !, प्रतिज्ञातं दृढं मया ॥९९१॥

ततस्तयाऽऽननान्नारी-रूपकृद् गुटिका बहिः । कर्षिताऽभूत्तदा **चन्द्र-चूडो**ऽभून्नन्दनो ध्रुवम् ॥९९२॥

**चन्द्रचूडं** सुतं वीक्ष्य, **कृष्णो**ऽवक् किं कृतं त्वया । ततः पुत्रो निजोदन्तं, सर्वं पितुः पुरोऽवदत् ॥९९३॥

**कृष्णो**ऽथ तां वधूं पुत्र-युक्तां विज्ञां विशेषतः । ज्ञात्वौकःस्वामिनीं चक्रे, सम्मानदानपूर्वतः ॥९९४॥

**रमा** श्वश्र्वादिवर्गस्य, सर्वस्य रमणस्य च । तन्वती विनयं श्लाघ्या, जाता सर्वजनेऽपि वा ॥९९५॥

इतो **नागपुरे** पुत्र्या-श्चेष्टितं रुचिरं तदा । जामातुश्च निशम्यैव, **भीम**श्चक्रे महोत्सवम् ॥९९६॥

ज्ञात्वाऽथ **चन्द्रचूडेन**, इमां निजसखीं तदा । परिणीतां वरं तं च, वव्रेऽथ कमला कनी ॥९९७॥

**हीरो**ऽथ भूपति**श्चन्द्र-चूडस्य** मेदिनीपतेः । अनेकांश्च द्विपादींश्च, प्रदायाऽप्रीणयत्तमाम् ॥९९८॥

**हीर**भूमीपतेः पुत्रा, आसन् शतमिताः क्रमात् । तेषां मध्येऽभवन्मुख्यः, पुत्रः **सुदर्शना**ऽभिधः ॥९९९॥

**सुदर्शना**ऽङ्गजोऽयोध्यापुर्याः **सिंहमहीपतेः** । पुत्रीं **देव्य**भिधां चार्वीं, परिणिन्ये सदुत्सवम् ॥१०००॥

अन्येऽपि नन्दना भूमी-पतीनां तनयाः क्रमात् । **हीरेण** भूभुजा चारू-त्सवेन परिणायिताः ॥१००१॥

अन्येद्युर्धर्मसूरीश-सन्निधौ धर्मदेशनाम् । शुश्राव **हीर**भूपालो, **हस्तिनागपुरे** वरे ॥१००२॥

तथाहि –

तैलोदकाऽयोऽनलवारिदुग्धलोहोल्लस्तशुद्धरसाः क्रमेण । सद्धर्मरङ्गे भविनां बहूनां, दृष्टान्तभावं बिभराम्बभूव ॥१००३॥

संसाराम्भोनिधौ सत्त्वाः, कर्मोर्मिपरिघट्टिताः । संयुज्यन्ते वियुज्यन्ते, तत्र कः कस्य बान्धवः ॥१००४॥

श्रुत्वेति धर्ममाप्रोक्तं, भावाद् **वीरमहिपतिः** । अष्टाह्निकामहश्चक्रे, विस्तराज्जिनसद्मसु ॥१००५॥

**सुदर्शनं** सुतं राज्ये, न्यस्य श्रीगुरुसन्निधौ । लात्वा व्रतं तपस्तप्त्वा, ययौ तुर्ये सुरालये ॥१००६॥

**सुदर्शनो** नृपो न्याया-त्पालयन्मेदिनीं सदा । प्रत्यर्थिनृपतीन् भूरीन्, वशीचक्रे ककुब्जयात् ॥१००७॥

अन्यदा **कमलाचार्या**, विहरन्तोऽवनीतलम् । आययु**र्हस्तिनागस्य**, पुरस्योद्यानमद्भुतम् ॥१००८॥

**सुदर्शनो** नृपस्तत्र, गत्वा नत्वा गुरुक्रमौ । उपविष्टो जिनेन्द्रोक्तं, धर्मं श्रोतुं समाहितः ॥१००९॥

**॥ धर्मोपदेशोऽत्र ॥**

दीनादिभ्यो ददद्दानं, यथाशक्ति भवेज्जनः । राज्यादिश्रियमाप्नोति, वीर-धीराविव क्रमात् ॥१०१०॥

**सुदर्शनो** नृपोऽप्राक्षीत्, सम्बन्धं **वीर-धीरयो:** । गुरो ! प्रदर्शयेदानीं, बोधिसम्प्राप्तिहेतवे ॥१०११॥
गुरवो जगदु**र्वीर-धीराभ्यां** यत्कृतं पुरा । सुकृतं तच्च राजेन्द्र !, कथ्यमानं निशम्यताम् ॥१०१२॥
तथाहि :–
**शङ्खपुर्यामभूच्चन्द्र-भूपस्य पद्मिनी** प्रिया । कौटुम्बिकस्य **सोमस्य, सोमिका**ऽभूच्च गेहिनी ॥१०१३॥
अन्यदा **सोमिका**ऽसूत, पुत्रीं **पद्मा**ऽभिधां वराम् । सा चाऽन्येद्युर्महीशेन, परिणीता महोत्सवम् ॥१०१४॥
पतिभक्ता दयादान-तत्परा विनयान्विता । **पद्मा** धर्मं जिनन्द्रोक्तं, चकाराऽनघमानसा ॥१०१५॥
यत: –
सती पत्यु: प्रभो: पत्ति-र्गुरो: शिष्य: पितु: सुत: । आदेशे संशयं कुर्वन्, खण्डयत्यात्मनो व्रतम् ॥१०१६॥
**पद्मिन्यास्तनयो देव-राजाह्वो**ऽजनि सद्दिने । **पद्मायाः** नन्दनौ **वीर-धीरौ** बभूवतु: क्रमात् ॥१०१७॥
**वीर-धीरौ** सुतौ जातौ, भक्तौ परस्परं सदा । देहच्छाये इवाऽन्यन्तं, न दूरं तिष्ठत: क्वचित् ॥१०१८॥
अत्यन्तबलिनौ पितृ-भक्तौ लोकप्रियौ च तौ । निरीक्ष्य **पद्मिनी** दध्यौ, म्रियेतां नन्दनाविमौ ॥१०१९॥
एतयोर्जीवतो**र्वीर-धीरयो:** सुतयो: सतो: । भविष्यति न मे सूनो, राज्यं **देवा**ऽभिधस्य तु ॥१०२०॥
**पद्मिन्यथ** तयो: सून्वो:, पश्यन्ती च्छिद्रमन्वहम् । वाञ्छन्ती स्वसुते राज्यप्राप्तिं तिष्ठति सत्वरम् ॥१०२१॥
यत: –
परवादे दशवदन: परदोषनिरीक्षणे सहस्राक्ष: । सद्वृत्तवित्तहरणे बाहुसहस्रार्जुनो नीच: ॥१०२२॥
खल: सत्क्रियमाणोऽपि, ददाति कलहं सताम् । दुग्धधौतोऽपि किं याति, वायस: कलहंसताम् ॥१०२३॥
वाति वातेऽन्यदा पत्रो[१]-ड्डायनक्रीडनं किल । कुर्वाणौ सोदरौ **धीर-वीरौ** जातो स बालकौ ॥१०२४॥
एकदा **पद्मिनी**गेहे, पताका पतिताऽम्बरात् । **धीर-वीरौ** ततस्तत्र, गतौ लातुं च तां द्रुतम् ॥१०२५॥
**पद्मिन्य**पि तयोर्हस्ते, विलगित्वा(ग्य)तां पताकिकाम् । गृहीत्वोच्चै: प्रजल्पन्ती, तुत्रोटाऽङ्गं निजं नखै: ॥१०२६॥
सपत्नीपुत्रयो: पश्चाद्-गतयोर्मेदिनीपतिम् । आकार्य **पद्मिनी** प्राह, **धीर-वीरौ** वरौ नहि ॥१०२७॥
निहन्तुं मां समायाता-विह राज्यार्थिनौ सतौ । नखैस्त्रोटयत: स्वाङ्गं, ममैवं दृश्यतां पते ! ॥१०२८॥
रुष्टोऽथभूपतिश्छन्न-माकार्य मन्त्रिणं जगौ । एतौ सुतौ निहन्तव्यौ, नीत्वा वने त्वया रह: ॥१०२९॥
मन्त्रिणाऽथ पुरोद्याने, नीत्वा तौ भूपनन्दनौ । प्रोक्तं रुष्टो नृपो हन्तुं, युवां वाञ्छति सत्वरम् ॥१०३०॥
ममाऽऽदिष्टं नृपालेन, हन्तव्यौ नन्दनाविमौ । विद्यते मे कृपा तेन, युवां याथो(ता) ऽतिदूरत: ॥१०३१॥
यदि राजा युवां पुत्रौ, जीवन्तौ श्रोष्यति ध्रुवम् । हनिष्यति युवां मां च, तदा नाऽत्रैव संशय: ॥१०३२॥
**वीर-धीरौ** ततो दूर-देशं प्रति तत: पुरात् । चेलतु: सचिवश्चापि, भूपपार्श्वे जगादिति ॥१०३३॥
स्वामिंस्तवाऽधुनाऽऽदेश:, कृत: पुत्रहतेर्मया । राजा प्राह वरं कार्यं, कृतं पापिनिकन्दनात् ॥१०३४॥
इतस्तौ सोदरौ मार्गे, चलन्तौ कान्तकानने । युगादितीर्थकृद्गेहे, नाभेयं नेमतुर्जिनम् ॥१०३५॥
तत्र देवं युगादीशं, प्रातर्नत्वा च सोदरौ । चलितौ कानने चन्द्र-चूडे सायं समीयतु: ॥१०३६॥
**धीरं** रात्रौ भुजङ्गेन, दष्टं **वीरो** विलोक्य च । मन्त्रतन्त्रादिना बहू-पचारं चकृवान् भृशम् ॥१०३७॥

१. पतंग इति भाषायाम् ।

अन(नहि)वीक्ष्य गुणं भ्रातु-**र्वीरो वीरपुरे** गतः । आनेतुं चन्दनैधानि, दाहहेतुं त्वरा तदा ॥१०३८॥
इतश्चन्द्र**पुराधीशो, सोमे** भूपे मृते सति । राज्याधिष्ठातृका देवी, **धीरं** निर्विषयं व्यधात् ॥१०३९॥
**सोमस्या**ऽपुत्रकस्यैव, पुरे **धीरं** नृपाङ्गजम् । नीत्वा राज्यरमा प्राह, मन्त्रीशानां पुरस्त्विति ॥१०४०॥
अयं **धीरो** महत्(हा) पुण्य-सम्भारो विक्रमी नयी । **सोम**राज्ये भवद्भिश्चा-ऽभिषेच्योऽद्याऽधुना ध्रुवम् ॥१०४१॥
अस्मि**न्धीरे** प्रजाः पाति, राज्यमेतद्दिने दिने । वृद्धि यास्यति कोशाद्यैः, सितपक्षेन्दुवत् क्रमात् ॥१०४२॥
ततस्तैर्मन्त्रिभिः सोम-राज्ये राज्यसुरीगिरा । **धीरो** निवेशितश्चारु-मुहूर्ते रुचिरोत्सवम् ॥१०४३॥
इतो **वीरो** गृहीत्वाऽऽशु, चन्दनैधानि भूरिशः । भ्रातुर्दाहार्थमायातो, वने तत्र मनोहरे ॥१०४४॥
अदृष्ट्वा सोदरं भूरि, रुदित्वा ध्यातवान् स च । भक्षितः सोदरो नूनं, नीत्वाऽत्र श्वापदैर्ध्रुवम् ॥१०४५॥
विलोक्य काननेऽन्यत्रा-दृष्ट्वा स्वं सोदरं लघुः । **वीरो** जगाम पाथोधे-स्तटस्थे **पद्मिनीपुरे** ॥१०४६॥
तत्रेभ्यो **लक्ष्मणो** यान-पात्राणि विंशतिं तदा । सज्जीचक्रे **कुलद्वीपे**, गन्तुं वस्त्रभृतानि तु ॥१०४७॥
द्वात्रिंशल्लक्षणनरे, हते यानानि वारिधौ । चलिष्यन्तीति देव्योक्ते, सचिन्तो **लक्ष्मणो**ऽभवत् ॥१०४८॥
तदा तत्रत्यभूपालं, प्रीणयित्वा धनादिभिः । द्वात्रिंशल्लक्षणधरं, नरं ममार्ग सादरम् ॥१०४९॥
राज्ञोक्तं यो विदेशीयो, द्वात्रिंशल्लक्षणो जनः । दृश्यतेऽत्र पुरे ग्राह्यः, स एव भवता वणिक् ! ॥१०५०॥
**लक्ष्मणेन** तदा तत्र, पुरे **वीरः** सुलक्षणः । दृष्ट्वा धृतो बलिं कर्तुं, वार्द्धिदेव्या निजाऽनुगैः ॥१०५१॥
**लक्ष्मण**स्तं पदा हन्तुं, निनाय यानसन्निधौ । तदा **वीरो** जगौ मां तु, यानारूढं कुरुष्व भो ! ॥१०५२॥
मय्यारूढेऽथ यानेऽस्मिन्, यानानि सकलान्यपि । चलिष्यन्ति ततः पापं, नहीदृक्षं कुरुष्व भोः ! ॥१०५३॥
यतः –
अकर्तव्यं न कर्तव्यं, प्राणैः कण्ठगतैरपि । सुकर्तव्यं तु कर्तव्यं, प्राणैः कण्ठगतैरपि ॥१०५४॥
यत्नेन पापानि समाचरन्ति, धर्मं प्रसङ्गादपि नाऽऽचरन्ति । आश्चर्यमेतद्धि मनुष्यलोके, क्षीरं परित्यज्य विषं पिबन्ति ॥१०५५॥
पुरुषः कुरुते पापं, बन्धुनिमित्तं वपुर्निमित्तं वा । वेदयते तत्सर्वं, नरकादौ पुनरसावेकः ॥१०५६॥
ततः स **लक्ष्मणो वीरं**, यानारूढं विधाय च । स्वपुत्रं **सुन्दरं** वार्द्धौ, चालयामास सत्वरम् ॥१०५७॥
चलितेष्व(षु) समग्रेषु, यानेषु वारिधौ तदा । सुवातैः कमलद्वीपे, ययौ महेभ्य**सुन्दरः** ॥१०५८॥
तत्र गत्वा पुरीमध्ये, सुप्राभृतप्रदानतः । मिलितः **सुन्दरो भीम**-भूपतेः शोभनेऽहनि ॥१०५९॥
मुक्ते शुल्केऽथ यानेभ्य, उत्तार्याऽऽशु क्रयाणकम् । क्रयविक्रयतो भूरि-लक्ष्मीमर्जयति स्म सः ॥१०६०॥
द्विगुणं त्रिगुणं वित्तं, भाण्डक्रयविचक्षणाः । प्राप्नुवन्त्युद्यमाल्लोका, दूरं देशान्तरं गताः ॥१०६१॥
अन्येद्युस्तत्र भूपालः, पुत्र्या **लक्ष्म्या** वराय च । मण्डयामास सद्घस्त्रे, सुस्थाने वरमण्डपम् ॥१०६२॥
लग्नं लात्वाऽन्यदेशेषु, प्रेष्य कुङ्कुमपत्रिकाः । आकारयन्महीपालान्, भूरीनङ्गादिदेशतः ॥१०६३॥
उपविष्टेषु भूपेषु, मञ्चोन्मञ्चेषु भूरिषु । **लक्ष्मीः** सुखासनाऽऽरूढा-ऽऽजगाम तत्र मण्डपे ॥१०६४॥
दूत्या कीर्तितभूपालान्, विमुच्य निखिलान् क्रमात् । वरमालां च **वीरस्य**, कण्ठे चिक्षेप भूपभूः ॥१०६५॥
ततः सम्मान्य निःशेषान्, नृपान् पुत्री वरोत्सवम् । ददौ वराय **वीराय**, लक्ष्मीदानपुरस्सरम् ॥१०६६॥

यतः –

राज्यं सुसम्पदो भोगाः, कुले जन्म सुरूपता । पाण्डित्यमायुरारोग्यं, धर्मस्यैतत्फलं विदुः ॥१०६७॥
धनदो धनमिच्छूनां, कामदः काममिच्छताम् । धर्म एवाऽपवर्गस्य, पारम्पर्येण साधकः ॥१०६८॥
राजाऽथ निखिलान्भूपान्, विसृज्य बहुमानतः । जामातुः प्रददौ प्रौढ-मावासं वासहेतवे ॥१०६९॥
**लक्ष्म्या** पत्न्या समं **वीरो**, जामाता भूपतेस्तदा । **सुन्दरेण** युतोऽचालीत् पाथोदिवर्त्मना ध्रुवम् ॥१०७०॥
मार्गे **लक्ष्मीं** गृहीतुं स, **सुन्दरश्**छलकृत्तदा । **वीरं** चिक्षेप पाथोधौ, निर्दयस्तं कृपापरम् ॥१०७१॥
पतन्**वीरो**ऽम्बुधौ मत्स्योदरे पपात सत्वरम् । स च मत्स्यश्चलन् **चन्द्र**-पुर्युपान्तं समीयिवान् ॥१०७२॥
विदारिते तु मत्स्यस्योदरे **वीरो** विनिर्ययौ । ततो गतो पुरीमध्ये, वीक्षितुं जेमितुं पुनः ॥१०७३॥
स्वं भ्रातरं नृपं तत्र, ज्ञात्वा दध्यौ नृपाङ्गजः । यावन्मिलति मे पत्नी, नैव तावन्मया खलु ॥१०७४॥
मिलितव्यं निजभ्रा तुर्लक्ष्मीसम्प्राप्तिहेतवे । ततः स मालिकावासे, **वीरस्**तस्थौ समाधिना ॥१०७५॥
इतो वायुवशेनैव, तस्मिन्नेव तु पत्तने । यानानि **सुन्दरस्या**ऽऽशु, समीयुर्दैवयोगतः ॥१०७६॥
ततो **वीरो** मिलित्वाऽऽशु, स्वभ्रातुर्मेदिनीपतेः । स्वां पत्नीं वालयामास, धनधान्यसमन्विताम् ॥१०७७॥
दयया **सुन्दरो** भूमि-भुजा बद्धोऽपि निर्दयम् । **वीरेण** मोचितः किञ्चिद्, धनप्रदानपूर्वकम् ॥१०७८॥
**धीरो** जगाविदं राज्यं, कुरु वीर ! सहोदर ! । यतो वृद्धं लघुर्भ्राता, नमतीति स्थितिर्ध्रुवम् ॥१०७९॥
ततो बलेन **धीरेण**, वृद्धभ्रात्रे सदुत्सवम् । दत्त्वा राज्यं स्वयं राजा, युव(वा)एवाऽभवच्च सः ॥१०८०॥
अन्येद्युर्बङ्गदेशेशः, **सहस्रबाहु**भूपतिः । अभ्येत्य **वीरभूपस्य**, देशं भनक्ति दोर्बली ॥१०८१॥
यदा **वीरो**ऽचलज्जेतुं, वैरिणं तं पुरान्निजात् । लघुभ्राता जगौ **धीरो**, भ्रातस्त्वं तिष्ठ साम्प्रतम् ॥१०८२॥
अहं तवाऽऽज्ञया शत्रून्, सर्वान् बलोत्कटानपि । जेष्यामि भवतश्चाज्ञा, ग्राहयिष्यामि हेलया ॥१०८३॥
वृद्धभ्रात्रा बलं दत्तं, लात्वा **धीरः** शुभेऽहनि । चचाल वैरिणो जेतुं, शकुनेषु वरेष्वथ ॥१०८४॥

यतः –

जंबू-चास-मयूरो, भारद्दाए तहेव नउले अ । दंसणमेव पसत्थं, पयाहणे सव्वसंपत्ती ॥१०८५॥
डाबी छींक जिमणी धाह वारणिआलूं मांस । एहे शकुने जई जाईइ तो विडारीउ कंस ॥१०८६॥
खर डाबे विसहर जेमणो वारुणिण सम्मुखं सदा । **सहस्रबाहु**भूपालं, जित्वाऽऽदौ तत्सुतं तदा ।
स्वसेवकं व्यधा**द्धीरो**, मुरारि[1]रिव पाण्डवान् ॥१०८७॥
ततो भूयिष्ठदेशेषु, गत्वा तत्स्वामिनो बहून् । जघान केचन स्वीय-सेवकान् विदधे स च ॥१०८८॥
भूपैः शतमितैर्भ्रातृ-निदेशधारिभिः सह । **धीरो** भूरिगजाश्वादि, लात्वा स्वपुरमाययौ ॥१०८९॥
भूरिभूपयुतो **धीरो**, वृद्धभ्रातुः पदाम्बुजम् । सिषेवे रामभूपस्य लक्ष्मणभ्रातृवन्मुदा ॥१०९०॥
अन्येद्युर्गुरवः **सोम-चन्द्राह्वा** भूमिमण्डलम् । बोधयन्तः पुरोद्याने, तत्रैव समुपागमन् ॥१०९१॥
आगतान् श्रीगुरून् श्रुत्वा, ददानो दानमर्थिने । **वीरो** भूमीपति**र्धीर**-युतो वन्दितुमीयिवान् ॥१०९२॥
वन्दित्वा गुरुपादाब्जं, साधूनन्यान् यथाक्रमम् । धर्मं श्रोतुमुपाविष्टो, भक्तिपूर्वं गुरोः पुरः ॥१०९३॥

---

१. मूले एव पाठान्तरम् - मोहवत् जननोत्करम् ।

अत्रोपदेश इति ।

अभयं सुपत्तदाणं, अणुकंपा उचिअ कित्तिदाणं च । दोहि विमुक्खो भणिओ, तिन्निवि भोगाईअं दिंति ॥१०९४॥

न कयं दीणुद्धरणं, न कयं साहम्मीआण वच्छल्लं । हिअयंमि वीयरागो, न धारीओ हारीओ जम्मो ॥१०९५॥

पोरिसिचउत्थभत्ते काउं कम्मं खवंति जं मुणिणो । तं नो नारयजीवा वाससयसहस्सलक्खेहिं ॥१०९६॥

अङ्गुष्ठमानमपि यः प्रकरोति बिम्बं, वीरावमानवृषभादिजिनेश्वराणाम् ।

स्वर्गप्रधानविपुलर्द्धिसुखानि भुक्त्वा, पश्चादनुत्तरगतिं समुपैति धीरः ॥१०९७॥

राजाऽप्राक्षीन्मया पुण्यं, किं कृतं प्राग्भवे प्रभो ! । मम भ्रात्रा च किं पुण्यं, विहितं कथ्यतामिह ॥१०९८॥

गुरवो जगदुः **पद्म-पुरे** युवां सहोदरौ । अभूतां वणिजो **भीम**-श्रेष्ठिनो नन्दनौ ध्रुवम् ॥१०९९॥

युवाभ्यां प्रददे दानं, शुद्धं सुसाधवेऽन्यदा । तेन पुण्येन वां राज्यं, बभूव विपुलं पुनः ॥११००॥

त्वया बाल्ये भवे तस्मिन्, क्रीडां वितन्वता सता । एकोन्दुरः पयोमध्ये, बोलितो मौढ्यभावतः ॥११०१॥

क्षणाज्जातकृपाधर्मो, भवांस्तमुन्दुरं पुनः । बहिश्चकर्ष तेन त्वं, बोलितोऽसि पयोनिधौ ॥११०२॥

उन्दुरः कर्षितो येन, तेन त्वं निर्गतोऽम्बुधेः । यादृशं क्रियते कर्म, तादृगासाद्यतेऽङ्गिना ॥११०३॥

श्रुत्वेति सोदरौ द्वौ तु, श्राद्धधर्मं सदर्शनम् । गृहीत्वा गुरुपादाब्जं, नत्वा स्वालयमीयतुः ॥११०४॥

ततो दश सहस्राणि, प्रासादा अर्हतां ध्रुवम् । भूपतिः कारयामास, स्वभ्रातृसहितो मुदा ॥११०५॥

ततः कटकबन्धेन, सहितौ सोदरौ क्रमात् । गत्वा पितुः पदाम्भोजं, नेमतुर्जननीक्रमौ ॥११०६॥

पिताऽथ मुदितः सूनो-**र्वीरस्य** राज्यमादरात् । वित्तीर्य संयमं लात्वा, स्वर्गसौख्यं समासदत् ॥११०७॥

**वीरो**ऽथ देवराजस्य, भ्रातू राज्यं यथोचितम् । दत्त्वा न्यायाऽध्वना राज्यं, पपाल **धीरसंयुतः** ॥११०८॥

**शत्रुञ्जयादि**तीर्थेषु, भूरिसङ्घसमन्विताः । त्रयोऽपि भ्रातरश्चक्रु-र्यात्रां विस्तरतो मुदा ॥११०९॥

**वीर-धीरौ** सदा सप्त-क्षेत्र्यां स्वं विभवं सदा । व्ययन्तौ स्वं जनुः सद्य-श्चक्राते सफलं ध्रुवम् ॥१११०॥

क्रमा**द्वीरो** व्रतं लात्वा, **धीर**सोदरसंयुतः । तथा चक्रे तपः प्राप, यथा स्वर्गसुखं ध्रुवम् ॥११११॥

ततश्च्युत्वा द्वयो**र्वीर-धीर**योः पुण्यपुष्टयोः । जीवौ नरभवं प्राप्य, भवे तस्मिंश्च सेत्स्यतः ॥१११२॥

श्रुत्वेति जिननाथोक्तं, धर्मं **सुदर्शनो** नृपः । धर्मं जीवदयामूलं, जग्राह गुरुसन्निधौ ॥१११३॥

इक्ष्वाकुवंशे वृषभार्हदादिभूपा असङ्ख्या अभवन्क्रमेण । **सुदर्शनो** भूमिपतिस्ततोऽभूत्पिता**ऽरनाथस्य** वरप्रतापः ॥१११४॥

**इति तपागच्छऽधिराजश्रीलक्ष्मीसागरसूरिशिष्य-**
**पं. शुभशीलविरचिते अष्टादशारनाथ-चरित्रे**
**इक्ष्वाकुवंशोद्भवश्री**
**अरनाथपूर्वजभूपवर्णनरचितश्चतुर्थः सर्गः समाप्तः ॥**

• • •

## ॥ पञ्चमः सर्गः ॥

इतश्च नवमग्रैवेयकादायुः समं क्रमात् । भुक्त्वा सुशर्मणा सार्ध-मेकत्रिंशत्पयोनिधीन् ॥१॥
जीवो **धनपते**र्भूमी-पतेश्च्युत्वा ततो दिवः । फाल्गुनश्वेतद्वितीया-मध्यरात्रौ तु पौष्णगे ॥२॥
चन्द्रे केन्द्रस्थिते जम्बूद्वीपस्य भारते त्विह । **हस्तिनागपुरे** रम्ये, **सुदर्शनमही**पतेः ॥३॥
**देवी**राज्ञ्या महास्वप्नान्, चतुर्दश गजादिकान् । पश्यन्त्यां सुखसुप्तायां, कुक्षाववततार सः ॥४॥
तदाऽजनि सुखं सर्व-नारकाणामपि ध्रुवम् । भूरप्युच्छ्वसिता गर्भराजिनारीव सर्वतः ॥५॥
यतः –
नारका अपि मोदन्ते, यस्य कल्याणपर्वसु । पवित्रं तस्य चारित्रं, को वा वर्णयितुं क्षमः ॥६॥
तस्मिन् गर्भागते **देवी**, प्रबुद्धा पतिसन्निधौ । गत्वा च स्वप्नसम्प्राप्तिस्वरूपमूचुषी शनैः ॥७॥
**सुदर्शन**नृपोऽप्राक्षी-देभिर्गजादिदर्शनैः । भविष्यति महान्पुत्रो, भूरिगजेभसैन्ययुक् ॥८॥
विशेषतः प्रगे पृष्ट्वा, स्वप्नपाठककोविदान् । करिष्येत फलस्याऽस्य, स्वप्नस्य निर्णयो मया ॥९॥
धर्मध्यानात्तथा कार्यं, यथा नैति प्रमीलिका । पापस्वप्नैर्निहन्यन्ते, वर्या स्वप्ना अपि स्फुटम् ॥१०॥
आकार्याऽथ सखीर्देव-गुरुगीतादिगायनैः । देवी निशीथिनीं निन्ये, धर्मध्यानपरायणा ॥११॥
यतः –
दृष्टा अपि वराः स्वप्नाः, पापस्वप्नैर्नृणां खलु । हन्यन्ते वाऽथवा निद्रा-भवनान्नात्र संशयः ॥१२॥
प्रातर्जागरितो भूपो, धर्मध्यानपरायणः । स्मृत्वा देवं गुरुं नत्वा, प्रातः कृत्यमचीकरत् ॥१३॥
चित्रशालां द्रुतं सज्जी-कारयित्वा सुगन्धिभिः । बन्धयित्वाऽन्तरे स्वेत-पटीं पृथुतरां नृपः ॥१४॥
उपविश्याऽऽसने **देवीं**, राज्ञीं पट्यन्तरे पुनः । निवेश्य सेवकान् प्रेष्या-ऽऽकारयत्स्वप्नपाठकान् ॥१५॥
निवेश्य नृपतिः स्वप्न-पाठकानासनेष्वथ । नालिकेराणि हस्तेषु, तेषां मुक्त्वा जगावदः ॥१६॥
यतः –
रिक्तपाणिर्न पश्येत, राजानं देवतां गुरुम् । उपाध्यायं च वैद्यं च, फलेन फलमादिशेत् ॥१७॥
अद्य रात्रौ गजोक्षादीन्, स्वप्नांश्चतुर्दशाऽनघान् । **देवी** ददर्श तेषां च, फलं किं भावि जल्पताम् ॥१८॥
तथाहि –
हस्त्युक्षसिंहश्रीदामविध्वर्कध्वजवार्निपाः । स्वःसरोऽब्धिविमानोऽध्वरत्नपुञ्जाऽग्नयः क्रमात् ॥१९॥
अथ ते निखिलाः स्वप्न-पाठका विदुरा मिथः । विचार्य तेषु मुख्यो यः, स एवं प्रोक्तवांस्तदा ॥२०॥
तथाहि :–
अणुभूअदिट्ठचिंतिअसुअपयवियारदेवयापरणुआ । सुमिणस्स निमित्ताइं पुण्णं पावं च ना भवौ ॥२१॥
धातुप्रकोपादनिलेऽधिके स्यु-स्तर्वद्रितुङ्गाम्बरलङ्घनानि ।
पित्ताऽधिके काञ्चनरत्नमाल्य-दिवाकराग्निप्रभृतीन्(च)पश्येत् ॥२२॥

श्लेष्माऽधिके चेन्दुभशुक्लपक्ष-सरित्सरोऽम्भोनिधिलङ्घनानि ।
यथास्थिते भाविनि वस्तुनि ध्रुवं, स्वस्थो नरः पश्यति सुस्थितं पुनः ॥२३॥
स्वप्नस्तु प्रथमे यामे, सांवत्सरविपाकिनः । द्वितीये चाष्टभिर्मासैस्त्रिभिर्मासैस्त्रियामके ॥२४॥
अरुणोदयवेलायां, दशाहेन फलं वदेत् । अत ऊर्ध्वं प्रवक्ष्यामि, पुण्याऽपुण्येषु चाऽधुना ॥२५॥
आरोहणं गोवृषकुञ्जराणां, प्रासादशैलाग्रनिवेशितानि ।
विष्ठाऽनुलेपो रुदितं मृतं च, स्वप्ने च गम्यागम्यं च धन्यम् ॥२६॥
आरुह्य नावं प्रतिगृह्य वीणां, भुक्त्वा रुदित्वा ध्रुवमर्थलाभः ।
स्थानेषु रम्येषु सुरेषु गोषु, सर्वार्थसिद्धिः प्रमदार्थवृद्धिः ॥२७॥
यस्तु पश्यति स्वप्नान्ते, राजानं कुञ्जरं हयम् । सुवर्णं वृषभं गावं, कुटुम्बं तस्य वृध्यति (वर्धते) ॥२८॥
प्रासादोद्धर्वस्थितो भुङ्क्ते, यो वार्द्धिं तरति स्वयम् । अपि दासकुलोत्पन्नः, सोऽपि राजा भविष्यति ॥२९॥
दीपमन्नं फलं पद्मे, कन्यां छत्रं तथा ध्वजम् । स्वप्नान्ते यो लभेन्मर्त्यं, तस्य श्रीः प्रचुरा भवेत् ॥३०॥
देवं चाऽभीप्सितं पश्येत्, प्रतिमां चार्हतः पुनः । आयुः कीर्तिर्यशोवृद्धि-र्धनं धान्यं भवेद् बहु ॥३१॥
सर्वाणि शुक्लानि सुशोभनानि, कर्पासभस्माऽस्थिकतक्रवर्जम् ।
सर्वाणि कृष्णानि न शोभनानि, गो-हस्तिदेवाश्वतरेशवर्जम् ॥३२॥
गायने रोदनं ब्रूयात्, नर्तने वधबन्धनम् । हसने शोचनं ब्रूयात्, पठने कलहं तथा ॥३३॥
अस्माकं स्वप्नशास्त्रेषु, स्वप्ना द्वासप्ततिः स्मृताः । द्वाचत्वारिंशदुक्ताश्च, चतुर्दशोत्तमोत्तमाः ॥३४॥
राज्ञ्या गजादयः स्वप्ना, उक्ता ये साम्प्रतं तव । ते सूचयन्ति तीर्थेशं, चक्रिणं भाविनं त्वयि ॥३५॥
उक्तं च —
यद्देव्या ददृशे दन्ती, चतुर्दन्तैः शुभाननः । तच्चतुःशुद्धधर्मोपदेष्टाऽस्यां भविता सुतः ॥३६॥
गमिष्यति सुतो **देव्या**, वृषभस्य निरीक्षणात् । क्षेत्रेऽस्मिन् भारते बोधि-बीजवापनिमित्तताम् ॥३७॥
मृगेन्द्रवीक्षणा**द्देव्या**, नन्दनः पालयिष्यति । दुष्कर्मकरिभिर्भज्यमानान् भव्यवनस्पतीन् ॥३८॥
एतस्याः साऽभिषेकश्री-दर्शनान्नन्दनः पुनः । सांवत्सरं ददद् दानं, श्रियं पुण्यां करिष्यति ॥३९॥
अमुष्या भविता सूनुः, प्रसूनस्रग्विलोकनात् । सुरासुरनराधीशै-र्मौलौ धृतपदः सदा ॥४०॥
पूर्णेन्दुदर्शनाद् देव्या, नन्दनो नेत्रनन्दनः । दास्यते वीतरागात्मा, नित्यं कुवलये मुदम् ॥४१॥
मार्तण्डमण्डलाऽऽलोकात्, सूनुरस्या भविष्यति । मार्तण्डमण्डलाखण्ड-भामण्डलविभूषणम् ॥४२॥
ध्वजस्य दर्शनाद् देव्या, तनुजन्मा तनिष्यते । स्वं प्रभुत्वं पुरःस्फूर्ज-द्दिव्यधर्मध्वजं श्रिया ॥४३॥
कलशाऽऽलोकनात् पुत्रः, सुवृत्तोऽस्याः करिष्यते । उत्तुङ्गोज्ज्वलसद्धर्म-प्रासादशिखरस्थितिम् ॥४४॥
विहरिष्यति पुत्रोऽस्याः, कमलाकरदर्शनात् । सुरसञ्चारितस्वर्ण-सरोजस्थापितक्रमः ॥४५॥
गम्भीरस्तनयो **देव्या**, राज्ञ्या रत्नाकरेक्षणात् । केवलाऽऽलोकरत्नस्य, स्थानमर्हद् भविष्यति ॥४६॥
विमानवीक्षणात्पुत्रो, जया **देव्या** भविष्यति । वैमानिकनिकायानां, स्वर्गादुत्तारकारणम् ॥४७॥
भविष्यति कुमारोऽस्या, रत्नपुञ्जनिभालनात् । उदाररत्नप्राकार-मध्यसद्धर्मदेशकः ॥४८॥

सुतोऽस्या भविता भास्वद्वैश्वानरनिरीक्षणात् । भव्यलोकात्मकल्याण-शुद्धिनिर्माणकारणम् ॥४९॥
दृष्टाश्चतुर्दश स्वप्ना, यद्देव्या तत्तदङ्गजः । सच्चतुर्दश रज्ज्वात्म-लोकाऽग्रयं पदमाप्स्यति ॥५०॥
निशम्यैतन्महीपाल-स्तेभ्यो धनं तथा ददौ । आजीवितं यथाऽऽप्नोति, तेषां खादनहेतवे ॥५१॥
विसर्जितस्ततः स्वप्न-पाठका मेदिनीभुजा । सुभूषणाऽम्बरास्ताक्ष्य-रूढाः स्वं स्वं गृहं ययुः ॥५२॥
स्वप्नानां फलमाकर्ण्य, राजा राज्ञी च हर्षितौ । धर्मकर्माणि कुर्वाते, विशेषाद् हृष्टमानसौ ॥५३॥
यतः –

आरोग्यभाग्याऽभ्युदयप्रभुत्वं, सत्त्वं शरीरे च जने महत्त्वम् ।
तत्त्वं च चित्ते सदनं च सम्पत्, सम्पद्यते पुण्यवशेन पुंसाम् ॥५४॥

गर्भाऽऽगते प्रभौ भूप-सदने जृम्भकाः सुराः । सञ्चारयन्ति भूयिष्ठ-निधानानि निरन्तरम् ॥५५॥
**देव्या** गर्भे समायाते, स्वामिन्य**रे** जिनाऽधिपे । शुभा ये दोहदा आसं-स्ते ते पूर्णाः शुभोदयात् ॥५६॥
अर्कादिषु ग्रहेषूच्च-स्थानस्थेषु शुभेऽहनि । मार्गाऽसितदशम्यां तु, रेवतीस्थे निशाकरे ॥५७॥
अनुकूलेऽनिले वाति, निशीथसमये शुभे । प्रासूत नन्दनं **देवी**, पूर्वेव तरणीं यथा ॥५८॥
यतः –

अजवृषमृगाङ्गनाकर्कमीनवणिजांशकेब्धिनाद्युच्चाः । दशशिख्यष्टाविंशति निवीन्द्रियस्त्रिघनविंशेषु ॥५९॥
उच्चा नीचं सप्तममर्कादीनां त्रिकोणसंज्ञानि । सिद्धवृषाजप्रमदाकार्मुकभृततौलिकुम्भधराः ॥६०॥
सुखी भोगी धनी नेता, जायते मण्डलाऽधिपः । नृपतिश्चक्रवर्ती च, क्रमादुच्चग्रहं बलम् ॥६१॥
तिरश्चो नीचरतश्चौरो, निष्प्रजो बुधवर्जितः । शत्रूपपीडितो रोगी, अर्काद्यैर्नीचगैः क्रमात् ॥६२॥
त्रिभिः स्वक्षेत्रगैर्मन्त्री, त्रिभिरुच्चैर्नराधिपः । त्रिभिर्नीचैर्भवेद्दास-स्त्रिभिरस्तं गतैर्जडः ॥६३॥ उच्चनीचग्रहफलम् ॥
मूर्तिलग्नं ग्रहैः सर्वै-र्बलिभिर्यस्य वीक्षितम् । भवेदीशः स्वयं शे स्वे, दीर्घायुश्चापभीः सुखी ॥६४॥
पातालाम्बर १० पञ्चम ५ द्विनवमे लग्नेऽपि सौम्यग्रहाः, क्रूराः षष्ठगता नराशिघनगाः सर्वे च त्र्यैकादशाः ।
यात्रा-जन्म-विवाह-दीक्षणविधौ, राज्याऽभिषेके नृणाम्, या मित्रं ग्रहवर्जितं यदि भवेत्सर्वे च ते शोभनाः ॥६५॥
प्रभोर्जन्मक्षणे जाता, ककुभश्चोज्ज्वला मुदा । सुखस्पर्शा ववुर्वाता, अनुकूला नृणां तदा ॥६६॥
जिनजन्मावधेर्ज्ञात्वा, षट्पञ्चाशन्मिता द्रुतम् । दिक्कुमार्यः समाजग्मुः, कर्तुं कृत्यं निजं निजम् ॥६७॥
तथाहि –

दिक्कुमार्यो ह्यधोलोक-वासिन्यः कम्पितासनाः । अर्हज्जन्माऽवधेर्ज्ञात्वा-ऽभ्येयुस्तत्सूतिमन्दिरे ॥६८॥
भोगङ्करा[१] भोगवती[२], सुभोगा[३] भोगमालिनी[४] । सुवत्सा[५] वत्समित्रा[६] च, पुष्पमाला[७] त्वनिन्दिता[८] ॥६९॥
नत्वा प्रभुं तदम्बां चे-शाने सूतिगृहं व्यधुः । संवर्तेनाऽशोधयन् क्ष्मा-मायोजनमितो गृहात् ॥७०॥
एता८ योजनप्रमाणभूमिं शोधयामासुः । मेघङ्करा[१] मेघवती[२], सुमेघा[३] मेघमालिनी[४] ।
तोयधारा[५] विचित्रा[६] च, वारिषेणा[७] बलाहका[८] ॥७१॥

अष्टोर्द्धलोकादेत्यैता, नत्वार्हन्तं समातृकम् । तत्र गन्धाम्बुपुष्पौघवर्षं वर्षा वितेनिरे ॥७२॥
अथ नन्दोत्तरा-नन्दे, आनन्दा-नन्दवर्धिनी । विजया वैजयन्ती च, जयन्ती चाऽपराजिता ॥७३॥

पूर्वस्माद्रुचकादेता, हस्ते दर्पणधारकाः । मङ्गलाऽर्थे समाजग्मुर्दर्शयन्त्यः प्रभोस्तदा ॥७४॥

समाहारा सुप्रदत्ता, सुप्रबुद्धा यशोधरा । लक्ष्मीवती शेषवती, चित्रगुप्ता वसुन्धरा ॥७५॥

दक्षिणाद्रुचकादेता-श्चञ्चद्भृङ्गारपाणयः । अभिषेकं प्रभोः कर्तुं, तत्राऽऽययुः प्रमोदिताः ॥७६॥

इलादेवी सुरादेवी, पृथिवी पद्मवत्यपि । एकनासा नवमिका, भद्रा सीतेति नामतः ॥७७॥

पश्चिमाद्रुचकादेता-श्चारुव्यजनपाणयः । दिक्कुमार्यः समाजग्मु-र्वातक्षेपकृते प्रभोः ॥७८॥

अलम्बुसा मिताकेशी, पुण्डरीका च वारुणी । हासा सर्वप्रभा श्रीर्ह्रीरष्टौ दिग् रुचकाद्रितः ॥७९॥

हस्तात्तचामरा एता, उत्तराद्रुचकाद्रितः । एत्य प्रभोः पुरश्चालयन्ति स्म चामराणि च ॥८०॥

विचित्रा चित्रकनका, सिता सौदामिनी तथा । दीपहस्ता विदिक्ष्वेत्यास्थु विदिग् रुचकाचलात् ॥८१॥

रुचकद्वीपतोऽभ्येयुश्चतस्रो दिक्कुमारिकाः । रूपा रूपासिका चापि, सुरूपा रूपकावती ॥८२॥

चतुरङ्गुलतो नालं, छित्त्वा खातोदरेऽक्षिपन् । तं समापूर्य वैडूर्यै-स्तस्योद्र्ध्वं पीठमादधुः ॥८३॥

बद्ध्वा तद् दूर्वया जन्म-गेहाद्रम्भागृहत्रयम् । ताः पूर्वस्यां[1] दक्षिणस्यामुत्तरस्यां[2] व्यधुस्ततः[3] ॥८४॥

याम्यरम्भागृहं नीत्वा-ऽभ्यङ्गं तेनुस्तु तास्तयोः । स्नानं वर्यांशुकाऽलङ्का-रादिपूर्वगृहे ततः ॥८५॥

उत्तरेऽरणिकाष्ठाभ्या-मुत्पाद्याग्निं सुचन्दनैः । होमं कृत्वा बबन्धुस्ता, रक्षापोट्टलिकां द्वयोः ॥८६॥

भूधरायुर्भवेत्युक्त्वा, स्फालयन्त्रश्मगोलकौ । जन्मस्थाने च तौ नीत्वा, स्वं स्वं स्थानं गतास्ततः ॥८७॥

यत उक्तं च –

मेरु अह १ उड्ढलोआ २ चउदिसि ४ रूअगाउ अट्ठपत्तेअं ।
चउविदिसि मज्झरूअगा अंति छप्पन्नदिसि कुमरी ॥८८॥

संवट्ट १ मेह २ आयंसगाय २ भिंगार ४ तालिअंटाय ५ ।
चामर ६जोई ७ रक्खं ८ करिंति एअं कुमारीओ ॥८९॥

इत्यादिषट्पञ्चाशद् दिक्कुमार्यागमनसम्बन्धः ॥

इत आसनकम्पेन, ज्ञात्वा जन्मावधेः प्रभोः । शक्रो जन्माऽभिषेकं तु, कर्तुकामोऽभवत्तदा ॥९०॥

वासवोऽवादयद् घण्टा-मष्टयोजनसंमिताम् । सुघोषां त्वरितं नैग-मेषिणा स्वानुगेन तु ॥९१॥

वादितायां सुघोषायां, घण्टायां नेदुरञ्जसा । घण्टाः सर्वविमानस्था, युगपज्जिनजन्मनि ॥९२॥

जिनजन्मावधेर्ज्ञात्वा, द्वादश स्वःस्थिताः सुराः । एत्य शक्रान्तिके प्रोचुः, कार्यं निवेदयाऽधुना ॥९३॥

इन्द्रादेशं समासाद्य, विमानं **पालका**ऽभिधम् । लक्षयोजनमानं तु, विदधे निर्जरैस्तदा ॥९४॥

शक्रे विमानमारूढे-ऽग्रमहिष्योऽष्टसुन्दराः । अग्रे तूपाविशन् जिष्णो-र्वामे सामानिकाः सुराः ॥९५॥

त्रिदशा दक्षिणे ऽमर्त्याः, सप्त सैन्यानि पृष्ठतः । अन्येऽपि निर्जराः स्वस्व-स्थानकैर्न्यषदन् क्रमात् ॥९६॥

असङ्ख्यदेव संसेव्यो-ऽचालीदिन्द्रः सुरालयात् । शक्रादेशात्सुराः केचि-च्चेलुः केचित्प्रियेरिताः ॥९७॥

मित्राऽनुवर्तनात्केचित्, केचिदात्मीयभावतः । केचित्कौतुकतश्चेलुः, केचिद्भक्तिभरात्प्रभोः ॥९८॥

नानावाहनमारूढा-श्चलन्तो निर्जरास्तदा । कोलाहलं व्यधुः प्रोच्चै-र्जल्पनाज्जलदाध्वनि ॥९९॥

सिंहारूढो जगौ कुम्भि-स्थितं दूरे गजं कुरु । ममायं केसरी ते तु, हनिष्यति गजं तव ॥१००॥

ताक्ष्र्यस्थं कासरारूढो, गरुडस्थोऽहिवाहनम् । छागस्थं चित्रकारूढो, जगुरेवं सुरास्तदा ॥१०१॥
देवानां कोटिकोटिभि-र्विमानैर्बहुवाहनैः । अनन्तोऽपि नभोमार्गः, सङ्कीर्णोऽभूत्तदाऽभितः ॥१०२॥
अग्रतः सुहृदः शीघ्रं, गच्छतो वीक्ष्य केचन । प्रोचुर्भ्रातः ! प्रतीक्षस्व, मा मां मुञ्चाद्य साम्प्रतम् ॥१०३॥
सुहृदो जगदुर्भ्रातः !, किं त्वं विज्ञोऽसि नाऽधुना । एवंविधे क्षणे कोऽपि, कस्य नैव प्रतीक्षते ॥१०४॥
तेषामागच्छतां व्योम्नि, मौलौ विधुकरैः स्थितैः । निर्जरा अपि जायन्ते, सजराः श्वेतकुन्तलैः ॥१०५॥
तेषां सुधाभुजां मौलौ, कुम्भाकारा बभुर्गले । ग्रैवयकोपमा देहे, तारकास्त्वम्बुबिन्दवः ॥१०६॥
असङ्ख्यद्वीपपाथोधीनुल्लङ्घ्य वासवः क्रमात् । नन्दीश्वरे समागत्य, विमानानि समक्षिपत् ॥१०७॥
मेरुमार्गे सुरान्मुक्त्वा, शक्रो **गजपुरे**ऽचिरात् । एत्य प्रदक्षिणास्तिस्रो, ददौ जिन-जिनाम्बयोः ॥१०८॥
वन्दित्वाऽर्हत्प्रसूं पुत्र-युतां शक्रो जगाविति । नमोऽस्तु देवि ! तुभ्यं तु, माणिक्यकुक्षिधारिका ! ॥१०९॥
इन्द्रोऽहं प्रथमात्स्वर्गा-ज्ज्ञात्वा ऽवधेः प्रभोः जनुः । करिष्ये च प्रभुं नीत्वा, मेरुशृङ्गे जनुर्महम् ॥११०॥
भेतव्यं न त्वया देवि !, प्रोच्याऽवस्वापिनीं ददौ । प्रतिबिम्बं प्रभोस्तत्र, मुक्त्वेन्द्रोऽलात्प्रभुं करे ॥१११॥
न्यस्याञ्जलौ प्रभुं शक्रः, पञ्चरूपधरोऽभवत् । एकेनालायि तीर्थेशः, करे द्वाभ्यां च चामरौ ॥११२॥
एकेन च धृतं छत्र-मेकेन पविराददे । तदा देवा जगुः श्लाघ्यः, शक्रोऽयं पञ्चरूपभृत् ॥११३॥
पृष्ठगं चाग्रगः स्तौति, पृष्ठगोऽप्यग्रगं पुनः । अग्रगा लोचने पश्चा-द्वाञ्छन्ति प्रभुमीक्षितुम् ॥११४॥
मेरुशृङ्गे हरिर्गत्वा, तच्चूलायां च दक्षिणे । ककुब्भागे जगामाऽति-पाण्डुकम्बलविष्टरे ॥११५॥
निषसाद हरिः कृत्वो-त्सङ्गे पूर्वमुखो जिनम् । अपरेऽपि सुराधीशाः, स्वामिपार्श्वे स्थितास्तदा ॥११६॥
स्वर्णमाणिक्यरूप्यादि-कलशान् योजनाननान् । अष्टोत्तरसहस्रास्तान्, बिभरुः क्षीरवारिभिः ॥११७॥
कुम्भान्वक्षःस्थले कृत्वा, देवाः श्रेण्यां स्थितास्तदा । भवाऽब्धिं तरितुं किं वा, वाञ्छन्ति साम्प्रतं सुराः ॥११८॥
भावद्रुमिव सिञ्चन्ति, क्षिपन्तो मलमात्मजम् । देवाः श्रेणिस्थिताः सर्वे, शोभन्ते स्म तदाऽभितः ॥११९॥
अच्युतेन्द्रादयः पश्चानुपूर्व्या वासवाः क्रमात् । चन्द्रार्काद्या ग्रहाः स्नात्रं, प्रभोश्चक्रुश्च पूजनम् ॥१२०॥
तत ईशानदेवेशः, कृत्वोत्सङ्गे प्रभुं स्थितः । तदाऽऽदिमद्युसन्नाथ-श्चक्रे वृषचतुष्टयम् ॥१२१॥
तेषां शृङ्गाष्टकच्योत-त्क्षीरैः स्नात्रं प्रभोर्व्यधात् । मन्दारकुसुमैः पूजां, चक्रे च निर्जरान्वितः ॥१२२॥
विधायाऽऽरात्रिकां चादौ, ततो मङ्गलदीपकम् । सन्नृत्यगीतवाद्यादि, व्यधाच्छक्रः सनिर्जरः ॥१२३॥
उक्तं च –

पय(पवर)पुप्फ १ गंध २ अइकय पईवफलधूवनीरपत्तेहिं ७, नेविज्जविहाणेहिं अ ८ जिणपूआ अट्ठहा होइ ॥१२४॥

गंधोदएण न्हवणं पूआ अट्ठविहमंगलाइं च । आरत्तिगाइमाई कायव्वं सव्वमणुदियहं ॥१२५॥

**जीवाऽभिगमागमे ।**

इन्द्रोऽथ प्रभुमानीय, मुक्त्वा **देव्यम्बि**कान्तिके । अहार्षीत्प्रतिबिम्बाव-स्वापिन्यौ निजशक्तितः ॥१२६॥
दिव्ये द्वे कुण्डले क्षोमयुग्मं मौलेरधः प्रभोः ।
शीर्षान्तिके प्रभोः श्रीस्रग्, **रत्नकरोल्लोचरै**गुडान् व्यमुचत् **हरिः** ॥१२७॥

बाल्ययोगैरमीभिस्तु, रममाणः प्रभुः सदा । शोभते चेति देवेशः, प्रभोर्भक्तिं व्यधात्तमाम् ॥१२८॥
हरेरादेशतो वैश्रमणपीयूषभुक् क्षणात् । द्वात्रिंशत्स्वर्णकोटीनां, वृष्टिं विहितवान्मुदा ॥१२९॥
द्वात्रिंशद् विलसद्भद्रा-सनान्यष्टौ शुभानि च । इन्द्रः प्रभोः पुरो भक्ति-पूरितो व्यमुचत्तदा ॥१३०॥
प्रभोः प्रभुजनन्याश्च, योऽशुभं चिन्तयिष्यति । आर्यमञ्जरिकेवाऽऽशु, शिरस्तस्य स्फुटिष्यति ॥१३१॥
एवं प्रोच्य हरिर्नत्वा, प्रभुं प्रभुप्रसूं पुनः । इन्द्रः सर्वेन्द्रसंयुक्तो, द्वीपे नन्दीश्वरे ययौ ॥१३२॥
अष्टाह्निकामहस्तत्र, कृत्वा विस्तरतो हरिः । सर्वेन्द्रसहितः स्वस्व-स्थानके समुपागमत् ॥१३३॥
मध्यरात्रौ जनुः सूनोः, श्रुत्वा नारीमुखात्तदा । ददौ **सुदर्शन**स्तस्यै, विभवं पारितोषिकम् ॥१३४॥
प्रातः सोमायिकां कृत्वा, पाठं तस्याः पठन् बुधः । छात्रयुक्तो नृपावासे, मङ्गलार्थं ययौ मुदा ॥१३५॥
ततो बद्धे गृहद्वारे, तोरणे मोरशालिनि । धवलोच्चारपूर्वं तु, पुरन्ध्र्योऽपि समाययुः ॥१३६॥
गृहे गृहे पुरीमध्ये, सर्पिषोऽम्बरधावनम् । कुर्वाणा योषितो भूप-पुत्रजन्मोत्सवं व्यधुः ॥१३७॥
हट्टश्रेणिषु कर्पूर-वारिवासितभूमिषु । स्वस्तिकाः पूरयामासु-र्नार्यो मुक्ताफलैर्वरैः ॥१३८॥
हट्टश्रेणिषु हट्टाग्रे, पट्टकूलैः पताकिकाः । बबन्धुर्वणिजो भूप-पुत्रजन्मनि हर्षिताः ॥१३९॥
स्थाने स्थाने प्रदीयेत, याचकेभ्यो धनं बहु । राजाऽपि ददते द्रव्यं, वाञ्छिताऽतिगमर्थिने ॥१४०॥
पूज्यन्ते श्रीजिनाऽधीशा, जनैर्जिनेन्द्रसद्मसु । कार्यते नाटकं भूमि-पतिनाऽपि जिनालये ॥१४१॥
साधवः प्रतिलाभ्यन्ते प्रासुकाऽन्नाम्बरादिभिः । गीयन्ते गुरुगीतानि, गायनैर्मनुजैरपि ॥१४२॥
मोच्यन्ते बन्दिनो गुप्ति-गृहेभ्यो भूभुजाऽनुगैः । कर्षकादि विवर्ध्यंते, सेतिकादि च मानके ॥१४३॥
मोच्यन्ते स्म कराः सर्वे, पुत्रजन्मनि भूभुजा । मीयते न धनं धान्यं, तोल्यं न तोल्यते जनैः ॥१४४॥
सन्मान्य स्वजनान् षष्ठी-जागराविधिरद्भुतः । विदधे भूभुजा भूरि-विभवव्ययतस्ततः ॥१४५॥
चञ्चच्चारणदीयमानकनकं सन्नद्धगीतध्वनि ऽस्फूर्जद्राधक- लुण्ठ्यमानकरटि प्रारम्भनृत्योत्सवम् ।
पूर्णं मङ्गलतूर्यदुन्दुभिरवैरुत्तालवैतालिक ऽश्लाघा- लङ्घितपूर्वपार्थिवमथ क्ष्माभर्तुरासीद् गृहम् ॥१४६॥
व्यतिते सूतिकाकर्म-दिने सन्मान्य सज्जनान् । सूनोररेतिनामाऽदात्सर्वसज्जनसाक्षिकम् ॥१४७॥
स्वप्ने निरीक्षिता **देव्या**, चक्रे हेममया अराः । तेन पित्रा ददे सूनोररेत्याह्वा सदुत्सवम् ॥१४८॥
उक्तं च –
सुमिणे अरं महरिहं पासइ जणणी अरो जहना । **इत्यावश्यके निर्युक्तिः** ॥
ततः सुदर्शनक्षोणी-पते**श्चन्द्रधरा**दयः । शतशो नन्दना जाता, विलसत्तनुभानवः ॥१४९॥
वर्धमानः क्रमात्सूनु-**ररो** बाल्ये लसत्तनुः । सवयोभिः समं पाकैः, क्रीडते स्म निरन्तरम् ॥१५०॥
अष्टोत्तरसहस्त्रैश्च, लक्षणैरुत्तमोत्तमैः । विभूषिततनुः स्वामी, राजते **स्माऽर**भूपभूः ॥१५१॥
यतः –
पञ्चदीर्घं चतुर्ह्रस्वं, चतुःसूक्ष्मं षडुन्नतम् । सप्तरक्तं त्रिविस्तीर्णं, त्रिगम्भीरं प्रशस्यते ॥१५२॥
बाहुनेत्रान्तरे **चैव**, हनुर्नासा तथैव च । स्तनयोरन्तरं चैव, पञ्चदीर्घं प्रशस्यते ॥१५३॥
ग्रीवा प्रजननं पृष्ठं, ह्रस्वे जङ्घे प्रपूज्यते । ह्रस्वानि यस्य चत्वारि, स पूजां लभते जनः ॥१५४॥

सूक्ष्माण्यङ्गुलिपर्वाणि, केशा त्वग् दशनास्तथा । चतुः सूक्ष्माणि येषां-स्युस्ते नरा दीर्घजीविनः ॥१५५॥
कक्षाकुक्षिश्च पादौ च, गुदः स्कन्धो ललाटिका । सर्वभूतेषु निर्दिष्टं, षडुन्नतं बुधोत्तमैः ॥१५६॥
पाणिपादतले रक्ते, नेत्रान्तानि नखास्तथा । तालुजिह्वाऽधरोष्ठो च, सप्तरक्तं विशिष्यते ॥१५७॥
उरः शिरो ललाटं च, त्रिविस्तीर्णमुदाहृतम् । स्वरः सत्त्वं च नाभिश्च, त्रिगम्भीरं प्रशस्यते ॥१५८॥
अतिदीर्घे च ह्रस्वे च, स्थूले चापि कृशेऽपि च । अतिकृष्णेऽतिगौरे च, षट्सु सत्त्वं न विद्यते ॥१५९॥
न श्रीस्त्यजति रक्ताक्षं, नाऽर्थः कनकपिङ्गलम् । दीर्घबाहुं न चैश्वर्यं, न मांसोपचितं सुखम् ॥१६०॥
उरो विशालो धनधान्यभोगी, शिरोविशालो नृपपुङ्गवश्च । कटिविशालो बहुपुत्रदारो, विशालपादः सततं सुखी स्यात् ॥१६१॥
चक्षुःस्नेहेन सौभाग्यं, दन्तस्नेहेन भोजनम् । त्वक्स्नेहेन(च) श्रीमान् स्यात्, पादस्नेहेन वाहनम् ॥१६२॥
अकर्मकठिनौ हस्तौ, पादौ चाऽध्वनिकोमलौ । यशः पार्ष्णी च पादौ च, स नरः सुखमेधते ॥१६३॥
रेखाभिर्बहुभिः क्लेशः, स्वल्पाभिर्धनहीनता । रक्ताभिः सुखमाप्नोति, कृष्णाभिः प्रेषको भवेत् ॥१६४॥
अतिपेष्यतिकीर्तिश्च, व्यतिक्रान्तः सुखी तथा । अतिस्निग्धा च दृष्टिः स्यात्, स अल्पायुर्विनिर्दिशेत् ॥१६५॥
महाकर्णा महानासा, महापादोदरा नराः । सुबाहुर्दृढनेत्राश्च, ते नरा दीर्घजीविनः ॥१६६॥
अधिकं यस्य गात्रेभ्यः, सुखं भवति सप्रभम् । ज्ञातिनि श्रेष्ठकं यस्मात्, विभवस्तु महाधनम् ॥१६७॥
दीर्घलिङ्गेन दारिद्रं, स्थूललिङ्गेन दुःस्थितः । कृशलिङ्गेन सौभाग्यं, ह्रस्वलिङ्गे नराऽधिपः ॥१६८॥
अचलो मांसलो रूक्षः, स्थूलकेशः स्फुटन्नखः । सुनखैः शोणितैः ख्यातो, जायते मानवो भुवि ॥१६९॥
नखैः कूर्मोन्नतैः स्निग्धै-श्छायाविक्रमसुप्रभैः । चन्द्रार्धसदृशेः शुक्लैर्जायते भाग्यवान् नरः ॥१७०॥
ताम्रवर्णनखैर्लक्ष्मी-र्धन्या पद्मनिभा नखाः । इन्द्रगोपकसङ्काशा, नखा नृपतयः स्मृताः ॥१७१॥
कनिष्ठाङ्गुलिमूलाच्च, रेखा गच्छति मध्यमां । अच्छिन्ना च भवेद्यस्य, जीवेद्वर्षशतं नरः ॥१७२॥
कनिष्ठाङ्गुलिदेशाच्च, रेखा गच्छत्यनामिकाम् । अच्छिन्ना च भवेद्यस्य, सोऽशीतिं जीवति ध्रुवम् ।१७३॥
कनिष्ठाङ्गुलिमूलाच्च, रेखा गच्छति तर्जनीम् । अच्छिन्ना च भवेद्यस्य, तदा षष्टिं स जीवति ॥१७४॥
अङ्कुशं कुलिशं चक्रं, यस्य पाणितले भवेत् । पद्मं सुशोभनं यस्य, शतं तस्य विनिर्दिशेत् ॥१७५॥
मत्स्ये शतं विजानीयात्, मकरे तु सहस्रकम् । पद्मे कोटिं समाख्याति, शङ्खे कोटिसहस्रकम् ॥१७६॥
अङ्गुष्ठोदरमध्यस्थो, यवो यस्य विराजते । उत्पन्नभक्षभोजी स्यात्, स नरः सुखमेधते ॥१७७॥
मणिबन्धोन्मुखा आयु-रेखायां येऽत्र पल्लवाः । सम्पदस्ते बहिर्लेखा, विपदोऽङ्गुलिसंमुखाः ॥१७८॥
इत्यादिलक्षणान्येव, यानि वर्याणि सन्ति च । तानि प्रभुशरीरे तु, राजन्ते नाऽत्र संशयः ॥१७९॥
मतिश्रुतावधिज्ञान-वन्तं पुत्रमरं जिनम् । अजानानौ पिता माता, लेखौकसि व्यमुञ्चत (ताम्) ॥१८०॥
स्वर्णवर्णवपुश्छाय-त्रिंशद्धनुस्तनुस्थितिः । चतुरष्टसहस्रायु-**ररस्वामी** विराजते ॥१८१॥
उक्तं च –
एमेव अरजिणंदस्स चउसु वि ठाणेसु दंतिपत्तेअं । इगवीससहस्साइं वासाणं हुंति नायव्वा ॥१८२॥
सवयोभिः समं शश्व-दस्य तिष्ठतः समाः । कुमारत्वे सहस्राणि, चन्द्रहस्तमितान्यगुः ॥१८३॥

कुर्वन् क्रीडां प्रभुर्नर्म-हेतोस्तुल्यवयस्ककान् । बलेन शतशो दोर्भ्यां, वहति स्म च बालकान् ॥१८४॥
आगर्भाच्चरतां याव-ज्जिनेन्द्रोऽरो विदन्नपि । एकादशाङ्गिकान्नैव, गाम्भीर्याज्ज्ञापयत्यहो ॥१८५॥
उक्तं च –
पढमस्स बारसंगो सेसाणिक्कार सूअसुअलंभो । इत्यादि ।
तिहिं नाणेहिं समग्गा तित्थयरा जाव हुंति गिहिवासे । पडिवन्नंमि चरित्ते चउनाणी जाव छउमत्थो ॥१८६॥
अनध्ययनविद्वांसो, निर्द्रव्याः परमेश्वराः । अनलङ्कारसुभगाः, पान्तु युष्मान् जिनेश्वराः ॥१८७॥
कलाविज्ञानशिल्पादि, सर्वं वा शिक्षितं स्फुटम् । आजन्मतः प्रभावासी-दवधिज्ञानवद् ध्रुवम् ॥१८८॥
शस्त्रशास्त्रकलाः सर्वा, जानन्नपि प्रभुः सदा । ज्ञत्वं न ख्यापयत्येव, गम्भीरता यतः प्रभौ ॥१८९॥
भूतं भावि भविष्यं च, वस्तु सर्वं जिनेश्वराः । अनन्तपर्यायोपेतमाबाल्यादपि वेत्त्यसौ ॥१९०॥
बाल्येऽपि वैरिणोऽनेकान्, जित्वा श्री**अरनन्दनः** । मानसं मोदयामास, मातापित्रोर्जनस्य च ॥१९१॥
यतः –
सोलसरायसहस्सा, सव्वबलेणं तु संकलनिबद्धं । अंछंति वासुदेवं, अगडतडंमी ठिअं संतं ॥१९२॥
घित्तूण संकुलं सो वामगहत्थेण अंछमाणाणं । भंजिज्ज विलिं पिज्जव महुमहणं तेन नायंति ॥१९३॥
दोसोला बत्तीसा सव्वबलेणं तु संकलनिबद्धं । अंछंति चक्कवट्टिं अगडतडंमी ठिअं संतं ॥१९४॥
घित्तूण संकुलं सो वामगहत्थेण अंछमाणाणं । भंजिज्ज विलिं पिज्जव चक्कहरं ते नरा यंति ॥१९५॥
जं केसवस्स पबलं तं दुगुणं होइ चक्कवट्टिस्स । तत्तो बला बलवगा अपरिमिअबला जिणवरिंदा ॥१९६॥
**सुदर्शन**नृपो याव-दुपाविशत् सभान्तरे । तावदेको नरोऽभ्येत्या-ऽपूर्वां वार्तां न्यशामयत् ॥१९७॥
**श्रीपुरे श्रीद**भूपस्य, पत्नी **पद्मा** सुता **रमा** । मन्त्री **भीमो**ऽभवत्पत्नी, तस्यापि **श्रीः** सुतोऽस्ति न ॥१९८॥
मन्त्रिगेहस्वरूपं ना ऽपुत्राद्यं वेत्ति भूपतिः । एकदा मन्त्रियुग् भूपो, गच्छन् मार्गे जगाविति ॥१९९॥
मन्त्रिन् ! सङ्कोचयाऽध्वान-मित्युक्तं मेदिनीभुजा । गूढोक्तं भूपते र्मन्त्र्य-जानन् प्रत्युत्ततार न ॥२००॥
प्रोक्तेऽथ भूभुजा मन्त्री, प्राह कल्ये वदिष्यते । एवं दिने दिने मन्त्री, पृष्टः प्रत्युत्तरं ददौ ॥२०१॥
कृष्णाऽऽस्यं मन्त्रिणं गेहा-ऽऽगतं वीक्ष्य जगौ सुता । तात ! किं क्रियते श्यामं, वक्त्रं त्वया निगद्यताम् ॥२०२॥
भूपपृष्टादिवृत्तान्ते, गदिते मन्त्रिणा तदा । पुत्री **चन्द्रवती** प्राह, खेदो नाऽत्र विधीयताम् ॥२०३॥
कुमारवेषमाधाय, द्वितीयेऽहनि मन्त्रिभूः । अश्वारूढोऽमिलन्मार्गे, भूपस्य गच्छतः सतः ॥२०४॥
भूपोऽवक् कस्य पुत्रस्त्वं, सोऽवग् मन्त्रिसुतोऽस्म्यहम् । राज्ञोक्तं तर्हि वर्त्म त्वं, सङ्कोचयाऽधुना द्रुतम् ॥२०५॥
मन्त्रिपुत्रो जगौ **भीम**-ग्रामे चूतादिशालिनीम् । वाटीं **कृत्वा** जटी जग्धां, दृष्ट्वा छन्नं स्थितो निशि ॥२०६॥
द्युगां स्फान्तां तदैक्ष्याऽला-त्तत्पुच्छं यावताध सः । तावत्साऽऽगाद्दिवं तत्र, प्रीणितो मोदकैः स च ॥२०७॥
गौः प्राहार्द्रां सदा वाटीं, तवैष्यामि च भक्षितुम् । त्वयात्रैत्यं मया सार्धं, दास्ये ते मोदकान् वरान् ॥२०८॥
तत्पुच्छे स सदा लग्नो, गत्वा दिवि च मोदकान् । खादं खादमभून्मत्तो, मित्रयुग् चान्यदाऽचलत् ॥२०९॥
जगदुः सुहृदो मार्गे, कियन्मानाश्च मोदकाः । भक्ष्यन्तेऽथ ततो मुक्त्वा, पुच्छं यावज्जटी जगौ ॥२१०॥
तावन्मित्रैः समैः सार्ध-मधस्तान्न्यपतज्जटी । भग्नकटिश्चिराद्दुःखी, जातो दूरवने स्थितः ॥२११॥

चिरकालान्मिलित्वा स, मित्राणां दुःखितो जटी । आगाद् ग्रामे निजे यावत्, तावत् शुष्का च वाटिका ॥२१२॥
ततोऽविमृश्यकारित्वफलं प्राप जटी स च । विमृश्यैव ततो वाच्यं, सुधीभिः सततं जनैः ॥२१३॥
कथ्यमाने ततस्तेन, सविनोदकथानके । वर्त्मप्रान्ते समायान्ते, भूपः प्रोवाचं तं प्रति ॥२१४॥
मन्त्रिपुत्र ! न किं वर्त्म, त्वया सङ्कोचितं मनाक् । मन्त्रिसूः प्राह मार्गस्तु, समकोचि कथोक्तितः ॥२१५॥
श्रुत्वेति भूपतिर्मन्त्र्य-ङ्गजं विसृज्य सत्वरम् । गतः स्वसदने मन्त्रि-पुत्रबुद्धिं समस्तवीत् ॥२१६॥
एवं दिने दिने मार्गे, मिलित्वा मेदिनीपतेः । वर्त्म सङ्कोचयामास, मन्त्रिभूः सुकथानकैः ॥२१७॥
राजा मन्त्रिसुतं वर्य-वरं ज्ञात्वा व्यचिन्तयत् । दास्याम्यहं **श्रियं** पुत्रीं, मन्त्रिपुत्राय सत्वरम् ॥२१८॥
ततो बलान्नृपो बुद्धिमते सचिवसूनवे । ददौ स्वनन्दिनीं **लक्ष्मीं**, चारूत्सवपुरस्सरम् ॥२१९॥
मनो विना महीपाल-नन्दिनीं परिणीय सः । गतः स्वसदने मन्त्रि-नन्दनो रुचिरोत्सवम् ॥२२०॥
तथा चक्रे तथा वक्ति, तथा तस्थौ तथेति च । यथा राजसुता जज्ञौ, वर्योऽयं मन्त्रिनन्दनः ॥२२१॥
भोगक्षणे तु मन्त्रीश-पुत्र एवं प्रजल्पति । अभिग्रहोऽस्ति मे देव-नत्यादिविषयो दृढम् ॥२२२॥
राजा राज्ञी च पुत्री च, मन्त्रिपुत्रस्वरूपकम् । पुरुषस्त्र्यादिकं जज्ञु-स्तत्तज्जल्पनहेतुभिः ॥२२३॥
एकदा मन्त्रिपुत्रेण, समं पुर्या बहिर्वने । राजाऽगात् तुरगान्खेल-यितुं सारपरिच्छदः ॥२२४॥
तत्राऽकस्मान्महीपाल-मन्त्रीशसूनुनेत्रयोः । महाकायः किरिः शीघ्रं, गच्छन्नाऽऽगान्मनोहरः ॥२२५॥
राज्ञा मुक्तः शरस्तस्य, देहे लगति नो मनाक् । स च बाणः समायाति, भूपपार्श्वे पुनः पुनः ॥२२६॥
क्षिप्तो मन्त्रीशपुत्रेण, बाणः किरिं प्रति स्फुटम् । अलगच्छूकरस्याङ्गे, यदा दृढतरं स्फुटम् ॥२२७॥
मन्त्रिपुत्रि ! लसद्भाग्ये !, भाग्यात्पुत्रोऽभवस्त्वकम् । मुक्तत्वद्बाणतोऽहं तु, सूकरोऽपि सुरोऽभवम् ॥२२८॥
राजाऽवग् देव ! किं त्वेवं, जल्प्यते साम्प्रतं त्वया । मया तु मन्त्रिपुत्राय, दत्ता पुत्री सदुत्सवम् ॥२२९॥
मन्त्रिपुत्रि ! नमस्तुभ्यं, पुत्रोऽभवोऽधुना पुनः । एवं प्रोच्य नमश्चक्रे, त्वया किं मन्त्रिसूनवे ॥२३०॥
सुरोऽवक् श्रूयतां भूप !, चमत्कृतिकरं वचः । **संवराह्वो**ऽमरोऽहंतु, शक्रस्य सेवकोऽभवम् ॥२३१॥
एकदा नर्तनं कुर्व-न्नहं देवपतेः पुरः । स्खलितो नर्तनाद् गीत-गानाच्च दैवयोगतः ॥२३२॥
तदा रुष्टो हरिः प्राह, सुर ! त्वं शूकरो भव । इन्द्रशापात्तदा जातः, कोलोऽहं कर्मयोगतः ॥२३३॥
ततोऽहं पदयोर्जिष्णोः, पतित्वेत्यब्रवं दृढम् । स्वामिन् ! मां मोचयेदानीं, शूकरस्य शरीरतः ॥२३४॥
प्रसन्नोऽथ जगौ शक्रो, गच्छ त्वं मेदिनीतले । यथा नृवेषभृन्नारी, त्वां बाणेन च भेत्स्यति ॥२३५॥
तदा त्वं किरिदेहं तु, मुक्त्वा सुरो भविष्यसि । सा च स्त्री पुरुषो भावी, तवोपकारकृत्यतः [पुण्यतः] ॥२३६॥
ततोऽहमिन्द्रवचनं, प्रपद्य किरिरूपभृत् । अत्राऽऽगतोऽभ्रमं भूरि-कालं स्वहितहेतवे ॥२३७॥
शुभकर्माऽभियोगेना-ऽधुनाऽत्र काननेऽगमम् । मन्त्रिपुत्र्यपि पुत्रस्य, वेषभृच्च समागमत् ॥२३८॥
नरवेषभृता मन्त्रि-पुत्र्याऽपि बाणक्षेपतः । अहं सूकरदेहाच्च, मोचितोऽनेन साम्प्रतम् ॥२३९॥
अतस्त्वया विशेषेण, भूरिदेशादिदानतः । माननीयो महीपाल !, मन्त्रीशनन्दनः सदा ॥२४०॥
एवं प्रोच्य सुरः कोऽपि, नत्वा मन्त्रिसुतक्रमौ । तस्मै दिव्यतमं हारं, दत्त्वा स्वर्गे समीयिवान् ॥२४१॥
राजा श्रुत्वेति मन्त्रीश-नन्दनेन समन्वितः । समागमन्निजावासं, महामहपुरःसरम् ॥२४२॥

ततो मन्त्रिसुतो भूरि-विषयादिप्रदानतः । मानितो मेदिनीशेन, सुखवानभवद् भृशम् ॥२४३॥
एतच्चमत्कारकरं कथानकं, निशम्य तस्मान्मनुजाननात् तदा ।
वितीर्य लक्ष्मीं प्रचुरां महीपतिः, **सुदर्शनः** श्राग् विससर्ज तं पुनः ॥२४४॥
**सुदर्शनो** नृपोऽन्येद्यु-**धर्मसेन**गुरोः पुरः । धर्मं जीवदयामूलं, शुश्रावेति कृतादरम् ॥२४५॥
पत्नी प्रेमवती सुतः सुविनयो, भ्राता गुणाऽलङ्कृतः, स्निग्धो बन्धुजनः सखाऽतिचतुरो नित्यं प्रसन्नः प्रभुः ।
निर्लोभोऽनुचरः सुबन्धुसुमुनिप्रायोपभोग्यं धनं । पुण्यानामुदयेन सन्ततमिदं कस्याऽपि सम्पद्यते ॥२४६॥
निर्दन्तः करटी हयो गतजवश्चन्द्रं विना शर्वरी, निर्गन्धं कुसुमं सरोगतजलं, छायाविहिनस्तरुः ।
रूपं निर्लवणं सुतो गतगुणश्चारित्रहीनो यतिर्निर्देवं भवनं न राजति तथा, धर्मं विना मानवः ॥२४७॥
न्यग्रोधे दुर्लभं पुष्पं, दुर्लभं स्वातिजं पयः । दुर्लभं मानुषं जन्म, दुर्लभं देवदर्शनम् ॥२४८॥
पुरुषः कुरुते पापं बन्धुनिमित्तं वपुर्निमित्तं च । वेदयते तत्सर्वं नरकादौ पुनरसावेकः ॥२४९॥
आकर्ण्येति नृपः सम्यग्-धर्मं श्रीगुरुसन्निधौ । सम्यक्त्वं लातवान् श्राद्ध-धर्मकर्मसमन्वितम् ॥२५०॥
प्रासादं जिननाथस्य, कारयित्वा महत्तमम् । प्रातिष्ठिपज्जिनं **शान्तिं**, भूयिष्ठविभवव्ययात् ॥२५१॥
प्रासादाः शतशः श्रीम-ज्जिनेन्द्राणां महत्तमाः । **सुदर्शनम**हीशेन, कारिता विभवव्ययात् ॥२५२॥ युग्मम् ॥
**सुदर्शनो** नृपोऽन्येद्यू, राज्ययोग्य**मरं** सुतम् । मत्वा तस्मै ददौ राज्यं, सर्वमन्त्र्यादिसाक्षिकम् ॥२५३॥
अन्येषां नन्दनानां तु, देशग्रामपुरादिकम् । नृपः **सुदर्शनो** दत्त्वा, गुरुपार्श्वे व्रतं ललौ ॥२५४॥
प्रपाल्य संयमं शुद्धं, सत्क्रियाकरणादरः । माहेन्द्रे ताविषे यातः, **सुदर्शन**यतिस्तदा ॥२५५॥
कृत्वा धर्मं चिरं **देवी**, राज्ञी **सुदर्शने**शितुः । कृताऽऽराधनिका स्वर्गे, **माहेन्द्रे** समुपागमत् ॥२५६॥
यतः —

उसभपिआ नागेसु, सेसाणं सत्त हुंति ईसाणे । अट्ठय सणंकुमारे, माहिंदे अट्ठ बोधव्वा ॥२५७॥
अट्ठण्हं जणणीओ तित्थयराणं तु हुंति सिद्धीओ । अट्ठ य सणंकुमारे माहिंदे अट्ठ बोधव्वा ॥२५८॥
**अरभूपो** नयी दानी, देयाद् भूमिं तथाऽऽदरात् । यथाऽऽसन् सुखिनः सर्वे, लोका बहुधनोच्चयाः ॥२५९॥
**अर**भूमीपते राज्यं, कुर्वतो न्यायतोऽन्यदा । आयुधालयपोऽभ्येत्य, नृपं नत्वा जगाविति ॥२६०॥
आयुधाऽवसथे चक्र-रत्नं स्फुलिङ्गशालिनम् । सहस्रारं समुत्पन्न-मकस्माद्देवताऽऽश्रितम् ॥२६१॥
तस्मै यथोचितं दानं, दत्त्वा च मेदिनीधवः । शस्त्रौकसि ययौ सार-परिवारसमन्वितः ॥२६२॥
उद्यत्किरणमालाभिः, प्रस्फुरद्रविबिम्बवत् । चक्ररत्नं निरीक्ष्यालं, मुमुदे सर्वभृत्ययुक् ॥२६३॥
आचारत्वाद्ददौ भूप-स्तस्य प्रदक्षिणां धुरि । पञ्चाङ्गप्रणतिं चाऽपि, चक्रेऽतिहर्षितस्तदा ॥२६४॥
प्रपूज्य प्रवरैः पुष्पै-र्मृगनाभिजचन्दनैः । **अर**भूपः शुचीभूया-ऽस्तवीत् स्तोत्रैः स्वयं कृतैः ॥२६५॥
कृते मणीमये पीठे, स्मृतपञ्चनमस्कृतिः । कृत्वा करेऽमुचच्चक्र-रत्नं दीप्यन्नरेश्वरः ॥२६६॥
अखण्डैस्तण्डुलैः श्वैतै-श्चक्रस्याग्रेऽष्टमङ्गलीम् । मङ्गलालीमिवाऽन्यासी-**दरभू**पोऽनघाशयः ॥२६७॥
यतः —

वर्यवैडूर्यमाणिक्य-मुक्ताकर्केतनादिभिः । अखण्डं स्वस्तिकं चक्रे, चक्रस्याग्रे**ऽर**भूपतिः ॥२६८॥

तत आरात्रिकां कृत्वा, चक्रस्याग्रे महीपतिः । मङ्गलार्थे ततश्चक्रे, वर्यं मङ्गलदीपकम् ॥२६९॥
क्षत्रियाणां नमस्कार-योग्यं चक्रं सुरार्चितम् । इत्युक्त्वा **चार**भूपालो-ऽनंसीत्तदायुधं तदा ॥२७०॥
इत्थमष्टाह्निकां कृत्वा, पुष्पादिपूजनैर्मुदा । चक्रमाराधयामास, श्री-**अरो** भूधवस्तदा ॥२७१॥
ततो यक्षसहस्रेण, सेवितं दिव्यरूपभृत् । सहस्रारं विभाति स्म, चक्रं तत्पीठसंस्थितम् ॥२७२॥
ततश्चारुपुरन्ध्रीभि-र्गायन्तीभिर्वरस्वरम् । वर्धापनं समादाय, चक्रे पार्श्वे समागतम् ॥२७३॥
सञ्चर्च्य चन्दनैश्चक्र-मखण्डैस्तण्डुलैर्वरैः । नार्यो वर्धापयामासुः, फलमोचनपूर्वकम् ॥२७४॥
चक्रस्याग्रे पुरन्ध्रीभिः, कुसुमैः स्वस्तिकं वरम् । विदधे मङ्गलश्रेणिकारकं रुचिराकृतिम् ॥२७५॥
भट्टा जयजयारावं, कुर्वाणास्तत्पुरस्तदा । लभन्ते कमलां बह्वीं, भूरिभूमीधवान्तिकात् ॥२७६॥
वीज्यमानं तदा चक्र-चामराभ्यां नृपानुगैः । शोभते यमुना-गङ्गा-प्रवाहाभ्यामिवाश्रितम् ॥२७७॥
चक्रस्योपरि भूपाला-नुगैश्छत्रं शितं धृतम् । किमियं शशभृत्सेवां, कर्तुमागान्नभोङ्गणात् ॥२७८॥
चक्रे शस्त्रालयात्पूर्वा-ऽभिमुखं संस्थिते सति । सज्ज्यकार्षीन्नृपः कुम्भि-रत्नं दिग्जयहेतवे ॥२७९॥
शोभनेऽह्नि कृतस्नान-देवपूजापुरस्सरम् । बुभुजे भूपतिर्भूरि-भृत्यैर्युक्तो मनोहरम् ॥२८०॥
मङ्गल्यतूर्यनिर्घोषे, जायमाने मनोरमे । आरुरोह गजं दानं, दत्त्वाऽर्थिभ्यो**ऽर**भूपतिः ॥२८१॥
चक्ररत्ने ततः पूर्वा-ऽभिमुखे चलिते सति । राजाऽपि तदनु प्राचीं, प्रत्यचालीच्छचीशवत् ॥२८२॥
प्रयाणाऽऽतोद्यनिर्घोष-बधिरीकृतदिक्तटः । चक्री चक्राऽनुगोऽचाली-दसङ्ख्येभहयादियुक् ॥२८३॥
ततः **सुषेण**सेनानी-र्गजारूढो महाबलः । चचालाऽथाग्रतश्चान्ये, चेलुश्चक्र्यनुगा मुदा ॥२८४॥
यतः –
विग्रहमिच्छन्ति भटा, वैद्या व्याधिपीडितं लोकम् । मृतकबहुलं च विप्राः, क्षेमं सुभिक्षं च निर्ग्रन्थाः ॥२८५॥
गृहचर्मादिरत्नानि, चेलुररनृपादनु । किं किं पुण्यवतां पुंसा, जायते रुचिरं नहि ॥२८६॥
यतः –
दिने दिने मङ्गलमञ्जुलाली, सुसम्पदः सौख्यपरम्पराश्च ।
सर्वत्र ऋद्धिर्बहुला च बुद्धिः, सर्वत्र धर्मं सृजतां जनानाम् ॥२८७॥
स्कन्धावारं विधातुं तु, रत्नं वार्द्धकिनामकम् । चचाल चर्मरत्नं चाऽऽतपवारणहेतवे ॥२८८॥
वैताढ्याद्रिगुहामध्यगतध्वान्तच्छिदे तदा । चचाल काकिणीरत्नं, दिव्यं निर्जरसेवितम् ॥२८९॥
अश्वकुम्भिनरादीनां, क्रमोच्छालितधूलिभिः । आच्छादिते नभोमार्गे, दृश्यते न तदा रविः ॥२९०॥
स्थगिते खेऽखिले धूल्या, घनाघनस्य शङ्कया । केकां वितन्वते मोरा-श्चातका मुदितास्तदा ॥२९१॥
**अर**सेनामहाभारा-त्स्थिराऽपि मेदिनी तदा । अस्थिरत्वमगात्कम्पं, प्रापत् शेषोऽपि तत्क्षणात् ॥२९२॥
ततः प्रदक्षिणावर्त्या, मङ्गलाय महीपतिः । शत्रून्साधयितुं पूर्वदिशं चचाल लीलया ॥२९३॥
एकस्य योजनस्यैव, प्रयाणे चक्रिणा कृते । योजनानि शतं जग्मु-र्बिभ्यतो वैरिणो द्रुतम् ॥२९४॥
कृते वार्द्धकिना स्कन्धावारेऽथ दिव्यशक्तितः । चक्री न्यवेशयत्सैन्यं, पुरवद् विपुलशक्तितः ॥२९५॥
ततोऽग्रतो महीशस्य, गच्छतो वैरिभूधवाः । गजादि प्राभृतीचक्रुः, प्रणामविधिपूर्वकम् ॥२९६॥

रोदसी पूरयन् सैन्यरजोभिररभूपतिः । स्तोकैर्दिनैर्ययौ तीर्थं, मागधं विषमस्थितम् ॥२९७॥
कृते वार्द्धकिनाऽऽवासे, मातङ्गान्मेदिनीपतिः । उत्तीर्य न्यविशत्सिंहा-सने सारपरिच्छदः ॥२९८॥
तत्र पौषधशालायां, कृताऽष्टमतपा नृपः । संस्तारके स्थितः शत्रुं, मागधं जेतुमञ्जसा ॥२९९॥
कृतस्नानोऽथ भूपालः, कृत्वा देवार्चनां पुनः । देवानां प्रीतये चक्रे, बलिं मन्त्रपुरःसरम् ॥३००॥
रथे सज्जीकृते वर्ये, सद्यः सारथिना तदा । अध्यारोहन्नृपश्चारुवाद्यनादपुरःसरम् ॥३०१॥
रथारूढो नृपः पूर्वसिन्धोस्तटमुपेत्य सः । नाभिदघ्ने जले वाद्य-नादपूर्वं समागमत् ॥३०२॥
कृत्वा चापमधिज्यं स, रणत्कारं तथा व्यधात् । यथा कम्पमगुः शत्रु-हृन्दि ध्वजान्तवत्तदा ॥३०३॥
मागधाऽभिमुखीभूय, हस्तात्तसधनुः शरः । कर्णाऽभ्यर्णे व्यधाच्चक्री, शरपुङ्खं विभावरम् ॥३०४॥
आकुञ्चितैकपादः स, भुजयोस्तरसा तदा । **अर**श्चक्री शरं शत्रोः, संमुखं प्राक्षिपत् क्षणात् ॥३०५॥
क्षोभयन् कच्छपांस्त्रासं, नयन् पक्षिततीस्तदा । भापयंस्तटिनीशेशं, दिशो बधिरयन् दश ॥३०६॥
जयन् वायुं जवाद्वल्ली-द्युत्या विद्योतयन्नभः । व्यतिचक्राम मार्तण्ड-योजनानि शरः स च ॥३०७॥ युग्मम् ॥
सभायां मागधेशस्य, न्यपतन्नृपसायकः । बाणं पतितमालोक्य, चुकोप मागधाऽधिपः ॥३०८॥
जगौ च मागधाधीशः, क्षिप्तोऽत्र येन सायकः । तस्योपर्यधुना रुष्टो, यमो जानाम्यहं ध्रुवम् ॥३०९॥
हनिष्यामि शरक्षेप-कारकं शात्रवं द्रुतम् । इत्याक्षिपत्स तीर्थेश, उत्तस्थौ रक्तलोचनः ॥३१०॥
परिवारोऽपि तस्यैवं, ज्वलत्क्रोधहुताशनः । मागधेशादनूत्तस्थौ, शत्रुं हन्तुमना द्रुतम् ॥३११॥
जगृहुर्मुद्गरान्पाणौ, केचित्कुन्तान् करे पुनः । उल्लालिताऽसयः केचि-दुत्तस्थुररुणेक्षणाः ॥३१२॥
यतः —
उलमालकिरिमालकुंतकंडतिलकोदंड, कलकइंसाबलसबलसेलहलमुसलपयंड ।
तेरीअतोमरभिंडमालडबतरकसबंध । सांगिसकति तरूआरि छुरी अन्नइनागनिबंध ॥३१३॥
हयखुररविऊछलीयखेह छाही रविमंडल,धुरिधूजी कलकली अकोलकंपी आडाहल ।
टलटलीआ गिरिटंकटोल खेचर खलभलीआ, खडडी अकूरमकंधिगंधि सायरटलटलीआ ॥३१४॥
सल्ली असमहरिसेससीस सलसलीअसक्कइ, कंचणगिरिकंधारभारि कंमकम्मीअकसक्कइं ।
कंपीअ किंनरकोडिपडीहरगण हडहडीआ, संकीअ सुरवर सग्गिसयलदाणव दडवडीआ ॥३१५॥ त्यादि ॥
भुजास्फोटं वितन्वानाः, कुर्वाणा भ्रुकुटिं पुनः । प्रोचुः केचित् वयं शत्रुं, हनिष्यामः क्षणादिह ॥३१६॥
हन्यतां हन्यतां वैरी, ध्रियतां ध्रियतां रिपुः । नीयतां नीयतां सद्म, यमस्य त्वरितं रिपुः ॥३१७॥
एवं कोलाहले जाते, मागधेशस्य संसदि । वीक्ष्य बाणाक्षराणीति, मन्त्र्याह स्वामिनः पुरः ॥३१८॥
उत्पन्नोऽस्त्यधुना चक्री, **श्रीअरो** जितशात्रवः । तेनाऽयं प्रेषितो बाणः, स्वनामाङ्कः स्वसन्निधौ ॥३१९॥
यद्यस्ति भवतो राज्य-श्रिया कार्यं नरेश्वर ! । तदा क्रोधं विमुच्याऽऽशु, तस्यांऽह्र्योः कुरु सेवनम् ॥३२०॥
**अयोध्या**तोऽधुना वैरि-वर्गं संसाधयन्क्रमात् । षट्खण्डं भूतलं स्वाज्ञां, ग्राहयिष्यति चक्रिराट् ॥३२१॥
चक्री प्राभृतदानेन, प्रीणितो भूरिवैरिभिः । तांस्तत्राऽरीन् क्रमाद् राज्ये, स्थापयन्निह चाऽऽगमत् ॥३२२॥
षष्ठोऽयं चक्रिराडेष, **श्री-अराह्वो** बलोत्कटः । तुष्टो दत्ते सुखं रुष्टो, हरते स्म रिपुश्रियम् ॥३२३॥
शक्यते तोलितुं मेरुरुद्ध्रियते मही करे । शोष्यते लवणाम्भोधि-श्चक्री न जीयतेऽरिणा ॥३२४॥

एष त्वां याचते दण्डं, पूर्वचक्रीव साम्प्रतम् । अतो दण्डं वितीर्यैव, राज्यं विधीयते चिरम् ॥३२५॥
यथा ज्ञानिषु तीर्थेशो, यथा देवेषु वासवः । यथा मेरुर्महीध्रेषु, तथा भूपेषु चक्रिराट् ॥३२६॥
क्रियते विनयोऽत्रैव, नैव युद्धोद्यमः पुनः । युद्धवार्ता भवेदत्र, कालरात्रिसहोदरा ॥३२७॥
निवार्यतां परीवारः, स्वकीयोऽयं रणोद्यमात् । प्राभृतीक्रियतां दण्ड-श्चक्रिणोऽस्य यथोचितः ॥३२८॥
श्रुत्वैतां मन्त्रिणो वाणीं, दृष्ट्वा बाणाक्षराणि च । गृहीत्वा प्राभृतं चक्रि-नाथं ननाम मागधः ॥३२९॥
उवाच मागधाधीशो-ऽपराधो यो मया कृतः । स त्वया क्षम्यतां सद्यः, प्रसद्य मयि साम्प्रतम् ॥३३०॥
सूर्यात्प्रत्यपरं तेजो, वातात्प्रत्यपरो जवी । मेरोः प्रत्यपरः शैलो, वरो मल्लस्तवाऽस्ति ते ॥३३१॥
अतः परं मम स्वामी, त्वमेव नापरः पुनः । जिनाशिषमिवाज्ञां ते, धारयिष्येऽहमन्वहम् ॥३३२॥
इदं रत्नचयं वर्यं, प्राभृतं लाहि साम्प्रतम् । देहि मागधतीर्थं मे, वासाय चक्रिपुङ्गव ! ॥३३३॥
ततो हारं किरीटं च, कुण्डले श्रेणिराजिते । जग्राह चक्रिराट् तं च, पर्यधासीद्वराम्बरैः ॥३३४॥
अतः परं त्वयाऽऽज्ञा मे, धार्या नित्यं स्वमूर्धनि । इत्युक्त्वा चक्रिराट् तं च, विससर्ज पुरं प्रति ॥३३५॥
ततः स मागधाधीशः, समेत्य स्वनिकेतनम् । **अर**चक्रधरस्याऽऽज्ञां, वहते स्म किरीटवत् ॥३३६॥
ततः पश्चात्समागत्य, पथा तेनैव चक्रिराट् । निजसैन्ये व्यधादष्टा-ह्निकोत्सवं पुरोऽर्हतः ॥३३७॥
वलिते चक्ररत्नेऽथ, ततस्तदनुगस्तदा । प्रयाणं चक्रिराट् चक्रे, योजने योजने सुखम् ॥३३८॥
गृह्णन् पदे पदे भूप-प्राभृतानि बहून्यपि । **अर**श्चक्री बलश्चापि, ययौ दक्षिणवारिधिम् ॥३३९॥
तत्रैलालवलीनालि-केरक्रमुककानने । स्कन्धावारं व्यधाच्चक्री, दक्षिणाब्धेस्तटे वरे ॥३४०॥
तत्राऽऽशु वार्धकिः पुर्या-कारं प्राकारसुन्दरम् । स्कन्धावारं व्यधाद् गेह-हट्टश्रेण्या विराजितम् ॥३४१॥
वरदामाऽधिपं जेतुं, चित्ते कृत्वा स चक्रिराट् । पूर्ववदष्टमं चक्रे, चक्रपूजापुरःसरम् ॥३४२॥
बलिं कृत्वा रथारूढो, नाभिदघ्ने जलेऽम्बुधेः । आश्रुत्याकृष्टकोदण्डो-ऽथ**अर**श्चक्र्यमुचच्छरम् ॥३४३॥
चक्रिमुक्तः शरः दिशं, द्योतयन् गगनान्तरात् । गत्वाऽर्कयोजनान्येव, न्यपतद्वैरिसंसदि ॥३४४॥
अकस्मादागतं बाणं, वरदामः सभान्तरे । रुष्टोऽवक् केन मूर्खेण, शरः क्षिप्तोऽत्र संसदि ॥३४५॥
येन मे संसदि क्षिप्तो, बाणो मूढधियाऽधुना । स एव शमनाऽऽवासं, गमिष्यति करान्मम ॥३४६॥
ततः कृद्धो भृशं सर्व-परीवारसमन्वितः । वरदामो रिपुं हन्तुं, सज्ज्यभूत् स्फोटयद्भुजम् ॥३४७॥
मन्त्र्यवक् चक्रिणा क्षिप्तो, बाणोऽक्षरावलीयुतः । वाचयित्वा स वर्णालीं, जज्ञौ चक्रिणमागतम् ॥३४८॥
ततः श्राग् वरदामः स, समेत्य चक्रिणं स्वयम् । नत्वा मागधवच्चक्रे, प्राभृतं चक्रिणे तदा ॥३४९॥
तादृग्विनयतो हृष्ट-श्चक्री तं प्रणतं रिपुम् । तत्रैव स्थापयामास, सम्मानदानपूर्वकम् ॥३५०॥
यतः –

प्रणिपातावधिः क्रोधः, प्रायो भवति सज्जने । दुर्जना मरणं याव-त्क्रोधं मुञ्चन्ति न क्वचित् ॥३५१॥
ततस्तेनैव मार्गेणा-ऽऽगत्य सैन्ये निजेऽचिरात् । तपसः पारणं चक्रे-ऽष्टाह्निकोत्सवपूर्वकम् ॥३५२॥
*चक्ररत्नस्य चक्रीशः, पूजां कृत्वाऽतिविस्तरात् । चक्राऽधिष्ठितदेवस्य, प्रीतये विदधे बलिम् ॥३५३॥*
ततः **शत्रुञ्जये** तीर्थे, मार्गायाते स चक्रिराट् । स्नात्रोत्सवं व्यधाद् गत्वा, **वृषभस्य** चमूयुतः ॥३५४॥

ततो मार्गे व्रजन् चक्री, शत्रूञ्चक्राऽनुगः क्रमात् । असङ्ख्यबलयुक् प्राप, प्रतीचीसिन्धुसैकतम् ॥३५५॥
कृताऽष्टमतपास्तत्र, सिन्धोः कटिमिते जले । गत्वा चक्री रथारूढः, प्रभासेशं प्रति ध्रुवम् ॥३५६॥
तथाऽमुचच्छरं स्वीय-नामाङ्कं रैमयं लघु । यथाऽपतत् प्रभासेशसभायां प्रस्फुरद्द्युति ॥३५७॥
तत्राऽपि पूर्ववद्बाणा-ऽक्षरालीं वाचयन् स च । **श्रीअरं** चक्रिणं जज्ञौ, समेतं जितशात्रवम् ॥३५८॥
आदाय प्राभृतं वर्यं, समेत्य चक्रिणोऽन्तिके । प्रणनाम प्रभासेशो, बाणदानपुरःसरम् ॥३५९॥
चक्री स्वविशिखं चूडा-मण्यादिप्राभृतान्वितम् । आदाय लघु सच्चक्रे, प्रभासतीर्थनायकम् ॥३६०॥
तमेव तत्र संस्थाप्य, प्रमोदाच्चक्रिराट् तदा । चक्राऽनुगश्चलन्मार्गे, ऽसाधयन् शात्रवान् बहून् ॥३६१॥
ततश्चक्राऽनुगश्चक्री, चलन् सुखप्रयाणकैः । ययौ सिन्धुमहासिन्ध्वो-र्दक्षिणे सैकते क्रमात् ॥३६२॥
तत्र वार्धकिना स्कन्धा-वारे प्रौढे विनिर्मिते । न्यवीविशद्बलं सर्वं, चक्री स्थाने यथोचिते ॥३६३॥
कृताऽष्टमतपाश्चक्री, सिन्धुं देवीं स्वचेतसि । कृत्वाऽस्थाच्च यदा तस्या-स्तदा चचाल विष्टरम् ॥३६४॥
स्वकीयाऽऽसनकम्पेन, ज्ञात्वा चक्रिणमागतम् । सिन्धुदेवी समेत्याशु, चक्रिणे प्राभृतं व्यधात् ॥३६५॥
वर्द्धयित्वाऽक्षतैश्चक्रि-नाथं सिन्धुसुरी जगौ । चिरं जिय जयोर्वीं त्वं, पालयन् न्यायवर्त्मतः ॥३६६॥
अद्य प्रभृति ते चक्रिन् !, कियूकर्यस्मि सदाऽहकम् । यच्च ते विद्यते कार्यं, समादेश्यं ममाऽपि तत् ॥३६७॥
प्रोच्येति चक्रिणे रत्नं, पूर्णकुम्भान् सहस्रशः । ददौ सिन्धुसुरी पूर्व-भवपुण्योदयात्तदा ॥३६८॥
**रत्न**सिंहासनं रम्यं, किरीटं बाहुरक्षकौ । कटकाद्भुतहारादि, ददौ सा चक्रिणे मुदा ॥३६९॥
गृहीत्वा प्राभृतं सर्वं, चक्री **सिन्धु**सुरीं तदा । सम्मानदानतः स्वीय-स्थानं प्रति व्यसर्जयत् ॥३७०॥
तत्राऽपि पारणं चक्री, चक्रेऽष्टाह्निकपूर्वकम् । ततो जयन् रिपून् मार्गे, चचालाऽतुलसैन्ययुक् ॥३७१॥
ततश्चक्राऽनुगश्चक्री, चलन्नुत्तरसम्मुखम् । **भरता**र्धस्थितं शैलं, **वैताढ्यं** समुपेयिवान् ॥३७२॥
उच्चैर्गिरिः स **वैताढ्यः**, पञ्चविंशतियोजनीम् । राजतो विस्तरादुच्चाद्विगुणो विद्यते वरः ॥३७३॥
विद्याधरवरैः सार्व-चैत्यैश्च शाश्वतैर्वनैः । सरोभिर्विपुलैर्वर्यै-र्भासते स गिरिर्महान् ॥३७४॥
तस्य याम्यनितम्बे स, स्कन्धावारं निवेश्य च । चक्रेऽष्टमं तपः कृत्वा, **वैताढ्ये**शं स्वचेतसि ॥३७५॥
धूतासनः स **वैताढ्या**चलनाथः खगेश्वरः । आगतं चक्रिणं षष्ठं, जज्ञाववधिनाऽचिरात् ॥३७६॥
**वैताढ्येशः** सुरः सद्यो, नीत्वा प्राभृतकं वरम् । चक्रिणं प्राणमद्भक्त्या, वदन्नेवं कृताञ्जलिः ॥३७७॥
स्वामिन् ! जय चिरं पाहि, पृथ्वीं पृथ्वीं नयाध्वना । किङ्करोऽस्मि तवेदानीं **तनोऽहं** कार्यमादिश ॥३७८॥
इत्युक्त्वा स मणीन् वर्यान्, रत्नालङ्करणानि च । भद्रासनानि दिव्यानि, पट्टकूलानि सोऽसुरः ॥३७९॥
वितीर्य चक्रिणेऽनंसी-च्चक्रिणं प्रणमच्छिराः । ततः सम्मानितः सोऽपि, चक्रिणा स्वाश्रयागतम् ॥३८०॥
तत्रैव पारणं चक्री, चक्रे सूत्सवपूर्वकम् । अष्टघस्रावधिप्रौढं, सर्वस्वपरिवारयुक् ॥३८१॥
ततश्चक्रानुगो गच्छन्, **तमिस्राह्वां** गुहां क्रमात् । प्राप्य न्यवेशयच्चक्रं, तस्याः पार्श्वे मनोहरे ॥३८२॥
**कृतमालं** तदीशं च, स्मृत्वा चक्री तपो व्यधात् । यदा तदाऽवधेर्जज्ञौ, स चक्रिणं समागतम् ॥३८३॥
ततो रत्नोच्चयं वर्यं, नीत्वा गुहाधिपः स च । ननाम चक्रिणं मुक्त्वा, प्राभृतं विलसद्द्युति ॥३८४॥
नारीरत्नोचितान्येव, भूषणानि चतुर्दश । प्राभृतीचकृवान् सोऽपि, चक्रिणः पुरतस्तदा ॥३८५॥

चक्रियोग्यानि माल्यानि, दिव्यानि वसनानि च । ढौकयित्वा स चक्रीशः, पुरतः प्रोक्तवानिति ॥३८६॥
अहं ते किङ्करोऽस्म्येव, त्वं मे स्वामी प्रभूत्तमम् । आदेशो मम दातव्यः, सदा यथोचितस्त्वया ॥३८७॥
विसृज्य तं लसन्मान-दानात्पारणकं पुनः । अष्टाह्निकामहः पूर्वं, चक्री चक्रे चमूयुतः ॥३८८॥
सिन्धुवारिधिवैताढ्यो-पान्तस्थितान् समान् नृपान् । जेतुं सेनापतिं चक्री, तत्रस्थो प्रैषयल्लघु ॥३८९॥
सेनानीः शिबिरं लात्वा, गत्वा तत्र द्रुतं तदा । तां नदीं चर्मरत्नेनो-त्ततार दुस्तरां लघु ॥३९०॥
तत्रस्थान् बर्बरान् भिल्लान्, सिंहलान् यवनानपि । म्लेच्छान् कालमुखांश्चापि, स जिगाय बलाऽधिपः ॥३९१॥
तेषां पार्श्वान्मणींस्ताक्ष्यान्, गजान् भूरिधनं पुनः । नीत्वाऽऽगत्य ददौ, सैन्यनायकश्चक्रिणे पुनः ॥३९२॥
दिनानि कतिचित्तत्र, स्थित्वा चक्रपतिर्जगौ । सैन्यपोद्घाटय द्वारं, **तमिस्रा**यास्तु सत्वरम् ॥३९३॥
चक्र्याऽऽज्ञया स सेनानीः, सुखस्नातः सिताम्बरः । कृत्वा तपोऽष्टमं बिभ्र-त्करे रैधूपधानकम् ॥३९४॥
गत्वा गुहान्तिके कृत्वा, तण्डुलैरष्टमङ्गलीम् । अश्वारूढोऽग्रहीद्दण्ड-रत्नं दक्षिणपाणिना ॥३९५॥ युग्मम् ॥
दण्डेनाऽऽहत्य तद्द्वार-मपसृत्याष्ट पदानि च । त्रिः कृत्वाऽताडयत्तस्याः, कपाटौ च दृढं तदा ॥३९६॥
तदोद्घटितयोस्तस्या, अरयोर्दण्डघाततः । सेनान्याश्चक्रिराट् द्वारोद्घाटनं ज्ञापितस्तदा ॥३९७॥
ततः कुम्भिसमारूढ-श्चक्री चक्रसमन्वितः । **तमिस्रा**या गुहापार्श्व-द्वारदेशं समागमत् ॥३९८॥
दण्डरत्नं दधद् भूत-प्रेतादिविघ्नशान्तये । मणिरत्नं करे चक्रे, **चक्रीव** चतुरङ्गुलम् ॥३९९॥
चक्री चक्राऽनुगः कुम्भि-कुम्भे तद्रत्नमद्भुतम् । आरोप्य सैन्ययुग् द्वारे, गुहायाः प्राविशत्क्रमात् ॥४००॥
सुवर्णाऽष्टकमानं तु, काकिणीमणिमुज्ज्वलम् । द्वादशयोजनी(नो)द्योत-कारकं सोऽग्रहीत्करे ॥४०१॥
गुहापार्श्वद्वये चक्री, काकिण्या मणिना पृथक् । योजनान्ते योजनान्ते, मण्डलान्यलिखत्क्रमात् ॥४०२॥
मण्डलप्रभया गच्छन्, गुहामध्ये शनैः शनैः । निम्नगोन्निम्नगाकूले, जगाम भयवर्जितः ॥४०३॥ युग्मम् ॥
तुम्बीफलमिवैकस्या-मुन्मज्जति शिलाऽपि च । तुम्बीफलं शिलेवाऽथा-ऽन्यस्यां सद्यो निमज्जति ॥४०४॥
यस्यां मुक्ता शिला तुम्बीफलवत्तरति स्म च । **सा निम्नगा** नदी ख्याता, सर्वज्ञैः सर्ववेदिभिः ॥४०५॥
मुक्तं तुम्बीफलं यस्यां, निमज्जति शिलेव तु । सा नदी **निम्नगा** प्रोक्ता, सर्वज्ञैः सर्ववेदिभिः ॥४०६॥
वार्धकिकृतपद्यां तां, निम्नगां तटिनीं तदा । चक्र्युत्ततार चान्यां तु, विना पद्यां सुखेन तु ॥४०७॥
गुहाया उत्तरद्वारे, प्राप्ते चक्रिणि तत्क्षणात् । कवाटावुद्घटेते स्म, तौः सद्यो दिव्यशक्तितः ॥४०८॥
गुहाद्वाराद्विनिर्गत्य, चक्री चक्राऽनुगः क्रमात् । उदग्भरतवर्षार्द्धे, भूपाञ्जेतुं चचाल सः ॥४०९॥
तत्राऽष्टमं तपः कृत्वा, स्नात्रं कृत्वाऽर्हतः पुनः । अष्टाह्निकामहं चक्रे, चक्री बलिपुरःसरम् ॥४१०॥
इतो म्लेच्छाः प्रपश्यन्ति, उल्कापातादिकं बहु । दुर्निमित्तं यतो दुःखमेतद्भवति भूतले ॥४११॥
म्लेच्छेशस्याग्रतः प्रोचु-रुत्पातादि जना यदा । तदा म्लेच्छाऽधिपः प्राह, कोऽस्ति मत्तो बली नहि ॥४१२॥
यतः –

वाजिनां कोटयः पञ्च, रथानां दश कोटयः । हस्तिनां कोटिरेका मे, पञ्चाशत्कोटयोऽनुगाः ॥४१३॥
एवं बलवतो मेऽत्र, यमोऽपि शक्त एष न । अन्येषां भूपतीनां तु, का शक्तिरस्ति मे पुरः ॥४१४॥
अथाऽऽगतं रिपुं ज्ञात्वा, म्लेच्छेशो बलगर्वितः । प्राह कोऽत्राऽधुना यातो, मर्तुं मे विषये रिपुः ॥४१५॥

सम्मील्य महतीं सेनां, भूरिकोट्यनुगाऽन्वितः । म्लेच्छेशो वैरिणा सार्धं, युद्धं कर्तुं विनिर्ययौ ॥४१६॥
म्लेच्छेशसुभटाः शस्त्र-भृतः संवर्मिणो घनाः । वर्षन्तः शरधाराभिः, प्रलयाब्दा इवाऽभवन् ॥४१७॥
तदा **श्रीअर**भूपस्य, भटा भुजार्हतिं भृशम् । कुर्वाणास्तैः समं युद्धं, विधातुं प्राववर्ति (वृत्ति)रे ॥४१८॥
उत्प्लुत(त्प्लव)न्तोऽतिगर्जन्तो, भुजाऽऽस्फोटविधायिनः । रणाङ्गणे द्वयोर्योधाः, प्रवृत्ता हिंसितुं मिथः ॥४१९॥
तेषां वितन्वतां युद्धं, स्फुलिङ्गाः शस्त्रसम्भवाः । व्योमगास्तारकाभ्रान्तिं, तन्वते पश्यतां नृणाम् ॥४२०॥
हतेभहयभृत्यानां, रुधिरैः कर्दमः क्षितौ । तथाऽभून्न यथा योधा, योद्धुं शेकुर्बलद्वये ॥४२१॥
गजानां गर्जितैरश्व-हेषितैरथचित्कृतैः । सिंहनादैर्भटानां तु, बधिरं चाऽभवज्जगत् ॥४२२॥
भूमिभृच्छिखरैर्वृक्षैरस्त्रैरप्यायसैर्दृढैः । मिथो युयुधिरे शूराः, स्वस्मिन् स्वस्मिन् जयेच्छवः ॥४२३॥
नश्यन् पतन् क्षितौ मूर्च्छन्, कुर्वन् दीनवचो रुदन् । चक्रिणा वीक्षितः स्वीय-परिवारोऽखिलो यदा ॥४२४॥
तदा चक्रिनिदेशेन, सेनानीः समराङ्गणे । तथा युद्धं व्यधान्नेशु-र्यथा म्लेच्छा दिशो दिशम् ॥४२५॥
क्षणात्काका इवैकत्र, मिलित्वाऽऽलोच्यते मिथः । कोलाहलं वितन्वन्ति, कर्तुं युद्धं पुनस्तदा ॥४२६॥
ततो म्लेच्छाऽधिपोऽत्यन्तं, सेनान्या चक्रिणा समम् । वृष्टिविकुर्वणादीनि, विघ्नानि कृतवान् भृशम् ॥४२७॥
कारं कारं महायुद्धं, चक्रिणा सह सन्ततम् । वर्षमेकमभूत् खिन्नो, म्लेच्छाधीशः स्वचेतसि ॥४२८॥
क्रुद्धोऽथ चक्रिराड् म्लेच्छाधीशशीर्षमपि ध्रुवम् । चक्रेण च्छिन्नवान् पद्म-नालवद्वटपत्रवत् ॥४२९॥
ज्ञात्वा स्वं पितरं चक्रवर्तिना निहतं तदा । म्लेच्छेशनन्दनो **वीरो**, विहस्तोऽजनि भृत्ययुग् ॥४३०॥
ततो म्लेच्छेशभू**र्वीरो**, रत्नेभाश्वादि ढौकनम् । वितीर्य चक्रिणः पादौ, प्रणनाम मदोज्झितः ॥४३१॥
ततः स चक्रिणा म्लेच्छनाथपुत्रः पितुः पदे । स्थापितो ग्राहयित्वाऽऽज्ञां, स्वां सन्मानप्रदानतः ॥४३२॥
शैलसागरसिन्धूना-मुत्तरस्थान् रिपून् घनान् । चक्र्याज्ञया स सेनानीः, साधयित्वा समागमत् ॥४३३॥
ततश्चक्राऽनुगश्चक्री, क्षुल्ल(द्र) हिमाद्रिभूभृतः । नितम्बे दक्षिणे सैन्यं, स्थापयामास हेलया ॥४३४॥
तत्र स्वशिबिरं न्यस्य, कृताऽष्टमः स चक्रिराट् । रथारूढः शरं सन्धयामास स गुणे दृढम् ॥४३५॥
मुक्तोऽथ चक्रिणा बाणो, गत्वा द्विमुनियोजनीम् । क्षुद्रहिमाद्रिनाथस्य, सभायां न्यपतद् द्रुतम् ॥४३६॥
आदौ क्रोधं विधायाऽथ, चक्रिनामाङ्कितं शरम् । दृष्ट्वा स उपदां लात्वा-ऽनंसीच्चक्रिपदाम्बुजम् ॥४३७॥
ततः प्राभृतमादाय, चक्रिणा स विसर्जितः । चक्र्याज्ञाभृद् ययौ सौव-स्थानके स्वबलान्वितः ॥४३८॥
ततश्चर्षभकूटाद्रिं, गत्वा तत्र स चक्रिराट् । काकिण्या मणिना स्वाह्वाऽक्षराणीति लिलेख च ॥४३९॥
चतुर्थारेऽवसर्पिण्यां, षष्ठोऽ**यमर**नामभृत् । चक्री षट्खण्डभुक् स्वाह्वां, लिलेखाऽत्र महीभृति ॥४४०॥
तत्र कृत्वा बलिं सार्वे-श्वरपूजापुरःसरम् । भरतार्धस्थितं शैलं, वैताढ्यं चक्रिराड् ययौ ॥४४१॥
स्थित्वा तत्र नितम्बे तु, बाणं स्वाह्वाक्षरान्वितम् । उदक्श्रेणिगतव्योम-गेशं प्रत्यक्षिपद् द्रुतम् ॥४४२॥
उत्तरश्रेणिनाथोऽथ, सभायां पतितं शरम् । प्रेक्ष्य क्रुद्धोऽभवत्सज्जो, युद्धाय चक्रिणा समम् ॥४४३॥
वाचयित्वाऽक्षरश्रेणीं, मयि क्रुद्धो मदात्तदा । युद्धायाऽऽगात्समं चक्रवर्तिना पावनध्वजः ॥४४४॥
युद्धं सप्ताष्टघस्राणि, कारं कारं निजौजसा । यदा भग्नोऽभवत् सोऽथ, तदा मन्त्री जगाविति ॥४४५॥
पुरा यो जायते चक्री, **भरते भरते**शवत् । तस्य विद्याधराः सर्वे, भवन्ति सेवका ध्रुवम् ॥४४६॥

अतोऽस्य ध्रियते चाज्ञा, दण्डदानपुरःसरम् । नो चेदसौ रिपुः प्राणान्, ग्रहीष्यति न संशयः ॥४४७॥
आकर्ण्येति स विद्याभृत्, रत्नादिप्राभृतान्वितः । सार्वभौमं ननामाशु, पदोः पतनपूर्वकम् ॥४४८॥
**अर**चक्र्याऽथ तं तत्र, स्थापयित्वाऽचलत्ततः । ययौ गङ्गोत्तरे कूले, **गङ्गा**देवीनिषेविते ॥४४९॥
ततोऽस्य चक्रिणः प्राप्या-ऽऽदेशं सेनापतिस्तदा । गङ्गामुत्तीर्य तत्रस्थान्, नृपान् साधयितुं ययौ ॥४५०॥
गङ्गातटस्थितान् भूपान्, जित्वा सेनापतिः क्रमात् । चक्रिणः प्रददौ दण्डं, तद्दत्तं विनयान्वितः ॥४५१॥
तपसा चक्रिणस्तुष्टा, **गङ्गादेवी** तदा ददौ । हैमं सिंहासनद्वन्द्वं, वर्यं सुखासनं पुनः ॥४५२॥
रत्नकुम्भसहस्रं तु, साष्टकं हारमङ्गदे । किरीटं शयनं दिव्यं, दिव्यवासः सुमानि च ॥४५३॥ युग्मम् ॥
**गङ्गादेवीं** विसृज्याथ, बलश्चक्री बलान्वितः । ययौ **खण्डप्रपाताह्वां**, गुहामधिष्ठितां सुरैः ॥४५४॥
कृते ऽष्टमे तपे**ऽरेण,** नाट्यमालोगुहाऽधिपः । धूतासनः सुरोऽभ्येत्य, ननाम चक्रिणः पदौ ॥४५५॥
भूषणानि बहून्येव, दत्त्वा स चक्रिणे जगौ । अतः परमहं भृत्यो, भवतोऽस्मि नरेश्वर ! ॥४५६॥
नाट्यमाले विसृष्टेऽथ, चक्र्याज्ञया बलाधिपः । गुहामुद्घाटयामास, कपाटाऽऽहतिपूर्वकम् ॥४५७॥
ततश्चक्री गजारूढो, गजांसे दक्षिणे तदा । निवेश्य मणिरत्नं तु, गुहाद्वारेऽविशत्पुनः ॥४५८॥
योजने योजने तस्यां, गुहायां मण्डलानि तु । काकिण्या मणिना कुर्वन्, गोमूत्राकारतोऽचलत् ॥४५९॥
निम्नगोन्निम्नगानद्या-वुत्तीर्य पद्यया पुनः । तद्गुहादक्षिणे द्वारे, चक्रिराट् प्रययौ महान् ॥४६०॥
स्वयमुद्घटिते तत्र, गुहाया अररद्वये । चक्रिराड् निर्ययौ याम्य-द्वाराद्बहिर्बलान्वितः ॥४६१॥
तत्र स्वर्गनदीकूले, पश्चिमे स्वबलं नृपः । निवेश्याऽथाऽष्टमं चक्रे, तपः शुचिमनाः पुनः ॥४६२॥
अष्टमान्ते निधानानि, नव पूर्ववृषोदयात् । सहस्रयक्षसेव्यानि, सेवन्ते चक्रिणं पृथक् ॥४६३॥
यतः –

**नैसर्पः पाण्डु**कश्चाऽपि, **पिङ्गलः सर्वरत्नकः । महापद्मः काल-महा-कालौ माणव-शङ्खकौ** ॥४६४॥
तैस्ते नामभिः ख्याता, उत्सेधे चाष्ट योजनाः । नव योजनविस्तीर्णा, दीर्घा द्वादशयोजनी ॥४६५॥
निधानाऽधिष्टका नाग-कुमाराह्वा सुराः पुनः । पल्योपमाऽऽयुषोऽभ्येत्य, नत्वा चा**ऽरं** जगुस्त्विति ॥४६६॥
गङ्गामागधतीर्थादि-वासिनो निर्जरा वयम् । आगताः सेवितुं त्वां तु, भवत्पुण्यवशीकृताः ॥४६७॥
निधीन् भुङ्क्ष्व स्वयं यच्छ घृतमर्थिजनाय च । वयं क्षीणा भविष्यामो, न हि त्वद्भाग्यवद् ध्रुवम् ॥४६८॥
उक्तं च –

स्कन्दावारपुरग्रामा-करद्रोणमुखौकसाम् । मडम्बपत्तनानां च, **नैसर्पाद्वि**निवेशनम् ॥४६९॥
मानोन्मानप्रमाणानां, सर्वस्य गणितस्य च । धान्यानामेव बीजानां, सम्भवः **पुण्ड[पाण्डु]का**न्निधेः ॥४७०॥
नराणामथ नारीणां, हस्तिनां वाजिनामपि । सर्वोऽप्याचरणविधि-निधेर्भवति **पिङ्गलात्** ॥४७१॥
एकेन्द्रियाणि सप्ताऽपि, सप्त पञ्चेन्द्रियाणि च । चक्रं रत्नानि जायन्ते, **सर्वरत्ना**ऽभिधान्निधेः ॥४७२॥
वस्त्राणां सर्वभक्तीनां, शुद्धानां रोगिणामपि । औषधानां समुत्पत्ति-**महापद्मनिधेः** पुनः ॥४७३॥
भविष्यद्भूतयोर्ज्ञानं, वत्सरान् **तीन् स[त]तो**ऽपि च । कृष्यादीनि च कर्माणि, शिल्पानि **कालतो** निधेः ॥४७४॥

प्रवालरजतस्वर्ण-शिलामुक्ताफलायसाम् । तथा लोहाकरादीनां, **महाकालात्**समुद्भवः ॥४७५॥
योधानामायुधानां च, सन्नाहानां च सम्पदाम् । युद्धनीतिरशेषाऽपि, दण्डनीतिश्च **माणवात्** ॥४७६॥
चतुर्द्धा काव्यनिष्पत्ति-र्वाद्यनाटकयोर्विधिः । तूर्याणामखिलानां च, सम्भवः **शङ्खतो** निधेः ॥४७७॥
यातेष्वेतेषु निधिषु, विधायाऽष्टाह्निकोत्सवम् । चक्री यथेप्सितं दानं, याचकेभ्यः प्रदत्तवान् ॥४७८॥
ततश्चक्र्याज्ञया गङ्गा-दक्षिणं निष्कुटं क्रमात् । साधयित्वा बलाधीशं, सद्दत्तं चक्रिणे ददौ ॥४७९॥
षट्खण्डं साधयित्वैवं, चक्री सुरासुरार्चितः । कियद्भिर्वासरैरागा-**दयोध्यानगरा**न्तिके ॥४८०॥
चतुर्दशमहारत्नै-ररस्वामी निषेवितः । द्वात्रिंशतां महीपाल-सहस्रैः सेवितोऽभवत् ॥४८१॥

उक्तम् –

वामयमाणं चक्कं १ छत्तं २ दंडं ३ दुहत्थयं । चम्मं ४ बत्रीसंगुलखग्गो ५ सुमुवण्ण कागिणि चउंगुलीआ ६॥४८२॥
चउरंगुलो दुअंगुलमणी ७, पुरोहि ८ गय ९ तुरया १० ।
सेणावइ ११ गाहावइ १२ वट्ट ट्ट १३, अत्थि १४ चक्किरयणाइं ॥४८३॥

उक्तं च शास्त्रान्तरे –

चतुर्दश रत्नानि पुनः सेनापत्यादीनि ।

तत्र -

**सेनापति**रपारविजयसमर्थः । परैरप्रतिहत**शक्तिः** १।

**गृहपति**र्गृहोचितशाल्यादिसर्वधान्यानां फलानां च तत्कालमेव कर्ता । सकलचक्रसैन्यस्यापि पूरयिता च प्रस्तावे २।

**पुरोधाः** सर्वक्षुद्रोपद्रवोपशान्तिकृत् ३। **गज-वाजिनौ** प्रकृष्टवेगपराक्रमौ ४-५। **वार्धकि**रवसरे सत्वरमेव समग्रसार्वभौमसैन्यस्यापि यथा विलोक्यमानभवनविरचनाद्यलङ्कर्मीण उन्मग्ना-निमग्नानाम (निम्नगा) युग्मसुगमपथा(थ) कृच्च ६। **स्त्रीरत्नं** सर्वातिशायिकामसुखनिधानम् ७।

**चक्रं** सहस्रारं व्यामप्रमाणं सर्वायुधप्रधानममोघं च ८।

**व्योमोपमानं छत्रम्** ।

प्रभुहस्तस्पर्शाद् द्वादशयोजनविस्तारि वैताढ्योत्तरभागवर्तिम्लेच्छाऽनुरोधिमेघकुमारोत्सृष्टप्रकृष्टवारिधारा-निवारितनव नवतिसहस्रकाञ्चनशलाकाग्रथितं काञ्चनमयोद्दण्डमण्डितं **बस्ति**प्रदेशे पञ्जरविराजितमर्ज(र्जु)ना-ऽभिधानप्रधान-पाण्डुर-स्वर्ण**प्रत्यवत**पृष्ठदेशं तपनातप-वात-वृष्टिकादिदोषनाशकम् ९।

**चर्म** द्विहस्तप्रमितं वैताढ्यपर्वतोत्तरदिग्वर्तिम्लेच्छ कारिताऽतुच्छमेघवृष्टौ स्वामिकराद् द्वादशयोजनविस्तृतं व्योम्नि स्थितमुपरि च्छत्ररत्नच्छादितं सकलचक्रिसेनानीजनानां वसुन्धरावदाधारभूतं प्रातरुप्ताऽपराह्नेनिष्पद्यमान-शाल्युत्पत्तिनिमित्तं च १०।

**मणिरत्नं** चतुरङ्गुलप्रलम्बं द्व्यङ्गुल-पृथुलं वैडूर्यमयं त्र्यस्त्रं षडंशं छत्रतुम्बस्थं हस्तिस्कन्धस्थं च द्वादशयोजनानि प्रकाशयति, क्षुद्रोपद्रवान् विद्रावयति, हस्तस्थे तस्मिन्नवस्थितयौवनः स्यादवस्थितकेशनखश्च ११।

**काकिणीरत्नम**ष्टसौवर्णिकं चतुरङ्गुलं समचतुरस्त्रं सर्व-विषापहारि तमिस्राखण्डप्रपातागुहयोर्द्वादश-योजनाऽन्यवधि-तिमिरहरं चक्रिणा रजन्यां सैन्यान्तर्न्यस्तं सूर्यवत्प्रकाशकरं चक्री च तमिस्रागुहायां पूर्व-

पश्चिमभित्त्योः प्रत्येकं योजनान्तराणि पञ्चधनुःशताऽऽयाम विष्कम्भानि योजनं यावदुद्द्योतकानि तु चक्रनेम्याकाराणि वृत्तानि गोमूत्रिमाक्रमेणैकस्यां भित्तौ पञ्च-विंशतिरपरस्यां च चतुर्विंशतिमेव, एवमेकोनपञ्चाशतं मण्डलानि तेन काकिणीरत्नेन खटिकावत् सुखोल्लेखेन लिखन् व्रजति भरताऽपरार्धे दिग्विजयाय । यावच्चक्री तावत्ता-न्यवतिष्ठन्ते ।

गुहाऽपि च तावदेवोद्घाटा तिष्ठति ।

एवं खण्डप्रपातगुहायामपि ज्ञेयम् १२।

**खड्गो** द्वात्रिंशदङ्गुलप्रमाणः सङ्ग्रामेऽप्रतिहतशक्तिः १३।

**दण्डरत्नं** रत्नमयं पञ्च**लताकं** वप्रसारं व्यामप्रमाणं शत्रुसेनावित्रासकं विषमोन्नत-भूमिभागसमत्वकारकं शान्तिकरं मनोरथपूरकं सर्वत्राऽप्यप्रतिहतं योजनसहस्रमप्यधिप्रविशति १४। चतुर्दशादि चैतानि । प्रत्येकं यक्षसहस्रप्रतिष्ठितानि । एषु च सेनापत्यादीनि सप्तपञ्चेन्द्रियाणि चक्रादीनि च सप्तैकेन्द्रियाणि पृथ्वीपरिणामरूपाणि ।

**॥ इति चतुर्दशरत्नस्वरूपम् ॥**

समुद्राशामिता ८४ लक्षा, इभ्याश्च स्यन्दना वराः । भट्टाः षण्णवतिः कोट्यो, बभूवुश्चक्रिणः क्रमात् ॥४८४॥
चतुरङ्गचमूरश्वैरिभैर्गजैर्दिने दिने । ववृधे चक्रिणो गङ्गा-प्रवाहेव वृषोदयात् ॥४८५॥
निवेश्य चक्रिराट् सेना-मयोध्यासन्निधौ तदा । पुर्यधिष्ठातृकां देवी-माश्रित्य विदधे तपः ॥४८६॥
अयोध्यायां प्रबध्यन्ते, तोरणानि पदे पदे । काश्मीरकुङ्कुमाम्भोभि-रभिषिच्येत मही जनैः ॥४८७॥
चित्रीयन्ते स्म वेश्मानि, चरित्रैर्भारतैरिव । पुरन्ध्रीभिर्विधीयन्ते, मङ्गल्यध्वनयोऽनघाः ॥४८८॥
परिधत्ते पुरीलोको, दिव्यवासांसि हर्षतः । मण्डपा विपुलाः स्वर्ग-विमानौघा इवाऽऽबभुः ॥४८९॥
पुरप्रतोलिकाः पट्ट-कुलैर्ध्वजानुकारिभिः । शोभन्ते स्मापणश्रेणी, मणिमुक्ताफलादिभिः ॥४९०॥
एवंविधासु शोभासु, कृतासु नागरैर्जनैः । दानं भूरि ददच्चक्री, वीज्यमानश्च चामरैः ॥४९१॥
ध्रियमाणाऽऽतपत्रश्च, मस्तके च्छत्रधारिभिः । क्रियमाणाऽनघश्रेयाः, पुरन्ध्रीभिः पदे पदे ॥४९२॥
गीयमानगुणोऽनेक-याचकैर्बिरुदोक्तिभिः । दृश्यमानो नृनारीभि-श्चक्री चक्रानुगः क्रमात् ॥४९३॥
स्फटिकाश्ममये गेहे, स्वर्विमानसहोदरे । आजगामाऽनुगश्रेणी-सेव्यमानः सुरेन्द्रवत् ।४९४। पञ्चभिः कुलकम् ।
आयान्ति ढौकनान्येव, यानि यानि पुरान्तरात् । तानि द्विगुणितान्येव, तेभ्योऽदीयन्त भूभुजा ॥४९५॥
द्वात्रिंशतिः सहस्राणि, भूपा मुकुटबन्धनाः । स्वस्वगेहात्समागत्य, सेवन्ते स्म च चक्रिणम् ॥४९६॥
अन्तःपुर्यश्चतुःषष्टि-र्बभूवुश्चक्रिणोऽबलाः । बभूवुर्द्विगुणास्ताभ्यः, षण्डविलासयोषितः ॥४९७॥
सूदास्त्रिषष्टिसंयुक्ताः, शतानि त्रीणि भूपतेः । वर्या रसवतीश्चक्रु-र्दिने दिने नवां नवाम् ॥४९८॥
श्रेष्ठिनोऽष्टादश श्रेणि-प्रश्रेणी दुर्गपालकाः । सार्थवाहा वरा आस-न्नटाश्च कोटिशो वराः ॥४९९॥
देवं प्रपूज्य चक्रिशः, सार्धमसङ्ख्यभूधवैः । बुभुजे रुचिरं भोज्यं, सर्वाङ्गपुष्टिकारकम् ॥५००॥
एवं कतिपयाहस्सु, गतेषु नृप-निर्जराः । चक्र्यभिषेकमाधातुमाजग्मुश्चक्रिणोऽन्तिके ॥५०१॥
यक्षा विद्याधरा राज्या-ऽभिषेकोचितमण्डपम् । रत्नौघै रचयामासुः, स्वर्विमानसहोदरम् ॥५०२॥

ह्रदेभ्यः स्वर्नदीभ्यश्च, मानसात्सरसः पुनः । सुगन्धं नीरमानिन्यु-श्चक्रिणः स्नानहेतवे ॥५०३॥
कारयित्वा धुरि स्नानं, चक्रिणं वारिभिर्नृपाः । कस्तूरिकाञ्चितैर्देहं, चर्चयन्ति स्म चक्रिणः ॥५०४॥
परिधाप्याम्बरैर्दिव्यै-श्चक्रिणं वरभूषणैः । अलङ्कृत्य नृपा देवा, नेमुर्भक्त्या सुरोपमम् ॥५०५॥
बलिं कृत्वाऽम्बरे सर्व-देवानां प्रीतये च ते । मण्डपे मण्डयामासुर्विष्टरं पूर्वदिग्मुखम् ॥५०६॥
स्कन्धे कृत्वाऽसिरत्नं स, चक्रपूजापुरःसरम् । द्वात्रिंशता नृपैर्वर्यैः, सहस्रैः परिषेवितः ॥५०७॥
अभ्येत्य मण्डपे पूर्वाऽभिमुखं चक्रिराट् तदा । उपविष्टः स्मरन् पञ्च-परमेष्ठिनमस्कृतीन् ॥५०८॥युग्मम्॥
ततोऽभ्येत्याऽखिला भूपाः, सामन्ता मन्त्रिपुङ्गवाः । श्रेष्ठिनो धनिनः सार्थवाहा सेनाऽधिपादयः ॥५०९॥
इभ्याश्च सुमणीमुक्ताः, प्राभृतानि वराणि च । मुक्त्वा तस्याऽग्रतश्चक्रु-र्नतिं पञ्चाङ्गयोगतः ॥५१०॥
सदा जयजयेत्युच्चै-र्भट्टाः प्रोचुश्च गायनाः । षष्ठचक्रिन् ! चिरं जीयाः, **श्रीअर** ! पृथिवीतले ॥५११॥
स्वस्वगेहात्समागत्य पुरन्ध्र्यो रुचिराक्षतैः । वर्धापयन्ति चक्रीशमाशीर्वादपुरस्सरम् ॥५१२॥
द्वात्रिंशतः सहस्राणां, भूपानां मुकुटानि च । शिरस्सु बन्धनायाऽदात्, चक्रवर्ती पृथक् पृथक् ॥५१३॥
ततश्चक्री नृपालैस्तैः, सेनेशसदनाऽधिपैः । वर्धकिश्रेष्ठिसामन्तैः, परीतः शक्रवत्सुरैः ॥५१४॥
उत्थायासनतो देवगृहे गत्वाऽजिनार्हतः । प्रणम्यान्यान् जिनान् भक्त्या-ऽनंसील्लोकस्थितेः स च ॥५१५॥
तत्र देवगृहे चारु-नीर-पुण्य(ष्प)-फलादिभिः । चक्री शुचितनुश्चक्रे, सभूपो जिनचर्चनम् ॥५१६॥
*एवं द्वादशवर्षाणि, भूपै राज्याऽभिषेचनम् । चक्रेऽथ* चक्रिणस्तस्य, नानोत्सवपुरःसरम् ॥५१७॥
अष्टादश कराणां तु, मुक्तिर्द्वादशवत्सरीम् । चक्रिणा विहिता तस्य, सौख्यभाजोऽभवन्प्रजाः ॥५१८॥
एकविंशतिसहस्राणि, सामान्यराज्यसम्पदः । भुक्त्वा जित्वा रिपून् भूरीन्, चक्री जातः क्रमा**दरः** ॥५१९॥
सौम्योऽभूच्चक्रिराट् सर्व-सज्जनेषु निरन्तरम् । सूर्योऽभूद्वैरिकुमुद-काननेषु निरन्तरम् ॥५२०॥
बुधोऽभूद्विबुधेष्वेव, गुरुर्गुरुगुणैरभूत् । मङ्गलोऽजनि माङ्गल्य-करणात्सर्वदेहिनाम् ॥५२१॥
शुक्रः काव्यकृतेरासीत्, शनिः शनैर्गतेः पुनः । एवं सप्तग्रहमयो, बभू**वारः** स चक्रिराट् ॥५२२॥
लक्षाश्चतुरशीतिश्चा-ऽभवन् रथेभवाजिनाम् । ग्रामाः षण्णवतिः कोट्यः, पत्तयोऽपि च चक्रिणः ॥५२३॥
ग्रामो वृत्या वृतः स्यान्नगरमुरुचतुर्गोपुरोद्भासिशोभा, खेटं नद्यद्रिवेष्टं परिवृतमभितः कर्बटं पर्वतेन ।
ग्रामैर्युक्तं मडम्बं दलितदशशतैः पत्तनं रत्नयोनि, द्रोणाख्यं सिन्धुवेलायितमथ पुनः संबाधनं चापि शृङ्गे ॥५२४॥
द्वात्रिंशतः सहस्राणि, देशा आसन् महत्तमाः । द्वासप्ततिसहस्राणि, पुराणि चक्रिणोऽभवन् ॥५२५॥
आसन् खेटसहस्राणि, द्रोणमुखपुरी पुनः । पत्तनानि सहस्राण्यष्टचत्वारिंशतः क्रमात् ॥५२६॥
कर्बटाश्च मडम्बा वा, सहस्राणि जिनोत्तमाः । आकराणां सहस्राणि, विंशतिश्चक्रिणोऽभवत् ॥५२७॥
आसन् खेटाः सहस्राणि, षोडश चक्रिणः क्रमात् । चतुर्दश सहस्राणि, सम्बाधानि विरेजिरे ॥५२८॥
षट्पञ्चाशतो द्वीपास्तस्याऽभवंश्च चक्रिणः । षट्त्रिंशत्सहस्राणि, तटान्यासन् पयोनिधेः ॥५२९॥
**पञ्चाशतः कुराज्यानि, स्त्रीराज्यानि सहस्रशः** । अभूवन् चक्रिणो**ऽरस्य**, पूर्वपुण्यप्रभावतः ॥५३०॥
सूर्यवंशस्तथा सोमवंशः[2] कदम्ब[3]-यादवौ[4] । परमार[5]स्तथा चाह[6]मा[7]नेक्ष्वाकू च मौरिकः[8] ॥५३१॥

चौलुक्यः सैन्धवश्चापोत्कटः सेलारच्छन्दकौ । प्रतीहारः शको राष्ट्रकूटो लुच्छकबिन्दुकौ ॥५३२॥
हूणकरटको राजपालो बिदल्लहिङ्गुलौ । करपालो गुहिलः स्यात्, मकूआणकपोतिकौ ॥५३३॥
अनङ्गो धामपालश्च, निसुम्भो हरितस्तथा । **डोडोहो** हिकरः केला, तुरोडाहीकमारवौ ॥५३४॥
एवं षट्त्रिंशतो राज-वंशा अन्येऽपि वंशजाः । सेवन्ते चक्रिणं चारु, भक्त्याऽरं निर्जरा अपि ॥५३५॥
विहारो[1] भूगृहं[2] हर्म्यं[3], तार्क्ष्यगेह-सभामठौ । भाण्डागार-कोष्ठागारौ, भूमिगेह-वृषालयौ ॥५३६॥
दानशालाऽऽयुधावासौ, स्नानौको भूषणालयौ । चन्द्रौकः-सूतिकागेहे, नायकः कम्बुमन्दिरम् ॥५३७॥
क्रीडौकः सूत्रधारौको, महानसाऽदनालयाः । आश्रमः शान्तिगेहं वो-टजापवरकौ तथा ॥५३८॥
गोशाला वृषभावासो, गर्तिका पाककुट्यपि । धर्मशिल्पादिशाला च, गुञ्जा पक्वणमन्दिरे ॥५३९॥
निषद्याघोषकौ लेखशाला मन्त्रनिकेतनम् । पुस्तिकामन्दिरं पट्ट-कूलगेहं कलागृहम् ॥५४०॥
इत्यादि शतशो गेहा, अभवंस्तस्य चक्रिणः । दीर्घिकान्धुसरो-वाप्या-दयः सङ्ख्यातिगाः पुनः ॥५४१॥
उमादेशे विराजेते, कोट्यो ग्रामाश्चतुर्दश । कलिङ्गः कोटिभिर्ग्रामै-रेकादशमितैरभात् ॥५४२॥
कोटयोऽष्टादश ग्रामाः, खरसाणाह्वनीवृति । कोट्यो द्वासप्ततिर्ग्रामाः, गाऊणे विषये स्मृताः ॥५४३॥
कोट्येकलक्षसप्तत्या, काश्मीरे धूमकेऽभवत् । कोट्येकाशीतिलक्षाणि, ग्रामाः पञ्च च गौडके ॥५४४॥
लक्षाः षट्त्रिंशतिग्रामाः, कर्णकुहाह्वनीवृति । जालन्धरे स्मृतं लक्षत्रयं ग्रामा मनोहराः ॥५४५॥
डाहले नव लक्षाणि, ऊडीसे लक्षमेककम् । लक्षं सयंभरौ लक्ष-त्रयं बम्भणवाहके ॥५४६॥
भोटेऽष्टादश लक्षाणि, चीणे लक्षाश्चतुर्दश । एकोनसप्ततिर्लक्षा, महामोटाह्वनीवृति ॥५४७॥
लक्षाणि षोडश ग्रामा, महाचीणाह्वनीवृति । मालवेऽष्टादश लक्षाणि, सहस्रानयनग्रहाः ॥५४८॥
पञ्चसप्ततिलक्षाणि, ग्रामा मरहठे स्मृताः । लक्षत्रयी करणाटे, नवलक्षास्तिलङ्गके ॥५४९॥
नीलोहरे स्मृतं लक्षं, मेवाडे लक्षमेककम् । चत्वारिंशत्सहस्राणि, लक्षमेकमजाहतौ ॥५५०॥
गङ्गापारे सहस्राणि, चतुर्विंशतिरेव च । सहस्रं किल सञ्जाणे, तथा कालहरे दश ॥५५१॥
सहस्रदशकं हंसे, वच्छे ग्रामाः स्मृता बुधैः । ग्रामास्त्रिंशत्सहस्राणि, कनकाद्रिरिनीवृति ॥५५२॥
ग्रामा दश सहस्राणि, विराटाभिधनीवृति । गुर्जरत्रे सहस्राणि, सप्ततिर्विबुधैः स्मृता ॥५५३॥
सहस्राणि नव ग्रामा, नवसाराह्वनीवृति । चतुर्दश शतान्येव, चत्वारिंशच्च कुङ्कणे ॥५५४॥
एतावद्ग्रामकोटीनां, स्वामित्वं चक्रिराट् श्रयन् । चकार लीलया राज्यं, शक्रवत्स्वर्गसम्पदः ॥५५५॥
**अरस्य** जन्मोत्सव-राज्यलब्धि-चक्रित्वसम्प्राप्तिमहोत्सवाश्च ।
दृष्टाः स्मृता भव्यशरीरभाजां, केषां न कल्याणसुखानि सन्ति ॥५५६॥

**इति तपागच्छाऽधिराजश्रीलक्ष्मीसागरसूरि-शिष्य-पण्डितशुभशील-विरचिते श्रीअरनाथचरित्रे अरार्हज्जन्मोत्सव-राज्यप्राप्ति-चक्रित्वप्राप्तिमहोत्सवरम्ये पञ्चमः सर्गः ।**

● ● ●

# ॥ षष्ठः सर्गः ॥

**अरस्य** चक्रिणः पुत्रो, **पद्मसेनाभिधो**ऽन्यदा । **चेदिपुर्यां धन**क्षोणी-पतेः **पद्मावतीं** सूताम् ॥१॥
परिणेतुं ययौ **भीमोद्याने श्रीशान्ति**सद्मना । शालिते श्री**धराचार्यो**पान्ते धर्ममथाऽशृणोत् ॥२॥
तथाहि –
माणुसखित्तजाइ कुलरूवारुग्गमाउअं बुद्धी । सवणग्गहसद्धा संजमो(य)लोगम्मि दुलहाइं ॥३॥
आलस्समोहवन्ना थंभा कोहा य माय कवणिन्ना । भयसोगा अन्नाणा वरे कवयकोऊहलारम्मा ॥४॥
अङ्कस्थाने भवेद् धर्मः, शून्यस्थाने ततः परम् । अङ्कस्थाने पुनर्भग्ने, सर्वशून्यं दरिद्रता ॥५॥
वरिसहते गणि दीहडा, जे जिणधम्मिहिं सार । तिण्णिसहा[या]उणसट्ठडी, इम्मइ गिणइ गमार ॥६॥
दिवसनिसाघडिमालं आउं सलिलं जणस्स घित्तूण । चंदाऽऽइच्च बइल्ला कालइहरहट्टं भमाडंति ॥७॥
भार्यादिमोहपतितो, जीवो **मुकुन्दवि**प्रवत् । नरके सहतेऽत्यन्तं, वेदनां दुःखदायिनीम् ॥८॥
तथाहि –
**पद्मपुर्यां मुकुन्दस्य**, विप्रस्य **पद्मिनी** प्रिया । कुशीलिनी बभूवाथ, मुखे मधुरभाषिणि ॥९॥
यतः –
आहारो द्विगुणः स्त्रीणां, निद्रा तासां चतुर्गुणा । षड्गुणो व्यवसायश्च, कामश्चाष्टगुणः स्मृतः ॥१०॥
विप्रे **जनार्दने** सक्ता, वञ्चयित्वा पतिं सदा । सेवते स्म रतेर्दानात्, **पद्मिनी** सा शठाशया ॥११॥
**पद्मिनी** मधुरं कान्तो-पान्ते प्राहेति गद्गदम् । यदा त्वं गच्छसि ग्रामे-ऽन्यत्र बिभेम्यहं तदा ॥१२॥
**जनार्दनो** जगौ पत्यु-स्तव पार्श्वाद्बिभेम्यहम् । तेन त्वया समं भोगं, करिष्येऽतः परं नहि ॥१३॥
जगाद **पद्मिनी** कुर्वे, तथाऽहं ते न भीर्यथा । **मुकुन्दो** मे पतिर्मां तु, सतीं जानाति सन्ततम् ॥१४॥
**मुकुन्दे**ऽथ गतेऽन्यत्र, ग्रामेऽन्यस्य कलेवरम् । नीत्वा श्मशानतो गेह-मध्ये मुमोच **पद्मिनी** ॥१५॥
ज्वालयित्वा गृहं छन्नं, तेनोपपतिना समम् । यमुनायास्तटे ग्रामे, सा गता भोगकामिका ॥१६॥
इतः प्रातः समेतोऽथ, **मुकुन्दो** दग्धसद्मनि । दग्धकलेवरं दृष्ट्वा, रुरोदोच्चैः स्वरं भृशम् ॥१७॥
रे प्रिये ! किममुं कान्तं, मुक्त्वैकं ज्वलिताऽधुना । अतस्त्वं कृत्रिमस्नेहा, विद्यसे किं वदाम्यहम् ॥१८॥
त्वां विनाऽहमतो गत्वा, तीर्थेऽन्यत्राऽसुनाशनः । यमस्य सदने पत्नि !, समेष्यामि तवान्तिके ॥१९॥
रोदं रोदं चिरात्कालात्, तस्या अस्थीनि तत्क्षणम् । लात्वाऽचालीद्विजस्तीर्थे, क्षेप्तुं मार्गेऽन्यदा गृहात् ॥२०॥
शुचीभूय तदस्थीनि, वहमानः स वाडवः । षण्मासान्ते ययौ तीरे, यमुनाया जडाशयः ॥२१॥
क्षालयित्वा तदस्थीनि, यमुनासलिले सदा । स्वयं वितनुते स्नानं, ततोऽत्ति स्म स वाडवः ॥२२॥
इतो **जनार्दने** नानाकेलिं कृत्वा तु **पद्मिनी** । स्नानं वितन्वती तीर्थे, ददर्श स्वं पतिं प्रगे ॥२३॥
हे भामिनि ! तेऽस्थीनि, स्वाभीष्टानि मयाऽत्र तु । आनीतानि विशुद्ध्यर्थं, क्षाल्यन्तेऽतो मयाऽम्भसि ॥२४॥

श्रुत्वेति वचनं पत्युः, **पद्मिनी** स्वं विचेष्टितम् । प्रोच्यऽवक् प्रिय ! मामङ्गी-कुरु क्षम्यं त्वया मयि ॥२५॥
द्विजोऽवग् मे प्रियाऽस्थीनि, विद्यन्ते मम सन्निधौ । कूटं न प्रोच्यते भोग-सुखाय स्वहितेच्छुना ॥२६॥
यतः –
यः कूटं मनुजो वक्ति, स्वार्थी सुखस्य हेतवे । स एव नरकं याति, यावच्चन्द्रदिवाकरौ ॥२७॥
अप्पउं धुलिहिं मेलीउं सयणह दीधउ लार । पगि पगि माथा ढांकणां जिणि जोई परनारि ॥२८॥
ततः सा पूर्वसङ्केतं, विवाहादिभवं यदा । जगौ तदा द्विजोऽप्राक्षीत्, विद्यसे राक्षसी त्वकम् ॥२९॥
सीकोतर्यथवा दुष्टा, पिशाची व्यन्तरी पुनः । यतो मे चेष्टितं वेत्सि, ततोऽहं त्वां श्रयेऽधुना ॥३०॥
गच्छ दूरे भवन्ती त्वं, वक्तव्यं नेदृशं वचः । प्रियास्थीनि पवित्राणि, कुर्वाणोऽस्मि जले ध्रुवम् ॥३१॥
सदृशा नरनार्यस्तु, स्थाने स्थाने भवन्ति हि । अतस्त्वं मत्प्रियातुल्या, विद्यसे सदृशाकृतेः ॥३२॥
यदि त्वं प्राणितं वाञ्छेः, मृगाक्षि ! स्वं हितं पुनः । नाऽऽगन्तव्यं ममोपान्ते, तदा भोगेच्छया मनाक् ॥३३॥
यतः –
पश्यन् मृतिं जनः स्वस्मिन्, राज्यं न वाञ्छति क्वचित् । नेहते विभवं पुत्र-पौत्रादिसन्ततिं पुनः ॥३४॥
पंथसमा नत्थि जरा, खुहासमा वेअणा नत्थि । मरणसमं नत्थि भयं, दारिद्दसमो वयरीओ नत्थि ॥३५॥
इतोऽभ्येत्य **मुकुन्दान्ते,** जगौ **जनार्दनो** द्विजः । तवैषा गेहिनी कुटकपटच्छलमन्दिरम् ॥३६॥
यतश्चादौ विहाय त्वां, लुब्धाऽजनि मयि ध्रुवम् । मायाविन्याऽनया त्यक्तो-ऽधुनाऽहं खरजल्पतः ॥३७॥
**मुकुन्दो**ऽवक् प्रिया मेऽभूत्, सरला मृदुभाषिणी । वराका मयि भक्ताऽलं, धर्मिष्ठा सत्यभाषिणी ॥३८॥
सा तु दग्धे गृहे दग्धा, वराकी वह्निना तदा । तस्या अस्थीनि मे पार्श्वे, विद्यन्ते भो नरोत्तम ! ॥३९॥
त्वमन्यस्यां स्त्रियां लुब्धो, वक्षि मे गृहिणीं पुनः । अतः परं न वक्तव्य-मीदृक्षं मे पुरो मनाक् ॥४०॥
एवं मूढमना मोहा-त्तान्यस्थीनि स्वयोषितः । जल्पन् नदीजले क्षिप्त्वा, **मुकुन्दो** नरके ययौ ॥४१॥
ततोऽभूज्जम्बुको भीमे, वनेऽथ शशकोऽजनि । ततो मृतोऽभवत्पक्षी, ततः पारापतोऽभवत् ॥४२॥
**पद्मिनी**तो मृता पापं, कुर्वाणा शीलखण्डनात् । प्रथमे नरके जाता, दुःखं सेहे ततो घनम् ॥४३॥
ततो निर्गत्य सा व्याघ्री, भूत्वाऽथ नरके ययौ । ततश्च्युता शृगाल्यासीत्, ततो व्याघ्री शुनी ततः ॥४४॥
शुनी मृता ययौ श्वभ्रे, सेहे दुःखपरम्पराम् । ततश्च्युता **रमा**पुर्यां, वने जाता शुकी वरा ॥४५॥
सा भ्रमन्ती जिनावासे, समेत्य तस्थुषी सती । जिनेन्द्रवक्त्रमालोक्य, प्रमोदं तनुते स्म हि ॥४६॥
शुकी प्रभोः पुरः सस्य-शीर्षं प्राभृतकं व्यधात्, तेन पुण्येन तत्रैव, पुरे **पद्म**सुताऽभवत् ॥४७॥
**पद्मेभ्यः** प्रददौ नाम, पुत्र्याः **पद्मावती**ति च । वर्धमानाऽपठत् धर्म-कर्मशास्त्राणि भूरिशः ॥४८॥
ततः श्रुत्वा गुरोरास्यात्, धर्मं जीवदयामयम् । तथाऽकरोद्यथा **पद्मावती** स्वर्गे समागमत् ॥४९॥
ततश्च्युता **महापुर्यां, चन्द्रशेखर**भूपतेः । **कमलाह्वा**ऽभवत्पत्नी, सरला सत्यभाषिणी ॥५०॥
ततो मृताऽऽदिमे स्वर्गे, **पद्म**नामाऽभवत्सुरः । सोऽन्यदा मित्रदेवेन, समं स्वर्णगिरौ ययौ ॥५१॥
तत्र दृष्ट्वाऽर्हतो जन्मो-त्सवं सुरविनिर्मितम् । **पद्मदेवो** व्यधान्नृत्यं, गीतगानपुरःसरम् ॥५२॥
ततश्च्युतः सुरः सोऽथ, **मेघ**भूमिपतेः सुतः । **आनन्दाह्वो**ऽभवत् धर्म-कर्मादिकारकः सदा ॥५३॥

एकदा स जिनेन्द्रस्य, पूजां कृत्वाऽतिविस्तरात् । भावनां भावयन् प्राप, पञ्चमं ज्ञानमञ्जसा ॥५४॥
प्रबोध्याथ जनान् भूरीन्, गमयित्वा शिवं पुनः । **आनन्दः** समगान्मुक्तिं, निःशेषकर्मणां क्षयात् ॥५५॥
इतो **मुकुन्द**जीवः स, पारापतोऽभवत्ततः । भारद्वाजोऽभवत् **शत्रु-ञ्जये** तीर्थे खगो ध्रुवम् ॥५६॥
तदा तत्राऽऽगतं सङ्घं, महान्तं वीक्ष्य हर्षितः । गीयमानं जिनेन्द्रस्य, गीतं लोकैर्निशम्य च ॥५७॥
जय त्वं वृषभाऽसङ्ख्य-सुखदाता शिवप्रदः । त्वत्तुल्योऽन्यो न देवोऽस्ति, मुक्तिभुक्तिनिधानवान् ॥५८॥
प्रातः प्रातः प्रभोः पादौ, नत्वा पक्षी सदा स च । चुण्यर्थं सङ्गतः सायं, तत्राऽऽयाति जिनालये ॥५९॥
प्रभोर्ध्यानान्मृतोऽन्येद्यु-र्भारद्वाजोऽनघाशयः । प्रथमे ताविशे देवो, भासुरद्युतिमानभूत् ॥६०॥
ततो मृतः ततश्च्युतः **कलापुर्यां**, **भीमस्य** श्रेष्ठिनः सुतः । बभूव **धन**नामाकः, सरलोऽकपटाशयः ॥६१॥
**धनो**ऽन्यदा गुरूपान्ते, गतो धर्मश्रुतीच्छया । कथ्यमानं वृषं श्रीमद्-गुरुभिश्चाशृणोदिति ॥६२॥
मोहेन संसृतौ जीवा, भ्रमन्तो भवसागरे । लभन्ते भूरिदुःखानि, तिर्यक्श्वभ्रभवानि तु ॥६३॥
शृङ्खलाऽयोमयी जीवै-स्त्रोट्यते चोपचारतः । मोहस्य शृङ्खलां छेत्तुं, न शक्यते कदाचन ॥६४॥
दारा परिभवकारा, बन्धुजनो बन्धनं विषं विषयाः । कोऽयं जनस्य मोहो, ये रिपवस्तेषु सुहृदाशाः ॥६५॥
पुत्रो मे भ्राता मे स्वजनो, मे गृहकलत्रवर्गो मे । इति कृत मे मे शब्दं, पशुमिव मृत्युर्जनं हरति ॥६६॥
ये जनाः स्वं कृतं पापं, प्रकाशन्ते गुरोः पुरः । त एव निर्वृतेः सातं, लभन्तेऽन्ये न कर्हिचित् ॥६७॥
**श्रीपुरे कृष्ण**विप्रस्य, पत्नी **लक्ष्मी** सुता रमा । अभूतां नन्दिनीं **चन्द्रो**, विप्रोऽथ परिणीतवान् ॥६८॥
क्रमात्तस्याः पतिः प्रेत-मन्दिरं समुपेयिवान् । **रमा** प्रीतिं व्यधात्सार्द्धं, **धनश्रिया** स्त्रिया ततः ॥६९॥
द्वे अपि नगरे तत्र, सेवमाने कुवर्त्म च । न भीतिं कुरुतः स्मैव, श्वभ्राऽसुखनिपाततः ॥७०॥
द्वे अपि श्रीगुरूपान्ते, गते अन्येद्युरादरात् । शीलपालनपुण्यस्य, फलं शुश्रुवतुस्त्विति ॥७१॥
जो देइ कणयकोडिं, अहवा कारेइ कणयजिणभवणं ।
तस्स न तत्तिअं पुण्णं, जत्तीअ बंभव्वए धरीए ॥७२॥
देवदाणवगंधव्वा, जक्खरक्खसकिंनरा । बंभयारिं नमंसंति, दुक्करं जे करंति तम् ॥७३॥
आकर्ण्येति **रमा** पाप-भीरुः शीलफलं तदा । त्यक्त्वा कुमार्गमह्नाय, सन्मार्गं श्रयते स्म सा ॥७४॥
द्वितीयाऽथ **धनश्री**स्तु, तदाहेति **रमां** प्रति । स्वेच्छया सेव्यते भोगं, तदा किं वीक्ष्यतेऽधुना ॥७५॥
**रमा** प्राह यदा येन, शीलं प्रपाल्यते ध्रुवम् । सदा स लभते शीघ्रं, मुक्तिसातं निरत्ययम् ॥७६॥
**रमा** शीलं प्रपाल्याथ, कृतं पापं प्रकाश्य च । गत्वा स्वर्गे क्रमान्मर्त्य-भवं प्राप्य शिवं ययौ ॥७७॥
द्वितीया सेवमाना तु, कुमार्गं दुर्गतिं ततः । गत्वा गत्वा भवे दुःखं, लभते स्मानिशं भृशन् ॥७८॥
ततः संसारकान्तारे, भ्रमन्ती च भवे भवे । कुगतिं प्राप्य दुःखानि, सेहे **धनश्रिया तराम्** ॥७९॥
एवं मे स्वं कृतं पाप-मन्यस्याग्रे प्रकाश्यते । धर्मबुध्या स छंद्येत, न च पापधिया क्वचित् ॥८०॥
आकर्ण्येति **धन**स्त्यक्त्वा, गृहवासं क्षणादपि । गृहीत्वा संयमं शुद्धं, पपाल निःस्पृहस्तनौ ॥८१॥
तपस्तीव्रं वितन्वानः, क्रियां शुद्धां च संतते । प्राप ज्ञानं चतुर्थं च, तत्तत्कर्मक्षयात्तदा ॥८२॥

ततः प्रबोधयन् भव्यान्, जीवान् भुवस्तले स च । क्षपकश्रेणिमारूढो-ऽन्यदा प्रातःक्षणे क्षणात् ॥८३॥
क्षीणे कर्मणि निःशेषे, केवलज्ञानयुक् स च । आयुःक्षये ययौ मुक्ति-पुर्यां भूरियतिश्रितः ॥८४॥

**॥ इति कुमार्गत्यजने सुमार्गाश्रयणे मुकुन्द-रमा-धनश्र्यादिकथा ॥**

आकर्ण्येति गुरोः पार्श्वे, धर्मं मुक्तिसुखप्रदम् । **पद्मसेनो** ललौ श्राद्ध-धर्मं सम्यक्त्वसंयुतम् ॥८५॥
**धन**भूमीपतेः पुत्रीं, **पद्मावतीं** वरोत्सवम् । परिणीयाऽगमत**पद्म-सेनः** स्वकीयपत्तने ॥८६॥
**अरस्य** चक्रवर्तित्वे, वर्षाणामेकविंशतिः । सहस्राण्यभवत्सौख्यं, भुञ्जानस्य निरन्तरम् ॥८७॥
अत्रान्तरे समागत्य, देवाः सारस्वता दिवः । **अर**प्रभोः पुरः स्थित्वा, जगदुः स्तुतिगर्भितम् ॥८८॥
जय त्वं विजयस्व त्वं, नन्द नन्द चिरं प्रभो ! । प्रवर्तय त्वरा धर्म-तीर्थं मुक्त्यध्वहेतवे ॥८९॥
यतः –
सारस्सय१ माइच्चा२ वह्नी३ वरुणाय४ गद्दातोआय५ । तुसिआ६ अव्वाबाहा७ अगिच्चा८ चेव रिट्ठाय९॥९०॥
एए देवनिकाया भयवं बोहिंति जिणवरिंदं तु । सव्वजगज्जीवहियं भयवं तित्थं पवत्तेह ॥९१॥
आकर्ण्येति प्रभुर्दीक्षां, जिगृहीषुः [जिघृक्षुः] शिवप्रदाम् । दानं सांवत्सरं दातुं, प्रववर्ते प्रगे प्रगे ॥९२॥
एककोटिर्हिरण्यस्य, लक्षाण्यष्टौ प्रगे प्रगे । **अरो** ददत् प्रजां सर्वा-मनृणां कृतवान् क्रमात् ॥९३॥
कोटीशतत्रयं चाष्टा-शीतिर्हेम्नां च कोटयः । प्रभुणा प्रददे वर्षा-वधि दुकूलकादि च ॥९४॥
यतः –
संवच्छरेण होही अभिनिक्खमणं तु जिणवरिंदाणं । तो अत्थ संपयाणं पवत्तए पुव्वसूरंमि ॥९५॥
एगाहिरत्नकोडी अट्ठेवय अणूणगा सयसहस्सा । सूरोदयमाइअं दिज्जइ राया परासाओ ॥९६॥
संघाडग-तिग-चउक्क-चच्चर-चउमुहमहापहेसु । दारेसु पुरवराणं इच्छामुह मज्जयारेसु ॥९७॥
वरवरिआघोसिज्जइ किमिच्छियं दिज्जए बहुविहीअं । सुरअसुरदेवदाणवनरिंदमहीआणनिक्खमणं ॥९८॥
तिन्नेवय कोडिसया अट्ठासीअं च हुंति कोडीओ । असीअं च सयसहस्सा एअं संवच्छरे दिन्नं ॥९९॥
प्रभुपार्श्वात्तलक्ष्मीका, याचकाः स्वस्वसद्मनि । आगता नोपलक्ष्यन्ते, पत्नीभिः सज्जनैरपि [स्वजनैरपि]॥१००॥
उक्तं च –
तत्तद्वार्षिकदानवर्षविरमद्दारिद्र्यदावानलाः, सद्यः सज्जितवाजिराजवसनालङ्कारदुर्लक्ष्यभाः ।
सम्प्राप्ताः स्वगृहेऽर्थिनः सशपथं प्रत्याययन्तोऽङ्गनाः, स्वामिन् ! षिड्गजनैर्निरुद्धहसितैः के यूयमित्यूचिरे ।१०१।
कारयित्वा जिनागारे, जिनानामर्चनां धुरि । चक्रिणा प्रददे राज्यं, **पद्मसेनाय** सूनवे ॥१०२॥
अन्येषामपि पुत्राणां, विभज्य विषयाः समे । चक्रिणा ददिरे**ऽरेण**, यथारुचि यथोचितम् ॥१०३॥
ध्याने निष्क्रमणोत्साहे, चक्रिणा चेतसा ततः । **पद्मसेनः** सुतो वृद्धः, पुरशोभां व्यधादिति ॥१०४॥
तलिकातोरणोद्भ्राजि-हट्टश्रेणीषु सर्वतः । कर्पूरवारिणा पुर्या, भूमिमालोटयन्नृपः ॥१०५॥
तदा शक्रोऽवधिज्ञानात्, प्रभोर्दीक्षाक्षणं क्षणात् । दीक्षामहोत्सवं कर्तुं, भूरिदेवः समागमत् ॥१०६॥
उक्तं च –
वातान्दोलितकेतुवज्जलनिधौ सङ्क्रान्तशीतांशुवत्, प्रोद्दामद्विपकर्णवत् मृगीदृशः स्वाभाविकं स्वान्तवत् ।

मूषोत्तापितहेमवत् ध्रुवमपि प्रौढप्रभावात्प्रभो- राकम्पेन चलाचलं समभवद्देवेन्द्रसिंहासनम् ॥१०७॥
कर्पूरवासिपानीयकृतस्नानक्रियः प्रभुः । सुचन्दनाऽनुलिप्ताङ्गो, मन्दारसुमस्रक्श्रितः ॥१०८॥
आबद्धशीर्षकोटीरो, हारालङ्कृतहृत्तटः । अङ्गदभ्राजिदोर्दण्डः, कुण्डलभ्राजितश्रुतिः ॥१०९॥
परिधत्तलसद्दिव्या-म्बरो मुद्रोल्लसत्करः । कल्पवृक्ष इव स्वामी, तदा विभ्राजतेतराम् ॥११०॥त्रिभिर्विशेषकम् ।
भूपेन्द्रविहितप्रौढ-शिबिकां चित्तमोददाम् । आरूढवान् प्रभुर्वाद्य-माने वादित्रसञ्चये ॥१११॥
शिबिकामध्यभागस्थे, विष्टरे पूर्वदिङ्मुखः । उपविष्टः प्रभुर्गीय-मानो भूप-मरुद्गणैः ॥११२॥
शक्रेशानप्रभू स्वामि-पार्श्वयोरुभयोः स्थितौ । रुचिरे चामरे चाल-यतः स्म भावपूरितौ ॥११३॥
सनत्कुमारदेवेशः, शीर्षे च्छत्रमधारयत् । माहेन्द्रेन्द्रः प्रभोरग्रे, खड्गमुल्लालयन्नभूत् ॥११४॥
ब्रह्मेन्द्रो दर्पणं दध्रे, कुम्भं लान्तकदेवराट् । सुस्वस्तिकं महाशक्रः, सहस्राराधिपो धनुः ॥११५॥
श्रीवत्सं प्राणतस्वामी, नन्द्यावर्तं महाच्युतः । अपरे वासवाः शेषा, अभूवन् शस्त्रधारिणः ॥११६॥
पूर्वमुच्चिक्षिपुर्भूपाः, शिबिकां तां प्रमोदतः । पुराद्बहिर्वहन्ति स्माऽ-सुराऽमराऽहिनायकाः ॥११७॥
पञ्चवर्णप्रसूनानां, वृष्टिं कुर्वन् मरुद्गणः । नभःस्थो वादयामास, देवदुन्दुभिमादरात् ॥११८॥
पुष्पितं काननं भाति, स्मेरपद्मैः सरो यथा । तथा व्योमस्थितैर्देव-विमानै रुचिरैर्दृढम् ॥११९॥
अतसीकाननं पुष्पैः, स्मेरैस्तिलवनं यथा । भाति व्योमस्थितैर्देवै-स्तथा गगनमण्डलम् ॥१२०॥
भूपगीर्वाणवादित्रै-र्दुन्दुभिप्रमुखैर्भृशम् । गगने भूतले शब्दा-द्वैतमेव तदाऽभवत् ॥१२१॥
चतुःषष्टिमिता इन्द्रा-स्तत्राऽभ्येत्य प्रमोदिताः । दीक्षामहोत्सवं चक्रुर्वादयन्तश्च दुन्दुभीः ॥१२२॥
मुक्त्वा निजं निजं कर्म, नरा नार्यो निजालयात् । प्रभोर्दीक्षोत्सवं द्रष्टुं, तत्र सद्यः समाययुः ॥१२३॥
आकर्ण्य वाद्यनिर्घोषं, स्त्रियो द्रष्टुं महोत्सवम् । चेष्टा नानाविधा बह्वीः, कुर्वाणा अभवन् भृशम् ॥१२४॥
यतः —
तीयहं तिन्नि पीआरडां कलि-कज्जल-सिंदूर । तिन्निअ-ए अतिवल्लहां दूध-जमाई-तूर ॥१२५॥
मुकुटा मुकुटैर्घृष्टास्त्रुटन्ति स्म महीभुजाम् । हारैर्हारा हतास्तद्वत्, त्रुटन्ति स्म मिथस्तदा ॥१२६॥
हृदयैर्हृ-दयान्येव, दल्यन्ते स्म तदाऽभितः । पृष्ठिभिः पृष्ठयः सार्धं, मिलन्ति देहिनां भृशम् ॥१२७॥
बाहुभिर्बाहवः सार्धं, घर्षयन्ति दृढं तदा । लातुमुच्छ्वास-निःश्वासौ, न शेकुर्मनुजास्तदा ॥१२८॥
तदा प्रभोः पुरोऽष्टौ च, मङ्गलानि चलन्त्यलम् । तथा छत्रपताकादि, सञ्चरेत पदे पदे ॥१२९॥
स्वस्तिकः कलशो नन्द्या-वर्तः श्रीवत्स-विष्टरे । भद्रासनं तथा वर्ध-मानो मत्स्ययुगं बभुः ॥१३०॥
पताकाश्च ध्वजाश्छत्रं, ततश्चेलुः सहस्रशः । खड्ग-तोमर-शकुन्त-फलकग्राहका नराः ॥१३१॥
चन्द्रहासधरा शस्त्री-धारकाश्च धनुर्धराः । तस्मादनु गजानीकं, हयानीकं ततोऽचलत् ॥१३२॥
कुर्वाणा नर्म केचिच्च, जय नन्द प्रजल्पकाः । पित्रादिबिरुदश्रेणीं, जल्पन्तश्चाचलन् पुनः ॥१३३॥
ततो भूपास्ततः श्रेष्ठि-सार्थवाहाश्च मन्त्रिणः । सामन्ताः सेल्लहस्ताश्च, ततः श्रीगरणाः पुनः ॥१३४॥
देवा देव्योऽचलन्व्योम्नि, गायन्त्यो मधुरध्वनि । प्रभोरास्यं प्रपश्यन्त-श्चेलुर्निर्निमिषेक्षणाः ॥१३५॥
भगवान् शिबिकारूढो, देवक्ष्मापनतोऽचलत् । **पद्मसेन**नृपो हस्त्या-रूढश्छत्रधरोऽचलत् ॥१३६॥

प्रभोरन्ये सुता मातङ्गमारूढास्ततोऽचलन् । चतुरङ्गचमूः स्वामि-पृष्ठितश्चलिता ततः ॥१३७॥
एवंविधे महे जाय-माने श्री**अर**चक्रिराट् । **हस्तिनागपुरो**ल्लासि, सहस्राम्रवणं ययौ ॥१३८॥
उत्तीर्य शिबिकायाश्चो-त्तार्य चाभरणादिकम् । प्रभुर्मुमोच सौधर्म-स्वामिहस्तकृताञ्जलौ ॥१३९॥
जन्मतो हायनेषु **त्रि-षण्मि**तेषु गतेषु च । मार्गश्वेतभवानीश-तिथौ च पश्चिमेऽहनि ॥१४०॥
रेवतीस्थे निशानाथे, षष्ठभक्ततया पुनः । चतुःसहस्रभूपाल-युतोऽजनि प्रभुस्तदा ॥१४१॥
कुमारपदवीराज्य-दीक्षाज्ञानेषु च क्रमात् । एकविंशसहस्राणि, वर्षाणामभवन् प्रभोः ॥१४२॥
उक्तं च –
एमेवय अरजिणिंदस्स, चउसु वि ठाणेसु हुंति पत्तेअं । इगवीससहस्साइं, वासाणं हुंति नायव्वा ॥१४३॥
एकं दिव्याम्बरं शक्रः, प्रभोः स्कन्धे न्यधात्तदा । पञ्चमुष्ट्या कचोत्पाटं, चक्रे **चाऽरजिनेश्वरः** ॥१४४॥
नीत्वा शक्राञ्जलौ केशान्, क्षीराब्धौ न्यक्षिपन्मुदा । कोलाहलं नृदेवानां, शक्रो निषिद्धवान् पुनः ॥१४५॥
ततः पूर्वमुखीभूत्वा [भूय], कृत्वा तीर्थनमस्कृतिः । सर्वसावद्यसंयोगं, सामायिकव्रतं ललौ ॥१४६॥
प्रभुणात्ते व्रते जज्ञे, मनःपर्ययवित् क्षणात् । तदानीं नारकानां तु, प्रादुरासन् सुखं क्षणम् ॥१४७॥
यतः –
तिहिं नाणेहिं समग्गा तित्थयरा जाव हुंति गिहिवासे । पडिवन्नंमि चरित्ते चउनाणी छउमत्था ॥१४८॥
**पद्मसेन**सुतः कोटीं, बह्वीं हेम्नां व्ययत्तदा । प्रभोर्दीक्षोत्सवं स्फारं, चमत्कारकरं व्यधात् ॥१४९॥
दीक्षामहोत्सवं कृत्वा, चतुःषष्टिः सुराधिपाः । नत्वा प्रभुपदौ **नन्दी-श्वरे** तीर्थे समागमन् ॥१५०॥
तत्राष्टौ दिवसान् चारू-त्सवं कृत्वा महत्तमम् । निखिला वासवाः स्वस्व-स्थानके समुपाययुः ॥१५१॥
**पद्मसेन**नृपः स्वामि-पुत्रः स्वामिपदाम्बुजम् । प्रणम्य स्वपुरीमध्ये, ययौ प्रभोर्गुणान्स्मरन् ॥१५२॥
विहृत्याऽथ पुरात्तस्माद्, गत्वा **राजपुरा**न्तिके । कार्योत्सर्गे स्थितः स्वामी, रात्रौ निष्कम्पमानसः ॥१५३॥
प्रभुः षष्ठतपःप्रान्ते, भ्रमन् **राजपुरा**न्तरे । भिक्षायै प्रययौ गेहे**ऽपराजित**महेशितुः ॥१५४॥
वीक्ष्या**ऽपराजितो** गेहाऽऽगतं तपस्विनं च तम् । **हृष्टः** कृत्वाऽञ्जलिं प्राह, लाहि त्वं पायसं त्विदम् ॥१५५॥
भावं सर्वोत्तमं तस्य, शुद्धं चान्नमवेत्य च । प्रभुः पारणकं चक्रे-**ऽपराजिता**लये तदा ॥१५६॥
सार्द्धद्वादशरत्नानां, कोटीनां वृष्टिमादधुः । भिक्षाक्षणे प्रभोर्देवा, **अपराजित**मन्दिरे ॥१५७॥
प्रभोर्दानप्रभावेणा-**पराजित**गृहेश्वरः । स्तोककालाद्दिवं गत्वा, मुक्तिपुर्यां गमिष्यति ॥१५८॥
यतः –
सव्वेहिं पि जिणेहिं जहीइं लद्धाउ पढमभिक्खाओ । तहीअं वसुहाराओ वुट्ठाओ पुप्फवुट्ठीओ ॥१५९॥
अद्धतेरसकोडी, उक्कोसा तत्थ होइ वसुहारा । अद्धतेरसलक्खा, जहन्नीआ होइ वसुहारा ॥१६०॥
सव्वेसिं पि जिणाणं जेहिं दिन्नाउ पढमभिक्खाओ । तयपणु पिज्जदोसा दिव्ववर परक्कमा जाया ॥१६१॥
केई तेणेव भवेण निव्वूआ सव्वकम्मउम्मुक्का । अन्ने तईअभवेणं सिज्झिस्संती जिणसगासं ॥१६२॥
ग्रामाद् ग्रामं प्रभुः कुर्वन्, विहारं मौनसंयुतः । अजैषीद्भावविद्वेषि-चमूं दृढतमां द्रुतम् ॥१६३॥
इतो द्रव्यरिपून् भूरीन्, **पद्मसेनो** महीपतिः । जित्वा निष्कण्टकं राज्यं, कुरुते स्म नयात्तदा ॥१६४॥

गृहीतसंयमे सार्व-भौमे जीवति सन्ततम् । वैताढ्यस्य गुहे द्वे तु, उद्धटे भवतः स्म च ॥१६५॥
यक्ष-राक्षस-मर्त्यादि-कृतोपसर्गसन्ततिम् । सहमानः प्रभुर्ग्रामाद्, ग्रामं विहरते स्म सः ॥१६६॥
विहरन् सन्ततं स्वामी, क्षिपन् कर्मततिं क्रमात् । **हस्तिनाग**पुरोद्याने, तस्थौ तीव्रतपःपरः ॥१६७॥
कार्तिकश्वेतद्वादश्यां, रेवतीगे निशाकरे । उत्तीर्णषष्ठतपसः, प्रभोः पूर्वेहनि द्रुतम् ॥१६८॥
शुक्लध्यानाधिरूढस्य, क्षिपतः कर्मणां ततिम् । उत्पन्नं केवलज्ञानं, लोकालोकप्रकाशकम् ॥१६९॥ युग्मम् ॥
तदा तत्र समागत्य, भूमिं योजनमात्रकाम् । शोधयन्त्यभितो वायु-कुमारा भक्तिपूरिताः ॥१७०॥
ततः सुगन्धनीरेण, तत्र वर्षन्ति वारिदाः । ऋतुदेवास्ततः पुष्प-वृष्टिं वितन्वते वराम् ॥१७१॥
ततो भूमितलं स्वर्ण-रूप्यरत्न-विचित्रितम् । व्यन्तरा विदधुश्चाभ्य-न्तरमध्यबहिः क्रमात् ॥१७२॥
वप्रास्त्रयो मणी-स्वर्ण-कलधौतमया वराः । मणि-रै-राजतास्तेषां, रोचिष्णुकपिशीर्षकाः ॥१७३॥
कृता वैमानिक-ज्योति-ष्किक-पातालवासिभिः । वृत्ते वप्रे त्रयस्त्रिंश-त्चापार्धा त्रिंशदङ्गुलाः ॥१७४॥
पृथुला भित्तयः पञ्च-शतचापोच्चताश्रिताः । षड्विंशतिशतेष्वेषां, अन्तरं द्वारयोर्द्वयोः ॥१७५॥
वृत्ता वप्राश्चतुर्द्वारा, विराजन्ते मनोहराः । चतुरस्रा भवन्त्येक-शतचापोच्चयाश्रिताः ॥१७६॥
सार्धक्रोशान्तरं चाद्य-द्विकयोः क्रोश एककम् । अन्तरं वप्रयोः प्रोक्तं, द्विकतृतीययोर्बुधैः ॥१७७॥
वृत्तवप्रदवप्रोक्तं, शेषं च चतुरस्रके । सोपानकसहस्राणि, दशहस्तपृथूच्चताः ॥१७८॥
अथ तानि समुल्लङ्घ्य, वप्र आद्योऽस्ति भूतलात् । तत्राऽस्ति प्रतरः पञ्चा-शद्धनूंषि समावनि ॥१७९॥
ततः पञ्चसहस्राणि, सोपानकानि रेजिरे । तत्र वप्रो द्वितीयोऽथ, प्रतरः पूर्वप्रमाणकः ॥१८०॥
ततः पञ्च सहस्राणि, सोपानकानि रेजिरे । ततो वप्रस्तृतीयोऽभूत्, षड्विंशति शता नतः ॥१८१॥
तत्र पीठं त्रिसोपानं, चतुर्द्वारविराजितम् । तन्मध्ये पीठिकां रत्न-मयीं जिनतनूच्चकाम् ॥१८२॥
शतद्वयतनुर्दीर्घ-पृथु, तच्च विभासते । सार्धक्रोशद्वयाद्भूमी-तलात्तच्च निगद्यते ॥१८३॥
जिनाङ्गाद् द्वादशगुणो-च्चोऽशोकधरणीरुहः । साधिकं योजनं विस्ता-रतः सच्छायशीतलः ॥१८४॥
तस्याधस्ताच्चतुर्दिक्षु, रैविष्टरचतुष्टयी । सपादपीठिका रम्या, विदधे निर्जरैर्वरैः ॥१८५॥
विष्टराणां तदा चोर्द्ध्वं, छत्राणां च त्रयी त्रयी । तत्रैशानविदिक्कोणे, देवच्छन्दो विराजते ॥१८६॥
स्वामिरूपोपमं रूप-त्रयं देवकृतं व्यभात् । तेषां पुरः सुरास्तस्थु-श्चारुचामरधारकाः ॥१८७॥
चतुर्दिक्षु विभान्ति स्म, धर्मचक्रचतुष्टयी । आख्यातुं किं वृषं दाना-दिकं चतुर्विधं जने ॥१८८॥
मत्स्यच्छत्रध्वजाः पञ्चा-लिकाऽष्टमङ्गलानि च । दाम-कुम्भौ मणी-धूप-घटीसत्तोरणस्थितिम् ॥१८९॥
प्रतिद्वारं वितन्वन्ति, व्यन्तरा प्रभुभक्तितः । योजनानां सहस्रोच्चा, दण्डाश्चतुर्ध्वजान् पुनः ॥१९०॥
प्रविश्य पूर्वया स्वामी, कृत्वा प्रदक्षिणात्रयम् । तीर्थाय नम इत्युक्त्वो-पविष्टः पूर्वविष्टरे ॥१९१॥
साधु-वैमानिकी साध्व्यः, कुशानुदिश्युपाविशन् । भवनपति-ज्योतिष्क-देव्यो नैर्ऋतिसंस्थिताः ॥१९२॥
कल्पामरा नरा नार्य, ऐशानविदिशि स्थिताः । भवनपति-ज्योतिष्का, वायव्यां विदिशि स्थिताः ॥१९३॥
चतुर्देव्यः श्रमणाश्च, ऊर्द्धवस्था एकमानसाः । उपविष्टाश्चतुर्देवा, नरा नार्यश्च साधवः ॥१९४॥

वप्रे द्वितीये तिर्यञ्च-श्चतुर्थे वाहनानि च । चतुरस्त्रे विभासेते, वाप्यौ द्वे द्वे विदिक्स्थिते ॥१९५॥
वाप्यैकैका विदिग्भागे, वृत्ते वप्रे विभासते । इत्यादि वप्रसम्बन्धं, ज्ञेयं स्तोत्राद्विचक्षणैः ॥१९६॥
एवं तु विविधा देवाः, आग्नेय्यादिविदिक्स्थिताः । शुश्रुवुः स्वामिनोऽ**रस्य**, वाणीं योजनगामिनीम् ॥१९७॥
यतः –
देवा देवीं नरा नारीं, शबराश्चापि शाबरीम् । तिर्यञ्चोऽपि हितैरश्चीं, मेनिरे भगवद्गिरम् ॥१९८॥
प्रभोर्ज्ञानं समुत्पन्नं, निशम्योद्यानपालकात् । **पद्मसेन**नृपो दानं, प्रददौ पारितोषिकम् ॥१९९॥
यतः –
वित्तीओ सुवन्नस्स बारस अद्धं च सयसहस्साइं । तावईअं चिअकोडी पीईदाणं तु चक्कीणं ॥२००॥
एए चेव पमाणं नवरं रययं तु केसवा दिंति । मंडलिआण सहस्सा वित्ती पीई सयसहस्सा ॥२०१॥
भत्तिविहवाणुरूवं अन्नेवी अर्दिति इंदमाईआ । सोऊण जिणागमणं निउत्तमनिओ इएर्सि वा ॥२०२॥
देवाणुवित्तिभत्तीपूआथिरकरण-सत्त अणुकंपा । माओदयदाणगुणापभावणे चेव तित्थस्स ॥२०३॥
ततोऽखण्डाक्षतानां वा, बलिमाढकसम्मितम् । रन्धनेनान्नमुर्वीशः, **पद्मसेनो** व्यधापयत् ॥२०४॥
तं लात्वाऽभ्येत्य समव-सरणे भूरिभूपयुग् । त्रिः प्रदक्षिणयामास, स्वामिनो मुदिताशयः ॥२०५॥
ततो महीपतिर्व्योम्नि-विघ्नोपशमहेतवे । बलिमुच्छालयामास, नराऽमरसमन्वितः ॥२०६॥
यतः –
रायातरायमच्चो तस्सासइ पुरजणवओवावि । दुब्बलिखंडियबलिछडियतंडुलाणाढयं कलमा ॥२०७॥
भाईअ पुणाणीआणं अखंडफुडीआण फलसरिस्साणं । कीरइ बली सुरावीअ तत्थेव छुहंति गंधाई ॥२०८॥
बलिपवसणसमकालं पुव्वद्दारेण ठाइ परिकहणा । तिगुणं पुरओ पाडणा तस्सद्धं अपडीअ देवा ॥२०९॥
अद्धद्धं अहिवइणा अवसेसं होइ पागयजणस्स । सव्वामयप्पसमणी कुप्पइ नन्नोअ छम्मासा ॥२१०॥
प्रणम्याथ प्रभोः पादौ, **पद्मसेन**नराधिपः । उपाविशद् यथास्थानं, श्रोतुं धर्मं जिनोदितम् ॥२११॥
सन्देहान् सर्वजीवानां, सद्यः स्फेटयितुं तदा । दिदेश देशनां स्वामी, स्वर्गापवर्गशर्मदाम् ॥२१२॥
यतः –
आसर्वार्थं जिनतनुमतां, यत्र संस्थो व्यपास्यत्, संख्यातीतानपि च युगपत्, संशयानेकवाचा ।
धर्मं स्मात्थ त्रिभुवनगुरोः पर्षदां द्वादशानां । अग्लान्याद्द्विः प्रतिदिनमहो विष्टपानुग्रहस्ते ॥२१३॥
देवा देवीं नरा नारीं, शाबराश्चापि शाबरीम् । तिर्यञ्चोऽपि हि तैरश्चीं, मेनिरे भगवद्गिरम् ॥२१४॥
चुल्लगपासगधन्ने जूए रयणे अ सुविणचक्के अ । चम्मदुगे परमाणू दसदिट्ठंता मणूअलंभे ॥२१५॥
विप्रः प्रार्थितवान् प्रसन्नमनसः, श्री**ब्रह्मदत्तात्**पुरा, क्षेत्रेऽस्मिन् भरतेऽखिले प्रतिगृहं, मे भोजनं दापय ।
इत्थं लब्धवरो धनेष्वपि कदाऽप्यश्नात्यहो द्विः स चेत्, भ्रष्टो मर्त्यभवात् तथाप्यसुकृती, भूयः समाप्नोति नो ।२१६।
**चुल्लगा ॥**

स्तम्भानां हि सहस्रमष्टसहितं, प्रत्येकमष्टोत्तरं, कोणानां शतमेषु तानपि जयेद्, द्यूतेऽथ तत्सङ्ख्यया ।
साम्राज्यं जनकात्पुनः स लभते, स्याच्चेदिदं दुर्घटं, भ्रष्टो मर्त्यभवात् तथाप्यसुकृती, भूयः समाप्नोति नो ॥२१७॥
**पाशकः ॥**

वृद्धा काऽपि पुरा समस्तभरते, क्षेत्रस्य धान्यावलिं, पिण्डीकृत्य च तत्र सर्षपकणान्, क्षिप्त्वाढकेनोन्मियात् ।
प्रत्येकं हि पृथक्करोति किल सा, सर्वाणि चान्नानि चेत्, भ्रष्टो मर्त्यभवात् तथाप्यसुकृती भूयः समाप्नोति नो ।२१८।
सिद्धद्यूतकलाबलात् धनिजनं, जित्वाऽथ हेम्नां भरैश्चाणक्येन नृपस्य कोशनिवहः, पूर्णीकृतो हेलया ।
दैवादाद्यजनेन तेन स पुनर्जीयेत मन्त्री क्वचित्, भ्रष्टो मर्त्यभवात् तथाप्यसुकृती, भूयः समाप्नोति नो ।२१९।
रत्नान्याढ्यसुतैर्वितीर्य वणिजां, देशान्तरादीयुषां, पश्चात्तापवशेन तानि पुनरहो, दातुं कृतोपक्रमैः ।
लभ्यन्ते निखिलानि दुर्घटमिदं, दैवाद्धटेत क्वचित्, भ्रष्टो मर्त्यभवात् तथाप्यसुकृती, भूयः समाप्नोति नो ।२२०।
स्वप्ने कार्पटिकेन रात्रिविगमे, श्रीमूलदेवेन चेत्, प्रेक्ष्येन्दुं सकलं कुनिर्णयवशादन्त्यं फलं प्राप्यते ।
स्वप्नस्तेन पुनः स तत्र शयिते नालोक्यते कुत्रचित्, भ्रष्टो मर्त्यभवात् तथाप्यसुकृती, भूयः समाप्नोति नो ।२२१।
राधाया वदनादधः क्रमवशाच्चक्राणि चत्वार्यपि, भ्राम्यन्तीह विपर्ययेण तदधो धन्वी स्थितोऽवाङ्मुखः ।
तस्या वामकनीनिकामिषुमुखेनैवाथविध्यत्यहो, भ्रष्टो मर्त्यभवात् तथाप्यसुकृती, भूयः समाप्नोति नो ।२२२।
दृष्ट्वा कोऽपि हि कच्छपो ह्रदमुखे, सेवालबन्धच्युतेः, पूर्णेन्दुमुदितं कुटुम्बमिह तद्द्रष्टुं समानीतवान् ।
सेवाले मिलिते कदापि स पुनश्चन्द्रे कलां लोकते, भ्रष्टो मर्त्यभवात् तथाप्यसुकृती, भूयः समाप्नोति नो ।२२३।
शम्पा पूर्वपयोनिधौ निपतिता, भ्रष्टं युगं पश्चिमाम्भोधावुद्धुरवीचिभिश्च सुचिरात्संयोजितं तद् द्वयम् ।
शम्पा सा प्रविशेद् युगस्य विवरे, तस्य स्वयं काऽपि चेत्, भ्रष्टो मर्त्यभवात् तथाप्यसुकृती, भूयः समाप्नोति नो ॥२२४॥
चूर्णीकृत्य पराक्रमान्मणिमयं स्तम्भं, सुरा क्रीडया, मेरौ सन्नलिकासमीरवशतः, क्षिप्त्वा रजो दिक्षु चेत् ।
स्तम्भं तैः परमाणुभिः सुमिलितैः, कुर्यात्स चेत् पूर्ववत्, भ्रष्टो मर्त्यभवात् तथाप्यसुकृती, भूयः समाप्नोति नो ॥२२५॥

उक्तं च –

पुव्वंते हुज्ज जुगं अवरंते तस्स हुज्ज समिलाओ । जुगछिड्डुंमिपविसे इअ संसइओ मणुअलंभो ॥२२६॥
जह समिला पब्भट्ठा सागरसलिले अणोरपारंमि । पविसिग्गाजुगछिड्डुं कहवि भमंती भमंतंमि ॥२२७॥
सा चंडवायवीई पणुल्लीआ अवि लभिज्ज जुगछिड्डुं । भय मानुसाओट्ठो, जीवो पुण पडिमाणुसं लहइ ॥२२८॥
इयदुल्लहलंभं माणुसत्तणं पाविऊण जो जीवो । न कुणइ पारत्तहियं सो सोयइ संकमणकाले ॥२२९॥
जहवारिमज्झबुड्डुव्व गयवरो मच्छउव्व गलगहिओ । वग्गुरपडिओव्व मओ संवट्टमिओ जहव पक्खी ॥२३०॥
सो सोअइ मच्चुजरा समुत्थु(त्थि)ओ तुरिय मिद्दपक्खित्तो । तायारमविंदंतो कम्मभरपणुल्लिओ जीवो ॥२३१॥

**इत्यादिमानुष्यभवे दृष्टान्ताः ॥**

जीवाजीवादितत्त्वानि, ज्ञात्वा जीवदयां जनः । यः पालयति मुक्तिं स, **लक्ष्मीचन्द्र** इवाश्रयेत् ॥२३२॥

तथाहि –

**श्रीशालनगरे लक्ष्मी-चन्द्रस्य** मेदिनीपतेः । पत्नी **श्री**रभवत् पुत्राः, सप्ताभूवंश्च सुन्दराः ॥२३३॥
**श्रीवच्छ-वच्छ-भूवच्छ-हंस-हीर-हराऽमराः** । सप्तापि तनयाः पेठुः, शास्त्राणि विबुधान्तिके ॥२३४॥

यत: —

जायंमि जीवलोए दो चेव नरेण सिक्खिअव्वाइं । कम्मेण जेण जीवइ, जेण मूओ सुग्गइं जाइ ॥२३५॥

**कलावत्य**भिधा पत्नी, द्वितीया भीमनन्दिनी । परिणीता महीशेन, **लक्ष्मीचन्द्रे**ण सूत्सवम् ॥२३६॥

विनीतास्तनया: सर्वे, पृथक् पृथक् महीभुजाम् । नन्दिन्य: सुन्दराकारा, भूपेन परिणायिता: ॥२३७॥

यत: —

विनयं राजपुत्रेभ्य:, पण्डितेभ्य: सुभाषितम् । अनृतं द्यूतकारेभ्य:, स्त्रीभ्य: शिक्षेत कैतवम् ॥२३८॥

क्रमात्तस्य **श्रिया** पत्न्या, जनितं नन्दिनीद्वयम् । आद्या **श्रीमदना लक्ष्मी-वत्याह्वा**ऽन्या निगद्यते ॥२३९॥

ते अपि पण्डितोपान्ते, पठन्त्यौ शास्त्रमन्वहम् । यौवनं प्रापतुर्यूनां, मनोमोहनकारकम् ॥२४०॥

अन्येद्युर्भूभुजा पुत्र्यौ, द्वे अपीति प्रजल्पिते । कस्यैव कर्मणा सातं, युवाभ्यां भुज्यतेऽधुना ॥२४१॥

आद्याऽवदत् त्वदीयस्य, तातपाद ! प्रसादत: । द्वितीयाऽऽह स्वकर्मैव, दत्ते सुखाऽसुखे नृणाम् ॥२४२॥

यत: —

सुख-दु:खानां कर्ता हर्ता च न कोऽपि कस्यचिज्जन्तो: । इति चिन्तय सद्बुद्ध्या, पुरा कृतं भुज्यते कर्म ॥२४३॥

राजाऽऽहाऽहमकार्षं त्वां, सुखिनीं नन्दिनि ! ध्रुवम् । स्वन्नपानप्रदानेना-थैवं किं जल्प्यते त्वया ? ॥२४४॥

यद्येवं मन्यसे कर्म, कृतं तर्हि दरिद्रिणे । त्वां दास्यामि ततस्तत्र, सुखिनी वीक्ष्यसे तदा ॥२४५॥

पुत्र्यवग् यदि नि:स्वाया-ऽनि:स्वाय वा प्रदास्यसि । तथापि प्राक्कृतं कर्म, भोक्ष्येऽहमशुभं शुभम् ॥२४६॥

यत: —

जं विहि करइ स होइ, होइ न जं जीय चींतवइ । ईह मइं चिंति पडेइ आहट दोहट केवले ॥२४७॥

रुष्टो नृपोऽथ नि:स्वाय, **समराय** ददौ सुताम् । वृद्धां पुत्रीं **मुकुन्दोर्वी**-पतेर्भीमसुताय च ॥२४८॥

तस्या: पुत्र्याश्च जामातु:, **कुम्भ्यश्वादिविभूषणम्** । बहुमूल्यं ददौ वर्यमान-सन्मानपूर्वकम् ॥२४९॥

स **भीमो मदनां** पत्नीं, परिणीय वरोत्सवम् । **गन्धारनगरे** गत्वा-ऽपासीद् राज्यं नयाध्वना ॥२५०॥

अकस्मादन्यदाऽभ्येत्य, गोत्रिभूपैर्बलोत्कटै: । तत्पुरं वेष्टितं युद्धं, कुर्वाणैर्निर्दयं भृशम् ॥२५१॥

स **भीमो**ऽल्पबलं वैरि-बलं सङ्ख्यातिगं तदा । दृष्ट्वा भीत: प्रियायुक्तो, नष्टश्छन्नो दिनात्यये ॥२५२॥

दु:खेनाथ व्रजन्मार्गे, बिभ्यद् गोत्रिमहीपते: । **कमलाह्वे** पुरेऽभ्येत्य, तस्थौ **भीम:** प्रियासख: ॥२५३॥

यत: —

न जानाति नृप: कर्तुं, व्यवसायादिकं मनाक् । अत: पत्न्यन्यगेहेषु, कर्म कृत्वाऽनयद्दिनान् [त्कणान्] ॥२५४॥

तै: कणैरुदरं दु:खात्, भूप: पत्नीसमन्वित: । नयन् वर्षप्रमाणानि, दिनानि तत्र तस्थिवान् ॥२५५॥

यत: —

बद्धा येन दिनाधिपप्रभृतयो, मञ्चस्य पादे ग्रहा:, सर्वे येन कृता कृताञ्जलिपुटा:, शक्रादिदिक्पालका: । लङ्का यस्य पुरि समुद्रपरिखा, सोऽप्यायुष: संक्षये, कष्टं विष्टपकण्टको दशमुखो, दैवाद् गत: पञ्चताम् ॥२५६॥

करोमि न करोमीति, चेत: किं परितप्यसे । सम्पत्तौ च विपत्तौ च, विधिरेव समुत्सुक: ॥२५७॥

इतः स **समरो** दुःस्थः, क्षत्रियो भूमिभुक्सुताम् । परिणीय पुरोद्याने, समेतोऽवक् प्रियां प्रति ॥२५८॥
गच्छ स्वच्छे ! पितुर्गेहं, मन्यस्व पितृजल्पितम् । यतस्त्वां महते भूप-सूनवे ददते[दास्यते]पिता ॥२५९॥
मम पार्श्वे धनं नास्ति, धान्यं वाऽप्यम्बरं पुनः । तेन त्वं दुःखिनी भूत्वा, मरिष्यसि मृगेक्षणे ! ॥२६०॥
त्वं तु प्रौढकुलोद्भूता, हीनकुलभवोऽस्म्यहम् । सदृशैः सदृशैर्योगः, शोभते नापरैः पुनः ॥२६१॥
मृगा मृगैः सङ्गमनुव्रजन्ति, मूर्खाश्च मूर्खैः सुधियः सुधीभिः ।
गावश्च गोभिस्तुरगास्तुरङ्गैः, समानशीलव्यसनेषु योगः [सख्यम्] ॥२६२॥
**लक्ष्मीवती** जगौ कान्त !, त्वयैवं किं प्रजल्प्यते । दुःस्थो वा धनवान् कुष्ठ्य-कुष्ठी वा न स्त्रियोज्झ्यते ॥२६३॥
यतः –
भरितं जायते रिक्तं, रिक्तं च भरितं भवेत् । अरघट्टघटीन्यायात्, शुभाऽशुभवृषोदयात् ॥२६४॥
ततः स **समरो** दध्या-वीदृशी प्रेयसीतमा । नहि भाग्यं विना पुंसा, लभ्यते मेदिनीतले ॥२६५॥
यतः –
आदौ धर्मधुरा कुटुम्बनिचये, क्षीणे च सा धारिणी, विश्वासे च सखी हिते च भगिनी, लज्जावशाच्च स्नुषा ।
व्याधौ शोकपरिवृतेव जननी, शय्यास्थिते कामिनी, त्रैलोक्येऽपि न विद्यते भुवि नृणां, भार्यासमो बान्धवः ॥२६६॥
ततः पत्नीयुतो गच्छन्, गतः **श्रीनगरान्तिके** । तत्र रात्रौ स्थिते तस्मिन्, देवोऽभ्येत्यैक ऊचिवान् ॥२६७॥
तव पत्न्या कृतं पुण्यं, यत्प्राग्भवे तु भावतः । तस्योदयादहं तुष्टो, गृहाणात्र स्थितं निधिम् ॥२६८॥
यतः –
पदे पदे निधानानि, योजने रसकूपिका । लभन्ते पुण्यहीना न, बहुरत्ना वसुन्धरा ॥२६९॥
ततस्तत्र स्थितं प्रौढं, निधिमाकृष्य भूमितः । दीनाराणां सहस्राणि, दशाऽऽदात्**समरः** स च ॥२७०॥
दीनारैः पञ्चभिस्तार्क्ष्यं, वर्यमेकं ललौ च सः । पुरीमध्ये ततो वास-मकार्षीच्च प्रियान्वितः ॥२७१॥
इतस्तत्र पुरेऽकस्मा-द्वैद्यैश्चिकित्सितोऽपि च । अपुत्रको नृपो देव-लोकमसाधयद् ध्रुवम् ॥२७२॥
मृतकृत्ये कृते तस्य, पञ्चदिव्यप्रयोगतः । तद्राज्यं मन्त्रिभिर्दत्तं, **समराय** महात्मने ॥२७३॥
तत्र कारयतस्तस्य, चित्रशालां नरेशितुः । दीनारकोटिभिः पूर्णं, निधानं निर्ययौ क्षितेः ॥२७४॥
यतः –
दुर्वारा वारणेन्द्रा जितपवनजवा, वाजिनः स्यन्दनौघा, लीलावत्यो युवत्यः प्रचलितचमरैर्भूषिता राज्यलक्ष्मीः ।
उच्चैः श्वेतातपत्रं चतुरुदधितटी, सङ्कटा मेदिनीयं, प्राप्यन्ते यत्प्रभावात्त्रिभुवनविजयी, सोऽस्तु धर्मः शिवाय ।२७५।
**लक्ष्मीवती** जगौ कान्त !, भवतः सुशुभोदयात् । राज्यं निधिद्वयं चापि, जातं यशश्च निर्मलम् ॥२७६॥
पुण्यं विना न कस्यापि, जायते शर्म कर्हिचित् । पुण्यं मान्यमतः सर्वै-र्जनैः स्वहितमिच्छुभिः ॥२७७॥
ततः स **समरः** पृथ्वीं, साधयन् वैरिभूभुजः । **श्रीशाल**नगरे यातो, जेतुं तत्रत्यभूपतिम् ॥२७८॥
**लक्ष्मीचन्द्रो** महीपालः, सन्नह्य स्वबलं दृढम् । संमुखो निर्ययौ पुर्या, जेतुं **समर**भूपतिम् ॥२७९॥
जायमाने महायुद्धे, **लक्ष्मीचन्द्रं** महीपतिम् । बबन्ध **समरो** भूपो, नागपाशेन निर्दयम् ॥२८०॥

बद्धे तस्मिन् महीपाले, **समरेण** महीभुजा । नष्टा दिशो दिशं सर्वे, सेवकास्तस्य तत्क्षणम् ॥२८१॥
यतः –
देवहीनं देवकुलं, पुत्रहीनं कुलं पृथु । हता रूपवती वन्ध्या, हतं सैन्यमनायकम् ॥२८२॥
किं करोति नरः प्रायः, प्रेर्यमाणः स्वकर्मभिः । प्रायेण हि मनुष्याणां, बुद्धिः कर्मानुसारिणी ॥२८३॥
बद्धं स्वजनकं श्रुत्वा, **लक्ष्मीवती** नृपप्रिया । बन्धनान्मोचयामास, स्वकीयपतिपार्श्वतः ॥२८४॥
**लक्ष्मीचन्द्रो** नृपः पुत्री-मुपलक्ष्य क्षणादपि । जामातरं च संप्राप्त-राज्यं जज्ञौ जनाऽऽननात् ॥२८५॥
इतोऽकस्मात्समेत्यैकः, पुमान् **लक्ष्मीवती**पुरः । जगौ ते भगिनी दुःस्था, दृष्टा **श्रीकमले** पुरे ॥२८६॥
रलन्ती **मदना**ऽन्येषां, गृहेषु कर्मकृत्यतः । धान्यमानीय दुःखेन, पतिं जीवयति ध्रुवम् ॥२८७॥
ततो **लक्ष्मीवती** स्वीयनरान् प्रेष्य निजालये । **आनैषीन्मदनां** तादृक्, कान्तयुक्तां ततः पुरात् ॥२८८॥
जरद्वस्त्रां मलक्लिन्न-गात्रां दुर्बलविग्रहाम् । **लक्ष्मीवती** जगौ किं ते-ऽवस्थेदृक्षा समागमत् ॥२८९॥
ततोऽवग् **मदना** राज्य-गमनोदन्तमादितः । **लक्ष्मीवती** भगिन्यग्रे, पितुश्चापि पुरः पुनः ॥२९०॥
ततो **लक्ष्मीवती** वर्य-वस्त्रादिकविभूषणैः । भूषयामास भगिनीं, स्वन्नपानप्रदानतः ॥२९१॥
वर्याश्चाम्बरदानेन, भोजयित्वा वरासनैः । प्रीणयामास तातं स्वं, **लक्ष्मीवती** शुभाशया ॥२९२॥
**लक्ष्मीचन्द्रो** द्वयोः पुत्र्यो-र्दृष्ट्वा कर्म शुभाशुभम् । शृण्वत्सु भूरिलोकेषु, प्रोक्तवानेवमुच्चकैः ॥२९३॥
सर्वैर्जनैर्दृढं मान-नीयं कर्म शुभाशुभम् । स्वकृतं प्राग्भवोपात्तं, नान्यत् पित्रादिनिर्मितम् ॥२९४॥
खणि खांडउ खणि आथिलउ, खणि आखउ खणि लीह । दैवि न दीधा शशिहरह, सव्वे सरीखा दीह ॥२९५॥
के वंका के पद्धरा दीहा हुंति नराण । हरिस विसाय न आणीइ तिअ हीअइ अप्पाण ॥२९६॥
जे जिम जाइ दीहडा, ते तू तिमइ गमिज्ज । दिवासि हरि पतंग जिम बलतइ झंपामदेसि ॥२९७॥
जाओ ढीली गाजणइ अरिजाओखरसाणि । ताइंजि फाटी कांबली जा दीधी रुहमाणि ॥२९८॥
मसि विण माथामाहि आखरजे आगइ हुअ । अधिक न ओछा घाइं चहुराते चाचिग भणइ ॥२९९॥
मया मौढ्यादिदं प्रोक्तं, सुखिनो दुःखिनो नरान् । करोम्यहं मुधा ह्येतत्, कुर्यात्कर्म शुभाशुभम् ॥३००॥
अहं सर्वकुटुम्बस्य, भराम्युदरमन्वहम् । एवं केनापि न ध्येयं, भूपादिनिजैरपि ॥३०१॥
भूयो भूयो वदत्येवं, **लक्ष्मीचन्द्रे** महीपतौ । उत्थाय **समर**क्ष्मापो, ननाम श्वशुरक्रमौ ॥३०२॥
**लक्ष्मीवत्य**पि तातांह्री, नत्वा भक्त्या जगावदः । मान्यं कर्मकृतं सर्वं, त्वया तात ! शुभाशुभम् ॥३०३॥
ततः परस्परं सर्वे, **लक्ष्मीचन्द्रा**दयस्तदा । क्षमयामासुरायोज्या-ञ्जली यथोचितं मुदा ॥३०४॥
**समर**क्ष्मापतिर्गत्वा, **गन्धारनगरे**ऽन्यदा । निष्काश्य वैरिणस्तस्य, राज्यं **भीमाय** दत्तवान् ॥३०५॥
सम्मान्य श्वशुरं प्रेष्य, **श्रीशालनगरं** प्रति । **समरः** क्ष्मापतिः शत्रून्, साधयामास भूरिशः ॥३०६॥
अभ्येत्य स्वपुरे राजा, **समरः** पालयन् प्रजाः । धर्मकामानुरोधेन, बभूव सुखवांश्चिरम् ॥३०७॥
**लक्ष्मीवत्य**न्यदा सौख्य-सुप्ता स्वप्ने निशाकरम् । दृष्ट्वा वाऽचीकथत् प्रातः, पत्युरग्रे निशीक्षितम् ॥३०८॥
राजा जगौ शशाङ्कस्य, वीक्षणात्तव गेहिनि ! । भविष्यति सुतः शूरो, वीरः सौम्यश्च सुन्दरः ॥३०९॥

यतः –

चन्द्रं वा तरणिं वाऽपि, जिनबिम्बं नरेश्वरम् । या पश्येद्वनिता तस्याः, पुत्र एव वरो भवेत् ॥३१०॥

यस्तु पश्यति स्वप्नान्ते, राजानं कुञ्जरं हयम् । सुवर्णं देवतां वृषं, कुटुम्बं तस्य वृध्यति (वर्धते) ॥३११॥

प्रासादस्थोऽपि यो भुङ्क्ते, समुद्रं तरति स्वयम् । अपि दासकुलोत्पन्नः, सोऽपि राजा भविष्यति ॥३१२॥

श्रुत्वेति वचनं पत्युः, प्रमाणीकृत्य तत्क्षणात् । **लक्ष्मीवती** जगौ सत्यं, भूयात्ते जल्पितं पते ! ॥३१३॥

क्रमा**ल्लक्ष्मीवती** पुत्रं, प्रासूताऽनघवासरे । जन्मोत्सवे कृते पित्रा, **धीराह्वा**ऽजनि तस्य तु ॥३१४॥

वर्धमानः क्रमाद् **धीरः**, पपाठ सकलाः कलाः । रोच्यमानः स सर्वेषां, जनानामभवद् गुणैः ॥३१५॥

यतः –

गुणाः कुर्वन्ति दूतत्वं, दूरेऽपि वसतां सताम् । केतकीगन्धमाघ्राय, स्वयमायान्ति षट्पदाः ॥३१६॥

सत्पक्षा ऋजवः शुद्धाः, सकला गुणशालिनः । तुल्यैरपि गुणैश्चित्रं, सन्तः सन्तः शराः शराः ॥३१७॥

गुरुपार्श्वेऽन्यदा **धीरो**, गत्वा धर्मं जिनोदितम् । नत्वा न्यवीविशद्याव-त्तावत्प्राह गुरुस्त्विति ॥३१८॥

आसन्ने परमपए पावेयव्वंमि सयलकल्लाणे । जीवो जिणिंदभणिअं, पडिवज्जइ भावओ धम्मं ॥३१९॥

तं पुणह परिमाणं जं गहिलाण-वि रिद्धिडी । तं पुण्णपापअहिनाण जं गुणवंतह भुक्खडी ॥३२०॥

केऽपि सहस्रंभरयो, लक्षंभरयश्च केऽपि केऽपि नराः । नात्मंभरयः केचित्, फलमेतत् सुकृत-दुष्कृतयोः ॥३२१॥

धर्मं जीवदयामूलं, श्रुत्वा **धीरो** जगाविति । अपराधं विना जीवा, हिंसनीया मया नहि ॥३२२॥

**वीर**पुर्यां **धन**क्षोणी-पतेः पुत्रीं **मनोरमाम्** । स **धीरकुमर**श्चारू-त्सवेन परिणायितः ॥३२३॥

माता-पितृ-गुरुणां तुं, विनयं सततं करन् । श्लाघ्योऽजनि तु निःशेष-जनानां सद्गुणालिभिः ॥३२४॥

नगराद् बहिरुद्याने, गतो **धीरो**ऽन्यदा प्रगे । वैदेशिकं नरं प्रेक्ष्या-प्राक्षीत्कुत्रागतोऽसि भो ! ॥३२५॥

स नरः प्रोक्तवान् देशा-न्तरे भ्राम्यन् पदे पदे । **नवसारीपुरे** यान-पात्रमारूढवानहम् ॥३२६॥

भग्ने यानेऽचटद्धस्ते, फलकमेककं मम । विलग्नः फलके तस्मि-न्नभ्रमं दिवसत्रयम् ॥३२७॥

चतुर्थे दिवसे दैवयोगाद्वा-र्धिगते गिरौ । अगमं च ततस्तत्र, स्वस्थोऽभूवं क्षणादपि ॥३२८॥

तत्रस्थोऽहं फलाहारं, कुर्वन्नासन्नवारिधौ । वादित्राणां धमत्कारम-श्रौषं जलमध्यतः ॥३२९॥

ततोऽकस्माज्जले दूरी-भूते विपुलमन्दिरम् । पयःकान्तमयं सप्त-भौमं निरगमद् बहिः ॥३३०॥

तस्य वातायने सिंहा-सनस्था कन्यकैकका । देवकन्यासमानश्री-र्वीक्षिता मयका ध्रुवम् ॥३३१॥

तस्या एवोभयोः पार्श्वे, द्वे नार्यो चारुचामरे । ढालयन्त्यौ मया दृष्टे, ताभ्यां दृष्टोऽस्म्यहं पुनः ॥३३२॥

ताभ्यामुक्तं तवास्तीह, साहसं यदि मानसे । तदाऽत्रैत्य कनीमेनां, जल्पय त्वं यथारुचि ॥३३३॥

श्रुत्वेति यातुकामोऽहं, तत्रोदस्थां च यावता । तावत्तत्परितो वह्नि-ज्वालामाला मयेक्षिता ॥३३४॥

ज्वालाया ऊर्द्धर्वमेताभ्यां, नारीभ्यां नर्तितं तथा । यथा बिभ्यन्नहं तत्र, न गन्ता यावता ध्रुवम् ॥३३५॥

तावत् तत्सदनं वारि-मध्ये समगमत्क्षणात् । एवं मासद्वयं पश्यन्नहं तत्र स्थितः पुनः ॥३३६॥

ततस्तत्रेतभारण्ड-पक्षिपादावलम्बनात् । आगमं **चम्पकद्वीपो**-द्याने वारिधितीरगे ॥३३७॥

तत्रत्या एव भारण्डा, प्रत्यहं चुणिहेतवे । वार्धौ सिंहाचलोद्याने, गच्छन्ति त्वरितं प्रगे ॥३३८॥
**चम्कपद्वीपतो**ऽत्राहं, यानारूढः समागमम् । गमिष्यते मया **स्वर्ण-पुरे** स्वजनसन्निधौ ॥३३९॥
यतः –
जणणी जम्मभूमी य, पच्छिमनिद्दा सुभासिआ गुट्ठी । मणइट्ठं माणुस्सं, पंचविण दुक्खेण मुच्चंति ॥३४०॥
स **धीर**कुमरो भूरि-धनं तस्मै वितीर्य च । विससर्ज नरं तं तु, सद्वचोदानपूर्वकम् ॥३४१॥
स **धीरः** साहसी याना-रूढो द्वीपेऽथ **चम्पके** । जगाम निशि निर्गत्या-प्रकाश्य पितुरग्रतः ॥३४२॥
भारण्डपक्षिणस्तस्मात्, गच्छतः पदयोस्तथा । विलग्नः सदृढं **धीरो**, यथागार्त्सिहपर्वते ॥३४३॥
फलाहारं वितन्वानो, **धीरो** वैदेशिकोदितम् । आवासं सलिलादूद्र्ध्वं, निर्गतं दृष्टवान् स च ॥३४४॥
चामरग्राहिणीभ्यां तु, कुर्वतीभ्यां च नर्तनम् । प्रोक्तं भो नर ! यद्यस्ति, साहसं मानसे दृढम् ॥३४५॥
तदाऽत्रैत्य कनीमेना-मङ्गीकुरु सुरीनिभाम् । नो चेदत्रागतं त्वां तु, वह्निर्धक्ष्यति निश्चितम् ॥३४६॥
ततः स निर्भयो **धीरः**, कुमारः कृतसाहसः । यातुं तत्रोत्थितो याव-त्तावत्प्रासाद ईयिवान् ॥३४७॥
प्रासादं सलिले मग्नं, वीक्ष्य स धीरमानवः । पश्चात्स्वस्थानके तिष्ठन्, चमत्कारं चकार च ॥३४८॥
एवं सप्ताष्टघस्त्रेषु, गतेषु कुमरोऽन्यदा । गच्छत्प्रासादपृष्ठौ तु, झम्पां स साहसी ददौ ॥३४९॥
अम्भोऽधस्ताद् गतो धीरो, मध्येप्रासादमद्भुताम् । कन्यकां तां निरीक्ष्यावक्, काचित्त्वमिह कन्यके ! ॥३५०॥
अथ तत्सेविका कन्या-प्रेरिता हस्तसंज्ञया । जगौ वैताढ्यभूमिध्रो, विद्यते भूमिमण्डनम् ॥३५१॥
**मेघघोषाभिधो** व्योम-गामी भूरि खगाश्रितः । वसंस्तत्र गिरौ देव, इवास्ति सातवान् भृशम् ॥३५२॥
तस्य पत्नी **सुघोषाह्वा**-ऽभवत्पुत्री च **सुन्दरी** । भूरिविद्याः पिता तस्यै, दत्तवान् महिमाभृतः ॥३५३॥
सम्प्राप्तयौवनां पुत्रीं, दृष्ट्वा विद्याधरः स च । स्थाने स्थाने वरं वर्यं, वीक्ष्यते तनयोचितम् ॥३५४॥
यतः –
जंमंतीए सोगो, वुड्ढंतीए वुड्ढए चिंता । परिणीआए दंडो, जुवईपीआ दुक्खिओ निच्चं ॥३५५॥
निअघरसोसा परगेहमंडणी कलिकलंककुलभवणं । जेहिं न जाया धूआ ते सुहीआ जीवलोगंमि ॥३५६॥
अन्येद्युः स खगाधीश, उपविष्टः सभान्तरे । नैमित्तिकान्तिकेऽप्राक्षीत्, समस्ति मम नन्दिनी ॥३५७॥
तस्या एव वरो वर्यो, मया विलोकितोऽपि सन् । न दृष्टस्तेन वक्षि त्वं, वरं योग्यं ममाग्रतः ॥३५८॥
नैमित्तिको जगौ गेहं, नीरकान्तमयं वरम् । सप्तभौमं ज्वलद्वह्नि-भीमं गवाक्षशोभितम् ॥३५९॥
कृत्वा सिंहाचलोपान्ते, वार्धिमध्ये विमुच्य ताम् । तत्रेयं कन्यका स्थाप्या, सुसखीद्वयसंयुता ॥३६०॥ युग्मम् ॥
प्रगे प्रगे गृहं तच्च, निर्याति सलिलाद्बहिः । मुहूर्तादनु पानीय-मध्ये याति पुनः पुनः ॥३६१॥
तादृक्षे सदने तस्मिन्, साहसी यः समेष्यति । दिनोदये स कान्तस्ते, नन्दिन्याश्च भविष्यति ॥३६२॥
एवं नैमित्तिके प्रोक्ते, **मेघघोषः** खगेश्वरः । इमां पुत्रीमिहाम्भोधौ, मुमोचाऽस्मत्समन्विताम् ॥३६३॥
अत्रागतैर्नरैर्नैव, साहसं विहितं ध्रुवम् । त्वमेव दृश्यसेऽतीवसाहसी पुरुषोत्तम ! ॥३६४॥
अतः सम्भाव्यते त्वं तु, समेत्यात्र कनीमिमाम् । परिणेष्यसि सद्रूपः, सदाकारः शुभाशयः ॥३६५॥
साहसं स विधायाथ, ज्वलज्ज्वालाग्निना गृहे । **धीरो** यावद्ययौ कन्या-समीपे मुदिताशयः ॥३६६॥

तदाऽकस्मात्समायातो, राक्षसस्तां कनीं मुखे । अर्द्धां क्षिप्त्वा स्थितो याव-त्तावत्स कुमरो जगौ ॥३६७॥
यदि कन्यामिमामेव, गलिष्यति तु राक्षसः । भविष्यति तदा श्वभ्र-पातस्तव ध्रुवं द्रुतम् ॥३६८॥
जीवहत्या न कर्तव्या, स्वभावेन सुरैः क्वचित् । कन्या-गो-बाल-साधूनां, हन्ता भवति नारकी ॥३६९॥
यतः –
कृपानदीमहातीरे, सर्वे धर्मास्तृणाङ्कुराः । तस्यां शोषमुपेतायां, कियन्नन्दन्ति ते पुनः ॥३७०॥
अहिंसासम्भवो धर्मः, स हिंसातः कथं भवेत् । न तोयजानि पद्मानि, जायन्ते जातवेदसः ॥३७१॥
इक्कह जीविअ कारणि मारि म जीवसयाइं । अज्जकि काल्हिजि मरण तूं पामिसि दुक्खसयाइ ॥३७२॥
शतेषु जायते शूरः, सहस्रेषु च पण्डितः । वक्ता शतसहस्रेषु, दाता भवति वा न वा ॥३७३॥
न रणे निर्जिते शूरो, विद्यया न च पण्डितः । न वक्ता वाक्पटुत्वेन, न दाता धनदायकः ॥३७४॥
इन्द्रियाणां जये शूरो, धर्मं चरति पण्डितः । सत्यवादी भवेद्वक्ता, दाता भूताभयप्रदः ॥३७५॥
राक्षसोऽवग् भवान् जीव-दयां स्थापयसि ध्रुवम् । अहमेवास्मि जीवस्तु, जीविष्यामि विनाऽदनम् ॥३७६॥
बुभुक्षया मम प्राणाः, करिष्यन्ति प्रयाणकम् । हत्या मे मरणात्ते तु, लगिष्यति नरोत्तम ! ॥३७७॥
भक्षयित्वा कनीमेनां, भविष्याम्याशितम्भवः । त्वमेवातो व्रजान्यत्रो-पदेशं वितराऽत्र मा ॥३७८॥
इमां मोचयितुं वाञ्छा, यद्यस्ति ते कृपापरः । तदा मृगाजकासरा-दिकजीवं प्रदेहि मे ॥३७९॥
राजपुत्रो जगौ प्राणा-त्यये जीवं न हन्म्यहम् । यदि क्षुत्ते तदा हत्वा, मां भक्षयाऽऽसु कोणप ! ॥३८०॥
राक्षसोऽवग् नरः को हि, ज्वालयित्वात्मनो गृहम् । रक्षत्यन्यालयं मूढ !, मृतो नैष्यति मानव ! ॥३८१॥
ततो **धीरो** जगौ मुक्त्वा, कन्यामेनामिहाधुना । हत्वा मां मम मांसेन, सद्यस्त्वमाशितंभवः ॥३८२॥
एवं प्रोक्ते कुमारेण, रक्षोरूपं विहाय सः । देवो भूत्वा लसद्रूपो, **धीरं** प्रति जगावदः ॥३८३॥
वर्ण्यमानं भवन्तं तु, जीवरक्षाविधायकम् । शक्रेणाऽऽकर्ण्य गीर्वाणोः, परीक्षायामिहागमम् ॥३८४॥
त्वं साहसी दयावांस्त्वं, त्वं धीरोऽसि कृपापरः । चालितो नाचलद्धर्मा-दङ्गीकृतान्मनागिह ॥३८५॥
अतो विद्यां तु सर्वत्र-जयविजयकारिणीम् । गृहाण मामनुगृह्य, नरोत्तम ! कृपापर ! ॥३८६॥
यथारुचि कनीमेनां, गृहाण शीलशालिनीम् । मया मुक्तास्ति ते कृत्वा, परीक्षां साम्प्रतं द्रुतम् ॥३८७॥
यतः –
ये प्राप्ते व्यसनेऽप्यनाकुलधियः, सम्पत्सु नैवोन्नताः, प्राप्ते नैव पराङ्मुखा प्रणयिनि, प्राणोपभोगैरपि ।
श्रीमन्तः स्वगुणाः प्रपञ्चनविधावन्यस्तुतावुत्सुका, धिग् धात्रा कृपणेन तेऽपि न कृताः, कल्पान्तदीर्घायुषः ॥३८८॥
चेतः सार्द्रतरं वचः सुमधुरं दृष्टिः प्रसन्नोज्ज्वला, शक्तिः क्षान्तियुता मतिः श्रितनया श्रीर्दानदैन्यापहा ।
रूपं शीलयुतं श्रुतं गतमदं स्वामित्वमुत्सेकता, निर्मुक्तं प्रकटान्यहो ! नव सुधाकुण्डान्यमून्युत्तमे ! ॥३८९॥
विद्यां जयकरीं याव-ल्ललौ देवान्नृपाङ्गजः । तावत्कनीपिता **मेघ-घोष**स्तत्र समागमत् ॥३९०॥
**धीरं** साहसिकं देव-परीक्षितं च धर्मिणम् । विज्ञाय **सुन्दरीं** पुत्रीं, तस्मै स विद्याभृद्ददौ ॥३९१॥
सुन्दरीगेहिनीयुक्तं, **धीरं** विमानसंश्रितम् । विहायसा खगोऽनैषीद्, व्योम्ना **श्रीनगरा**न्तिके ॥३९२॥

यतः –

वने रणे शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा । सुप्तं प्रमत्तं विषमस्थितं वा, रक्षन्ति पुण्यानि पुराकृतानि ॥३९३॥
इतस्तत्र चितां कृत्वा, **समरः** सप्रियो नृपः । पुत्रानागमनान्मर्तु-काम आगात्कृशानुना ॥३९४॥
पुत्रमोहान्महीपालो, वारितोऽप्यथ मन्त्रिणा । यदा तस्थौ न तत्रेति, प्रोक्तं तिष्ठ क्षणं नृप ! ॥३९५॥
कदाचित्कोऽपि वक्त्येत्य, पुत्रस्यागमनं ध्रुवम् । जीवन्नेव सुतोऽत्रैव, समेष्यति न संशयः ॥३९६॥
मोहो न क्रियते सद्भिः, पुत्रदारादिषु ध्रुवम् । यतो भ्रमति संसारे, जीवो भूरीभवान् भृशम् ॥३९७॥
यतः –

रागोऽयं दोषपोषाय, चेतनारहितेष्वपि । मञ्जिष्ठा कुन्दनस्था न, भृशं ताप-सहा भृशम् ॥३९८॥
मुखे पुरीषप्रक्षेपं, तथा पाषाणपीडनम् । एकेन्द्रियोऽपि सहते, मृतिकारागदोषतः ॥३९९॥
हिअडा चोल मंजीठ जिम तोले घणे चडेसि । रंगपणइं आपणइं परभव घणा सहेसि ॥४००
एवं जल्पत्सु मन्त्र्यादि-जनेषु कोऽपि ना जगौ । **धीरः** समागतः पुर्या, उद्याने वीक्षितो मया ॥४०१॥
**धीरो**ऽपि पितरं मातृ-युतं मर्तुमुपागतम् । श्रुत्वा चितान्तिके पत्नी-युतः समागमत् ध्रुवम् ॥४०२॥
प्रणम्य चरणौ **मातुः**, पितुरालिङ्गनादिभिः । मातरं पितरं **धीरः**, प्रीणयामास मोदतः ॥४०३॥
ततः स **समरः** क्ष्मापो, वरोत्सवपुरस्सरम् । **धीरं** स्वनन्दनं पत्नी-युतं स्वसदनेऽनयत् ॥४०४॥
कन्यापिता खगोऽनेका, विद्याः पुत्रीवराय तु । वितीर्य स्वपुरे यातो, वैताढ्ये मेदिनीवरे ॥४०५॥
पुत्रागमान्नृपो देव-गृहे स्फारं महोत्सवम् । कारयन् ददते दानं, सत्पात्राय यथारुचि ॥४०६॥
यतः –

पात्रे धर्मनिबन्धनं तदितरे, प्रोद्यद्दयाख्यापकं, मित्रे प्रीतिविवर्धकं रिपुजने, वैरापहारक्षमम् ।
भृत्ये भक्तिभरावहं नरपतौ, सन्मानपूजाप्रदं, भट्टादौ च यशस्करं, वितरणं न क्वाऽप्यहो निष्फलम् ॥४०७॥
अन्येद्युर्नृपति**श्चन्द्र-शेखरस्य** गुरोः पुरः । शुश्रावेति जिनाधीश-गदितां धर्मदेशनाम् ॥४०८॥
कर्तव्या देवपूजा शुभगुरुवचनं, नित्यमाकर्णनीयं, दानं देयं सुपात्रे प्रतिदिनममलं, शीलनीयं च शीलम् ।
तप्यं शुद्धं स्वशक्त्या तप इह महती, भावना भावनीया, श्राद्धानामेष धर्मो जिनपतिगदितः, पूतनिर्वाणमार्गः ॥४०९॥
छायामिसेण कालो, सयलजीवाणं छलं गवेसंतो । पासं कहवि न मुंचई, ता धम्मे उज्जमं कुणह ॥४१०॥
कम्महवारं झडपडओ धम्महमंदी देह । आपणसरिसी चोरडी तइं किमु सीखी होइ ॥४११॥
रम्यं येन जिनालयं निजभुजोपात्तश्रिया कारितं, मोक्षार्थे स्वधनेन शुद्धमनसा, दानं सुपात्रे ददे ।
वन्द्यं तेन नरामरेन्द्रसहितं, तीर्थेश्वराणां पदं, प्राप्तं जन्मफलं कृतं जिनमतं, गोत्रं समुद्द्योतितम् ॥४१२॥
श्रुत्वेति नृपतिर्ग्रामे, ग्रामे पुरे पुरे वने, प्रासादान्मण्डयामास, जिनेन्द्राणां शुभेऽहनि ॥४१३॥
चतुर्विंशतिसर्वज्ञकल्याणकतपःफलम्, आकर्ण्य भूपति**र्नाभि**नन्दनाद्यर्हतां ध्रुवम् ॥४१४॥
प्रासादान् विंशतिशतं, कैलासाचलसोदरम् [रान्] । कारयामास कल्याणसुखसम्प्राप्तिहेतवे ॥४१५॥युग्मम् ॥
च्युत-जन्म-व्रत-ज्ञान-मुक्तिगत्यादिकाकृतीः । सर्वेषामर्हतां भूपो-ऽचीकरत्तेषु सद्मसु ॥४१६॥
तास्ताः सार्वाकृतीः सर्वाः, प्रतिष्ठाप्य सदुत्सवम् । पूजयामास भूपालो, विशिष्टफलहेतवे ॥४१७॥

सर्वेषु जिनगेहेषु, षट्शतानि जिनाकृतीः । च्युत-जन्म-व्रत-ज्ञान-मोक्षस्थानां जनोऽर्चयत् ॥४१८॥

यतः –

निक्खमणनाणनिव्वाण-जम्मभूमीओ वंदई जिणाणं । नय वसेइ साहुविरहीअ देसे बहुगुणे वि ॥४१९॥

**समरो** भूपतिर्भूरि-सङ्घयुक्तो शुभाशयः । शत्रुञ्जयादितीर्थेषु, यात्रां विस्तरतोऽकरोत् ॥४२०॥

भूपपत्न्या जिनागारं, वसुव्योमेन्दुमण्डपम् । कारितं तत्र बिम्बानि, जिनेन्द्राणां न्यवीविशत् ॥४२१॥

तस्मिन् जिनालये देव-पूजां भक्त्या नृपप्रिया । कृत्वाऽन्यदोद्यता भाव-पूजां कर्तुमजायत ॥

भावपूजां वितन्वत्या, नृपपत्न्यास्तदा क्षणात् । सर्वकर्मक्षयाज्ज्ञानं, पञ्चमं समजायत ॥४२२॥

ततोऽर्पिते सुरैः साध्वी-लिङ्गेऽथ धर्मदेशनाम् । भिक्षुणी सा वितन्वाना, भव्यजीवानबोधयत् ॥४२३॥

आयुःक्षये गतायां तु, तस्यां निर्वृतिपत्तने । सिद्धिगत्युत्सवं देवा, व्यधुस्तत्र क्षितौ मुदा ॥४२४॥

स्वयं **श्रीकमलाचार्यो**-पान्ते **समर**भूपतिः । भूरिभिः क्षत्रियैः सार्धं, संयमश्रियमाददौ ॥४२५॥

यतः –

सुहीओ न चयइ भोए चइज्जा दुक्खिओत्ति अलीयमीणं । चिक्कणकम्मोलिंतो न इमो न इमो परिचयइ ॥४२६॥

जह चयइ चक्कवट्टी, पवित्थरं तत्तिअं मुहुत्तेणं । न चयइ तहा अहन्नो, दुबुद्धी खुप्परं दमओ ॥४२७॥

कुर्वाणो विनयं तीव्रं, तपस्तपनतत्परः । **समरो**ऽथावधिज्ञानं, प्राप सङ्ख्यातदर्शकम् ॥४२८॥

**समरर्षिः** शिवक्ष्माध्रे, गत्वा तीव्रं तपः करन् । शुक्लध्यानसमारूढः, पञ्चमं ज्ञानमासदत् ॥४२९॥

प्रबोध्य जिनधर्मेऽथ, बहून् भव्यजनान् क्रमात् । सिद्धिक्षेत्रमलङ्चक्रे, क्षीणे शेषायुषि ध्रुवम् ॥४३०॥

**धीरो**ऽथ भूपतिर्न्याय-मार्गेण पालयन्प्रजाः । प्रासादानर्हतोऽनेकान्, कारयामास मोदतः ॥४३१॥

सीदतो मनुजानेव, प्रत्यहं लक्षसम्मितान् । धनधान्यप्रदानेन, **धीरो**ऽथाऽप्रीणयन्मुदा ॥४३२॥

यतः –

अभयं सुपत्तदाणं, अणुकंपा-उचिअ-कित्तिदाणं च । दोहि वि मुक्खो भणिओ, तिन्निवि भोगाईअं दिंति ॥४३३॥

**धीरो**ऽपि दानशीलादि-धर्मं चतुर्विधं सदा । पोषयामास कुर्वाणो, जिनार्चां कुसुमादिभिः ॥४३४॥

अनित्यां संसृतिं मत्वा, **धीर**भूपो निजे पदे । निवेश्य स्वसुतं **चन्द्रं**, जग्राह संयमश्रियम् ॥४३५॥

तपो द्वादशधा कुर्वन्, बाह्याभ्यन्तरभेदतः । कर्म निर्जरयामास, भूरि संसारसञ्चितम् ॥४३६॥

यतः –

सदोषमपि दीप्तेन, सुवर्णं वह्निना यथा । तपोग्निना तप्यमान-स्तथा जीवो विशुध्यति ॥४३७॥

दीप्यमाने तपोवह्नौ, बाह्ये चाभ्यन्तरेऽपि वा । यमी जरति कर्माणि, दुर्जराण्यपि तत्क्षणात् ॥४३८॥

अनशनमौनोदर्यं, वृत्तेः सङ्क्षेपणं तथा । रसत्यागस्तनुक्लेशो, लीनतेति बहिस्तपः ॥४३९॥

प्रायश्चित्तं वैयावृत्तं, स्वाध्यायो विनयोऽपि च । व्युत्सर्गोऽथ शुभध्यानं, षोढेत्याभ्यन्तरं तपः ॥४४०॥

सम्प्राप्य केवलज्ञानं, **धीरर्षिः** कर्मणां क्षयात् । अपुनर्भवपुर्यां च, जगाम **सिंह**पर्वते ॥४४१॥

**श्रीशालनगरे लक्ष्मी-चन्द्रः श्रीवत्**सनन्दनम् । राज्ये निवेश्य जग्राह, चारित्र्यं शिवहेतुकम् ॥४४२॥

**लक्ष्मीचन्द्र**यतिस्तीव्रं, तपस्तप्त्वा चिरं ध्रुवम् । सम्प्राप केवलज्ञानं, सम्मेतशिखराचले ॥४४३॥

ततः स बोधयन् भव्य-जनान् श्रीजिनशासने । आयुःक्षये शिवक्षेत्र-मलङ्चक्रे सुसाधुराट् ॥४४४॥

**॥ इति जीवदयायां समर-धीर-लक्ष्मीचन्द्रादिकथा ॥**

**अरस्य** देशनामेवं, श्रुत्वा रमापुरेशितुः । **सहस्त्रमल्ल**भूपस्य, नन्दनः, **कुम्भ**नामकः ॥४४५॥
उत्थाय मस्तके कृत्वा-ञ्जलिं नत्वा प्रभुं जगौ । अहं भीतोऽस्मि संसार-भूयिष्ठभ्रमणात्स्फुटम् ॥४४६॥ युग्मम् ॥
अतः प्रसद्यमप्येवं, चारित्रतरणीं वराम् । त्वं विश्राणय संसार-सिन्धूत्तारणाय मे ॥४४७॥
यतः —
चक्रे तीर्थकरैः स्वयं निजगदे, तैरेव तीर्थेश्वरैः, श्रीहेतुर्भवहारि दारितरुजः, सन्निर्जराकारणम् ।
सद्यो विघ्नहरं हृषीकदमनं, माङ्गल्यमिष्टार्थकृत्, देवाकर्षणकारि दर्पदलनं, तस्माद्विधेयं तपः ॥४४८॥
योग्यं भूपसुतं ज्ञात्वा, तस्मै दत्त्वा व्रतश्रियम् । गणभृत्पदवीं नाथो, दत्तवान् भगवा**नरः** ॥४४९॥
ततो हस्तद्वयं शीर्षे, कृत्वाऽवक् **कुम्भ**गच्छपः । किं तत्त्वं प्रोच्यते चाथ, स्वामी प्रोवाच तं प्रति ॥४५०॥
उत्पद्यते समं वस्तु, स्थावरं जङ्गमं स्फुटम् । ततः पप्रच्छ गच्छेशः, किं तत्त्वं पुनरुच्यते ॥४५१॥
स्वाम्युवाच ध्रुवं तत्त्वं, कियत्कालस्थितेः पुनः । पुनः पप्रच्छ किं तत्त्वं, गणी ततः प्रभुर्जगौ ॥४५२॥
विपद्यते समं वस्तु, स्थावरं जङ्गमं क्रमात् । श्रुत्वेति त्रिपदीं स्वामि-पार्श्वे गणधरस्तदा ॥४५३॥
द्वादशाङ्गीं व्यधाद् विश्व-विश्वहितकरां किल । एवमस्थापयत्स्वामी, द्वात्रिंशद् गणधारकान् ॥४५४॥
ततो भूपादयोऽनेके, जनाः शतमितास्तदा । संयमं जगृहुः श्रीम-**दर**स्वाम्यन्तिके किल ॥४५५॥
प्रभोर्व्याख्याक्षणप्रान्ते, प्रथमो गणनायकः । प्रभोर्विश्रामहेतुं तु, चकार धर्मदेशनाम् ॥४५६॥
यतः —
खेअविणोओ सीसगुण देवण पव्वओ उभओवि । सीसापरिअकमोवि अ गणहरकहणे गुणा हुंति ॥४५७॥
राओवणी अ सिंहासणे विनिविट्ठो वयाय पीढंमि । जिट्ठो अन्नय सेवा गणहारि कहेइ वीआए ॥४५८॥
संखाइए वि भवे साहइ जं वा पुरोउ पुच्छिज्जा । नयणं अणाइ सेसी वियाणई एस छउमत्थो ॥४५९॥
वासोदगस्स व जहा वन्नाई हुंति भायणविसेसा । सव्वेसिंपि सभासा जिणभासा परिणमइ एवं ॥४६०॥
साहरणासवत्ताइ तदुवओगो उगाहग गिराए । नवियनिविज्जाइसोआ किढिवाणीअ दासिआहरणा ॥४६१॥
सव्वो उंपि सोआ सविज्जइ हु सययं जिणो कहए । सीउण्हखुप्पिवासा परिस्समभए अविगणंतो ॥४६२॥
मेघवाहनभूपाल-पुत्रः **पद्मप्रभाभिधः** । श्रुत्वा स्वामिवचो दीक्षां, जग्राह शिवशर्मदाम् ॥४६३॥
श्राद्धानां श्राविकानां च, बहूनां भविनां तदा । सम्यक्त्वसहितं श्राद्ध-धर्मं देशितवान् प्रभुः ॥४६४॥
ततो लक्षमिताः श्राद्ध-श्राविकाश्च जिनान्तिके । धर्मं जीवदयामूलं, स सम्यक्त्वमूलस्तदा ॥४६५॥
अरस्य दीक्षाग्रहणोत्सवादिज्ञानाप्तिसम्भूतमहोत्सवेषु । तीर्थस्य संस्थापनसन्महेषु बोधिर्न केषामभवन्नराणाम् ॥४६६॥

**इति तपागच्छाधिराज-श्रीलक्ष्मीसागरसूरिशिष्य-पं. शुभशीलविरचिते श्रीअरनाथचरित्रे प्रभुदीक्षाग्रहणज्ञानोत्पत्ति-गणभृत्स्थापनोत्सवशोभिते षष्ठः सर्गः समाप्तः**

**॥ शुभं भवतु ॥**

● ● ●

## ॥ सप्तमः सर्गः ॥

प्रबोधयन् बहून् भव्य-जनान् ग्रामे पुरे पुरे । **अरतीर्थकरोऽयोध्यां**, पुर्युद्याने समीयिवान् ॥१॥
तत्राभ्येत्य सुरा वप्र-त्रयं योजनसंमितम् । विदधू रत्नकल्याण-रूप्यात्मकं मनोहरम् ॥२॥
तन्मध्ये विष्टरे प्रौढे, निविश्याऽरजिनेश्वरः । पर्षदां पुरतो धर्मदेशनां विदधेतराम् ॥३॥
तदा**योध्या**पुरस्वामी, **चन्द्रचूड**महीपतिः । धर्मं श्रोतुं समायातः, श्रीमतो**ऽरस्य** सन्निधौ ॥४॥
तथाहि –
राज्यं सुसम्पदो भोगाः, कुले जन्म सुरूपता । पाण्डित्यमायुरारोग्यं, धर्मस्यैतत्फलं विदुः ॥५॥
व्याकुलेनापि मनसा, धर्मः कार्योऽन्तरान्तरा । मेढीबद्धो बहिर्भ्राम्यन्, घासग्रासं करोति गौः ॥६॥
भावपूजां वितन्वानो, भव्यजीवः स्वभावतः । **महासेन** इवाप्नोति, कल्याणनगरीसुखम् ॥७॥
**श्रीपुरे भीम**भूपस्य **लक्ष्मीः पद्मा रमा कला** । पत्न्योऽभूवन् क्रमात्तासु, **कलां** भूपो न मन्यते ॥८॥
एकदा भूभुजा **लक्ष्मीपत्तने** गच्छता सता । पत्नीनां पुरतः प्रोक्तं, कस्याः किं वस्तु वीक्ष्यते ॥९॥
आद्याऽवक् पत्तनात्कान्त !, शाटिका मम वीक्ष्यते । द्वितीया प्राह रुचिरा, रोचते मे कुसुम्भिका ॥१०॥
तृतीयाऽवग् वराङ्ग-**ष्टस्थलौ** चाह चतुर्थिका । कांई एक ममाप्येव, समानेयं पुरात्ततः ॥११॥
तिसृणां च गृहीतानां, योग्यं वस्तु महीभुजा । संगृहीतं चतुर्थं तु, वस्तु लातुं समीह्यते ॥१२॥
हट्टे हट्टे ततः कांई, वस्तु भूयो विलोकते । एकेनोक्तं ममावासे, कांई स्त्रीवस्तु विद्यते ॥१३॥
तस्मै दत्त्वा धनं राजा, तां लात्वाऽगान्निजे पुरे । तिसृभ्यः प्रेयसीभ्यस्तु, शाटिकाद्यं नृपो ददौ ॥१४॥
कांई स्त्रिया नृपो मार्गे, रञ्जितोऽभूत्तथा भृशम् । यथा तस्या वचः शश्व-न्मन्यते स्म वरादरम् ॥१५॥
कांई स्त्रियोदितं स्वामिन् !, मत्स्वामिन्या निकेतने । गम्यते भवता सार्धं, यथा सा मां तु मन्यते ॥१६॥
कांई स्त्रिया गिरा तस्यां, रक्तो राजाऽभवद्भृशम् । अपत्यं नाभवत्पूर्व-कर्मयोगाच्च कर्हिचित् ॥१७॥
ततः कांई स्त्रिया स्वीय-स्वामिन्या उदरोपरि । बन्धित्वा चार्कपत्राणि, राज्ञोऽग्र इति जल्पितम् ॥१८॥
आधानमजनिष्ठाऽस्याः, पत्न्यास्तवाभियोगतः । दृष्ट्वा चोदरवृद्धिं हि, हृष्टो राजाऽभवद्भृशम् ॥१९॥
ततो राजा पणं चैकं, वस्तुग्रहणहेतवे । मुत्कलं व्यमुञ्चदाग्रा-हणिकायाः कृते खलु ॥२०॥
कांई स्त्रियाऽन्यदा प्रोक्त-मेवं भूमिपतेः पुरः । त्वत्पत्न्या जनितः पुत्रः, क्रियतां जननोत्सवः ॥२१॥
कारिते नन्दनोत्पत्ति-महे प्रौढे महीभुजा । कांई स्त्री कृत्रिमं पुत्रं, चक्रे कणिकया वरम् ॥२२॥
राज्ञी कृत्रिमपुत्रेण, युक्ता कांईसमन्विता । जलाशये ययौ नीरदेवीनत्यै सदुत्सवम् ॥२३॥
जलोपान्ते रहोवृत्त्या-ऽमुञ्चद्यावत्सुतं च तम् । तावन्मत्स्येन भुक्तः स, कणिकात्मक एव च ॥२४॥
रोदितुं लग्नाया राज्या, जलदेव्याह सकृपा । मा-रुदस्त्वं हि यज्जातं, तज्जातं कर्मयोगतः ॥२५॥
त्वत्सत्त्वेन सुतोऽन्यस्ते, भविष्यति नृपप्रिये ! । ततो हृष्टा समायाता, राज्ञी निजनिकेतने ॥२६॥

मत्स्यभुक्तं सुतं मत्वा, दुःखितोऽभून्नराधिपः । जलदेवीवरं पुत्र-प्रापकं च प्रमोदयुक् ॥२७॥
कालक्रमेण सत्कर्म-योगात्तस्यास्तनुभवः । बभूवाथ नृपेणैव, चक्रे तस्य जनुर्महः ॥२८॥
तस्य सूनोर्**महासेन**, इत्याह्वां नृपतिर्ददौ । शस्त्रशास्त्रकलाः पित्रा, पाठितः सकलाः क्रमात् ॥२९॥
यतः –
जायंमि जीवलोए दो, चेव नरेण सिक्खिअव्वाइं । **कम्मेण जेण जीवइ, जेण मूओ सुग्गइं जाइ** ॥३०॥
राजाऽथ **श्रीधर**क्षोणी-पतेः पुत्रीं **मनोरमाम्** । पर्यणीणयदुर्वीशःपुत्रं, चारुतरोत्सवम् ॥३१॥[पर्यणीणय]
क्रमाद्धर्म**धराचार्यो**-पान्ते धर्मं जिनोदितम् । श्रुत्वा सदा जिनेन्द्रार्चां, **महासेनो** व्यधात्तमाम् ॥३२॥
**महासेनो**ऽन्यदा पूजां, कृत्वा जिनेशितुर्मुदा । भावपूजां वरैः स्तोत्रै-श्चकारैकाग्रमानसः ॥३३॥
भावपूजां **महासेनः**, कुर्वाणः पुरतोऽर्हतः । सम्प्राप्य केवलज्ञानं, मुक्तिपुर्यां समीयिवान् ॥३४॥

**॥ इति पूजायां महासेनकथा ॥**

पालयन्स्थावरान्जीवांस्त्रसाश्च यतनापरः । जनः प्राप्नोति कल्याणं, **चारुदत्त** इवाचिरात् ॥३५॥
तथाहि –
**चम्पायां** श्रेष्ठिनो **भानोः**, समुद्राह्वाऽजनि प्रिया । **चारुदत्ता**ऽभिधः पुत्रस्तयोः क्रमादभूद्वरः ॥३६॥
वर्धमानः क्रमात् पित्रा, **चारुदत्तः** सुतः क्रमात् । पाठितो भूरिशास्त्राणि, **मुकुन्द**पण्डितान्तिके ॥३७॥
यतः –
जायंमि जीवलोए, दो चेव नरेण सिक्खिअव्वाइं । कम्मेण जेण जीवइ, जेण मुओ सुग्गइं जाइ ॥३८॥
सकलाऽपि कलावतां कला, विकला पुण्यकलां विना किल । सकलाऽवयवा वृथा यथा, तनुभाजामकनीनिकं वपुः ॥३९॥
**चारुदत्तो**ऽन्यदा बाह्यो-द्याने यातो दिनात्यये । ददर्श कीलितं बाढं, नरमेकं सदाकृतिम् ॥४०॥
जल्पितः स नर**श्चारु-दत्ते**नापि पुनः पुनः । शशाक जल्पितुं नैव, कीलितास्यो मनागपि ॥४१॥
ततो जातकृप**श्चारु-दत्त**स्तं बन्धनात्ततः । स्वयं मोचयितुं ध्यायन्, तत्पार्श्वेऽसिं व्यलोकत ॥४२॥
तस्यासेः कोशमध्यस्थां, विशल्यामौषधीं वराम् । **चारुदत्तो** ददर्शाशु, हृष्टो मोचयितुं च तम् ॥४३॥
विशल्यौषधिसंस्पर्शात्, विशल्यं तं व्यधात्स च । तदा स ध्यातवान्मेऽसौ, चकारोपकृतिं मुधा ॥४४॥
यतः –
पात्रार्थे भोजनं येषां, दानार्थं च धनार्जनम् । धर्मार्थे जीवितं येषां, ते नराः स्वर्गगामिनः ॥४५॥
शैले शैले न माणिक्यं, मौक्तिकं न गजे गजे । साधवो नहि सर्वत्र, चन्दनं न वने वने ॥४६॥
ध्यात्वेति स यदाऽनंसी-**च्चारुदत्त**क्रमाम्बुजम् । **चारुदत्त**स्तदा प्राह, कस्त्वं ? केनाऽत्र कीलितः ? ॥४७॥
स प्राहाऽहं च वैताढ्य-दक्षिणश्रेणिसङ्गते । **भ्रमराह्वे** पुरे व्योम-गाम्याऽऽसं **कुशलाभिधः** ॥४८॥
क्रमान्ममाऽभवद्वैरी, **दुर्दमाह्वो** महाबलः । सुप्तोऽहं कीलितस्तेनो-त्पाट्यथ मुमुचेऽत्र तु ॥४९॥
यतः –
वैरं वैश्वानरो व्याधिर्वाद-व्यसनलक्षणाः । महानर्थाय जायन्ते, वकाराः पञ्च वर्धिताः ॥५०॥

निःशल्यकरणाच्चक्रे, ममोपकार एव यः । भवताऽहं छुटिष्यामि, तस्मात्कथं नरोत्तम ! ॥५१॥

शास्त्रं बोधाय दानाय, धनं धर्माय जीवितम् । वपुः परोपकाराय, धारयन्ति मनीषिणः ॥५२॥

पिबन्ति नद्यः स्वयमेव नाम्बु, खादन्ति न स्वादुफलानि वृक्षाः ।

वाञ्छन्ति सस्यानि पयोमुचो न, परोपकाराय सतां विभूतयः ॥५३॥

करिष्येऽवसरेऽहं तू-पकारं तव सत्तम ! । विशल्यामौषधिमेनां, लाहि सम्प्रति सत्वरम् ॥५४॥

अनिच्छते तदा **चारु-दत्ताय** करुणात्मने । तमौषधीं वितीर्याशु, स खगः स्वपुरं ययौ ॥५५॥

यतः –

न चन्द्रमाः प्रत्युपकारलिप्सया, करोति भाभिः कुमुदाविबोधनम् ।

स्वभाव एवोत्तमचेतसामयं, परोपकारव्यसनं हि जीवितम् ॥५६॥

**चारुदत्तो**ऽथ तादृक्ष-मुपकारं विधाय च । आजगाम निजावासं, स्वं वृत्तं न जगाद च ॥५७॥

क्रमाद्वीक्ष्य कर्नी वर्यां, पुरे **पद्मोत्तरे**ऽपि ताम् । **भीमसेन**वणिक्पुत्रीं, पुत्रयोग्यां व्यलोकत ॥५८॥

मेलयित्वा पितोद्वाहं, सूत्सवं तां कनीनिकाम् । **चारुदत्तं** सुतं वर्य-वासरे पर्यणीणयत् ॥५९॥

क्रमाद्विरक्तचित्तः सन्, पूर्वाशुभोदयात्तदा । **चारुदत्तो**ऽभवत्पत्न्यां, तस्यामेव पराङ्मुखः ॥६०॥

यतः –

अनाज्यं भोज्यमप्राज्यं, विप्रयोगः प्रियैः सह । अप्रियैः सम्प्रयोगश्च, सर्वं पापविजृम्भितम् ॥६१॥

रागासक्तं विधातुं तं, नन्दनं गणिकान्तिके । मोचयामासतुर्माता-पितरौ शिक्षितुं क्रीडितुं पुनः ॥६२॥

प्रत्यहं प्रेषयामास, माता **लक्ष्मीं** सुतान्तिके । सुतस्तया **श्रिया** सार्धं, वेश्यया विललास सः ॥६३॥

वेश्यया शिक्षितोऽत्यन्तं, स्वां कलां श्रेष्ठिनन्दनः । पश्चाद् ववाञ्छ नो यातुं, मातापित्रोश्च सन्निधौ ॥६४॥

**चारुदत्तो** धनं कोटि-प्रमितं गणिकान्तिके । तिष्ठन् निष्ठापयामास, वर्षैर्द्वादशभिः क्रमात् ॥६५॥

पितृर्गृहे धने क्षीणे, धनानागमतोऽन्यदा । त्याजितः स्वगृहं **चारु-दत्त**श्छारोज्झनादिभिः ॥६६॥

यतः –

नयणिहिं रोइ मणि हसइ जण जाणइ सहु सव्व । वेसविसट्ठहतं करइ जं कठह करवत्त ॥६७॥

अपि प्रदत्तसर्वस्वात्, कामुकात् क्षीणसम्पदः । वासोऽप्याच्छेतुमिच्छन्ति, गच्छतः पण्ययोषितः ॥६८॥

जल्पन्ति सार्धमन्येन, पश्यन्त्यन्यं सविभ्रमाः । हृद्गतं चिन्तयन्त्यन्यं, प्रियः को नाम योषिताम् ॥६९॥

**चारुदत्तो** निजावासे-ऽभ्येत्य स्वं पतितं गृहम् । दृष्ट्वा स्वर्गगतिं माता-पित्रोर्जज्ञौ जनाऽऽननात् ॥७०॥

पत्नीं पितुर्गृहे यातां, दासादींश्च गतान् समान् । **चारुदत्तो** हतस्वान्तो, ध्यातवानिति मानसे ॥७१॥

मया मूढेन नो सारा, विदधे मातृतातयोः । अतो मे मस्तके वज्रं, विद्युद्वा पतताद् ध्रुवम् ॥७२॥

छुटिष्यामि कथं मातु-रुपकारात्कृतादहम् । भविष्यत्यथवा श्वभ्र-पातो मे दुष्टचिन्तनात् ॥७३॥

यतः –

उपाध्यायाद्दशाचार्य, आचार्याणां शतं पिता । सहस्रं तु पितुर्माता, गौरवेणाऽतिरिच्यते ॥७४॥

आस्तन्यपानाज्जननी पशूनामादारलाभावधि चाधमानाम् ।

आगेहकर्मावधि मध्यमानामाजीवितं तीर्थमिवोत्तमानाम् ॥७५॥

विलप्यैवं चिरं **चारु-दत्तो** निजनिकेतनात् । श्वशुरस्य गृहे यातो, मुक्त्वा मानं धनक्षयात् ॥७६॥

यतः –

तावदाश्रीयते लक्ष्म्या, तावदेव स्थिरं यशः । पुरुषस्तावदेवासौ, यावन्मानान्न हीयते ॥७७॥

वरं प्राणपरित्यागो, मा मानपरिखण्डना । मृत्योस्तु क्षणिका पीडा, मानखण्डो दिने दिने ॥७८॥

श्वश्र्वा गौरवितो मासा-दनु दध्यौ स्वचेतसि । श्वशुरस्य गृहे वास-श्चिरं पुंसो न शोभते ॥७९॥

यतः –

श्वशुरगृहनिवासः, स्वर्गतुल्यो नराणाम् । यदि वसति दिनानि, त्रीणि वा पञ्च सप्त ।

अथ कथमपि तिष्ठेल्लुब्धचेता वराको, निपतति खलु पात्रे काञ्जिकं क्षिप्रयुक्तम् ॥८०॥

उत्तमाः स्वगुणैः ख्याता, मध्यमास्तु पितुर्गुणैः । अधमा मातुलैः ख्याताः, श्वशुरैश्चाधमाधमाः ॥८१॥

अतो लात्वा मुखं गत्वा, अर्जित्वा च धनं बहु । श्वशुरस्यालये नून-मागन्तव्यं मया पुनः ॥८२॥

पुमान् निर्जरतुल्याङ्गो, लक्ष्मीवान् पद्मया विना । न शोभते मनाग् व्योम-प्रदेश इव शीतगुम् ॥८३॥

यतः –

वरं रेणुर्वरं भस्म, नष्टश्रीर्न पुनर्नरः । मुक्त्वैतं दृश्यते क्वापि, पूजा पर्वणि पूर्वयोः ॥८४॥

परीक्ष्य सत्कुलं विद्यां, शीलं शौर्यं सुरूपताम् । विधिर्ददाति निपुणं, कन्यामिव दरिद्रताम् ॥८५॥

ध्यात्वेति **चारुदत्तो**ऽथा-नापृच्छ्य गृहिणीं निशि । निर्ययौ श्वशुरावासात्, पद्मोपार्जनहेतवे ॥८६॥

गत्वा वार्धितटे यान-मारूढः कस्यचित्क्रमात् । **चारुदत्तो** ययौ स्वर्ण-द्वीपे जलधिवर्त्मना ॥८७॥

तत्रोपार्ज्य धनं भूरि-यानारूढश्चलन् स च । चचाल **कुमुदद्वीपं**, प्रति लक्ष्मीकृतेऽन्यदा ॥८८॥

अकस्मादनिले चण्डे, वाति वर्षति वारिदे । भग्नं यानं ययौ सर्वा, लक्ष्मीर्बहुजना मृताः ॥८९॥

सम्प्राप्तफलक**श्चारु-दत्तः** स्मरन् नमस्कृतिम् । चतुर्थे दिवसे कोल-द्वीपकूले समागमत् ॥९०॥

यतः –

यन्मनोरथशतैरगोचरं, यत्स्पृशन्ति न गिरः कवेरपि । स्वप्नवृत्तिरपि यत्र दुर्लभा, लीलयैव विदधाति तद्विधिः ॥९१॥

करोमि न करोमीति, चैवं किं परितप्यसे । सम्पत्तौ च विपत्तौ च, विधिरेव समुत्सुकः ॥९२॥

तत्र **श्रीनगरे** कुर्वन्, व्यवसायं रमां बहुम् । **चारुदत्तो**ऽर्जयामास, ललौ भूरि क्रयाणकम् ॥९३॥

अनांसि वसुभिर्भृत्वा, **चारुदत्तो** व्रजन्पथि । भीमाटव्यां समायातो, नर्मदातटिनीतटे ॥९४॥

अकस्माद् धाटिका तत्रा-गता सर्वं क्रयाणकम् । लुण्टयित्वा व्यधा**च्चारु-दत्तं** निर्विभवं तदा ॥९५॥

ततः क्रमाद् भ्रमन् **रत्न-द्वीपे** स **चारुदत्तकः** । गत्वा पञ्च मणीन् वर्या-नर्जयामास सत्वरम् ॥९६॥

सङ्गोप्य तान् मणीन् **चारु-दत्तो** मार्गे चलन् द्रुतम् । **भीमपल्ल्याः** समीपे तु, समायातो दिनोदये ॥९७॥

यष्टिमुष्ट्यादिभिर्हत्वा, **चारुदत्तं** तदन्तिकात् । भिल्लाः पञ्च मणीन् वर्यान्, जगृहुर्निर्दयाशयाः ॥९८॥

यतः –

मज्जत्वम्भसि यातु मेरुशिखरं, शत्रुं जयत्याहवे, वाणिज्यात्कृषिसेवनादिसकला, विद्याः कलाः शिक्षतु(ताम्) ।
आकाशं विपुलं प्रयातु खगवत्, कृत्वा प्रयत्नं परं, नाभाव्यं भवतीह कर्मवशतो, भाव्यस्य नाशः कुतः ? ॥९९॥
ततश्चलन् **रमापुर्यां**, गत्वा मातुलसन्निधौ । मातुलस्य श्रिया चक्रे, व्यवसायं स सन्ततम् ॥१००॥
तत्रापि विभवं भूरि, समुपार्ज्य क्रमात्स च । क्रयाणकानि भूरीणि, मेलयामास हेलया ॥१०१॥
मार्गेऽथ गच्छतस्तस्य, लग्ने दावानले भृशम् । सर्वं क्रयाणकं दग्धं, वह्निनाऽन्नसमन्वितम् ॥१०२॥
ततोऽतिदुःखित**श्चारु-दत्तो**ऽवधूतवेषभृत् । एकस्य योगिनो मार्गे, व्रजन्नेवामिलत्क्रमात् ॥१०३॥
योगिनोक्तं किमर्थं त्वं, व्रजन्नसि नरोत्तम ! । स च प्राहात्मनो दौःस्थ्य-स्वरूपं तत्पुरस्तदा ॥१०४॥
योगी जगावहं **दौःस्थ्य-भञ्जकाह्वो**ऽस्मि सत्तम ! । मम यः कुरुते सेवां, द्यामि तस्य दरिद्रताम् ॥१०५॥
यदीच्छा विद्यते लक्ष्मी-मेलने तव साम्प्रतम् । तदा मदीरितं कुर्वन्, मत्पार्श्वे तिष्ठ सन्ततम् ॥१०६॥
**चारुदत्तो** जगौ तर्हि, किमन्यद्वीक्ष्यते मम । त्वमेव भाग्ययोगेन, प्राप्तोऽसि वारिवन्मरौ ॥१०७॥

यतः –

सा सा सम्पद्यते बुद्धिः, सा मतिः सा च भावना । सहायास्तादृशा ज्ञेया, यादृशी भवितव्यता ॥१०८॥
योगी जगौ चलेदानीं, मम सार्धं शुभे वने । तत्राऽस्ति रसकूपी तु, स्वर्णकृत् ताम्रयोगतः ॥१०९॥
ततस्तेन समं **चारु-दत्त**स्तस्मिन् वने ययौ । दर्शयामास तां कूपीं, तस्मै योगी मनोहराम् ॥११०॥
रसकूपीमथालोक्य, **चारुदत्तो** मुमोद सः । लोभार्त्तिः किं नरो नैव, चेष्टितं विदधे ध्रुवम् ॥१११॥
अर्पयित्वा घटीं हस्ते, **चारुदत्तं** स योगिराट् । मञ्चिकारूढमादाय, कूपिकां मध्यतोऽमुचत् ॥११२॥
रसपूर्णां घटीं ज्ञात्वा, योगी मञ्चकमाकृषत् । तावद्यावद् घटीं स्वीय-करे जग्राह हेलया ॥११३॥
ततः स मञ्चिकां दोर-प्रयोगेण तथाऽकरोत् । यथा पपात कूप्यन्त-**श्चारुदत्तः** क्षणादपि ॥११४॥

यतः –

छित्त्वा पाशमपास्य कूटरचनां, भङ्क्त्वा बलाद्वागुरां, पर्यन्ताग्निशिखाकलापजटिलान्निर्गत्य दूरं वनात् ।
व्याधानां शरगोचरादतिजवेनोल्लङ्घ्य धावन्मृगः, कूपान्तः पतितः करोतु विधुरे किं वा विधौ पौरुषम् ।११५।
लात्वा रसघटीं योगी, धन्यंमन्यः स्वयं तदा । नष्टस्ततो भवन्त्येवं-विधाः पापात्मका नराः ॥११६॥

यतः –

भग्गं न जाइ घडणं, दुज्जणहिययं कुलालभंडं वा । सयखंडो वि घडिज्जइ, कंचणकलसो सुअणचित्तं ॥११७॥
दुर्जनः परिहर्तव्यो, विद्ययाऽलङ्कृतोऽपि सन् । मणिना भूषितः सर्पः, किमसौ न भयङ्करः[१] ॥११८॥
कूपिकाऽधःपतं**श्चारु-दत्तः** पूर्वशुभोदयात् । गोधापुच्छं करे प्राप, दृढं सलिलसन्निधौ ॥११९॥
गोधापुच्छविलग्नः सन्, कूपिकाया बहिस्तदा । निर्गतो ध्यातवान् **चारु-दत्तः** कर्माऽशुभं निजम् ॥१२०॥
गच्छतस्तस्य मार्गे तु, मिलितो दुष्टकेसरी । ततस्तरौ चटित्वा स, विघ्नादुद्वलितस्ततः ॥१२१॥
गते सिंहे व्रजन् **चारु-दत्त**स्य मिलितो गजः । ततो वृक्षं समारूढो, ररक्ष जीवितं निजम् ॥१२२॥

---

१. अन्यकथायामन्यवर्णनमस्ति ।

यतः –

प्राणी प्राणितलोभेन, यो राज्यमपि मुञ्चति । तद्वधोत्थमघं सर्वो-र्वीदानेऽपि न शाम्यति ॥१२३॥

मार्गेऽथ व्रजतस्तस्य, **पद्मपुर्या** बहिर्वने । मातुलस्य सुतो **रुद्रद-त्तो**ऽमिलद्दिनोदये ॥१२४॥

द्रावपि भ्रातरौ प्रीति-भाजौ यातौ **धने** पुरे । मेषद्वयं गृहीत्वाब्धि-कूलं समीयतुः क्रमात् ॥१२५॥

**रुद्रदत्तो** जगौ मेषौ, हत्वा भस्त्रिकयोस्तयोः । मध्ये प्रविश्यते तीक्ष्ण-क्षुरीं लात्वा पृथक् पृथक् ॥१२६॥

भारण्डा मांसबुद्ध्या तू-त्पाट्य वारेः क्षितौ क्षणात् । प्रयान्त्यतो गमिष्याव-स्तत्र द्वीपे क्षणादपि ॥१२७॥

तत्र हेमरजो लात्वा, भारण्डांऽह्र्योर्विलग्य च । पुनः पश्चात्समेष्येते, आवाभ्यां सोदरोत्तम ! ॥१२८॥

तेन जाम्बूनदेनैव, धनवद्भिर्भविष्यते । यतो धनं विना नैव, मन्यते कोऽपि कस्यचित् ॥१२९॥

यतः –

जाई रुवं विज्जा, तिन्निवि निवडंतु कंदरे विवरे । अत्थुच्चीय परिवुड्ढो, जेण गुणा पायडा हुंति ॥१३०॥

**चारुदत्तो** जगौ जीव-वधः किं क्रियते ध्रुवम् । जीवहिंसाद्यतः श्वभ्रे, जीवा गच्छन्ति निश्चितम् ॥१३१॥

यतः –

पङ्गु-कुष्ठि-कुणित्वादि, दृष्ट्वा हिंसाफलं सुधीः । निरागस्त्रसजन्तूनां, हिंसा सङ्कल्पतस्त्यजेत् ॥१३२॥

आत्मवत्सर्वभूतेषु, सुख-दुःखे प्रियाप्रिये । चिन्तयन्नात्मनोऽनिष्टां, हिंसामन्यस्य नाचरेत् ॥१३३॥

अहिंसा दुःखदावाग्नि-प्रावृषेण्यघनावली । भवभ्रमिरुगार्तानामहिंसा परमौषधी ॥१३४॥

दीर्घमायुः परं रूप-मारोग्यं श्लाघनीयता । अहिंसाया फलं सर्वं, किमन्यत्कामदैव सा ॥१३५॥

नाहमेवंविधं पापं, करिष्ये जीवितात्यये । तेन किं क्रियते हेम्ना, त्रुट्यते श्रवणो यतः ॥१३६॥

ततो **रुद्र**श्छगं चैकं, हत्वाऽन्यं हन्ति यावता । तावत्स **चारुदत्ते**ना-ऽनशनं ग्राहितो लघु ॥१३७॥

श्रावितः स नमस्कारान्, लगित्वा कर्णयोर्द्वयोः । **चारुदत्तेन** तत्कालं, तस्य सद्गतिहेतवे ॥१३८॥

यतः –

पंच नमुक्कार समायंते, वच्चंति जस्स दस पाणा । सो जइ न जाइ मोक्खं, अवस्स वेमाणीओ होइ ॥१३९॥

कृत्वा पापसहस्राणि, हत्वा जन्तुशतानि च । अमुं सूत्रं समाराध्य, तिर्यञ्चोऽपि दिवं गताः ॥१४०॥

अपुव्वो कप्पतरू एसो, चिंतामणी अपुव्वो अ । जो झायइ सयाकालं, सो पावइ सिवसुहं विउलं ॥१४१॥

तयोश्छगलयोर्भस्त्रा-मध्ये प्राविशतां च तौ । मांसबुद्ध्या तु भारण्डौ, तौ लातः स्म मुखे निजे ॥१४२॥

गच्छतोः पक्षिणोर्व्योम्नि, भारण्डस्य मुखात्तदा । भस्त्रिका **चारुदत्त**स्य, न्यपतत्साम्बुपल्वले ॥१४३॥

छुर्या छित्त्वा च तां भस्त्रां, निर्गत्य सरसीतटे । **चारुदत्तः** समायातो, दध्यौ दुःखेऽपतं भृशम् ॥१४४॥

वियोगो मेऽभवद् भ्रातु-श्चटितं कनकं न हि । मेषहत्याकरं पापं, ममाऽऽयातं करे दृढम् ॥१४५॥

यतः –

पुरुषः कुरुते पापं बन्धुनिमित्तं वपुर्निमित्तं च । वेदयते तत्सर्वं नरकादौ पुनरसावेकः ॥१४६॥

जामति पछइ सांभरइ साजइ पहिली होइ । कज्ज न विणसइ अप्पण उंडुज्जण न हसइ कोइ ॥१४७॥

काला कर्म न रूसीइ, दैव न दीजइ दोस । सरयूं लाभइ आपणउं, घणउं न कीजइ सोस ॥१४८॥

ततो वने भ्रमंश्चारुदत्तः शीलोद्ध्र्वंसंस्थितम् । ध्यानलीनयतिं चैकं, दृष्ट्वा ऽनंसीत्सुभक्तितः ॥१४९॥
त्यक्तध्यानो यतिर्धर्म-लाभं प्रोच्य जगाविति । **चारुदत्त**स्तवाविघ्नं, धर्मो निर्वहते ध्रुवम् ॥१५०॥
यतः –
धनदो धनमिच्छूनां, कामदः काममिच्छताम् । धर्म एवापवर्गस्य, पारम्पर्येण साधकः ॥१५१॥
जिह बिहुं पह रह मग्गडई, तहिं जीव संबल लेइ । जइ चउरासी भवगहणि तहिं अवहेल करेइ ॥१५२॥
करि संबल भरि भत्थडी इह अप्पणा धराह । आगलि विसमा वाणीआ न हि वेसज्जइ कोइ ॥१५३॥
**चारुदत्तो**ऽगदन्नाम, मम ज्ञातं त्वया कथम् । कस्त्वं ? दीक्षा कुतो हेतो-र्गृहीता ? कस्य हेतवे ? ॥१५४॥
साधुः प्राह त्वयाऽहं तु, **कुशलाह्वो** वियद्गमी । कीलितो वैरिणाऽमोचि, विशल्यौषधियोगतः ॥१५५॥
ततोऽहं स्वपुरे गत्वा, दृष्ट्वाऽभ्रगणमम्बरे । विशीर्णं च क्षणादेवा-ऽपश्यं वातायनस्थितः ॥१५६॥
**कुन्तलस्य** सुतस्याहं, राज्यं वितीर्य वेगतः । युवराजपदं **भीम-सूनवे**ऽदां वरोत्सवम् ॥१५७॥
अष्टाह्निकामहं कृत्वा, जिननायकसद्मसु । **चन्द्रसूरीश्वरो**पान्ते, चारित्रं लातवान् ध्रुवम् ॥१५८॥
मया विधीयते कर्म-क्षेपाय दुष्करं तपः । तपो विना न पापानि, क्षयं गच्छन्ति कस्यचित् ॥१५९॥
यतः –
जं नारयाण कम्मं खमें[वं]ति बहूहिं वासकोडीहिं । तं खलु **वत्थ**भोई जीवो निज्जरइ सुहभावा ॥१६०॥
एवं कथयतस्तस्य, साधोः श्रीधर्मदेशनाम् । विमानं किङ्किणीरावं, वर्यं तत्राम्बरेऽगमत् ॥१६१॥
उत्तीर्य द्वौ खगौ तस्मा-द्विमानाद्वर्धिताशयौ । प्रदक्षिणात्रयं दत्त्वा, नेमतुश्चरणौ यतेः ॥१६२॥
यतः –
गुरुवंदण-मह तिविहं, तं फिट्टा छोभबारसावत्तं । सिरनमणाइसु पढमं१, पुण्णखमासमण-दुगि बीअं ॥१६३॥
तईअं तु छंदण-दुगे, तत्थ-मिहो आइमं सयलसंघे । बीअं तु दंसणीण य, पयट्ठिआणं च तईअं तु ॥१६४॥
पडिक्कमणे सज्झाए२ काउस्सग्गा३, वराह४ पाहुणए५ । आलोअण६ संवरणे७, उत्तमट्ठे अ वंदणयं ॥१६५॥
दोवणय-महाजायं आवत्ता, बार चउसिर तिगुत्तं । दुपवेसिग निक्खमणं, पणवीसा वस्सय किइकम्मे ॥१६६॥
[गुरुवंदनभाष्य]

**क्षमाश्रमण**[1]युग्मेन, वन्दित्वा तं यतीश्वरम् । श्रोतुं धर्मं यथायोग्य-स्थाने न्यविशतां मुदा ॥१६७॥
कुशलः संयतो धर्म-देशनां प्रददाविति । धर्मरिक्तो जनो नैव, लभते शिवसम्पदम् ॥१६८॥
तथाहि –
सामायिकावश्यकपौषधानि, देवार्चनस्नानविलेपनानि । ब्रह्मक्रियादान-दयामुखानि, कृत्यानि धर्मो गदितो जिनेश्वरैः ॥१६९॥

कुलं विश्वश्लाघ्यं वपुरपगदं जातिरमला, सुरूपं सौभाग्यं ललितललना भोगकमला ।
चिरायुस्तारुण्यं बलमविकलं स्थानमतुलं, यदन्यच्च श्रेयो भवति भविनां धर्मत इह ॥१७०॥
धर्मं जीवदयामूलं, श्रीसम्यक्त्वसमन्वितम् । **चारुदत्तः** खगौ चापि, साधूपान्ते ललुस्तदा ॥१७१॥

---
१. दो खमासमण देकर ।

**चारुदत्तो**ऽगदत् साधु-मेतौ कौ व्योमगामिनौ । साधुः स्वपुत्रसम्बन्धं, तस्याग्रे प्रोक्तवांस्ततः ॥१७२॥
इतोऽकस्मान्नभोमार्गा-दुत्तीर्यैकः सुरो वरः । **चारुदत्तं** प्रणम्यादौ, साधुं च नतवांस्ततः ॥१७३॥
प्रोचतुर्व्योमगौ देवाः, श्रूयन्ते विबुधाः खलु । साधुं त्यक्त्वा गृहस्थोऽसौ, भवता वन्दितः कथम् ? ॥१७४॥
देवोऽवक् शृणुतं व्योम-गामिनौ गृहिवन्दने । कारणं विद्यते प्रौढं, गुरुभावसमुद्भवम् ॥१७५॥
प्रोचतुर्व्योमगौ देव !, विस्तराद्वद कारणम् । ततः स निर्जरः प्राह, तयोः खगामिनोः पुरः ॥१७६॥
तथाहि –

**वाराणस्याम**भूतां द्वे, **सुभद्रा-सुलसा**भिधे । तपस्विन्यौ तपो विद्या-बलगर्वितमानसे ॥१७७॥
वादे तां **सुलसां** जित्वा, परिव्राड् **याज्ञवल्कवः** । दासीं कृत्वा तया सार्धं, पत्नीभावं प्रपन्नवान् ॥१७८॥
क्रमात्तयोरभूत्पुत्रो, निशीथसमये खलु । लोकापवादभीता सा, **सुलसा** समजायत ॥१७९॥
नगराद् बहिरुद्याने, पिप्पलस्य तरोरधः । छन्नं तं बालकं मुक्त्वा, स्वस्थानकं समागमत् ॥१८०॥
यतः –

अनृतं साहसं माया, मूर्खत्वमतिलोभता । निःस्नेहो निर्दयत्वं च, स्त्रीणां दोषाः स्वभावजाः ॥१८१॥
सुलसासहितो **याज्ञवल्कवो** दूरनीवृति । गत्वा तस्थावहो गूढा, संसारस्थितिरीदृशी ॥१८२॥
प्रातः **सुभद्रया** तत्रा-गतया सखिवीक्ष्यया । तत्र स्थाने शिशुर्दृष्टः, सुलसासदृशाकृतिः ॥१८३॥
पिप्पलद्रुफलं तस्य, शिशोरास्ये निरीक्ष्य सा । गृहीत्वा तं करे दध्यावेष मे सखिनन्दनः ॥१८४॥
सुलसा कुत्र याताऽस्ति, मुक्त्वाऽमुं जनितं सुतम् । आगत्यात्मसुतं सद्यो, वर्धयिष्यति निश्चितम् ॥१८५॥
तया लोकापवादेन, बिभ्यत्या सूनुरीदृशः । त्यक्तोऽसीत्यहकं जाने, समागच्छोत्तरं वद ॥१८६॥
त्वां विना बालको ह्येष, मरिष्यति सखि ! ध्रुवम् । पायय स्तन्यपानं त्वं, लज्जां मुक्त्वाऽधुना द्रुतम् ॥१८७॥
एवं विलप्य तं बालं, सा लात्वा स्वाश्रयेऽगमत् । **पिप्पलादे**ति नामाऽदात् **सुभद्रा** तस्य तु क्रमात् ॥१८८॥
स्तन्यपानादिदानेन, वर्धयामास तं च सा । स्वविद्या भूरिशस्तस्मै, शैशवातिक्रमे ददौ ॥१८९॥
विद्यामदात्तृणं विश्वं, मन्यमानोऽभ्रमुच्छलन् । **पिप्पलादो** न माति स्म, देहे गेहे निजे क्वचित् ॥१९०॥
यतः –

ज्ञानं मददर्पहरं माद्यति यस्तेन तस्य को वैद्यः । अमृतं यस्य विषायति, तस्य चिकित्सा कथं क्रियते ॥१९१॥
विषभारसहस्रेण, वासुकिर्नैव गर्जति । वृश्चिकस्तृणमात्रेण, स्वो**द्धर्वं** वहति कण्टकम् ॥१९२॥
त्यागिना किं दरिद्रेण, किं कुलिनेन पापिना । तुष्टेन किं कदर्येण, दर्पान्धेन बुधेन किम् ॥१९३॥
अनेके वादिनः **पिप्पलादेन** विजिताः क्रमात् । मौनं कृत्वा गता दूरं, केचित्तं शिश्रियुः पुनः ॥१९४॥
अन्येद्युः **पिप्पलादं** तं, विद्याबलविगर्वितम् । अजानन् नन्दनं **याज्ञवल्क्यवः** सुलसायुतः ॥१९५॥
वाराणस्यां समायातो, जेतुकामः सुशास्त्रवित् । पिप्पलादस्तदा वादं, कर्तुं सज्जोऽभवद्भृशम् ॥१९६॥ युग्मम् ॥
पिप्पलादस्तथा हेतुमद्युक्तीरगदद् भृशम् । यथा न जल्पितुं **याज्ञवल्क्यव** ईशितोऽभवत् ॥१९७॥
**पिप्पलादेन** सद्यः स, विजितो **याज्ञवल्कवः** । किङ्करोऽजनि तस्यैव, स्वामिसेवकभावतः ॥१९८॥

**पिप्पलादं सुभद्राऽवक्, सुलसा**-याज्ञवल्क्यवौ । पितरौ भवतस्तेनावज्ञां मा कुरु नन्दन ! ॥१९९॥
जातमात्रो भवांस्त्यक्तो, **याज्ञवल्क्येन** हेलया । मया त्वं वर्धितस्तन्य-पानदानेन निश्चितम् ॥२००॥
सख्याः पुत्रस्य सम्बन्धात्, बह्वयो विद्या मया क्रमात् । विश्राणितास्तवाऽत्यन्तं, यथा विज्ञोऽभवद्भवान् ॥२०१॥
ततः स धर्मबुद्ध्या तु, मातृमेधाऽश्वमेधकौ । गोमेधं पितृमेधं चाजमेधं यज्ञमन्यदा ॥२०२॥
कल्पयित्वा च शास्त्राणि, स्वःफलानि व्यधाच्च सः । मातृमेधादिशास्त्राणि, पेठुर्विप्रा घनास्ततः ॥२०३॥
यतः –
यादृशं कल्प्यते शास्त्रं, धर्मपापात्मकं बुधैः । तादृशं पठ्यते लोकैरज्ञानैर्निश्चितं सदा ॥२०४॥
पापं शास्त्रं पठन् पाप-कर्माणि कुरुते जनः । धर्मशास्त्रं पठन् धर्म-कृत्यानि कुरुते जनः ॥२०५॥
यतः –
अंबस्स य निंबस्स य, दुण्हंपि समागयाइ मूलाइं । संसग्गीइ विणट्ठो, अंबो निंबत्तणं पत्तो ॥२०६॥
जातमात्रोऽप्यहं मातृ-पितृभ्यां प्रोज्झितः क्षितौ । मातृमेधं पितृमेधं, यज्ञं करोम्यतोऽधुना ॥२०७॥
**पिप्पलादो** विचार्येति, हत्वाऽम्बा-जनकौ निजौ । मातृमेधं पितृमेधं, यागं चकार मूढधीः ॥२०८॥
तथाविधानि शास्त्राणि, पापकानि च भूरिशः । उपदिश्य स्वशिष्येभ्यः, **पिप्पलादो** ममार सः ॥२०९॥
तादृक्कुशास्त्रनिर्माण-समर्जिततमोभरात् । **पिप्पलादो** गतः श्वभ्रे, पञ्चमे बहुदुःखदे ॥२१०॥
ततोऽन्तरान्तराच्छाग-व्याघ्रमत्स्यभवादिषु । उत्पद्य नरके दुःखी, **पिप्पलादो**ऽभवद् भृशम् ॥२११॥
ततः स निर्गतः पञ्चभवेषु च्छगलोऽभवत् । यज्ञेषु याज्ञिकैर्वह्नौ, हुतः पुण्यधिया क्रमात् ॥२१२॥
यतः –
यादृशं क्रियते कर्म, तादृगासाद्यते फलम् । उप्तेषु कोद्रवेष्वेव, न शालिर्जायते क्वचित् ॥२१३॥
षष्ठे भवे ममाऽजस्य, हन्यमानस्य निर्दयम् । **रुद्रदत्तेन** कल्याण-द्वीपेऽथ गन्तुचेतसा ॥२१४॥
**चारुदत्तो** नमस्कारान्, लगित्वा श्रवसो मम । अश्रावयत्तथा च्छाग-भवे वर्यदयात्मकः ॥२१५॥ युग्मम् ॥
ग्राहितोऽनशनं चाऽहं, **चारुदत्तेन** तत्क्षणात् । तथा यथाऽभवं स्वर्गे, प्रथमे भासुरः सुरः ॥२१६॥
अतो मेऽभूद् गुरु**श्चारुदत्तः** पूर्वभवे वरः । तेनादौ गुरुभावेन, **चारुदत्तो** नमस्कृतः ॥२१७॥
यतः –
अज्ञानतिमिरान्धस्य, ज्ञानाञ्जनशलाकया । नेत्रमुन्मीलितं येन, तस्मै श्रीगुरवे नमः ॥२१८॥
विना गुरुभ्यो गुणनीरधिभ्यो, जानाति धर्मं न विचक्षणोऽपि ।
विना प्रदीपं शुभलोचनोऽपि, निरीक्षते कुत्र पदार्थसार्थम् ॥२१९॥
स्वेच्छाविरचितशास्त्रैः, प्रव्रज्यावेषधारिभिः क्षुद्रैः । नानाविधैरुपायैर-नाथवन्मुष्यते जनः ॥२२०॥
मयैव पापिना पाप-मया यागाः प्रवर्तिताः । अतो मे नरकं मुक्त्वा, स्थानमन्यत्र विद्यते । ।२२१॥
प्रणम्याथ यतेः पादौ, जगाद स सुरस्तदा । कथं मे छुट्टनं तस्मात्पातकाद्धि भविष्यति ॥२२२॥
यतिः प्राह न गीर्वाणैस्तपो विधीयते मनाग् । अतः कुरुष्व सान्निध्यं, श्रीसङ्घस्यार्हतो नतिम् ॥२२३॥

**चारुदत्तः** खगौ तौ तु, श्रुत्वा देवभवं सुरात् । त्यक्त्वा मिथ्यात्वमह्नाय, सम्यक्त्वशालिनोऽभवन् ॥२२४॥
यतः –
शास्त्रं बोधाय दानाय, धनं धर्माय जीवितम् । वपुः परोपकाराय, धारयन्ति मनीषिणः ॥२२५॥
**चारुदत्तं** गुरोर्भावात्, सुरः खगद्वयान्वितः । प्रणम्य तं यतिं **चम्पापुर्यां** सद्योऽनयत्तमाम् ॥२२६॥
सार्धद्वादशरैकोटी-र्वर्षयित्वा तदङ्गणे । स सुर**श्चारुदत्तं** च, नत्वा स्वस्थानमीयिवान् ॥२२७॥
**चारुदत्त**स्ततो वर्यावासं भूरिव्ययाद्व्यधात् । स्वजनान् पोषयामास, भूयिष्ठं गौरवात्क्रमात् ॥२२८॥
श्वशुरस्यालयात्पत्नीं, समानीय शुभेऽहनि । सनाथं स्वगृहं चक्रे, **चारुदत्तः** प्रियास्थितेः ॥२२९॥
इतो भ्रान्त्वा भुवं **रुद्रदत्त**श्चीवरखण्डभृत् । आगतस्तादृशं **चारुदत्तं** दृष्ट्वा चमत्कृतः ॥२३०॥
ततश्च **चारुदत्तेन**, पृष्टः क्व रैरजो वद । **रुद्रदत्तो**ऽवदत् स्वर्ण-द्वीपेऽहमगमं तदा ॥२३१॥
पट्टलं हेमधूलीभि-र्बन्धयित्वा दृढं ध्रुवम् । भारण्डांऽह्रिविलग्नः सन्, द्वीपात्तस्माद्विनिर्गतः ॥२३२॥
मार्गे नभोऽध्वना मे तु, करात्पट्टलकोऽपतत् । ततोऽहं दूरतोऽन्यस्मिन्, गिरिशृङ्गेऽपतत् पुनः ॥२३३॥
किञ्चिद्भग्नतनुस्तस्मा-दङ्गादुत्थाय निर्गतः । आगच्छंश्चटितो हस्ते, पारसिकनृणामहम् ॥२३४॥
तैश्च स्वसदने नीत्वा, पोषयित्वा वराशनैः । छित्त्वा च मे तनुं रक्तं, कर्षितं प्रचुरं च तैः ॥२३५॥
तेन रक्तेन ते पट्ट-कुलेषु रञ्जनं व्यधुः । एवं पुनः पुनर्मासा-त्कदर्थितः समा बहुः ॥२३६॥
एवं कष्टं सहित्वाऽलं, नष्टोऽहमेकदा निशि । पुनर्धृत्वा समानी-तस्तैश्च बद्धो दृढं तनौ ॥२३७॥
मासे गते गते देहं, छित्त्वा मे रुधिरं ललुः । मुक्तोऽथ मुत्कलो हन्त, पुनर्नष्टः कृतत्वरः ॥२३८॥
तत्र श्वभ्रसमाः पीडाः, सहित्वा बहुहायनान् । आगतोऽहं वने कृष्ण-चम्पके बहुपादपे ॥२३९॥
भ्रमन्वनेऽभितो लग्नो, भारण्डपक्षिणोः पदोः । स भारण्डः समायातो, द्वीपेऽथ **ऊषरा**ऽभिधे ॥२४०॥
जलाभावादहं जातो, दुःखी वासरसप्तकम् । ततोऽकस्मादभूद् वृष्टि-रपां पयस्ततो भृशम् ॥२४१॥
ततः सुप्तोऽहमुद्वानागतमत्स्येन दैवतः । गिलितोऽथ ययौ मत्स्यः, **कम्बुद्वी**पतटे क्रमात् ॥२४२॥
मत्स्योदराद्विनिर्गत्य, भक्षयित्वा फलानि तु । भ्रमन् वनेऽमिलं पुंस, एकस्य काष्ठवाहिनः ॥२४३॥
तेन सार्धं पुरे पद्मे, गत्वा स्थित्वा दिनाष्टकम् । अत्राहमागतो दैवा-न्मिलितः सज्जनस्य [स्वजनस्य] तु ॥२४४॥
**चारुदत्तो** जगौ स्वस्य, चेष्टितं भ्रातुरग्रतः । ततः स प्रीतितस्तेन, वरवस्त्रान्नदानतः ॥२४५॥
**रुद्रदत्तो** जगौ भाग्यं, विद्यते पुष्कलं तव । अहं निर्भाग्यपुंसां तुं, मध्ये मुख्योऽस्मि साम्प्रतम् ॥२४६॥
**चारुदत्तो** जगौ पुण्यं, विना न लभ्यते सुखम् । अतस्त्वं कुरु सर्वज्ञधर्मं जीवदयामयम् ॥२४७॥
यतः –
व्याघ्रीव तिष्ठति जरा, परिवर्जयन्ती, रोगाश्च शत्रव इव, प्रहरन्ति देहम् ।
आयुः परिस्रवति भिन्नतटादिवाम्भो-लोकस्तथाऽप्यहितमाचरतीति चित्रम् ॥२४८॥
क्षणं बालो भूत्वा क्षणमथ युवा, कामरसिकः, क्षणं वित्तैर्हीनः क्षणमपि च, सम्पूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनु-र्नरः संसाराङ्के वसति यमधानीजमनिकाम् ॥२४९॥
**रुद्रदत्तो** निशम्येति, धर्मं भ्रातुः समीपतः । चकार जिननाथार्चां, कुसुमैः प्रवरैः सदा ॥२५०॥

**चारुदत्त**स्ततोऽनेकान्, प्रासादानर्हतो वरान् । कारयित्वाऽऽप्तबिम्बानि, स्नपयामास सूत्सवम् ॥२५१॥
शत्रुञ्जयादितीर्थेषु, भूरिसङ्घसमन्वितः । पूजां चकार सत्पुष्प-ध्वजदीपादिदानतः ॥२५२॥
यतः –
श्रीतीर्थपान्थरजसा, विरजीभवन्ति, तीर्थेषु बम्भ्रमणतो, न भवं भ्रमन्ति ।
तीर्थव्ययादिह नराः, स्थिरसम्पदः स्युः, पूज्या भवन्ति जगदीशमथार्चयन्तः ॥२५३॥
सुसाधुभ्यः सदा दानं, दत्त्वा प्रासुकमात्मना । **चारुदत्तो**ऽन्वितः श्राद्धै-र्वैररत्ति स्म यत्नतः ॥२५४॥
यतः –
अभयं सुपत्तदाणं, अणुकंपा-उचिअ कित्तिदाणं च । दोहिं विमुक्खो भणीओ, तिन्नि वि भोगाईअं दिंति ॥२५५॥
स्थापयित्वौकसो भारं, पुत्रे **पद्माऽभिधे** क्रमात् । **चारुदत्तो**ऽग्रहीद्दीक्षां, **रुद्रदत्त**समन्वितः ॥२५६॥
**चारुदत्त**स्तपस्तप्त्वा, चतुर्थे तविषे ययौ । **रुद्रदत्तो** द्वितीये तु, स्वर्गलोके समागमत् ॥२५७॥
ततश्च्युतो **धरापुर्यां, चारुदत्तः** सुधाशनः । **कलापुरे** वणिग्**भीम**-पुत्रः **सोमाऽभिधो**ऽभवत् ॥२५८॥
तत्राऽसारं भवं ज्ञात्वा, लात्वा दीक्षां तमःक्षयात् । **कल्याणनगरीं चारुदत्तो**ऽलङ्कृतवान् क्रमात् ॥२५९॥
**रुद्रदत्त**स्ततश्च्युत्वा, भवानेकादश क्रमात् । भ्रान्त्वा **वीरपुरे धीर**-पुत्रोऽभूत्**कमलाभिधः** ॥२६०॥
कमलोऽथ व्रतं लात्वा, तपस्तीव्रं सदा करन् । सर्वकर्मक्षयान्मुक्ति-नगर्यां समुपागमत् ॥२६१॥

**॥ इति जीवदयायां कर्मणि च चारुदत्तकथा ॥**

**चन्द्रचूड**महीपालो, भूरिलोकसमन्वितः । श्राद्धधर्मं दयामूलं, जग्राह शिवशर्मदम् ॥२६२॥
**अयोध्यानगरी**मध्ये, प्रासादानर्हतो दश । कारयामास भूपाल-**श्चन्द्रचूडो** धनव्ययात् ॥२६३॥
विहरन्नथ **कौशाम्ब्याः**, पुर्या बहिर्वनेऽन्यदा । **अरो**ऽर्हत्समवासार्षित्, गच्छेशादिसुसाधुयुक् ॥२६४॥
तदा तत्रत्यभूपालः, **शतमल्लाभिधो**ऽचिरात् । प्रभोः पार्श्वे समायातः, धर्मं श्रोतुं जनान्वितः ॥२६५॥
ततो**ऽर**स्तीर्थकृद् भव्य-जनप्रबोधहेतवे । देशनां चकृवानेवं, योजनप्रमया गिरा ॥२६६॥
कुमार्गं सन्ततं सेव-मानो भवे भवे भृशम् । दुःखानि लभते जीवः, **सुन्दरीवनि**तेव तु ॥२६७॥
तथाहि –
**कोशाम्ब्यां** पुरि भूपालः, कालः प्रत्यर्थिभूभुजाम् । चन्द्रवज्जनतानन्दी, **रामनामा**ऽभवन्नमी ॥२६८॥
यतः –
दुष्टानां दमनं नयानुगमनं, स्वीयप्रजापालनं, नित्यं देवमहर्षिसाधुनमनं, षड्दर्शनीमाननम् ।
औचित्याचरणं परोपकरणं, त्यागं सभोगश्रियां, कुर्वाणो नृपतिः श्रिया निजपतिः, सत्येव नो मुच्यते ॥२६९॥
तस्य **प्रीतिमती** पत्नी, पट्टराज्यभवद्वरा । **पद्मदेवाऽभिधः** पुत्रो, विनीतोऽभूच्च सुन्दरः ॥२७०॥
यतः –
*अवधिज्ञानिनः सूरे-रानन्दाह्वास्य कानने । निशम्यागमनं दानं, वनपालाय दत्तवान् ॥२७१॥*
आरुह्य हस्तिनं **राम-नामा**ऽथ पृथिवीपतिः । उद्यानेऽभ्येत्य च्छत्रादि, विमुच्य विधिपूर्वकम् ॥२७२॥
प्रणम्य गुरुपादाब्जं, भक्तितः सपरिच्छदः । धर्मं श्रोतुमुपाविष्टः, शिवशर्मप्रदायकम् ॥२७३॥

यतः –

सचित्तदव्वमुज्झण१ मचित्तमणुज्झणं२ मणेगत्तं३ । इगसाडी उत्तरासंगु४ अंजली५ सिरसि जिणदिट्ठे ॥२७४॥

इअ पंचविहाभिगमो, अहवा मुच्चंति रायचिह्नाइं । खग्गं१ छत्तो२ वाणह३, मउडं४ चमरे अ पंचमए ॥२७५॥

देशनावसरे पार्श्वस्थितद्रोः शिखरोपरि । शकुन्युपाविशद्व्योम्ना, समेत्य त्वरितं ध्रुवम् ॥२७६॥

तदा तत्र गुरोरग्रे, कुष्ठ्येको मानवः पुनः । समेत्योपाविशज्जैनं, धर्मं श्रोतुमना मुदा ॥२७७।

वृक्षशाखासमारूढं, तदा शकुनिकं स्थिरम् । कुष्ठिनं च नरं दृष्ट्वा, हसितं श्रीगुरूत्तमैः ॥२७८॥

गुरूणामानने हास्यं, दृष्ट्वा भूपो जगाविति । भवद्भिर्हसितं कस्माद्धेतोः सद्यो निगद्यताम् ॥२७९॥

निषिद्धं हसनं सर्व-लोकानां दुःखहेतुकम् । यतीनां तु विशेषेण, हास्यं पापनिबन्धनम् ॥२८०॥

यतः –

बालसखित्वमकारणहास्यं, स्त्रीषु विवादमसज्जनसेवा । गर्दभ(यान)मसंस्कृतवाणी, षड्भिर्नरो लघुतामुपयाति ॥२८१॥

हसन्नपि नृपो हन्ति, मानयन्नपि दुर्जनः । स्पृशन्नपि गजो हन्ति, जिघ्रन्नपि भुजङ्गमः ॥२८२॥

भूपोक्तमेवमाकर्ण्य, गुरुराह शकुन्यसौ । सम्प्राप्तं मानुषं जन्म, जहाराशुभकर्मतः ॥२८३॥

एष कुष्ठी गलत्कायो, दुष्कर्मकरणात्क्रमात् । जातोऽत्र संसृतौ दुःख-श्रेणीं श्रयन् पदे पदे ॥२८४॥

यतः –

अनाज्यं भोज्यमप्राज्यं, विप्रयोगः प्रियैः सह । अप्रियैः सम्प्रयोगश्च, सर्वं पापविजृम्भितम् ॥२८५॥

राजाऽप्राक्षीत्कथं मर्त्य-जन्म प्राप्ता शकुन्यसौ । अपाहरन्नरस्त्वेष, कुष्ठी जातो निगद्यताम् ॥२८६॥

गुरवो जगदुः खण्डे, भरतेऽत्र **धरापुरे** । **धनस्य** श्रेष्ठिनः पत्नी, **सुन्दरी** समजायत ॥२८७॥

सा च पत्या समं शश्वत्, कुर्वाणा कलहं भृशम् । **भोजेना**ऽन्यनरेणाऽऽमा, कुमार्गं सेवते रहः ॥२८८॥

यतः –

दिवा पश्यन्ति नो घूकः, काको नक्तं न पश्यति । अपूर्वः कोऽपि कामान्धो, दिवा नक्तं न पश्यति ॥२८९॥

वञ्चयित्वा पतिं शश्वत्, गृहसत्कं धनं घनम् । **भोजाया**ऽदान्न वीक्ष्येत, भयं संसारसम्भवम् ॥२९०॥

अन्यदा **सुन्दरी** प्रोक्ता, **भोजेनेति** रहःस्थिता । नातः परं त्वयाऽत्रैत्यं, बिभेमि कान्ततस्तव ॥२९१॥

यतः –

राजदण्डभयात्पापं, नाचरत्यधमो जनः । परलोकभयान्मध्यः, स्वभावादेव नोत्तमः ॥२९२॥

**सुन्दर्यव**ग् न भीः कार्या, त्वयाऽहं करवै तथा । यथाऽऽवाभ्यां सुखेनैव, स्थास्यते निर्भयं सदा ॥२९३॥

सबलाः पुरुषाः प्रोक्ताः, प्रोक्ताः नार्योऽबलाः पुनः । अतस्त्वं कुरुषे चित्तं, कातरं विबलं भृशम् ॥२९४॥

एवं प्रोच्य स्थिरीकृत्य, **भोजं** चैत्याऽऽलये निजे । **सुन्दरी** रमणं स्वीयं, हन्तुमीष्टे रहः सदा ॥२९५॥

यतः –

कुसङ्गतेः कुबुद्धिः स्यात्, कुबुद्धेः कुप्रवर्तनम् । कुप्रवृत्तेर्भवेज्जन्तु-र्भाजनं दुःखसन्ततेः ॥२९६॥

पापी पापं वितन्वानो, नेहाऽमुत्रापि कर्हिचित् । भूपतेर्नरकाद्दुःखं, वीक्ष्यतेऽन्धमनुष्यवत् ॥२९७॥

**धनो**ऽन्यदाऽदनं कर्तुं, यावच्चोपाविशद् गृहे । तावत्पत्नी वरान्नानि, प्रथमं पर्यवेषयत् ॥२९८॥
अर्धभक्ते तु सा पत्नी, करम्बं विषमिश्रितम् । कृत्वा मध्ये गृहं यावद्, भोजनं स्वकरेऽग्रहीत् ॥२९९॥
तावत्तत्रस्थसर्पेण, दृष्टा सा सुन्दरी क्षणात् । मूर्च्छां प्राप्याऽपतद् भूमौ, छिन्नमूलद्रुवत् तटात् ॥३००॥
अकस्मात्पतितां पत्नीं, दृष्ट्वा **धनो**ऽतिदुःखितः । तत्रैत्याकारयत् क्ष्वेडो-त्तारणे यत्नमादरात् ॥३०१॥
मन्त्र-तन्त्रौषधैर्नाना-विधैर्धनेन कारिते । उपचारे प्रियायास्तु, न गुणोऽभून्मनागपि ॥३०२॥
यतः –
स्फुरन्त्युपायाः शान्त्यर्थ-मनुकूले विधातरि । प्रतिकूले पुनर्यान्ति, तेऽप्युपाया अपायताम् ॥३०३॥
कस्य स्यान्न स्खलितं, पूर्णाः सर्वे मनोरथाः कस्य । कस्येह सुखं नित्यं, दैवेन न खण्डितः को वा ॥३०४॥
त्यक्तासुः **सुन्दरी** दुष्ट-ध्यानाद् व्याघ्रभवत्ततः । प्रायः पापी लभत्येव, दुर्गतिं दुःखदायिकाम् ॥३०५॥
मृत्वा(तां) प्रियां **धनो** दृष्ट्वा, विललापेति सकृपम् । हे पत्नी ! त्वं कथं मुक्त्वा, मां सम्प्रति गता मृतिम् ॥३०६॥
लोका जगुः स्त्रीयोऽर्थे कः, कातरो जायते नरः । नारी द्रव्ये क्रयाणं तु, लभ्यते प्रवरा पुनः ॥३०७॥
**धनो** जगौ किमीदृक्षा, गेहिनी लभ्यते वरा । अतः परं मयाऽन्यस्याः, कर्तव्यं पाणिपीडनम् ॥३०८॥
एवंविधा मृगाक्षी तु, लभ्यते नैव कर्हिचित् । एवं स सरलस्वान्तो, **धनो** जगौ जनाऽग्रतः ॥३०९॥
यतः –
उपकर्तुं प्रियं वक्तुं, कर्तुं स्नेहमकृत्रिमम् । स्वजनानां स्वभावोऽयं, केनेन्दुः शिशिरीकृतः ॥३१०॥
मृत्युकृत्यं सधर्मिण्या, विधायाद्यं बल(धन)स्तदा । असारां संसृतिं शश्वत्, ददर्श भस्मपुञ्जवत् ॥३११॥
अह इक्कंमि तरुवरे, वसीऊणं पक्खिणो पभायंमि । वच्चंति दसदिसाओ, एक्ककुटुंबंमि तह जीवा ॥३१२॥
इंदधणुफेणसुविणय-विज्जुलया-कुसुम-बब्बुअसरिच्छा । इड्ढजणसंपओसा विभवा देहाय जीवाणं ॥३१३॥
ध्यात्वेति स **धनः** प्राप्त-वैराग्यो विभवं निजम् । सप्तक्षेत्र्यां व्ययित्वा तु, गुरुपार्श्वे व्रतं ललौ ॥३१४॥
इतस्तां **सुन्दरीं** त्यक्त-प्राणां ज्ञात्वा जनाननात् । मृतो दुर्ध्यानतो व्याघ्रो, बभूवाऽधमकृत्यकृत् ॥३१५॥
शिक्षयित्वा क्रियां सर्वां, गुरुपार्श्वे **धनो** यतिः । तपति स्म तपस्तीव्रं, गुरुप्रोक्तं निरन्तरम् ॥३१६॥
यतः –
केनाञ्जितानि नयनानि मृगाङ्गनानां, को वा करोति रुचिराङ्गरुहान्मयूरान् ।
कश्चोत्पलेषु दलसञ्चयमातनोति, को वा करोति विनयं कुलजेषु पुंसु ॥३१७॥
भीमारण्येऽन्यदा कार्योत्सर्गस्थं धनसंयतम् । व्याघ्री वीक्ष्य न्यहन् पूर्वभववैरविधानतः ॥३१८॥
यतः –
यस्मिन् दृष्टे मनस्तोषो, जायते बान्धवः स च । यस्मिन् दृष्टे भवेत्क्रोधो, जायते स रिपुर्ध्रुवम् ॥३१९॥
ऋषि**र्धनः** शुभध्याना-न्मृत्वा स्वर्गेऽच्युते ययौ । व्याघ्री तु नरके तुर्ये, जगामासुखदायके ॥३२०॥
यतः –
जे विय मारंति पसू पुरोहिआ होमकारणु जाता । गम्माहिवई वि नरा तेवी अ नरगोवगा हुंति ॥३२१॥

सीहछभल्लचित्तयतंतूअ-तिमि-मयर-सुसुमारा य । वच्चंति ते वि नरयं जीवाहारा महापाव ॥३२२॥

पंचाणुव्वयजुत्ता, जे इत्थ सकामनिज्जरा एय । एवंविहा मणुस्सा, मरिऊण लभंति देवत्तं ॥३२३॥

शशकादीन् सदा जीवान्, व्याघ्रोऽथ भक्षयन् भृशम् । द्वितीये नरके यातः, सेहे दुःखपरम्पराम् ॥३२४॥

नरकात्**सुन्दरी** जीवो, निर्गत्य जम्बुकोऽभवत् । **धनजीवो**ऽच्युताच्च्युत्वा, **चन्द्रपुर्यां धनो** नृपः ॥३२५॥

स च न्यायी नृपोऽनेकान्, प्रासादानर्हतां वरान् । कारयित्वा व्यधाद्यात्रां, तीर्थे सिद्धाचलादिके ॥३२६॥

ततो **धनो** नृपो मृत्वा, **श्रीदर्यां** श्रीदनन्दनः । **वरदत्ताऽभिधो** जज्ञे ऽपाठीद् विद्या घनाः पुनः ॥३२७॥

**वरदत्तो**ऽन्यदा **धर्मशेखराचार्य**सन्निधौ । धर्मं श्रोतुं गतो धर्म-देशनां दत्तवान् स च ॥३२८॥

यथेक्षुहेतोः परिसिञ्चति पयस्तत्तृणानि वल्लीरपि च प्रसिज्यति ।

तथा नरो धर्मपथेन सञ्चरन् यशश्च कामांश्च वसूनि विन्दते ।३२९।

जीवो गेही वपुर्गेहं, जरा वह्निर्दहत्यदः । विषमा विषयाश्चौरा, मुष्णन्ति सुकृतं धनम् ॥३३०॥

दानशीलतपोभाव-भेदाद्धर्मं चतुर्विधम् । यः करोति जनस्तस्य, शिवश्रीर्नैव दुर्लभा ॥३३१॥

तत्रादौ भविभिर्ग्राह्यं, सम्यक्त्वं मुक्तिशर्मदम् । सम्यक्त्वरहितो जीवो, भवाब्धिपारगो नहि ॥३३२॥

या देवे देवताबुद्धि-र्गुरौ च गुरुतामतिः । धर्मे च धर्मधीः शुद्धा, सम्यक्त्वमिदमुच्यते ॥३३३॥

अदेवे देवबुद्धिर्या, गुरुधीरगुरौ च या । अधर्मे धर्मबुद्धिश्च, मिथ्यात्वमेतदुच्यते ॥३३४॥

सम्यक्त्वपालनफलं, श्रुत्वाऽलाद् गुरुसन्निधौ । तस्मिन्न दूषणं स मानयामास कदाचन ॥३३५॥

यतः –

शमसंवेगनिर्वेदा-नुकम्पास्तिक्यलक्षणैः । लक्षणैः पञ्चभिः सम्यक्, सम्यक्त्वमुपलक्ष्यते ॥३३६॥

स्थैर्यं प्रभावना भक्तिः, कौशल्यं जिनशासने । तीर्थसेवास्य(थ) पञ्चास्य, भूषणानि प्रचक्ष्य(क्ष)ते ॥३३७॥

शङ्का काङ्क्षा विचिकित्सा, मिथ्यादृष्टिप्रशंसनम् । तत्संस्तवश्च पञ्चापि, सम्यक्त्वं दूषयन्त्यमी ॥३३८॥

विवेकी विनयी दानी, **वरदत्तः** कृपापरः । कुर्वन् धर्मं स्वयं चान्या-न्कारयामास भाविनः ॥३३९॥

यतः –

कर्तुः स्वयं कारयितुः परेण, शुद्धेन चित्तेन तथाऽनुमन्तुः ।

साहाय्यकर्तुश्च समानभावात्तुल्यं फलं तत्त्वविदो वदन्ति ॥३४०॥

जम्बुकः सुन्दरीजीवो, वनेऽभूच्छशकस्ततः । शुना स च हतः कीरो, बभूव चन्द्रकानने ॥३४१॥

कीरो मृत्वा द्विको जातो, जलाभावान्मृतः स च । **श्रीदर्यां** श्रीदगेहेऽभूत्, दासीसूश्**चन्दनाभिधः** ॥३४२॥

वञ्चनाकुशलो गेह-कर्मकुर्वन् निरन्तरम् । श्रीदेन मानितः पुत्र, इव स्वान्नाम्बुदानतः ॥३४३॥

श्रीदस्तं **चन्दनं** दासी-पुत्रं स्वसूनुवत्सदा । मानयामास सद्वस्त्र-भूषणादिप्रदानतः ॥३४४॥

श्रीदरीनगरे पुण्ये-भ्यस्य **प्रीतिमतीं** सुताम् । **वरदत्तः** सुतः पित्रा, सूत्सवे(वं) परिणायितः ॥३४५॥

विधायाराधनां सम्यक्, श्रीदः श्रेष्ठ्यन्यदा मृतः । अलञ्चकार गीर्वाण-गेहशर्म समाधिना ॥३४६॥

आलोइसु अईआरे वयाई उच्चरिसु-खमेसु जीवेसु । वोसिरे भाव-अप्पा अट्ठारस पावठाणाइं ॥३४७॥

चउसरणं गरहणं च सुकडाणुमोअणं कुणसु । सुहभावणं अणसणं पंचनमुक्कारसरणं च ॥३४८॥

श्रीदे मृते मृता पत्नी, विधायाराधनां तथा । **वरदत्तो** गृहस्वामी, श्रीदश्रेष्ठिमृतेरनु ॥३४९॥

यतः –

सृजति तावदशेषगुणालयं, पुरुषरत्नमलङ्करणं भुवः । तदपि तत्क्षणभङ्गी करोति चेदहह कष्टमपण्डितता विधेः ॥३५०॥

परिहरति न मृत्युं, पण्डितं श्रोत्रियं वा, धनकनकसमृद्धं, बाहुवीर्यं नृपं वा ।
तपसि नियतयुक्तं, सुस्थितं दुःस्थितं वा, वनगत इव वह्निः सर्वभक्षी कृतान्तः ॥३५१॥

**चन्दनं वरदत्तस्तु**, मन्यते मित्रवत्सदा । भोजनाच्छादनादीनि, **चन्दनाय** च दत्तवान् ॥३५२॥

**चन्दनाय** रमां सर्वां, बाह्यां भूमिगतां पुनः । दर्शयत् सरलस्वान्तो, **वरदत्तो** न शङ्कते ॥३५३॥

यतः –

अयं निजः परो वेति, गणना लघुचेतसाम् । उदारचरितानां च, वसुधैव कुटुम्बकम् ॥३५४॥

क्रमात्स **चन्दनो** लक्ष्मीं, **वरदत्तालये** बहुम् । निरीक्ष्याऽचिन्तयत् स्वामी, गेहस्यास्य भवाम्यहम् ॥३५५॥

यतः –

लोभमूलानि पापानि, रसमूलाश्च व्याधयः । स्नेहमूलानि दुःखानि, त्रीणि त्यक्त्वा सुखी भव ॥३५६॥

धनेषु जीवितव्येषु, स्त्रीषु चाहारकर्मसु । अतृप्ताः प्राणिनः सर्वे, याता यास्यन्ति यान्ति च ॥३५७॥

**वरदत्तो** यथा चारु-वस्त्रदानादिदानतः । मन्यते स्म तथा सोऽपि, द्वेषं तस्मिंश्च **चन्दनः** ॥३५८॥

**वरदत्तो** न मायां तु, चन्दनेन कृतां तदा । न जानीते मनाक् सम्यक्, सरलस्वभावतः क्वचित् ॥३५९॥

यतः –

दूधिइं सींचिउ लीबडउ थाणउं कीओ अमीएण । तोइज कंटाफाडणी जातिइं तणइं गुणेण ॥३६०॥

दुज्जणजण बब्बूलवण जइ सिञ्चई अमीएण । तोइज कंटाफाडणी जातिइं तणइं गुणेण ॥३६१॥

धर्मं वितन्वतां पुंसां, **वरदत्तो** विशेषतः । गौरवं कुरुते स्मालं, वस्त्रान्नदानतः सदा ॥३६२॥

मत्वेति मायया दासी-पुत्र**श्चन्दन** आदरात् । प्रीतिं धत्ते यदा लोक-स्तदेति जगदुः स्फुटम् ॥३६३॥

एतौ किं प्राग्भवे जातौ, सोदरौ सुहृदावथ । अन्यथा नेदृशी प्रीति-र्जायते क्वचिदेव तु ॥३६४॥

**चन्दनो वरदत्तं** तु, हन्तुं वाञ्छति सन्ततम् । गृहस्वामी स्वयं स्थातुमीहते नीचजोऽपि ॥२६५॥

विषेण वासितान्येव, नागवल्लीदलानि तु । कृत्वाऽथ चन्दनो रात्रौ, वरदत्ताय दत्तवान् ॥३६६॥

नागवल्लीदलान्येष, भक्षयित्वा मरिष्यति । अथाहमस्य गेहस्य, स्वामी भवामि निश्चितम् ॥३६७॥

कृतं चतुर्विधाहार-प्रत्याख्यानं स्वयं निशि । स्मृत्वादाद् वरदत्तो न, गतेऽन्यत्र च चन्दने ॥३६८॥

उच्छीर्षस्य विमुच्याधो, नागवल्लीदलानि तु । सुष्वाप **वरदत्तो**ऽथ, स्मरन्पञ्चनमस्कृतीन् ॥३६९॥

यतः –

नउकार इक्क अक्खर, पापं फेडेइ सत्त अयराणं । पन्नासं च पएणं सागरपयसयसममौणं [गेणं] ॥३७०॥

उच्छीर्षकादधः पेतु-र्नागवल्लीदलानि तु । यदा तदाऽमुचन्निद्रां, **वरदत्तः** सुपुण्यवान् ॥३७१॥

स्मरन् पञ्च नमस्कार-मुत्थितो देवसद्मनि । **वरदत्तो** नमन् देवां-स्ततो गुरुपदाम्बुजम् ॥३७२॥

यतः :

ब्राह्मे मुहूर्ते उत्तिष्ठेत्, परमेष्ठिस्तुतिं पठन् । किंधर्मा किंकुलश्चास्मि, किंव्रतोऽस्मीति च स्मरन् ॥३७३॥
शुचिपुष्पामिषस्तोत्रै-र्देवमभ्यर्च्य वेश्मनि । प्रत्याख्यानं यथाशक्ति, कृत्वा देवगृहं व्रजेत् ॥३७४॥
प्रविश्य विधिना तत्र, त्रिः प्रदक्षिणयेज्जिनम् । पुष्पादिभिस्तमभ्यर्च्य, स्तवनैरुत्तमैः स्तुयात् ॥३७५॥
ततो गुरूणामभ्यर्णं, प्रतिपत्तिपुरःसरम् । विदधीत विशुद्धात्मा, प्रत्याख्यानप्रकाशनम् ॥३७६॥
अभ्युत्थानं तदा लोके-ऽभियानं च तदागमे । शिरस्यञ्जलिसंश्लेषः, स्वयमासनढौकनम् ॥३७७॥
आसनाभिग्रहो भक्त्या, वन्दना पर्युपासनम् । तद्ध्यानेऽनुगमश्चेति, प्रतिपत्तिरियं गुरोः ॥३७८॥
ततः प्रतिनिवृत्तः सन्, स्थानं गत्वा यथोचितम् । सुधीर्धर्माविरोधेन, विहितार्थविचिन्तनम् ॥३७९॥
ततो माध्याह्निकीं पूजां, कुर्यात्कृत्वाऽथ भोजनम् । तद्विद्भिः सह शास्त्रार्थरहस्यानि विचारयेत् ॥३८०॥
ततश्च सन्ध्यासमये, कृत्वा देवार्चनं पुनः । कृतावश्यककर्मा च, कुर्यात्स्वाध्यायमुत्तमम् ॥३८१॥
न्याय्ये काले ततो देव-गुरुस्मृतिपवित्रितः । निद्रामल्पामुपासित, प्रायेणाब्रह्मवर्जकः ॥३८२॥
निद्राच्छेदे योषिदङ्गसतत्त्वं परिचिन्तयेत् । स्थूलभद्रादिसाधूनां, तन्निवृत्तिं परामृशन् ॥३८३॥
**वरदत्ते** देवगृहे, गते नन्तुं जिनेश्वरम् । वरदत्तप्रिया तानि, पत्राण्यादान्निजे करे ॥३८४॥
तया च देवृवाल्लभ्यात्, तानि पत्राणि तत्क्षणम् । ददिरे **चन्दनायैव**, मुमोद चन्दनस्ततः ॥३८५॥
अविमृश्यैव पत्राणि, दासीसूनुरभक्षयत् । मूर्च्छितोऽथ क्षणात् छिन्न-मूलद्रुवत्पपात सः ॥३८६॥
कारितेषूपचारेषु, बहुषु श्रीदसूनुना । पञ्चत्वमगामद्दासी-नन्दन**श्चन्दनः** क्षणात् ॥३८७॥

यतः –

संयोगाः स्युर्वियोगान्ता, विपत्सीमाश्च सम्पदः । स्यादानन्दो विषादान्तो, जन्म स्यान्मरणान्तिकम् ॥३८८॥
उच्छ्वासावधयः प्राणाः, स चोच्छ्वासः समीरणः । समीरणाच्चलं नान्यदियज्जीवति तदद्भुतम् ॥३८९॥
**चन्दनस्य** मृतिं स्मारं, स्मारं श्रीदसुतोऽनिशम् । दुःखी जातस्ततः शोको, लोकैरुत्तारितस्त्विति ॥३९०॥

यतः –

धर्म-शोक-भयाऽऽहार-निद्रा-काम-कलि-क्रुधः । यावन्मात्रा विधीयन्ते, तावन्मात्रा भवन्त्यमी ॥३९१॥
**वरदत्तो**ऽथ सम्प्राप्तवैराग्यो गुरुसन्निधौ । ललौ दीक्षां यदा चादा**दानन्दो**ऽपि तदा व्रतम् ॥३९२॥
पठञ्छास्त्राणि गुर्वन्ते, योग्यः सूरिपदाय तु । **आनन्दो**ऽथ यदा जातो-ऽभवत्सूरिपदं तदा ॥३९३॥
क्रमात्प्राप्तावधिज्ञान, **आनन्दो**ऽहं गुरुः स च । बोधयन् भविनोऽत्राऽऽयां, प्रबोधाय तवाऽधुना ॥३९४॥(सचा)
धनश्रेष्ठिभवा पत्नी, **सुन्दरी** तनुमान् पुनः । भ्रमन्ती संसृतौ भूरिदुःखानि प्राप भूरिशः ॥३९५॥
स च दासीसुतो नाम्ना, **चन्दनः** कपटाशयः । मृतः समलिका जाता, काननेऽत्र मनोहरे ॥३९६॥
भ्रमन्ती शकुनिः साऽथ, शिखरे साऽधुना तरोः । भूयो भूयो मुखं मामकीनं निरीक्षते स्म हि ॥३९७॥
एष कुष्ठी नरो **भोज**जीवो भवे भवे भ्रमन् । जातस्तादृक्षदुष्कर्मसंयोगात्साम्प्रतं ध्रुवम् ॥३९८॥
स्वं वृत्तं शकुनिर्ज्ञात्वा, जातजातिस्मृतिः स्फुटम् । पुनः पुनर्ममाऽऽस्यं तु, वीक्षते पशुतां गता ॥३९९॥

सोऽपि कुष्ठी निजं वृत्तं, कुत्सितं प्राग्भवादिकम् । प्राप्य जातिस्मृतिं कर्म, स्वं निनिन्द पुनः पुनः ॥४००॥
निरीक्ष्य चेष्टितं कुष्ठि-शकुन्योर्मयकाऽधुना । हसितं भूपतेर्यस्माद्भवस्य गतिरीदृशी ॥४०१॥
यत: –
क्षणं बालो भूत्वा क्षणमथ युवा कामरसिकः, क्षणं वित्तैर्हीनः क्षणमपि च सम्पूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनु- र्नरः संसाराङ्के विशति यमधानीयवनिकाम् ॥४०२॥
यत: –
देवो नेरइओ त्ति य कीड पयंगु त्ति माणुसो एसो । रूवस्सी विरूवो सुहभागी दुक्खभागी अ ॥४०३॥
राउ त्ति अ दमगुत्ति अ एस सवागुत्ति एस वेयविऊ । सामी दासो पुज्जो खलो त्ति अधणो धणवई त्ति ॥४०४॥
न वि इत्थ कोइ नियमो, सकम्म-विणिविट्ठ सरिस-कय-चिट्ठो । अन्नन्नरूववेसो, नडुव्व परिअत्तए जीवो ॥४०५॥
ततः शकुनिका वृक्षा-दुत्तीर्य गुरुपादयोः । पतित्वा क्षमयामास, स्वगिरा स्वं कृतं तमः ॥४०६॥
स कुष्ठ्यपि गुरोः पादौ, प्रणम्य स्वकृतं तमः । क्षमयामास भावेन, मनोवाक्काययोगतः ॥४०७॥
ततः शकुनिका-कुष्ठि-नरौ त्यक्त्वाऽशनादिकम् । लातः स्माऽनशनं भावात्, नमस्कारपुरःसरम् ॥४०८॥
गुरवोऽथ जगुः शुद्धं, लातं वाऽनशनं वरम् । युवाभ्यां पालनीयं च, कुष्ठि-शकुनिके ! ध्रुवम् ॥४०९॥
यः क्षमां कुरुते देही, मनसाऽपि दिवानिशम् । स याति निर्वृतिं स्तोक-भवैरेव **जनः** खलु ॥४१०॥
तथाहि –
**रोहितकपुरे हारीत**को धरणिनायकः । त्यक्त्वा राज्यं ललौ दीक्षां, तापसीं तापसान्तिके ॥४११॥
कृपापराङ्मुखस्तीव्र-**हारीत**कस्तपस्तपन् । मध्याह्ने नगरीमध्ये, भिक्षायै समुपैति सः ॥४१२॥
कदाचित्तपसा प्राप्त-तेजोलेश्यः स तापसः । गर्वं दधत् जगत्सर्वं, मन्यते स्म तृणोपमम् ॥४१३॥
यत: –
जाई कुलरूवबलसुयतवलाभसिरीइ अट्ठमयमत्तो । एआइच्चिअ बंधइ असुहाइं बहुं च संसारे ॥४१४॥
जाई य उत्तमाए कुले पहाणंमि रूवमिस्सरिअं । बलविज्जाइतवेण य लाभमएणं च जो खिंसे ॥४१५॥
संसारमणवयग्गं नीयट्ठाणाइं पावमाणो अ । आभमइ अणंतं कालं तम्हाउ मए विवज्जिज्जा ॥४१६॥
एकदाऽऽदाय भिक्षां स, **हारीत**कतपोधनः । तरोस्तले बहिः कक्षे, जेमनाय न्यवीविशत् ॥४१७॥
तदा तस्य तरोः शाखा, स्थिता बलाकिकैकका । पुरीषं व्युत्सृजत् **हारीत**कशीर्षोपरि क्षणात् ॥४१८॥
**हारीत**कोऽथ रुष्टः संस्तेजोलेश्यां तथाऽमुचत् । यथा स भसितीभावं, गता सद्यो बलाकिका ॥४१९॥
यत: –
अपूर्वः कोऽपि कोपाग्निः, सज्जनस्य खलस्य च । एकश्च शाम्यति स्नेहा-द्वर्धतेऽन्यश्च वारितः ॥४२०॥
नाकारणरुषां सङ्ख्या, सङ्ख्याताः कारणात्क्रुधः । कारणेऽपि न कुप्यन्ति, ये ते जगति पञ्चषाः ॥४२१॥
तं नत्थि घरं तं नत्थि सउलं देउलं पि तं नत्थि । जत्थ अकारण कुवीआ दो तिन्नि नरा न दीसंति ॥४२२॥
अन्येद्युस्तापसः सोऽपि, क्रूरकर्मा पुरान्तरे । भिक्षायै **जिनदासस्य**, सदने समुपेयिवान् ॥४२३॥

जिनदासप्रिया **शीलमती** जिनमतश्रिता । कृपावती जिनेन्द्रार्चां, कृत्वाऽत्ति सन्ततं स्वयम् ॥४२४॥
तदा **शीलवती** किञ्चित्, कार्यव्यग्रा विलम्ब्य सा । भिक्षां दातुं समायाता, क्रुद्धोऽथ तापसोऽभवत् ॥४२५॥
तेजोलेश्यां मुमुक्षुं तं, मुखे धूमविनिर्गमात् । ज्ञात्वा **शीलवती** प्राप्ताऽवधिज्ञाना जगाद तम् ॥४२६॥
भो भो ! तापस ! या वृक्षे, शाखास्थिता बलाकिका । भस्मीकृता त्वया तेजोलेश्ययाऽहं न साऽबला ॥४२७॥
क्षमी यत्कुरुते कार्यं, न तत्क्रोधवशंवदः । कार्यस्य साधनी प्रज्ञा, सा च क्रोधाद्विनश्यति ॥४२८॥
अइतज्जणा न कायव्वा, पुत्तकलत्ते सुसामिए मित्ते । दहिअंपि महिज्जंतं, छंडइ नेहं न संदेहो ॥४२९॥
श्रुत्वेति चकितो **हारीत**को दध्यौ कथं मम । बलाकादहनं वेत्ति, पुरमध्यस्थिता त्वसौ ॥४३०॥
तेजोलेश्यां स संहृत्य, प्राह ! भद्रे सतीतमे ! । कथं मच्चेष्टितं छन्नं, कृतं त्वं वेत्सि कथ्यताम् ॥४३१॥
प्राह **शीलवती वाणारसीपुर्यां** व्रजाऽधुना । मातङ्गः **कुमुद**स्तत्र, वासी सर्वं वदिष्यति ॥४३२॥
आकर्ण्यैतद् विशेषण, **हारीत**स्तापसस्तदा । वाराणस्यां समेत्या-गात् **कुमुदस्य** निकेतने ॥४३३॥
**हारीत**कं समायातं, दृष्ट्वा **कुमुद** ऊचिवान् । भो हारीत ! बलाकां त्वं, हतवान् पादपस्थिताम् ॥४३४॥
**शीलवत्या** निजस्वान्तःसंशयस्य च्छिदेऽधुना । प्रेषितोऽत्र भवान् सोऽथ, तापसश्चकितो भृशम् ॥४३५॥
ततः स तापसः प्राह, त्वं सा **शीलवती** पुनः । वितथो मच्चरितं छन्नं, कृतं कस्माद्वनोद्भवम् ॥४३६॥
**कुमुदः** प्राह ते तस्या, रक्षतोर्जीवजीवितम् । कुर्वतोर्जिननाथार्चां, क्षमां वितन्वतोः सतोः ॥४३७॥
अवधिज्ञानमुत्पन्नं, ससङ्ख्याताब्धिदर्शकम् । तेन विज्ञायतेऽस्माभ्यां, स्वस्यान्यस्य विचेष्टितम् ॥४३८॥
यतः –

संखाईआओ खलु ओही-नाणस्स हुंति पइडीओ । काओ भवपच्चइआ, खओवसमिआउ काउं वि ॥४३९॥
*संखिज्जंमी अकाले दीवसमुद्दावि हुंति संखिज्जा । कालंमी असंखिज्जे दीवसमुद्दाय भइयव्वा ॥४४०॥*
संखिज्जमसंखिज्जो पुरिसमबाहाइ खित्तओ ओही । संबंधमसंबद्धो लोगमलोगे असंबद्धो ॥४४१॥
पुव्वभवा सोपि जइ इक्कं दोतिन्नि जाव नवगं वा । उवरिं तस्स अविसओ भावओ जाईसरणस्स ॥४४२॥
दया विना तपस्वित्वं, कृतं भवति निष्फलम् । दयामूलं वृषः प्रोक्तं, क्षमामूलं व्रतं पुनः ॥४४३॥
यतः –

सट्ठिवाससहस्सा तिसु तिखुत्तोदएण धोएणं । अणुचिण्णं तामलिणा, अन्नाणतवेण अप्पफलो ॥४४४॥
तामलि तणइं तवेण जिणमए सिज्झइं सत्तजण । किंतु मिच्छत्तवसेण तामलि ईसाणे गओ ॥४४५॥
अतो जीववधं त्यक्त्वा, लात्वा जैनं व्रतं ध्रुवम् । क्षमस्व निखिलान् जीवान्, मनोवाक्तनुभिः समम् ॥४४६॥
यतः –

क्षमाखड्गं करे यस्य, दुर्जनः किं करिष्यति । अतृणे पतितो वह्निः, स्वयमेव विनश्यति ॥४४७॥
*खामेसु सव्वसत्ते खमेसु तेसु तुमं विगयकोवो । परिहरीअ पुव्ववेरो सव्वं मित्तेति चिंतेसु ॥४४८॥*
क्षमावतामयं लोकः, परश्चैवाक्षमावताम् । इह सन्मानमर्हन्ति, [क्षमीह लभते सौख्यं] परत्र च शुभां गतिम् ॥४४९॥

ददतु ददतु गालीर्गालिमन्तो भवन्तो- वयमिह तद[१]दानाद् गालिदानेऽप्यशक्ताः[२] ।
जगति विदितमेतद्दीयते विद्यमानं, ददति खरविषाणं किं महात्यागिनोऽपि ? ॥४५०॥

प्रायः सर्वंसहस्यापि, भवेयुः सुहृदोऽरयः । तोयैः क्ष्मां शोषयेद् ग्रीष्मो, वर्षा तोयैश्च पोषयेत् ॥४५१॥
श्रुत्वेति वचनं तस्य, **कुमुदस्य** वरादरात् । जैनयत्यन्तिके दीक्षां, लात्वा **हारीतको** जगौ ॥४५२॥
बलाका या मया जघ्ने, सा कुत्र समपद्यत । यतिः प्राह पुनः पृच्छ, मातङ्गं **कुमुदं** त्वकम् ॥४५३॥
ततः स तापसो गत्वा, पप्रच्छ **कुमुदं** तकम् । सा बलाका मृता कुत्र, समुत्पन्नाऽस्ति कथ्यताम् ॥४५४॥
यत्रस्तत्र व्रजित्वाऽहं, क्षमयिष्यामि तां पुनः । विना क्षमणकं नैव, जीवश्छुट्टति पापतः ॥४५५॥
**मुकुन्दो**ऽवग्बलाका सा, मृत्वा **प्रेमपुरा**न्तिके । अभूत् शुकी जिनावासे, शुश्राव च मुनेर्वचः ॥४५६॥
जिनपूजाफलं श्रुत्वा, वानेयात् कणिशात् सदा । करोति स्म शुकी तीर्थंकरपूजां सुभावतः ॥४५७॥
यतः –
पूआ पच्चक्खाणं पडिक्कमणं पोसहो परोवयारो अ । पंच पयारा जस्स य, न पयारो तस्स संसारे ॥४५८॥
मृत्वाऽथ साम्प्रतं **पद्मपुरे पद्मे**भ्यनन्दिनी । **धनवत्य**भिधा जाता, जिनधर्मपरायणा ॥४५९॥
यतः –
हस्तो दानविधौ मनो जिनमते, वाचः सदा सूनृते, प्राणाः सर्वजनोपकारकरणे, वित्तानि चैत्योत्सवे ।
येनैवं विनियोजितानि शतशो, विश्वत्रयीमण्डले, धन्यः कोऽपि स विष्टपैकतिलकः, काले कलौ श्रावकः ॥४६०॥
ततः स तापसः साधु-र्गत्वा तत्र पुरे रयात् । **धनवत्या** पदौ नत्वा, क्षमयामास सादरम् ॥४६१॥
जगौ **धनवती** त्वं तु, साधुः सम्प्रति वीक्ष्यसे । गृहस्थाऽहं कथङ्कारं, पत पदोस्तले मम ॥४६२॥
गृहस्थो यतिपादाब्जे, पतित्वा क्षमते ध्रुवम् । नैव साधुर्गृहस्थानां, पदोः पतति कर्हिचित् ॥४६३॥
साधुः प्राह गृहस्थो वा, साधुर्वा क्षमते यकः । स एवाराधकः प्रोक्तो, जिनैर्वृद्धो लघुः पुनः ॥४६४॥
जगौ **धनवती** कुत्राऽपराधो मे त्वया कृतः । मया वा भवतः कुत्रापराधो विहितो वद ॥४६५॥
ततो **हारीतकः** साधुः, स्वकीयं चेष्टितं समम् । अचीकथद्वलाकाया, भवे भूतं यथाश्रुतम् ॥४६६॥
ततो **धनवती** जात-जातिस्मृतिर्भवान् निजान् । दृष्ट्वा **हारीतकं** सम्यक्, क्षमयामास भावतः ॥४६७॥
ततो **हारीतकः** साधु-र्मुक्त्वा नेत्रे निजे तदा । देहरक्षां व्यधात्रैव, निःस्पृहः सर्ववस्तुषु ॥४६८॥
यतः –
वंदिज्जमाणा न समुक्कसंति, हीलिज्जमाणा न समुज्जलंति ।
दंतेण चित्तेण चरंति धीरा, मुणी समुग्घाईयरागदोसा ॥४६९॥
नो समणो जइ समणो, भावेण य जो न होइ पावमणो ।
सयणे अ जणे अ समो, समो अ माणावमाणेसु ॥४७०॥
**हारीत**को दयां कुर्वन्, विशेषात्सर्वजन्तुषु । **क्षिप्त्वा**ऽखिलतमा मुक्ति-नगर्यां समुपेयिवान् ॥४७१॥
**धनवत्य**पि चारित्रं, गृहीत्वा यतना परा । मृत्वा गताऽऽदिमे स्वर्गे, देवत्वेन स्फुरद्द्युतिः ॥४७२॥
ततश्च्युतः सुरः सोऽपि, संप्राप्य मानुषं जनुः । मुक्तिं **धनवती** तत्र, भवे समागमत् खलु ॥४७३॥
मातङ्गः **कुमुदो** जीव-दयां प्रपालयन् सदा । स्वर्गे द्वादशमे गत्वा, सुरोऽभूद् रुचिरद्युतिः ॥४७४॥

१. अभावात् । २. असमर्थाः ।

ततश्च्युतो **धरापुर्यां**, भूत्वा भूपतिनन्दनः । **सिंहाह्व**श्चरणग्राही, शैशवे स भविष्यति ॥४७५॥
तत्र तीव्रं तपस्तप्त्वा, क्षिप्त्वा चाखिलपातकम् । सम्प्राप्य केवलज्ञानं, मुक्तिकान्तो भविष्यति ॥४७६॥

**॥ इति क्षमायां हारीतककथा ॥**

मानाद्वा यदिवा क्रोधाद्, लोभाद्वा यदि वा भयात् । यो न्यायमन्यथा ब्रूते, स याति नरकं नरः ॥४७७॥
एकस्मिन् विपिने वृक्षे, नीडं चकार तित्तिरः । चुर्णि कृत्वा च सन्ध्यायां, समायाति निजाश्रये ॥४७८॥
चुण्यर्थमन्यदा याते, तित्तिरे दूरकानने । शशकोऽभ्येत्य तत्स्थानमधिष्ठाय स्थितोऽचिरात् ॥४७९॥
तत्रैत्यतित्तिरः प्राह, शशकाय ममाश्रयः । मुच्यतां भवताऽहं तु, स्थास्याम्यत्र दिनात्यये ॥४८०॥
शशकोऽवग् मुधा कूटं, किं त्वं जल्पसि तित्तिरः । एष मे आश्रयो वस्तुं, विद्यते चिरकालतः ॥४८१॥
तयोर्विवदतोरेकः, पुमानेत्य जगावदः । विवादो विहितोऽनर्थ-हेतवे जायते युवाम् ॥४८२॥
यतः –
लिङ्गिनां परमाधारो, वेश्यानां परमो वि(नि)धिः । वणिजां परमा वीथी (नीविः), मृषावाद ! नमोऽस्तु ते ॥४८३॥
पारदारिकचौराणा-मस्ति काचित्प्रतिक्रिया । असत्यवादिनः पुंसः, प्रतीकारो न विद्यते ॥४८४॥
असत्यमप्रत्ययमूलकारणं, कुवासनासद्म समृद्धिवारणम् ।
विपन्निदानं परवञ्चनोर्जितं, कृतापराधं कृतिभिर्विवर्जितम् ॥४८५॥
गङ्गातटे समस्त्येको, मार्जारः करुणापरः । केदारकङ्कणौ बिभ्रन्मध्यस्थोऽखिलदेहिषु ॥४८६॥
तत्र यातं युवां सोऽपि, विवादं स्फेटयिष्यति । गत्वा तत्र ततस्तौ तु, स्वं स्वं वक्तव्यमूचतुः ॥४८७॥
केदारकङ्कणौ बिभ्रन्मार्जारः प्रोक्तवानिति । युवां मे तिष्ठतं चाग्रे विवादो भङ्क्ष्यते मया ॥४८८॥
ताभ्यां तथाकृते धर्मं, मार्जार ऊचिवानिति । विवादः क्रियते नैव, कदापि कोविदैः क्वचित् ॥४८९॥
यतः –
तित्तिरोऽवग् मदीयोऽय-माश्रयो विद्यतेऽधुना । शशकोऽवग् मदीयोऽय-माश्रयोऽस्ति ममार्प्यताम् ॥४९०॥
ततस्तदा स मार्जारो, जघान शशकं धुरि । ततो मार्जार आचष्ट-नीडमेतन्मदीयकम् ॥४९१॥
शशकं तित्तिरं चापि, भक्षयित्वा क्षणादपि । मार्जारो गतवान् श्वभ्रे, घोरे दुःखशतप्रदे ॥४९२॥
यः करोति स्वशक्त्या तूपकारं सर्वदेहिषु । स एव लभते स्वर्गा-पवर्गशर्म **पद्मवत्** ॥४९३॥
तथाहि –
**भीमपल्ली**पुरे **चन्द्र-भूपस्य कमला** प्रिया । पुत्रः **पद्माभिधो**ऽभूतां, विनीतो विशदाशयः ॥४९४॥
शस्त्रशास्त्रकलाभ्यासं, कुर्वन् **पद्मो** बुधान्तिके । बभूव कोविदोऽतीव, वाचस्पतिरिव ध्रुवम् ॥४९५॥
यतः –
जले तैलं खले गुह्यं, पात्रे दानं मनागपि । प्राज्ञे शास्त्रं स्वयं याति, विस्तारं वस्तुशक्तितः ॥४९६॥
देशान्तरनिरीक्षार्थ-मन्यदा **पद्म** एककः । निर्ययौ पितरावेवानापृच्छ्य निर्भयः किल ॥४९७॥
गतः **पद्मो**ऽथ **भीमाह्वे**, वने रोदनतत्पराम् । स्त्रियं दृष्ट्वा जगौ का त्वं, किमर्थं रुद्यते त्वया ? ॥४९८॥
मुक्त्वाथ रोदनं नारी, जगौ दुःखं ममास्ति यत् । न तत् स्फेटयितुं कोऽपि, समर्थो वीक्ष्यते नरः ॥४९९॥
**पद्मो**ऽप्राक्षीत्तवेदानीं, यद्दुःखं विद्यते हृदि । तद्वक्षि त्वरितं स्फेटयिष्याम्यहकमत्र तु ॥५००॥

नारी प्रोवाच **वैताढ्ये**, मणि**नूपुरपत्तने** । **प्रभाकराभिधो** विद्याधरोऽभूज्जितभूरिद्विट् ॥५०१॥
तस्याऽऽसीत्**कोशला** पत्नी, पुत्रश्च **विमलाभिधः** । मन्त्रीश्वरोऽभवत्काम-केलिर्वरकलालयः ॥५०२॥
अन्यदोत्पन्नदुःसाध्यरोगग्रस्ततनुः किल । **प्रभाकरः** स विद्याभृत्, जगाम यममन्दिरे ॥५०३॥
**विमलं** बालमालोक्य, गोत्रिणोऽभ्येत्य दुःशकाः । निष्काश्य जगृहू राज्यं, तदीयं हेलया तदा ॥५०४॥
**विमलं** नन्दनं नीत्वा, सद्योऽहमिह कानने । समागताऽवितुं दुष्टगोत्रिभ्यो भयविह्वला ॥५०५॥
पित्रा विश्राणिता विद्या, **विमलो** बाल्ययोगतः । असाधयन्नपूर्वं तु, साधयिष्यति साम्प्रतम् ॥५०६॥
सूनोः साधयतो विद्या, विना ह्युत्तरसाधकम् । न सिद्ध्यन्ति ततश्चाहं, रुदत्यस्मि पुनः पुनः ॥५०७॥
**पद्मः** प्राह त्वया मातर्न कार्यं रोदनं मनाक् । द्वितीयोऽहं सुतस्ते तु, भवाम्युत्तरसाधकः ॥५०८॥
ततः स **विमलः** कृत्वा, कुण्डं विपुलमञ्जसा । ज्वलदङ्गारसम्पूर्णं, चकार होमम‌द्भुतम् ॥५०९॥
**पद्मे** रक्षां वितन्वाने, भूतप्रेतादिवारणात् । **विमल**स्याखिला विद्याः, सिद्धा आसन् खगादिकाः ॥५१०॥
ताभिर्विद्याभिरु(ह्र)द्याभिर्बहुरूपाणि तत्क्षणम् । कुर्वाणो **विमलो** जेतुं, गोत्रिणो वाञ्छति स्म सः ॥५११॥
**पद्मेन** सुहृदा सार्धं, **विमलः** स खगस्ततः । निर्धाट्य गोत्रिणः सर्वान्, पितृराज्यमलात्क्षणात् ॥५१२॥
**विमलो**ऽथ खगो विद्या, वितीर्य तस्य तत्क्षणात् । अजेयासिं मणिं क्ष्वेडापहारं च प्रदत्तवान् ॥५१३॥
यतः –
रम्यं रूपं करणपटुताऽऽरोग्यमायुर्विशालं, कान्ता रूपावजितरतयः, सूनवो भक्तिमन्तः ।
षट्खण्डोर्वीतलपरिवृढत्वं यशः क्षीरशुभ्रं, सौभाग्यश्रीरिति फलमहो ! धर्मवृक्षस्य सर्वम् ॥५१४॥
**पद्मो**ऽथ स्वपुरेऽभ्येत्य, मातापितृक्रमाम्बुजम् । प्रणम्य स्वार्जितां विद्यां, कथयामास वेगतः ॥५१५॥
अजेयेन कृपाणेन, निखिलान् वैरिणस्तदा । साधयित्वा पितू राज्यं, **पद्मो** निष्कण्टकं व्यधात् ॥५१६॥
मणिना तेन निःशेष-विषहन्त्रा स भूपभूः । उपकारं व्यधाद् भूरि-जनानां दुःखिनां तदा ॥५१७॥
**चन्द्रभूपो**ऽन्यदा राज्यं, **पद्माय** स्वीयसूनवे । दत्त्वा लात्वा व्रतं तीव्रं, तपस्तप्त्वा दिवं ययौ ॥५१८॥
अमारिं कारयित्वाऽथ, **पद्म**भूपो जिनेशितुः । प्रासादान् शतशोऽकार्षीत्, कैलासाचलसोदरान् ॥५१९॥
**पद्मः** स्वनन्दनं राज्ये, निवेश्य गुरुसन्निधौ । गृहीत्वा संयमं चक्रे, क्षमां तपःपरः सदा ॥५२०॥
पालयित्वा चिरं दीक्षां, **पद्मः** परोपकारकृत् । गतः स्वर्गं क्रमान्मुक्ति-सातमासादयिष्यति ॥५२१॥
विद्याभृद्**विमलो** राज्यं, कुर्वन् वर्यनयाध्वना । उपकारं भूरिलोकानां, चकाराऽनघमानसः ॥५२२॥
एकदा **विमलो** विद्याधरो गुर्वन्तिके गतः । धर्मं जीवदयामूलं, शुश्रावेति कृतादरम् ॥५२३॥
अपि लभ्यते सुराज्यं, लभ्यन्ते पुरवराणि रम्याणि । नहि लभ्यते विशुद्धः, सर्वज्ञोक्तो महाधर्मः ॥५२४॥
चत्वारः प्रहरा यान्ति, देहिनां गृहचेष्टितैः । तेषां पादे तदर्धे वा, कर्तव्यो धर्मसङ्ग्रहः ॥५२५॥
दानशीलतपोभाव-भेदो धर्मः चतुर्विधः । प्रोक्तः तीर्थंकरैः कार्यः, प्राणिभिः सुखहेतवे ॥५२६॥
ततः पुरे पुरे ग्रामे, ग्रामे **विमल**भूपतिः । प्रासादान् विमलान् भूमि-भूषकान् कुरुते स्म च ॥५२७॥
ततश्च सोऽपि विद्याभृत्, राज्ये न्यस्य निजं सुतम् । गृहीत्वा चरणं शुद्धं, पालयामास सन्ततम् ॥५२८॥
आयुःक्षयेऽथ गीर्वाणा-लये पञ्चमके क्रमात् । **विमलो** भासुरद्युति-निर्जरः समजायत ॥५२९॥
ततश्च्युत्वा भवान् सप्त, प्राप्य मानुषकं जनुः । कल्याणनगरीसौख्यश्रेणीमासादयिष्यति ॥५३०॥

श्रुत्वेति **रामभूपालः**, सम्यक्त्वं गुरुसन्निधौ । गृहीत्वा पालयामास, कल्याणसातदायकम् ॥५३१॥
पालयित्वाथ सम्यक्त्वं, **रामो** वसुमतीपतिः । आराधनां विधायान्ते, देवलोके समागमत् ॥५३२॥
कुष्ठी नरो विशेषेण, श्रद्दधानो वृषं हृदि । प्रपाल्यानशनं स्वर्ग-नगरीं समुपाययौ ॥५३३॥
तदा शकुनिका स्वीयं, कृतं कर्म निरन्तरम् । निन्दन्त्यनशनं लात्वा, स्वर्गलोकमुपाययौ ॥५३४॥
अन्येऽपि भविनो वृत्तं, शकुन्याः कुष्ठिनस्तदा । निशम्य जिननाथोक्तं, धर्मं जग्राह भावतः ॥५३५॥
**रामो**ऽपि नृपतिः स्वर्गा-च्च्युतः सप्ताष्टभिर्भवैः । आराध्य जिननाथोक्तं, धर्मं यास्यति निर्वृत्तिम् ॥५३६॥
वरदत्तपतिः प्राप्तज्ञानस्तस्मिन् भवे खलु । सर्वकर्मक्षयान्मुक्तिपत्तने समुपेयिवान् ॥५३७॥

**॥ धर्मे वरदत्तकथा ॥ सुन्दरीनार्यादिकथा चात्र ज्ञेया ॥**

शीलं शुद्धं सदा यस्तु, पालयामास निश्चितम् । स एव जायते श्लाघ्यो, **धनश्रेष्ठिवधू**रिव ॥५३८॥
तथाहि :—
**राजपुर्यां धन**श्रेष्ठी, **पद्मा** पत्न्यभिधाऽभवत् । **सज्जनो** नन्दनो नाम्ना, तयोरासीन्मनोहरः ॥५३९॥
तेनैव सूनुना गेह-प्राङ्गणे रिङ्खता सता । श्रेष्ठिनः सदनं भाति, व्योमेव विधुना ध्रुवम् ॥५४०॥
यतः —
शर्वरीदीपकश्चन्द्रः, प्रभाते रविदीपकः । त्रैलोक्यदीपको धर्मः, सुपुत्रः कुलदीपकः ॥५४१॥
उत्पतन् निपतन् रिङ्खन्, हसन् लालावलीर्वमन् । कस्याश्चिदेव धन्यायाः, क्रोडमाक्रमते सुतः ॥५४२॥
पाठितो नन्दनो विद्व-त्पार्श्वे शास्त्राणि भूरिशः । विनयं कुरुते मातापित्रोः कर्तव्यतः सदा ॥५४३॥
यतः —
विणए सिस्सपरीक्खा, सुहडपरीक्खा य होइ संगामे । वसणे मित्तपरीक्खा, दाणपरीक्खा य दुक्काले ॥५४४॥
**मनोरमा**भिधां पत्नीं, चन्द्रश्रेष्ठितनूभवाम् । परिणिन्येऽन्यदा वर्य-महोत्सवेन **सज्जनः** ॥५४५॥
एकदा कलहे जाते, समं पत्न्या स **सज्जनः** । प्रोवाचातः परं सङ्गं, करिष्ये न त्वया सह ॥५४६॥
पत्न्यवग् मम कौशल्यं, तदा सत्यं भविष्यति । यदा त्वमनुकूल्यैव, सेविष्यसे च मां ध्रुवम् ॥५४७॥
ततः स **सज्जनः** पत्न्या, नाह्वां गृह्णाति कर्हिचित् । **मनोरमा**ऽपि नो कान्तं, प्रजल्पयति कर्हिचित् ॥५४८॥
अन्येद्युः **सज्जनो** यान-मारुह्य दूरनीवृति । ययौ **कुण्डपुरे** रम्ये, लक्ष्म्युपार्जनहेतवे ॥५४९॥
तत्र **कामकला**वेश्यावशगः **सज्जनः** स च । पश्चाद् वलितुमिच्छां न, करोति स्म कदाचन ॥५५०॥
वेश्यावशीकृतं पुत्रं, व्ययन्तं विभवं बहुम् । श्रुत्वा श्रेष्ठ्यभवद् दुःखी, न शेते सुखतः क्वचित् ॥५५१॥
श्रेष्ठी वक्ति कुटुम्बाग्रे, कोऽप्यस्ति चतुरो नरः । यः **सज्जनं** सुतं चात्रा-नयेद्वेश्यासमीपतः ॥५५२॥
परदेशभयाद्वेश्या-भयाच्च कोऽपि मानवः । यदा न गन्तुमीहेत, तदा प्राह **मनोरमा** ॥५५३॥
भो तात ! क्रियते नैव, विषादः पण्डितैर्जनैः । कर्मणः पुरतः कोऽपि, न च्छुट्टति शरीरवान् ॥५५४॥
यदि मह्यं त्वया तात !, नृवेषो दीयते रहः । तदाऽहं भवतः पुत्रं, मानयिष्यामि निश्चितम् ॥५५५॥
श्वशुरेणार्पितं वेषं, नरस्याथ **मनोरमा** । परिधायाऽचलत् कान्तं, पश्चादानयितुं द्रुतम् ॥५५६॥
स्तोकेनैव तु कालेन, सुखेन जलवर्त्मना । रम्ये **कुण्डपुरे** याता, **मनोरमा** नृवेषभृत् ॥५५७॥

साऽथ वेश्यागृहोपान्ते, नारीवेषधरा स्थिता । स्थगितं स्वमुखं नैव, दर्शयामास कस्यचित् ॥५५८॥
वेश्यया सह कुर्वाणा, प्रीतिं **मनोरमा** सदा । स्वस्थानके स्थिता वर्य-समस्यादिविनोदतः ॥५५९॥
वेश्यां मुक्त्वा न कस्याश्चित्, सहाऽऽलापं करोति सा । ततो मिथः समस्याभि-र्नयतः कालमन्वहम् ॥५६०॥
थलि ऊपज्जइ जलिवसइ अन्नपाणी खाइ । अवरदेसहपाहुणा नितवउलावइ जाइ ॥५६१॥नौः ॥
गजा येन हताः सिंहाः, क्रान्ता व्याकुलिता भटाः । स कोलिकगृहे वीरो, बद्धः सखी निरीक्षितः ॥५६२॥ मशकः ॥
पांचे परिणी दसि धरी बत्रीसह केरी नारि । मइं हई आली पाठवी सही बोलि विचारि ॥५६३॥ जीभ ॥
वेश्यावक् **सज्जन**स्याग्रे, एकाऽस्ति मे सखी वरा । विमुच्य मन्मुखं नान्यदा(न्या)ननं पश्यति कर्हिचित् ॥५६४॥
रूपेण विद्यते रम्भा, तिलोत्तमोपमा श्रिया । **सज्जनो**ऽवक् तया सार्धं, भोगो यदि करिष्यते ॥५६५॥
तदा मे जीवितं भावि, नो चेन्मृतिर्भविष्यति । वेश्याऽवक् पूरयिष्यामि, वाञ्छितं ते प्रियोत्तम ! ॥५६६॥
वेश्याथ रुचिरं हारमर्पयित्वा सखीं प्रति । प्राहैको मानवो माररूपोऽस्ति मम सन्निधौ ॥५६७॥
सोऽपि त्वया समं काम-क्रीडां कर्तुं समीहते । **मनोरमा** जगौ कान्तं, मुक्त्वा नान्यं श्रयाम्यहम् ॥५६८॥
तथापि तव वाक्येन, खे यावदीक्षते विधुः । तावन्मया प्रदातव्य-स्तस्य भोगो दिनात्यये ॥५६९॥
तया समं वितन्वानः, सम्भोगं प्रेक्ष्य तां कनीम् । मुञ्चन्तीं च कटाक्षादि, **सज्जनः** प्रोक्तवानिति ॥५७०॥
वाम पमाणे लोअणे, मुद्दिम अंबर जोइ । अमृत ए चांदो खिसइ, रयणि अंधारूं होइ ॥५७१॥
आकर्ण्येति मृगाक्षी सा, पत्नीभावं निजं तदा । ज्ञापयितुं जगावेवं, पत्युः पार्श्वे स्फुटाक्षरम् ॥५७२॥
रहि रहि चंदा दढ कर, जिम मठडओ विहाइ । हारपसाइ प्रियलिउ प्रिहि पीआरो थाइ ॥५७३॥
इमां गाथां निशम्याथ, **सज्जन**श्चकिताशयः । भुक्तां स्वां गेहिनीं ज्ञात्वा, प्रतिज्ञां स्मृतवान् पुनः ॥५७४॥
पत्न्या बुद्धिं वरां ज्ञात्वा, शीलं च जगदुत्तमम् । स्वां पत्नीं प्रीणयामास, वस्त्राभरणदानतः ॥५७५॥
**सज्जनो**ऽथ प्रियायुक्तो, यानमारुह्य वेगतः । स्वकीयनगरे चारू-त्सवेन समुपागमत् ॥५७६॥
अन्येद्युर्नगरोद्याने, **धर्मसुन्दरसूरयः** । भूरिसाधुयुता ऐयु-र्भव्यान् बोधयितुं क्रमात् ॥५७७॥
सकुटुम्बो **धनश्रेष्ठी**, धर्मं श्रोतुं यदा ययौ । तदेति गुरुभिर्धर्म-देशना विहिता ध्रुवम् ॥५७८॥
स्वर्गच्युतानामिह जीवलोके, चत्वारि नित्यं हृदये वसन्ति ।
दानप्रसङ्गो विमला च वाणी, देवार्चनं सद्गुरुसेवनं च ॥५७९॥
पुरुषः कुरुते पापं, बन्धुनिमित्तं वपुर्निमित्तं च । वेदयते तत्सर्वं, नरकादौ पुनरसावेकः ॥५८०॥
गतसारेऽत्रसंसारे, सुखभ्रान्तिः शरीरिणाम् । लालापानमिवाङ्गुष्ठे, बालानां स्तन्यविभ्रमः ॥५८१॥
शीलं नाम नृणां कुलोन्नतिकरं, शीलं परं भूषणं, शीलं ह्यप्रतिपाति वित्तमनघं, शीलं सुगत्यावहम् ।
शीलं दुर्गतिनाशनं सुविपुलं, शीलं यशः पावनं, शीलं निर्वृतिहेतुरेव परमं, शीलं तु कल्पद्रुमः ॥५८२॥
सम्यक्त्वं यो जनो लात्वा, शुद्धं पालयति ध्रुवम् । स एव लभते स्वर्गा-पवर्गसुखसम्पदम् ॥५८३॥
श्रुत्वेति सकुटुम्बः स, श्रेष्ठी सम्यक्त्वसंयुतम् । द्वादशव्रतरोचिष्णुं, धर्मं जग्राह भावतः ॥५८४॥
सम्यक्त्वं शुभभावेन, पालयित्वा निरन्तरम् । आयुःक्षये ययौ श्रेष्ठी, द्वितीये तविषे खलु ॥५८५॥
ततश्च्युतो लभित्वाऽथ [लब्ध्वा], मानुषं जन्म निर्मलम् । कल्याणनगरीं सद्यो-ऽलङ्करिष्यति निश्चितम् ॥५८६॥

**सज्जनो**ऽपि प्रियायुक्तो, शुद्धशीलं सुभावतः । प्रपाल्य प्रथमे स्वर्गे, सुरोऽभूद्भासुरद्युतिः ॥५८७॥
ततश्च्युत्वा **रमापुर्यां**, **सज्जनो** निर्जरः स च । **चन्द्र**नामा वणिग् भूत्वा, चक्रे धर्मं जिनोदितम् ॥५८८॥
क्रमाल्लात्वा व्रतं क्षिप्त्वा, क्षिप्त्वा कर्माऽखिलं घनम् । **सज्जनो** ह्यसुमान् मुक्ति-नगर्यां समुपागमत् ॥५८९॥

**॥ इति धनसज्जनमनोरमाकथा सम्यक्त्वशीलोपरि ॥**

**शतमल्लो** नृपो धर्मं, श्रुत्वा श्रीअरसन्निधौ । श्राद्धधर्मं ससम्यक्त्वं, जग्राह जनसंयुतः ॥५९०॥
चन्द्रचूडमहीनाथ-शतमल्लनृपादयः । **अरनाथान्तिके** धर्मं, जगृहुः शिवशर्मदम् ॥५९१॥

**इति तपागच्छाधिराज-श्रीलक्ष्मीसागरसूरिशिष्य पं. शुभशीलविरचिते श्रीअरनाथचरित्रे अयोध्याकौशाम्ब्यादिविहारचन्द्रचूडशतमल्लभूपादिप्रतिबोधसहिते**

**सप्तमः सर्गः समाप्तः ॥७॥**

● ● ●

**योगसार - द्वितीयः प्रस्तावः**

**तत्त्वसारोपदेशकः**

किं नागन्येन सितै रक्तैः, किं पटैः किं जटाभरैः ।
किं मुण्डमुण्डनेनापि, साम्यं सर्वत्र नो यदि ? ॥ २१ ॥
किं व्रतैः किं व्रताचारैः, किं तपोभिर्जपैश्च किम् ।
किं ध्यानैः किं तथा ध्येयै,- र्न चित्तं यदि भास्वरम् ॥ २२ ॥
किं क्लिष्टेन्द्रियरोधेन, किं सदा पठनादिभिः ।
किं सर्वस्वप्रदानेन, तत्त्वं नोन्मीलितं यदि ? ॥ २३ ॥
नाग्चलो मुखवस्त्रं न, न राका न चतुर्दशी ।
न श्राद्धादिप्रतिष्ठा वा, तत्त्वं किन्त्वमलं मनः ॥ २४ ॥
दृष्ट्वा श्रीगौतमं बुद्धे,- स्त्रिपञ्चशततापसैः ।
भरतप्रमुखैर्वापि, क्व कृतो बाह्यकुग्रहः ? ॥ २५ ॥
दृढप्रहारिवीरेण, चिलातीपुत्रयोगिना ।
इलापुत्रादिभिश्चैव, सेवितो योग उत्तमः ॥ २६ ॥
येन केन प्रकारेण, देवताराधनादिना ।
चित्तं चन्द्रोज्ज्वलं कार्यं, किमन्यैर्ग्रहकुग्रहैः ॥ २७ ॥
तथा चिन्त्यं तथा वाच्यं, चेष्टितव्यं तथा तथा ।
मलीमसं मनोऽत्यर्थं, यथा निर्मलतां व्रजेत् ॥ २८ ॥
चञ्चलस्यास्य चित्तस्य, सदैवोत्पथचारिणः ।
उपयोगपरैः स्थेयं, योगिभिर्योगकाङ्क्षिभिः ॥ २९ ॥

# ॥ अष्टमः सर्गः ॥

ततः श्री**अर**तीर्थेशो, बोधयन् भविनो बहून् । भूरिसाधुयुतः **शत्रुञ्जये** तीर्थे समागमत् ॥१॥
**भृगुकच्छ**पुराधीश-**भीम**भूपः शिवाचले । भूरिसङ्घयुतश्चागात्, नन्तुं श्रीप्रथमं जिनम् ॥२॥
**अर**स्तीर्थकरः प्राह, तस्येति नृपतेः पुरः । **नाभाक**नृपवज्जीवो, धर्मान्मुक्तिसुखं श्रयेत् ॥३॥
तथाहि –
अस्मिन्नेव वरे **जम्बुद्वीपे**ऽत्र **भरत**क्षितौ । पुरे **क्षितिप्रतिष्ठाख्ये**, जिनौकोराजिराजिते ॥४॥
न्यायाध्वना प्रजाः सर्वाः, पालयन् दानिशेखरः । **नाभाको**ऽभून्नृपो **नेमि-पार्श्व**नाथान्तरे खलु ॥५॥ युग्मम् ॥
यतः –
दुष्टानां दमनं नयानुगमनं, स्वीयप्रजापालनं, नित्यं देवमहर्षिपादनमनं, षड्दर्शनीमाननम् ।
औचित्याचरणं परोपकरणं, त्यागं सभोगं श्रियां, कुर्वाणो नृपतिः श्रिया निजपतिः, सत्येव नो मुच्यते ॥६॥
अन्यदा संसदि प्रात-र्यावद्भूपो न्यवीविशत् । तावदेको महेभ्योऽगात्, नन्तुं तत्र महीपतिम् ॥७॥
प्राभृतं भूपतेरग्रे, मुक्त्वा नत्वा नृपं धनी । यावत्तस्थौ तदा तस्मै, नृपोऽदापयदासनम् ॥८॥
नृपोऽप्राक्षीत् कुतःस्थाना-दागाः ? कुत्र गमिष्यते ? । ततः स धनवानाह, सावधानोऽधुना शृणु ॥९॥
**चन्द्र**पुर्यामहं वासं, कुर्वन् बहिर्वनेऽन्यदा । आगतान्**धनसूरी**शान्, श्रुत्वा नन्तुमुपागमम् ॥१०॥
तदा तत्र गुरूत्तंसैः, प्रोक्तं शत्रुञ्जयाचले । यो नमेत् प्रथमं देवं, स याति परमं पदम् ॥११॥
यतः –
तीर्थानामुत्तमं तीर्थं, नगानामुत्तमो नगः । क्षेत्राणामुत्तमं क्षेत्रं, सिद्धाद्रिर्गदितो जिनैः ॥१२॥
वज्रलेपायितैः पापै-र्जन्तुरत्यन्तदुःखभाक् । तावद्यावन्न सिद्धाद्रि-मधिरुह्य जिनं नमेत् ॥१३॥
पञ्चाशद्योजने मुक्तिर्दर्शनात्स्पर्शनादपि । ये जातास्ते गमिष्यन्ति, कालेनापि परां गतिम् ॥१४॥
मयूर-सर्प-सिंहाद्या, हिंस्रा अप्यत्र पर्वते । सिद्धाः सिध्यन्ति सेत्स्यन्ति, प्राणिनो जिनदर्शनात् ॥१५॥
पल्योपमसहस्रं तु, ध्यानाल्लक्षमभिग्रहात् । दुष्कर्म क्षीयते मार्गे, सागरोपमसञ्चितम् ॥१६॥
श्रुत्वेति तीर्थमाहात्म्यं, धनीभ्यवदनात्तदा । राजाऽवग् नम्यते तीर्थं, तदेव शिवशर्मणे ॥१७॥
तदा **नाभाक**भूपालः, परिधाप्य धनीश्वरम् । विसर्ज्य च ततः **शत्रुञ्जये** यातुमना अभूत् ॥१८॥
अन्येद्युर्लातवान् भूपो, मुहूर्तं पञ्चमीदिने । यातुं तीर्थे तदा तस्मिन्, दिनेऽङ्गेऽभूद् व्यथा भृशम् ॥१९॥
औषधैर्बहुभिर्नास्य, पीडा तस्मिन् दिने ययौ । द्वितीये वासरे याता, स्वयं भूपतनौ व्यथा ॥२०॥
ततो दध्यौ नृपो भाग्यात्कल्येऽगाद्वेदना तनौ । धर्मस्य करणे प्राया-न्तरायो जायते ध्रुवम् ॥२१॥
गृहीते रुचिरेऽन्यस्मिन्, मुहूर्ते नृपगेहिनी । कष्टिता वमनाद्गाढं, यात्रातोऽथ नृपः स्थितः ॥२२॥
यतः –
चल्यते दिवसे यस्मिन्, तस्मिन् स्याद्वमनं यदि । तदा विघ्नं महद् भावि, तस्मिन् ग्रामान्तरे नृणाम् ॥२३॥

गृहीते रुचिरेऽन्यस्मिं-स्तृतीये मुहूर्तवासरे । सम्मुख्यजनि क्षुत् भूमिनाथस्य चलतः सतः ॥२४॥
यतः –
द्वारपातो दशासंग, स्खलनं पाणिपादयोः । संमुखा क्षुद् भवेन्नृणां, दुःखाय महते ध्रुवम् ॥२५॥
चीबरी दक्षिणैकाङ्गा, दक्षिणो वृद्धतित्तिरः । लघुर्विनायको वामो, मृगाः प्रातः प्रदक्षिणाः ॥२६॥
एकाङ्गः कौशिको वामो, शृगालीनिनदस्तथा । हनूमान् दक्षिणैकाङ्गो, विचार्य परिगृह्यताम् ॥२७॥
संमुखं शुभदं नृणां, शबं रोदनवर्जितम् । वामभागे क्षुतं चापि, सर्वकार्येषु सिद्धिदम् ॥२८॥
दुर्गा वामस्थिता या च, सौम्यदक्षिणवेष्टिता । प्रयाणे फलदा पुंसां, शान्ताशा स्थानकस्थिता ॥२९॥
विचार्येति नृपस्तस्मिन्, दिने स्थित्वा नृपः पुनः । मुहूर्तं लातवान् तुर्यं, विशुद्धे वासरे ध्रुवम् ॥३०॥
यतः –
ध्रुवचक्रे स्थिते तिर्यक्, प्रतिष्ठा-दीक्षणादिकम् । उद्ध्वर्वस्थिते ध्वजारोप-खातप्रमुखमाचरेत् ॥३१॥
ज्ञेऽष्टौ ८ कुजे नव गुरौ, सप्तैकादश भास्करे । पादानि शुद्धच्छायायास्तासु कार्याणि साधयेत् ॥३२॥
तस्मिन् दिने महीशस्य, चलतोऽङ्गारका ध्रुवम् । सम्मुखा मीलितास्तस्मा-त्तस्थौ तस्मिन्दिने नृपः ॥३३॥
यतः –
भस्म-रजस्तुषाङ्गारा, गुड-तैल-खलोपलाः । गुर्विणी तैलदिग्धाङ्गा, नग्न-मुण्ड-रजस्वलाः ॥३४॥
मुक्तकेशास्थिकर्पास-मार्जारोरगवाहनाः । रोदनं रुदमानस्य, बालकस्य पलायनम् ॥३५॥
पञ्चमेऽथ मुहूर्ते तु, परचक्रस्य भीरभूत् । ततस्तच्च गतं लग्नं, पूर्वस्याशुभकर्मणः ॥३६॥
भवन्ति भविनां भाग्यै-र्धर्मकर्ममनोरथाः । फलन्ति यत्पुनस्ते तु, तत्सुवर्णस्य सौरभम् ॥३७॥
ततो दध्यौ नृपः कोऽपि, अत्रैति ज्ञानवान् यदि । तदा स्वस्यान्तरायस्य, स्वरूपं प्रक्ष्यते मया ॥३८॥
एवं चिन्तयतस्तस्य, नृपस्य प्रतिवासरम् । चतुर्ज्ञानी गुरुस्तत्र, **युगन्धरः** समागमत् ॥३९॥
आगतं बहिरुद्याने, **युगन्धरगुरू**त्तमम् । श्रुत्वा **नाभाक**भूपालो, वन्दितुं समुपागमत् ॥४०॥
उपविष्टे महीपाले, धर्मं श्रोतुं जिनोदितं । **युगन्धरगुरु**श्चक्रे, धर्मस्य देशनामिति ॥४१॥
आर्यदेशकुलरूपबलायुर्बुद्धिबन्धु समवाप्य नरत्वम् । धर्मकर्म न करोति जडो यः, पोतमुज्झति पयोधिगतः सः ॥४२॥
आदित्यस्य गतागतैरहरहः, सङ्क्षीयते जीवितम्, व्यापारैर्बहुकार्यभारगुरुभिः, कालो न विज्ञायते ।
दृष्ट्वा जन्मविपत्तिशोकमरणं, त्रासश्च नोत्पद्यते, पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥४३॥
पुरुषः कुरुते पापं, बन्धुनिमित्तं वपुर्निमित्तं च । वेदयते तत्सर्वं नरकादौ पुनरसावेकः ॥४४॥
यत्नेन पापानि समाचरन्ति, धर्मं प्रसङ्गादपि नाचरन्ति ।
आश्चर्यमेतद्धि मनुष्यलोके, क्षीरं परित्यज्य विषं पिबन्ति ॥४५॥
देशनान्ते नृपोऽप्राक्षीत्, भगवन् ! केन कर्मणा । धर्मस्य करणे जाता, अन्तराया इषुप्रमाः ॥४६॥
ज्ञानी जगौ जनो यस्तु, धर्मं वितन्वतां नृणाम् । अन्तरायं करोत्येव, तस्य विघ्नो भवेद् वृषे ॥४७॥
ततो **नाभाक**भूपो-ऽवग्, मया कस्यान्तरायकम् । विहितं कथ्यतां स्वामिन् !, भवे कस्मिन् दुरात्मना ॥४८॥
ज्ञान्यथाऽऽह भवे पूर्वे, ग्रामे **गुडस्थला**भिधे । पाद्रस्वाम्यभवन्नाम्ना, **भानुः** क्रूरतराशयः ॥४९॥

अन्यायाद्दण्डयन् लोकान्, दुःखिनः स व्यधाद् भृशम् । ज्ञात्वा देशेश्वरस्तं तु, **भानुं** स्वदेशतोऽकृषत् ॥५०॥
यतः –
नरपतिहितकर्ता, द्वेष्यतां याति लोके, जनपदहितकर्ता, त्यज्यते पार्थिवेन्द्रैः ।
इति महति विवादे वर्तमाने समाने, नृपतिजनपदानां, दुर्लभः कार्यकर्ता ॥५१॥
अश्वतरीणां गर्भो दुर्जनमैत्री नियोगिनां लक्ष्मीः । स्थूलत्वं श्वयथुभवे विना विकारेण न भवन्ति ॥५२॥
**भानु**र्गङ्गातटे तिष्ठन्, यात्रिकादिजनान् बहून् । हक्कयित्वा धनं लाति, हत्वा के(कांश्) चन निर्दयः ॥५३॥
यतः –
मृगमीनसज्जनानां, तृणजलसन्तोषविहितवृत्तीनाम् । लुब्धक-धीवर-पिशुना, निष्कारणवैरिणो जगति ॥५४॥
एकदा कोऽपि भूदेवः, पत्नी-नन्दन-गोयुतः । आगच्छन् वीक्षितस्तत्र, **भानु**ना दिवसोदये ॥५५॥
**भानु**र्लातुं तु गां सज्जो, यावदासीत्स निष्कृपः । तावद् द्विजोऽपि सज्जः सन्, दधाव तस्य सम्मुखे ॥५६॥
आगच्छन्तं द्विजं चादौ, जघानाथ स तत्प्रियाम् । ततस्तन्नन्दनं गां च, धावन्तीं हतवान् पुनः ॥५७॥
आयान्तीं वाहरां दृष्ट्वा, भीतः स **भानु**रञ्जसा । नंष्ट्वा दूरतरे स्थाने, जगाम जीविताशयः ॥५८॥
लोकाः पत्न्यादिसंयुक्तं, विप्रं हतं निरीक्ष्य च । प्रोचुरेतत्कृतं पापं, पाप्मना केनचिद् दृढम् ॥५९॥
यतः –
पापी रूपविवर्जितः पिशुनवाग्, यो नारको नाऽभवत्, तिर्यग्योनिसमागतश्च कपटी, नित्यं बुभुक्षातुरः ।
मानी ज्ञानविवेकबुद्धिविकलो, यो मर्त्यलोकागतो, यस्तु स्वर्गपरिच्युतः स सुभगः, प्राज्ञः कविः श्रीयुतः ॥६०॥
पापी पापं वितन्वानः, शङ्कते न मनागपि । पुण्यवांस्तु व्रजंस्तिष्ठन्, शयानोऽपि स भीर्भवेत् ॥६१॥
गच्छन् शत्रुञ्जयोपान्त-वने **भानुः** स क्षत्रियः । कार्योत्सर्गस्थितं साधुं, ददर्श दिवसात्यये ॥६२॥
स्थित्वा तत्र वने **भानुः**, कार्योत्सर्गे समुज्झिते । साधुं नत्वाऽथ पप्रच्छ, राज्याय किमिदं तपः ॥६३॥
साधुः प्राह मया राज्यं, मातापित्रादिसंयुतम् । त्यक्त्वाऽग्राहि व्रतं मुक्ति-सातसम्प्राप्तिहेतवे ॥६४॥
राज्यं तु जायते प्रायो, नरकाय विनिर्मितम् । यतो भवति जीवानां, वधः कूटादिनिर्मितेः ॥६५॥
यतः –
राज्यं कुर्वन् यतः प्रायः, पीडयन् जनताः सदा । कर्म श्वभ्रोचितं शश्वत्, बध्नाति बहुदुःखदम् ॥६६॥
लक्ष्मीवन्तो न जानन्ति, प्रायेण परवेदनाम् । शेषे धराभराक्रान्ते, शेते लक्ष्मीपतिः स्वयम् ॥६७॥
निर्दयत्वमहंकार-स्तृष्णा कर्कशभाषणम् । नीचपात्रप्रियत्वं च, पञ्च श्रीसहचारिणः ॥६८॥
भक्ते द्वेषो जडे प्रीति-ररुचिर्गुरुलङ्घनम् । मुखे कटुकताऽत्यन्तं, धनिनां ज्वरिणामिव ॥६९॥
अतो मया शिवस्यार्थं, तपो विधीयतेऽधुना । अतस्तत्र न विद्येत, दुःखं मनागपि क्वचित् ॥७०॥
यतः –
सिवमयलमरुअमणंतमक्खयमव्वाबाहमपुणराविति । सिद्धिगइनामधेयं ठाणं संपत्ताणं नमो जिणाणं ॥७१॥
अतः पापं भवांस्त्यक्त्वा, कुरु धर्मं दयामयम् । अतस्तवापि जायेत, मुक्तिसौख्यं निरत्ययम् ॥७२॥
निरपराधजीवानां, हननेऽभिग्रहोऽस्तु मे । मुनिः प्राह महाभाग !, पालव्योऽभिग्रहो दृढम् ॥७३॥

ततो नत्वा मुनिः स्वीय-स्थानेऽभ्येत्य कृपापरः । **भानु**र्निष्पापवृत्त्या तु, स्वोदरं चाभरत्सदा ॥७४॥
ततोऽभ्येत्य स्वके देशे, मिलित्वा स्वस्य भूपतेः । स्वकीयाभिग्रहं **भानु**-रुवाच विनयान्वितः ॥७५॥
राज्ञा दत्तं स्वकं ग्रासं, प्राप्य भानुर्नयाध्वना । जनताः पालयामास, रक्षन् स्वाभिग्रहं दृढम् ॥७६॥
ततो धर्मिष्ठलोकानां, मध्ये रेखां श्रयन् सदा । अभिष्टोऽजनि भूपस्य, लोकस्यापि निरन्तरम् ॥७७॥
मध्याह्ने **भानु**रन्येद्यु-र्यावद्भोक्तुमुपाविशत् । तावत्तस्य गृहद्वारे, साधुद्वयं समागमत् ॥७८॥
आगतौ संयतौ द्वारे, दृष्ट्वोत्थाय सुवासनः । प्रासुकान्नं प्रमोदेन, **भानु**र्व्यश्राणयत्तदा ॥७९॥
यतः –
पढमं जईण दाऊणं, अप्पणो पणमीऊण पारेइ । असई सुविहीआणं, भुंजई कयदिसालोआ ॥८०॥
साहूण कप्पणिज्जं जं न विदिन्नं कहवि कंचि तहिं । धीरा जहत्तकारी सुसावगा तं न भुंजंति ॥८१॥
तेन दानेन **भानुः** सो-ऽर्जयित्वा सुवृषं बहु । आलुलोच कृतं पापं, नैव गुरोः पुरः पुनः ॥८२॥
साधुदानप्रसादेन, स **भानु**र्जीवितात्यये । **नाभाक**स्त्वं नरेशोऽभू-रहो ! दानफलं महत् ॥८३॥
यतः –
सत्पात्रं महती श्रद्धा, काले देयं यथोचितम् । धर्मसाधनसाम्रग्री, बहुपुण्यैरवाप्यते ॥८४॥
धन्योऽहं मम मन्दिरं वरतरं, पुण्यं धनं मामकं, श्लाघ्यं जन्म सुवासरोऽथ हृदयं, सर्वज्ञमार्गानुगम् ।
आयातो मुनिपुङ्गवो मम गृहं, गृह्णातु चानुग्रहात्, किंचित्कश्चिदतिप्रमोदकलितो, दत्ते धनं शुद्धधीः ॥८५॥
त्वया पूर्वभवे जैन-प्रासादो मौढ्यबुद्धितः । पातयित्वा महावप्रः, कारितः **कमले** पुरे ॥८६॥
विप्र-स्त्री-बाल-गो-जैनसद्महत्या कृता त्वया । अतः पञ्चान्तरायास्ते, बभूवुरिह भूपते ! ॥८७॥
यतः –
विग्घं दाणे१लाभे२ भोगु३ वभोगेसु४ विरिएअ५ ।
सिरिहरिअ समं एअं जह पडिकूलेण तेण रायाई । न कुणइ दाणाईअं एवं विग्घेण जीवो वि ॥८८॥
त्वया देवधनं पूर्व-भक्षितं तेन भूपतौ । यत्सेहे नरके दुःखं, तच्चाग्रे कथयिष्यति ॥८९॥
अथ भूपतिराचष्ट, तादृशात्पातकाद् ध्रुवम् । त्रुटिष्यामि कथं साधू-त्तम ! त्वं ब्रूहि सत्वरम् ॥९०॥
**युगन्धर**गुरुः प्राह, तीर्थहत्याविशुद्धये । भव्यो जिनालयः कार्यो, भवता भूरिरैव्ययात् ॥९१॥
उपवासाः पुन स्त्रिंश-त्कार्या त्वया तमच्छिदे । यावन्निष्पाद्यते नैव, प्रासादः श्रीजिनेशितुः ॥९२॥
तावत्त्वया क्षितौ शेयं, दुग्धं त्याज्यं तमच्छिदे । ब्रह्महत्याविशुद्ध्यै व, पाल्यं ब्रह्मव्रतं पुनः ॥९३॥
बालहत्याविशुद्ध्यै तु, दध्नस्तेऽभिग्रहोऽधुना । नारीहत्याच्छिदे याव-ज्जीवं त्याज्या पराऽबला ॥९४॥
गोहत्याशुद्धये मद्य-नियमो भवतः पुनः । पापानां पञ्चकं ह्येतत्, श्वभ्रासुखप्रदं यतः ॥९५॥
सर्वहत्याच्छिदे **शत्रुञ्जये** श्रीप्रथमार्हतः । विधातव्याऽर्चना चारू-त्सवं भूरिधनव्ययात् ॥९६॥
यावन्निष्पद्यते नैव, प्रासादः परमार्हतः । तावच्च भवता वप्र-मध्ये, त्याज्यं प्रवेशनम् ॥९७॥
स्थापयित्वा गुरूंस्तत्र, स्तोकमासैर्जिनालयः । कारितो भूभुजाऽस्थापि, बिम्बं चाप्यर्हतः पुनः ॥९८॥
त्रिकालं जिननाथस्य, पूजां कुर्वन् स भूपतिः । कृतार्थं स्वं जनुश्चके, यशश्चाप्यर्जयन् बहु ॥९९॥

यतः –

तैरात्मा स पवित्रितो निजकुलं, तैर्निर्मलं निर्ममे, तैः संसारमहान्धकूपपततो, हस्तावलम्बो ददे ।
लब्धं जन्मफलं कृतं च कुगतिद्वारैकसंरोधनं, यैः शत्रुञ्जयमुख्यतीर्थनिवहे यात्रोद्यमो निर्मितः ॥१००॥

गुरूक्तविधिना कृत्वा, प्रायश्चित्तं शुभेऽहनि । तीर्थहत्याच्छिदे यात्रां, कर्तुं चक्रे मनो नृपः ॥१०१॥

चलतो भूपतेः **शत्रुञ्जये** देवार्चनाकृते । चतस्रः कृष्णमार्जार्य, उत्तीर्णाः क्रमयोगतः ॥१०२॥

यावद्राजा स्थितस्ताव-त्प्रोक्तं श्रीमद्गुरूत्तमैः । मार्जार्यः सूचयन्त्येव, तव पापचतुष्टयम् ॥१०३॥

कृत्वैकाग्रं मनः शत्रुञ्जये गम्यं त्वया नृप ! । तत्र धर्मान्तराण्येव, गमिष्यन्ति क्षयं क्षणात् ॥१०४॥

यतः –

श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि । अश्रेयसि प्रवृत्तानां, क्वापि यान्ति विनायकाः ॥१०५॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः, प्रारभ्य विघ्ननिहता विरमन्ति मध्याः ।
विघ्नैः सहस्रगणितैरपि[1] हन्यमाना, आरब्ध[2]मुत्तमगुणा[3] न परित्यजन्ति ॥१०६॥

गुरूक्त्या शकुनीकृत्य, ता एकमना नृपः । चलन्स्तोकैर्दिनैस्तीर्थमपश्यं विघ्नविनासकृत् ॥१०७॥

तत्रस्थो नृपतिस्तीर्थ-दर्शनोत्सवमादरात् । स्नात्रसल्लपनश्र्यादि-लम्भनैः स्मरणादिना ॥१०८॥

मतो विशेषतः कुर्वन्नुत्सवं गुरुयुग् नृपः । तीर्थस्य तलहट्यां तु, जगामाऽनघमानसः ॥१०९॥

**युगन्धर**गुरूत्तंसैः, सार्धं पादचरो नृपः । ददद्दानं महातीर्थ-मारुरोह वरोत्सवम् । ॥११०॥

पाण्डवैर्विहितो द्वारे, प्रासादे कीरदारुभिः । नृपो लेपमयं बिम्बं, ननाम प्रथमार्हतः ॥१११॥

यथाविधि विधायार्चां, प्रतिमाया जिनेशितुः । पादुके पूजयामास, सगन्धकुसुमादिभिः ॥११२॥

राजादन्या मुदा कृत्वा, तिस्रः प्रदक्षिणास्तदा । चकार सफलं जन्म, **नाभाक**नरनायकः ॥११३॥

स्नात्रं विस्तरतः कृत्वा-ऽऽरात्रिकां मङ्गलावधि । स्तोतुं गुणान् प्रभोर्लग्न, एवं **नाभाक**भूपतिः ॥११४॥

**॥ अत्र देवस्तुतिर्वाच्या ॥**

कुर्वन्नेवं स्तुतिं क्लिष्टं, तपः कृत्वा नरेश्वरः । प्रभोरग्रे निविष्टः सन्, ध्यानं वितनुते स्म सः ॥११५॥

एवं पूजां त्रिकालं तु, कृत्वा दिने दिने प्रभोः । रात्रौ ध्यानपरश्चक्रे, नमस्कारपरावृत्तिम् ॥११६॥

एवं तपःपरो भूपो, मासप्रान्ते दिनात्यये । ददर्श पट्टिकोन्माना-श्चतस्र औष्टिका शितीः ॥११७॥

ततः कल्पतपः कुर्वन्, मासप्रान्ते नृपो निशि । कोलमानाश्च मार्जारीश्चतस्रोऽथ व्यलोकत ॥११८॥

तपोऽभि दशमं कुर्वन्, मार्जारीर्मूषिका सिताः । चतस्र धवलाकारा, ददर्शाऽवनिनायकः ॥११९॥

तपो द्वादशमं कुर्वन्, दिनान्येकोनत्रिंशतम् । स्फटिकं भूधरं भूपो-ऽपश्यत्सोपानसुन्दरम् ॥१२०॥

आदिसोपानके याव-दुपविष्टोऽहमात्मना । तावत् केन कृशाङ्गेन, वृद्धपुंसा हि पातितः ॥१२१॥

अथो निपातितोऽप्यद्रे-र्नाऽपतं मेदिनीतले । किन्तु द्वितीयकं सोपानकमारूढवानहम् ॥१२२॥

ततः सुखात्तृतीये तु, सोपानके गतोऽहकम् । तत्र स्थित्वा क्षणं तुर्य-सोपाने स्फटिकेऽगमम् ॥१२३॥

तत्र मुक्तामये सोपानके गतभयोऽपि सन् । उपविष्टश्चिरं कालं, सुखलीनो गताशयः ॥१२४॥

---

१. पुनःपुनरपि प्रति । २. प्रारभ्य । ३. तूत्तमजना । इति भर्तृकरिकृत 'नीतिशतकेश्लोक-२७ मध्ये पाठान्तराणि

एवंविधं मया सूत्रं, लब्धमद्य दिनात्यये । अस्मात्स्वप्नात् फलं कीदृग्, भविष्यति गुरूत्तम ! ॥१२५॥
गुरुः प्राहाऽर्हतो धर्मः, स्फटिकाद्रिसहोदरः । असौ नरभवः सोपानकमादिममुच्यते ॥१२६॥
तत्र त्वं चटितोऽसीह, केन दुष्कर्मणाऽधुना । पातितोऽपि भवान्नैव, पतिष्यसि नराधिपः ॥१२७॥
द्वितीये यच्च सोपाने, चटितः पातितोऽपि सन् । तत्ते स्वर्गो भवादस्मा-द्भविष्यति सुखात्मकः ॥१२८॥
ततश्च्युतस्य ते भावी, नृभवो देवदुर्लभः । आरोहणात् तृतीयस्य, सोपानस्यातिशालिनः ॥१२९॥
तत्र ते संयमादानात्, तपसा शोषितात्मनः । भाव्यथ केवलज्ञानं, सत्यं **नाभाक**भूपते ॥१३०॥
आयुःक्षयात् शिवक्षेत्र-सम्प्राप्तिस्ते भविष्यति । यदन्तरायकर्मास्ति, तच्चाग्रे ज्ञास्यसि क्रमात् ॥१३१॥
क्षेत्रे **महाविदेहाख्ये, सीमन्धर**जिनेश्वरः । प्रष्टव्यो भवता सम्यग्, तत्कर्मज्ञप्तिहेतवे ॥१३२॥
राजाऽऽचष्ट कथं **सीमन्धरस्यै**व जिनेशितुः । दूरत्वाद्दर्शनं भावि, निर्भाग्यस्य ममाऽधुना ॥१३३॥
गुरुणोक्तं विषादं मा, कुरु भूप ! स्वमानसे । **सीमन्धरा**र्हतो वीक्षा, भाग्यात्तव भविष्यति ॥१३४॥
आपद्यप्यागतायां तु, मेरुशृङ्गमिव त्वया । स्थिरं मनो विधातव्यं, मौक्तिसौख्यस्य हेतवे ॥१३५॥
यतः —

तावद्भयेभ्यो भेतव्यं, यावद्भयमनागतम् । आगतं तु भयं दृष्ट्वा, प्रहर्तव्यमशङ्कितैः ॥१३६॥
श्रियमनुभवन्ति धीरा न भीरवः किमपि पश्य शस्त्रहताः । कर्णः स्वर्णालङ्कृतिरञ्जनरेखाङ्कितं चक्षुः ॥१३७॥
ततो हृष्टे नृपः कृत्वो-पवासं दिवसात्यये । ध्यानालीनोऽभवद्याव-त्तावद्ददर्श काननम् ॥१३८॥
भ्रमन् सर्वत्र वृक्षालीः, पश्यन् दध्याविदं नृपः । क्व तत्तीर्थं वनं क्वैतत्, शून्यं लोकैश्च दारुणम् ॥१३९॥
वनस्य पारमप्राप्तो, राजा ललावभिग्रहम् । सिद्धक्षेत्रे जिनं नत्वा, ग्राह्ये मयाऽन्न-पानके ॥१४०॥
ततश्चोत्तरदिग्भाग-माश्रित्य भूपतिश्चलन् । कण्टकैर्विध्यमानांह्रि-र्दूनो दुःख्यभवद्भृशम् ॥१४१॥
मध्याह्ने भूपतिस्तप्त-वालुकातापितक्रमः । बुभुक्षापीडितः कर्म, प्राक्कृतं सहते स्वयम् ॥१४२॥
तृषाशुष्यन्मुखः पञ्चोपवासैर्दुर्बलाङ्गकः । पादचारी व्रजन्नग्रे-ऽपश्यदेकां नितम्बिनीम् ॥१४३॥
दीयमानं तया नीर-फलादिभक्ष्यमद्भुतम् । न ववाञ्छ महीपालो, मनाक् क्षुधातुरोऽपि सन् ॥१४४॥
ततोऽग्रतो नृपो गच्छ-न्नभ्रंलिहालयश्रितम् । वप्रं प्रतोलिकासारं, ददर्श स्वःपुरीसमम् ॥१४५॥
मध्येपुरं व्रजन् नारी-वृन्दं देवसमं श्रिया । पश्यति स्म नृपो नैकं, नरं क्वचित्पदे पदे ॥१४६॥
एकया बालया हस्ते, गृहीत्वा स बलात्तदा । नीतः प्रौढालयेऽपश्य-न्नारीं वर्यां महीपतिः ॥१४७॥
तस्या नारीसहस्रं तु, सेवां वितनुते मुदा । सा चाऽभ्युत्थाय पल्यङ्कात्, सस्नेहमूचुषी नृपम् ॥१४८॥
भो भद्र ! भाग्यवान्नत्रा-यातोऽस्मत्पुण्ययोगतः । अलङ्कुर्वासनं ह्येतत्, प्रसद्याऽस्मासु साम्प्रतम् ॥१४९॥
आहारं देवतायोग्यं, गृहाणानुगृहाण माम् । परिधेहि दुकूलानि, वाञ्छितानि यथेच्छया ॥१५०॥
प्रेङ्खारूढो रमस्व त्वं, मया सार्धं यथासुखम् । द्युसद्विमानसङ्काशे, मन्दिरे वस सन्ततम् ॥१५१॥
स्त्रीराज्यमिदमेवाल्प-पुण्यैर्नैवाप्यते क्वचित् । त्वमस्माकं भव स्वामी, कामी च भोगदानतः ॥१५२॥
राजा दध्यौ मया यस्त्वभिग्रहोऽन्याबलोज्झने । गृहीतस्तं न मोक्ष्येऽहं, प्राणात्ययेऽपि च क्वचित् ॥१५३॥
गुरुभिर्याऽऽपदाग्रे मे, प्रोक्ता दुष्टा समेष्यति । सैव सम्भाव्यतेऽत्रागात्, गुरूक्तं नान्यथा भवेत् ॥१५४॥
ध्यायन्नेवं तया दत्ते, विष्टरे मौनवान्नृपः । उपविष्टो यदाह स्त्री, तदा स्नानं कुरुष्व भोः ॥१५५॥

कर्पूरवासितं नीर-मानीतं विद्यते तव । पक्वान्नपूरितस्थाल-मानीतमपरं च तद् ॥१५६॥
कुरु स्नानं ततो भुङ्क्ष्व, भोज्यं तथेप्सितं स्वयम् । ततः पूरय मे वाञ्छां, कामसौख्यप्रदानतः ॥१५७॥
एवं निमन्त्र्यमाणोऽपि, तया **नाभाक**भूपतिः । स ददौ नोत्तरं यावत्, तावत्स्त्री प्राह तं प्रति ॥१५८॥
क्लमिष्यति तवाङ्गं हि, विनाऽऽहारं नरोत्तम ! । अतश्चोत्तिष्ठ मुञ्चस्व, मौनं कुरु मदीरितम् ॥१५९॥
प्रतिकूलोपसर्गैः स, क्षोभ्यमानोऽपि भूपतिः । यथा न क्षुभितश्चित्ते, स्वाभिग्रहान्मनागपि ॥१६०॥
ततः क्षणादपि श्रीम-त्तीर्थे **शत्रुञ्जया**भिधे । आत्मानं पश्यति स्मैकं, स्थितं तां न स्त्रियं पुनः ॥१६१॥
यदा विस्मितचित्तोऽभू-द्राजा शत्रुञ्जयेक्षणात् । तावद् व्यधात् सुरः पुष्प-वृष्टिं तस्यैव मस्तके ॥१६२॥
केनेयं विहिता पुष्प-वृष्टिराकाशतोऽधुना । यावद् दध्याविति क्ष्माप-स्तावदेकोऽमरो जगौ ॥१६३॥
अहो ! सत्त्वमहो ! सत्त्वं, भाग्यवानसि सम्प्रति । विजयस्व चिरं धर्मं, जैनं कुरु यथेच्छया ॥१६४॥
**नाभाको**ऽवग् भवान् कस्त्वं, किमर्थमागतो वद । सुरोऽवक् प्रथमे स्वर्गे, स्थितः प्राहेति वासवः ॥१६५॥
**नाभाकः** सत्त्ववान् यादृक्, न विद्यते भरतेऽधुना । तादृग् नान्यो नरः कश्चिद्वीक्ष्यते सात्त्विकः किल ॥१६६॥
क्रियमाणां प्रशंसां ते, शक्रेणाहं सभान्तरे । अश्रद्दधादिहायातस्त्वां क्षोभयितुमादरात् ॥१६७॥
अरण्ये नयनादीनि, विघ्नानि बहुशो मया । कृतानि न पुनस्त्वं तु, चलितो ध्यानतो मनाक् ॥१६८॥
**रत्नाङ्गदः** सुरोऽहं तु, तुष्टोऽस्मि त्वयि साम्प्रतम् । वरं याचस्व चित्तस्थं, तुभ्यं दास्ये च मार्गितम् ॥१६९॥
राज्ञोक्तं मयका प्रापि, जैनौ धर्मः शिवप्रदः । ममैहिकसुखे नास्ति, वाञ्छा श्वभ्रासुखप्रदे ॥१७०॥
यतः –
राज्यं सुसम्पदो भोगाः, कुले जन्म सुरूपता । पाण्डित्यमायुरारोग्यं, धर्मस्यैतत्फलं विदुः ॥१७१॥
सुलहो विमाणवासो, एगछत्ता य मेइणी सुलहा । दुलहो पुण जीवाणं, जिणिंदवरसासणे बोही ॥१७२॥
नृपोऽवग् यदि तुष्टोऽसि, **सीमन्धर**जिनान्तिके । तदा मां नय नत्वा तं, कृतार्थोऽहं भवामि तु ॥१७३॥
ततस्तत्र जिनान् नत्वा, **रत्नाङ्गदः** सुरो मुदा । **नाभाकं** नृपतिं निन्ये, **सीमन्धर**जिनान्तिकम् ॥१७४॥
दत्त्वा प्रदक्षिणास्तिस्रः, **सीमन्धर**जिनक्रमौ । नत्वा स चोचिते स्थाने, धर्मं श्रोतुमुपाविशत् ॥१७५॥
धम्मेण अत्था पउरा भवंति, कामा य देवासुरमाणुसाणं ।
धम्मं चरित्ता रिसओ महण्णा, ठाणाणि पत्ता अयरामराणि ॥१७६॥
कोहाभिभूआ न सुहं लहंते, माणंसिणो सोगपरा भवंति ।
मायंसिणो हुंति परस्स वेसा, लुद्धा महिच्छा नरयं लहंते ॥१७७॥
कोहो विसं किं अमयं अहिंसा माणो अरी किं हिअमप्पमाओ ।
मायामयं किं सरणं च सव्वं तां भाडहं किं मुह माह तुट्ठी ।१७८।
अट्ठविहकम्मबद्धो, जीवो परिभमइ दीहसंसारं, दुक्खाणि अणुहवंते, उदएण वेअणिजस्स ॥१७९॥
श्रुत्वेति नरपोऽप्राक्षीत्, मया सुकृत-दुष्कृते । के कृते प्राग्भवे स्वामिन् !, निगदतां प्रसद्य भो ! ॥१८०॥
उवाच भगवान् **जम्बूद्वीप**स्थे भरते त्विह । एकोनविंशतेः कोटा-कोटेः प्राक्सागरोपमाम् ॥१८१॥
चतुर्विंश्यां व्यतीतायां, सप्रभे तीर्थनायके । मुक्तिं गते उपोम्भोधि, **ताम्रलिप्त्यां** पुरि ध्रुवम् ॥१८२॥

**समुद्र-सिंह**नामानौ, सोदरौ द्वौ बभूवतुः । धर्मी ज्येष्ठोऽजन्यन्यो-ऽभूदधर्मी कनीयान्पुनः ॥१८३॥
द्वयोः पत्न्यौ धनीकेऽल्पा-भिधे बभूवतुः क्रमात् । धर्मकर्मणि निष्णाते, सरले शीलशोभिते ॥१८४॥
गेहाङ्गणे यदा स्थूणा-हेतवे खनतोः क्षितिम् । प्रादुरासीन्निधिः प्रौढो, द्वयोः सोदरयोः पुरः ॥१८५॥
निधिमुद्घाट्य पत्रं तु, प्रथमं ददृशतुश्च तौ । ततो वर्णावलीर्वाचयामासतुरिति ध्रुवम् ॥१८६॥
**गोष्ठीनागेन** दीनारा, सहस्रं जिनसंमिताः । देवसत्काः निधावस्मिन्, न्यस्ताः सन्ति रहो निशि ॥१८७॥
**समुद्रः** प्रोक्तवान् देवद्रव्यं **शत्रुञ्जया**चले । व्ययते श्रेयसे **नागगोष्ठिक**स्यैव सोदर ! ॥१८८॥
देवद्रव्यं तु देवस्य, कार्ये यदि समेष्यति । तदा भवति **नागस्य**, पुण्यमेवात्मनः पुनः ॥१८९॥
यतः –
कर्तुः स्वयं कारयितुः परेण, तुष्टेन चित्तेन तथाऽनुमन्तुः । साहाय्यकर्तुर्मनुजस्य नूनं, तुल्यं फलं तत्त्वविदो वदन्ति ॥१९०॥
**सिंहो** जगौ तु द्रव्येणा-नेन पुत्री **कलावती** । परिणायत एवात्र, विलोक्य रुचिरं वरम् ॥१९१॥
ज्येष्ठो भ्राता जगौ देव-द्रव्यं भुक्तमघप्रदम् । देवद्रव्यादनात् श्वभ्र-पातो भवति निश्चितम् ॥१९२॥
यतः –
भक्खणे देवदव्वस्स, परत्थीगमणेण य । सत्तमं नरयं जंति, सत्तवारा य गोअमा ॥१९३॥
सिंहोऽवग् वीक्षितः केन, श्वभ्रः स्वर्गोऽथवा क्वचित् । आत्मनः प्रददे क्षोण्या, निधिरेष स्वभाग्यतः ॥१९४॥
ज्येष्ठो भ्राताऽवदत् पापं, वचो नैव प्रजल्प्यते । पुण्यं पापं निरीक्ष्येत, सुखि-दुःखिजनेक्षणात् ॥१९५॥
यतः –
एगे दो घट्टघटा रहेसु जं याणवाहणारूढा । वच्चंति सुकयपुन्ना, अन्ने धावंति सपुरओ ॥१९६॥
चेईअदव्वविणासे रिसिघाए पवयणस्स उड्डाहे । संजइचउत्थभंगे मूलग्गीबोहिलाभस्स ॥१९७॥
वरं सेवा वरं दास्यं, वरं भिक्षा वरं मृतिः । निदानं दीर्घदुःखानां, न देवधनभक्षणम् ॥१९८॥
अथ पत्नी जगौ कान्त !, ज्येष्ट-भ्रातृवचः कुरु । ज्येष्टभ्राता तु पित्रादि, गुरुवत् मान्यते जनैः ॥१९९॥
भ्रातृवचोऽवगणनाद्, देवद्रव्यविनाशतः । लभन्ते नरकं घोरं, भूरि दुःखावलीप्रदम् ॥२००॥
पत्न्यैवं जल्पिते **सिंहो**, जगौ रण्डे ! त्वयाऽधुना । उपदेशो न दातव्यो वाञ्छत्या हितमात्मनः ॥२०१॥
वानरं कम्पमानाङ्गं, शीतेन पीडितं भृशम् । प्रददौ सुगृही चारू-पदेशं हितहेतवे ॥२०२॥
हस्तपादसमायुक्तो, दृश्यसे पुरुषाकृतिः । शीतवातपरिभ्रष्टो, गृहं किं न करिष्यसि ? ॥२०३॥
श्रुत्वैतद्वचनं तस्याः, प्रोच्यमानं तदा स्फुटम् । वानरः कम्पमानाङ्गः प्रोक्तवानिति तां प्रति ॥२०४॥
शूचीमुखे ! दुराचारे !, रण्डे ! पण्डितमानिनि ! असमर्थोऽहं गृहारम्भे, समर्थो गृहभञ्जने ॥२०५॥
इत्युक्त्वा सुगृहीगेहं, शतखण्डं विधाय च । वृक्षस्याऽपरशाखायां, जगाम वानरो द्रुतम् ॥२०६॥
इतो लात्वा निधिं शत्रुञ्जये व्ययितुमादरात् । यावत्सज्जोऽभवज्जेष्ठो, भ्राता शोभनवासरे ॥२०७॥
लङ्घनत्रितयं कृत्वा, निध्यर्धं कलिपूर्वकम् । स्वभागं सद्मनो लात्वा, पृथक् **सिंहो**ऽभवत्तदा ॥२०८॥
पापी दोषं निजं नैव, पश्यत्यन्यस्य पश्यति । धर्मी दोषं निजं पश्ये-न्नान्यस्य कर्हिचित् क्वचित् ॥२०९॥
ततो देवधनं तीर्थे, **समुद्रं** व्ययितुं यदा । यियासुं वीक्ष्य **सिंहो**ऽवक्, **प्राहेति** भूपतेः पुरः ॥२१०॥
खनताऽथ **समुद्रेण**, प्राप्तो निधिर्महत्तमः । तं लात्वा व्ययितुं तीर्थे, **समुद्रो**ऽथ चलिष्यति ॥२११॥

ततो राजा **समुद्रं** तु, धृत्वा रुष्टो जगाविति । यो निधिर्भवता प्राप्तस्तं मह्यं वितराऽचिरात् ॥२१२॥
**समुद्रो** ध्यातवान् भ्रात्रा, लातमर्धं निधिं पुरा । निधिप्राप्तिस्वरूपं च, राज्ञोऽग्रे च निवेदितम् ॥२१३॥
यदि न दास्यते राज्ञे, निध्यर्द्धं साम्प्रतं मया । गृहसत्कं धनं यन्मे, विद्यते तच्च लास्यति ॥२१४॥
विमृश्येति **समुद्रः** स, राज्ञोऽग्रे प्रोक्तवानिति । स्वामिन् ! देवधनं ह्येतद्, गृह्यतां यदि रोचते ॥२१५॥
भुक्तं देवधनं सर्वकुललक्ष्मीक्षयाय तु । भवतीह परत्रापि, नरकासातःहेतवे ॥२१६॥
ध्यात्वेति तद्धनं लात्वा, तीर्थे व्ययितुमादरात् । यियासुरस्म्यहं ते यद्, रोचते तद्विधीयताम् ॥२१७॥
राजाऽपि देवद्रव्यस्य, भक्षणात्पापभीर्जगौ । शत्रुञ्जयादितीर्थेषु, व्यय देवधनं समम् ॥२१८॥
**समुद्रो**ऽथ तदा भ्रातृलातं देवधनं किल । अचीकथन्न भूपस्य, पुरो दाक्षिण्यनीरधीः ॥२१९॥
सत्कृत्य स **समुद्रो**ऽथ मुक्तो भूमिभुजा तदा । व्ययितुं तद् धनं तीर्थे, यियासुरभवत्क्रमात् ॥२२०॥
यतः —
शैले शैले न माणिक्यं, मौक्तिकं न गजे गजे । साधवो नहि सर्वत्र, चन्दनं न वने वने ॥२२१॥
शुभेऽह्नि स **समुद्रो**ऽथ, चलन् **शत्रुञ्जयं** प्रति । पुरे ग्रामे पुरे ग्रामे, जिनस्नात्रोत्सवं व्यधात् ॥२२२॥
**काञ्चनाह्वे** पुरे गत्वा, **समुद्र**स्तस्थिवान् यदा । तदा तत्र पुरे भूपो, निष्पुत्रो रोगवानभूत् ॥२२३॥
विहितेषूपचारेषु, बहुष्वपि तु मन्त्रिभिः । राजा **महाबलो**ऽकस्मा-त्पञ्चत्वमगमद् ध्रुवम् ॥२२४॥
यतः —
सम्पदो जलतरङ्गविलोला, यौवनं त्रिचतुराणि दिनानि ।
शारदाभ्रमिव चञ्चलमायुः, किं धनैः कुरुत धर्ममनिन्द्यम् ॥२२५॥
चेतोहरा युवतयः स्वजनोऽनुकूलः, सद्बान्धवाः प्रणयगर्भगिरश्च भृत्याः ।
वल्गन्ति दन्तिनिवहास्तरलास्तुरङ्गाः, सम्मीलने नयनयोर्नहि किञ्चिदस्ति ॥२२६॥
पञ्चभिर्गजताक्ष्याद्यै-र्दिव्यैरेवाधिवासितैः । भूपपट्टे **समुद्रो**ऽथो-ऽभिषिक्तो मन्त्रिभिस्तदा ॥२२७॥
यतः —
दैवेन प्रभुणा स्वयं जगति यद्यस्य प्रमाणीकृतं, तत्रस्यापि नयेन्मनागपि सदा, नैवाश्रयः कारणम् ।
सर्वाशापरिपूरके जलधरे, वर्षत्यपि प्रत्यहं, सूक्ष्मा एव पतन्ति चातकमुखे, द्वित्राः पयोबिन्दवः ॥२२८॥
यद्धात्रा निजभालपट्टलिखितं, स्तोकं महद्वा धनं, तत्प्राप्नोति मरुस्थलेऽपि नितरां, मेरौ गतो नाऽधिकम् ।
तद्धीरो भव वित्तवस्तुकृपणां, वृत्तिं वृथा मा कृथाः, कूपे पश्य पयोनिधावपि घटो, गृह्णाति तुल्यं जलम् ॥२२९॥
तस्मिन् राज्ये निविष्टः सन्, **समुद्रः** क्षोणिमण्डनम् । न्यायात्प्रजा अपात्पाप-भीरुः स कृपयाञ्चितः ॥२३०॥
यतः —
वसुहाभरणं पुरिसा, पुरिसाभरणं प्रधानतरलक्ष्मीः । लक्ष्म्याभरणं दानं, दानाभरणं सुपात्रं च ॥२३१॥
स्थापयित्वा धनं देवस-त्कमेकत्रं यत्नतः । व्ययितुं वाञ्छति क्ष्मापः, **समुद्रो विमलाचले** ॥२३२॥
स्वच्छाशयाः प्रकृत्या, परहितकरणोद्यता रता धर्मे । सम्पदि न गर्वभाजो, विपदि न मुह्यन्ति सत्पुरुषाः ॥२३३॥
सम्प्राप्यावसरं भूपो, लात्वा देवधनं च तत् । व्ययितुं सिद्धशैले तु, चचाल शोभनेऽहनि ॥२३४॥

स्वीयं धनं व्ययन्मार्गे, जिनस्नात्रोत्सवादिषु । **शत्रुञ्जये** ययौ भूपः, **समुद्रः** शोभनाशयः ॥२३५॥
प्रभोः कृत्वाऽर्चनं प्रौढ-विस्तरान्मेदिनीपतिः । **नागगोष्ठिक**नाम्ना तु, भोगं चक्रे प्रमोदतः ॥२३६॥
ततः स्वश्रेयसे भूपो, बह्वीं लक्ष्मीं शिवाचले । व्ययित्वा सफलं जन्म, चकार भरतेशवत् ॥२३७॥
यतः –
श्री-तीर्थपान्थरजसा विरजीभवन्ति, तीर्थेषु बम्भ्रमणतो न भवे भ्रमन्ति ।
तीर्थव्ययादिह नराः स्थिरसम्पदः स्युः, पूज्या भवन्ति जगदीशमथार्चयन्ति ॥२३८॥
अन्यतीर्थेषु यद् द्रव्य-व्ययात्पुण्यं प्रजायते । तच्च कोटिगुणं **शत्रुञ्जये** स्याद् व्ययितं वृषे ॥२३९॥
ततो **रैवतभूमि**ध्रे, नत्वा **नेमि**जिनेश्वरम् । भूपो भूरिधनं धर्मे, व्यययामास भावतः ॥२४०॥
तत्रापि विस्तरात्स्नात्रोत्सवं श्री**नेमिनो**ऽर्हतः । कुर्वाणो नृपतिः पुण्यं, मुक्तियोग्यमुपार्जयत् ॥२४१॥
यतः –
**रैवते** भूधरे **नेमि**जिनं यो नमति ध्रुवम् । सोऽन्यतीर्थनतेः पुण्यं, लक्षगुण्यं समर्जयेत् ॥२४२॥
ततः स नृपतिर्मार्गे, चलन्स्वदेशसन्निधौ । यावदागादरिक्ष्मापै, रुद्धस्तावद् गतकृपैः ॥२४३॥
जजल्पुर्विद्विषो रे ! रे !, वणिग् ! राज्यं करोषि किम् । अस्मादृशेषु सत्स्वेव, दुर्दमेषु द्विषामपि ॥२४४॥
वणिग्हस्ते तुला भाति, भाण्डं तोलयितुं किल । शूरहस्तोचितं खड्गं, शूरहस्ते च शोभते ॥२४५॥
यद्यस्ति तव सामर्थ्यं, तदा घोरं रणं कुरु । नो चेद्राज्यमिदं त्यक्त्वा, स्वस्थाने व्रज सत्वरम् ॥२४६॥
अस्माभिर्न तवोपास्ति-र्मनागपि करिष्यते । एत्यास्माकं कुरूपास्तिं, त्यज राज्यमिदं रयात् ॥२४७॥
**समुद्रो**ऽवग् वयं नूनं, वणिजः कातराः स्मृताः । कथ्यन्ते क्षत्रियाः शूराः, शस्त्रहस्ता महाबलाः ॥२४८॥
जायमाने रणे घोरे, ज्ञास्यते बलमावयोः । स्थीयन्ते तु क्षणं कस्मा-द्भवद्भिः क्षत्रियैः कथम् ॥२४९॥
परक्षेपं सहन्ते न, शूराः क्षणमपि क्वचित् । अतो मे सम्मुखं युद्धं, कुरुध्वं सत्वरं दृढम् ॥२५०॥
हतोऽयं नैगमो नूनं, मारिमारीति कर्कशम् । जल्पन्तो विद्विषो युद्धं, कर्तुं लग्ना महीभुजः ॥२५१॥
तदा कृत्वा शये खड्गं, मारिमारीति जल्पता । **समुद्रे**णोत्थितं युद्धं, कर्तुं सहारिभूमिपैः ॥२५२॥
नष्टं निजबलं दृष्ट्वा, **समुद्र** एककस्तदा । युद्धं कुर्वन् स्थितः सत्त्वशाली स्मरन् जिनं हृदि ॥२५३॥
उत्थिता वैरिणो हन्तुं, **समुद्रं** यावताऽऽदरात् । तावत्ते स्तम्भिताः केनचिदासंश्चित्रिता इव ॥२५४॥
त्रुटत्सन्धानकैर्बाढं, पीडिताङ्गैरितीरितम् । मुञ्चास्मान् भवतः सेवां, करिष्यामो नृपाऽनिशम् ॥२५५॥
कृपासागर ! सत्सत्त्व !, धर्मज्ञ ! धर्मिशेखर ! । सर्वेषु शत्रुमित्रेषु, तुल्यो भावस्तवेक्ष्यते ॥२५६॥
कृपां कुरु द्रुतं मुञ्च, कुर्मोऽह्र्योः सेवनं तव । वेदनयाऽनया प्राणा, गमिष्यन्ति नरेश्वर ! ॥२५७॥
अस्माभिर्मौढ्यतः प्रोक्तं, विरूपं यत्तवोपरि । तत्तत्पतितमस्माकं, मस्तके प्राणहारकम् ॥२५८॥
एवं तेषु प्रजल्पत्सु, भूपदृष्ट्या प्रसन्नया । मुक्तास्ते वैरिणो नेमुः, **समुद्र**भूपतिक्रमौ ॥२५९॥
चिरं जीव चिरं रक्ष, पृथ्वीं धर्मं चिरं कुरु । अतः परं भवान् स्वामी, त्वमेव जीविताविध ॥२६०॥
यतः –
व्यसनशतगतानां, क्लेशरोगातुराणां, मरणभयहतानां, दुःखशोकार्दितानाम् ।
जगति बहुविधानां, व्याकुलानां जनानां, शरणमशरणानां, नित्यमेको हि धर्मः ॥२६१॥

दीपो हन्ति तमःस्तोमं, रसो रोगमहाभयम् । सुधाबिन्दुर्विषावेगं, धर्मः पापभरं तथा ॥२६२॥
ततस्तैः सैवकैरिव, सेवितः स महीपतिः । सूत्सवं स्वपुरीमध्ये, प्रविवेश महाशयः ॥२६३॥
नत्वा चैत्ये जिनान् गेहेऽ-भ्येत्य भुक्त्वा यथारुचि । यावद्राजा सभायां तूपाविशत् सुरनाथवत् ॥२६४॥
तावदेकः सुरो दिव्य-रूपो भूमीपतेः पुरः । प्रादुरासीत्तनोः कान्त्या, भासयन्सकलां सभाम् ॥२६५॥
**समुद्रो**ऽवग् भवान् कस्त्वं ?, किमर्थमिह सङ्गतः ? । केन मे वैरिणः स्तम्भी-कृताः कथय साम्प्रतम् ॥२६६॥
देवो जगौ पुरा **ताम्रलिप्त्यां** पुर्यां वरश्रियि । गोष्ठिको **नागनामा**ऽभूत्, जैनधर्मकृतादरः ॥२६७॥
पूर्वजैः कारिते जैन-प्रासादे सारमादरात् । कुर्वाणो गोष्ठिको नागो, देवद्रव्यममेलयत् ॥२६८॥
मिलितं विभवं भूरि, दृष्ट्वा दध्यौ मया ह्यदः । मेलितं तु ततो गेहे, व्ययितं तेन किञ्चन ॥२६९॥
दिने दिने क्षयं गच्छन्, धनं कुटुम्बसंयुतम् । दृष्ट्वाऽप्राक्षीत्स **नाग**स्तु, गुरोः पार्श्वे कृतादरम् ॥२७०॥
किं मे कुटुम्बकं क्षीणं, धनं याति क्षयं कथम् । गुरुः प्राह त्वया देवद्रव्यं च व्ययितं गृहे ॥२७१॥
यः करोति जनो देवद्रव्येण क्रयविक्रयौ । सोऽत्रापि च परत्रापि, दुःखभाग् जायते भृशम् ॥२७२॥
श्रुत्वेति **नागगोष्ठिः** स, लेखं कृत्वाऽऽदितो दृढम् । चतुर्विंशतिदिनार-सहस्त्रीं ज्ञातवान् प्रभोः ॥२७३॥
ताम्रपत्रयुतं देव-द्रव्यं तन्निधिमध्यगं । कृत्वा न्यास्यकरोत् क्षोण्यां, स **नागगोष्ठि**को द्रुतम् ॥२७४॥
अन्यदाऽऽसन्नगेहस्थै, रासः **शत्रुञ्जय**स्य तु । गीयमानः श्रुतो **नाग-गोष्ठि**केन कृतादरम् ॥२७५॥
तद्ध्यानासक्तचित्तः स, मृत्वा व्यन्तरसद्मनि । व्यन्तरो निर्जरो जातः, स्फुरत्तेजोमयात्मकः ॥२७६॥
निर्गत्याथ ततः **शत्रुञ्जये**ऽभ्येत्य जिनक्रमौ । सेवते स्म सदा सङ्घ-विघ्नानि दूरतः क्षिपन् ॥२७७॥
यदा **शत्रुञ्जये नाग**-नाम्ना भोगः प्रभोः पुरः । चक्रे त्वया तदा हृष्टो, व्यन्तरः सोऽभवद्भृशम् ॥२७८॥
सोऽहं प्राग्भवजं **नाग**-नाम स्मृत्वा मुदाञ्चितः । त्वयि भक्तिपरोल्लासी, समुद्रनरपाऽभवम् ॥२७९॥
त्वां निरुद्धं द्विषद्वर्गै-र्विज्ञाय ज्ञानतोऽध्वनि । सान्निध्यं कर्तुकामोऽहं, रणे तत्र समागमम् ॥२८०॥
स्तम्भिता वैरिणः सर्वे, मया तस्मिन् रणाङ्गणे । ततस्तवाभवद् वैरीजयो रिपुनिकृन्तनात् ॥२८१॥
निर्लोभी त्वं यतोऽस्त्येव, पुण्यवानपि भूपते ! । विद्यतेऽतो महद् भाग्यं, पूर्वपापक्षयाद् ध्रुवम् ॥२८२॥
प्रतिवर्षं मम श्रेयो-निमित्तं **विमलाचले** । यात्राद्वयं विधातव्यं, पुण्यं द्वयोर्भविष्यति ॥२८३॥
यतः —
यद्वस्तु दीयते भावात्, भवेल्लक्षगुणं सदा । यद्दत्ते सुकृतं पुण्ये, पापे पापं च तद्गुणम् ॥२८४॥
किं चान्यद्दीयते यत्तद्, धनिकस्यापचीयते । सुकृतं दीयमानं तु, धनिकस्योपचीयते ॥२८५॥
श्राव्यते सुकृतं यावत्, प्रान्तकालेऽपि तावतः । निजश्रद्धाऽनुमानेन, प्राप्यते तत्फलं ध्रुवम् ॥२८६॥
ततः श्रावयिता पश्चा-द्विधत्ते मानिनं यदि । तदा सोऽप्यनृणः पुण्य-भाग् भवेदन्यथा न तु ॥२८७॥
अश्रावितोऽपि श्रद्धत्ते, सुकृतं यः क्वचिद्गतौ । जानन् ज्ञानानुभावेन, सोऽपि तत्फलमाप्नुयात् ॥२८८॥
अन्यथा सुकृतं तन्वन्, स्वजनः स्वजनाख्यया । व्यवहारप्रीतिभक्ती, एवं ज्ञापयति ध्रुवम् ॥२८९॥
कर्तुः कारयितुः पुण्यं, तथानुमोदतः सतः । पुण्यं भाववशाल्लु[त्तु]ल्यं, जायते शिवशर्मदम् ॥२९०॥
तीर्थयात्राद्वयस्यैव, मानिते श्रेयसि ध्रुवम् । स व्यन्तरो ययौ **शत्रुञ्जये** सेवितुमर्हतः ॥२९१॥

व्यन्तरस्य ततस्तस्य, श्रेयसे प्रतिहायनम् । यात्राद्वयं व्यधा**च्छत्रुञ्जये** **समुद्र**भूपतिः ॥२९२॥
न्यायाध्वना प्रजाः सर्वाः, पालयन् सततं नृपः । स्वसुतं **सुन्दरं** स्वस्य, पदे न्यवीविशन्मुदा ॥२९३॥
प्रान्ते दिनानि षट्त्रिंशत्, **समुद्र**मेदिनीपतिः । पालयित्वा व्रतं पुण्य-मर्जयामास भूरिशः ॥२९४॥
आराधनां विधायाथ, क्षमापनापुरस्सरम् । ययौ **सर्वार्थसिद्ध्**याह्वे, विमाने स नृपो यतिः ॥२९५॥
ततश्च्युत्वा **कलापुर्यां, चन्द्रस्य** मेदिनीपतेः । **सहस्र**मल्लभूपालः, पुत्रोऽपात्पृथिवीं नयात् ॥२९६॥
तत्रान्यदा गुरुः **सिंहसेनो** भूरियतिश्रितः । आययौ बोधितुं भव्य-जीवान् जिनेन्द्रधर्मणि ॥२९७॥
श्रोतुं धर्मं जिनेन्द्रोक्तं, तस्मिन् भूपे समागते । दिदेश देशनां साम्बु-मेघघोषगिरा तदा ॥२९८॥
धर्मो महामङ्गलमङ्गभाजां, धर्मो जनन्युद्दलिताखिलार्त्तिः ।
धर्मः पिता पूरितचिन्तितार्थो, धर्मः सुहृद्वर्तितनित्यहर्षः ॥२९९॥
दिवसनिसाघडिमालं, आउं सलिलं जणस्स घित्तूणं । चंदाइच्च बइल्ला कालरहट्टं भमाडंति ॥३००॥
छायामिसेण कालो, सयलजीआणं छलं गवेसंतो । पासं कहवि न मुंचइ, ता धम्मे उज्जमं कुणह ॥३०१॥
जे जिणधम्मह बाहिरा, ते जाणे वा चारि । ऊगी ऊगी खयगया संसारी आसंसारि ॥३०२॥
वरिसह ते गणि दीहडा, जे जिणधम्मिंहि सार । तिण्णसया उण सट्ठडी, ईहं म गिणइ गमार ॥३०३॥
श्रुत्वेति भूपतिः सप्तसहस्राणि जिनालयान् । कारयामास भूपीठ-भूषणानि धनव्ययात् ॥३०४॥
सहस्राणां त्रयं सार्वगेहानां पततां क्रमात् । उद्धारं कारयामास, भूपः स्वश्रेयसे तदा ॥३०५॥
**शत्रुञ्जया**दितीर्थेषु, यात्रां कुर्वन् नरेश्वरः । स्वं जन्म सफलं चक्रे, भूयिष्ठविभवव्ययात् ॥३०६॥
अनित्यं विभवं सर्वं, कुटुम्बयोगमेव च । ज्ञात्वा स भूपतिर्दीक्षां, ललौ श्रीगुरुसन्निधौ ॥३०७॥
षष्ठाष्टमादिकुर्वाणः, **सहस्रमल्ल**संयतः । कर्मक्षयात्क्रमात्प्रापावधिज्ञानं मनोहरम् ॥३०८॥
अवधिज्ञानतोऽसङ्ख्य-भव्यजीवान् प्रबोधयन् । विहारं चकृवान् ज्ञानं, चतुर्थं चाप्तवान् पुनः ॥३०९॥
सन्ध्यायामन्यदा शुक्लध्यानारूढः स संयतः । अवाप केवलज्ञानं, लोकालोकप्रकाशकम् ॥३१०॥
निर्जरैर्विहिते हेमपद्मे निविश्य हेलया । ज्ञानी **सहस्रमल्लः** स, धर्मोपदेशनां व्यधात् ॥३११॥
अनित्यमारोग्यमनित्ययौवनं, विभूतयो जीवितमप्यनित्यम् ।
अनित्यताभिः प्रहतस्य जन्तोः, कथं रतिः कामगुणेषु जायते ।३१२।
उत्पत्तिरेवास्ति विपत्तिसंयुता, न कोऽप्युपायोऽस्ति मृतौ शरीरिणाम् ।
अतः सदा धर्ममरोगदायकं, करोति भव्यो मनुजोऽपरो नहि ॥३१३॥
प्रबोध्येति बहून् भव्य-जीवान् स केवली क्रमात् । आयुःक्षये ययौ मुक्तिं, **समुद्रः** स यतीश्वरः ॥३१४॥

**॥ इति समुद्रजीवमुक्तिगतिः ॥**

**नाभाको**ऽथ नृपः प्राह, **सिंहः समुद्र**सोदरः । देवद्रव्यादनात्कां कां, गतिं बभ्राम भूतले ॥३१५॥
**सीमन्धरो** जिनः प्राह, **सिंहो** यथाऽभ्रमद् भुवि । तथा **नाभाक**भूपाल !, शृणु सम्प्रति भावतः ॥३१६॥
तदा **सिंहः** कृतस्वीय-भ्रात्रपराधशङ्कया । गत्वा वेलातटे **पद्मपुरे** वासं चकार सः ॥३१७॥
देवद्रव्येण पुत्रीं स्वां, परिणाय्य सदुत्सवम् । शेषेण देवद्रव्येण, व्यवसायं चकार च ॥३१८॥
ततोऽन्यदा धनं तच्च, लात्वा वारिधिवर्त्मना । यानारूढोऽचलल्लक्ष्मीं, मेलितुं **सिंह**नैगमः ॥३१९॥

यत: —

तृष्णा खानिरगाधेयं, दुष्पूरा केन पूर्यते । या महद्भिरपि क्षिप्तैः, पूरणैरवखन्यते ॥३२०॥

शरीरं श्लथते नाऽऽशा, रूपं याति न पापधीः । जरा स्फुरति न ज्ञानं, धिक् स्वरूपं शरीरिणाम् ॥३२१॥

गत्वा स **सिंहल**द्वीपे, **सिंहः** क्रयाणकं समम् । विक्रीय दन्तिनां दन्तान्, लातुकामोऽजनि क्रमात् ॥३२२॥

अभावं दन्तिदन्तानां, ज्ञात्वा तत्र पुरे तदा । मिलितो भूपतेः कृत्वा, प्राभृतं प्रवरं क्रमात् ॥३२३॥

पापर्द्धिकारकाणां तु, दायं दायं धनं बहु । **सिंहो** धर्तुं गजान् पाशान्, मण्डयामास कानने ॥३२४॥

गर्तायां दन्तिनो भूरीन्, पातयित्वा निहत्य च । तद्दन्तैरभरद्यान-चतुष्कं **सिंह** आदरात् ॥३२५॥

यत: —

लोभमूलानि पापानि, रसमूलाः स्युरामयाः । स्नेहमूलानि दुःखानि, त्रीणि त्यक्त्वा सुखी भव ॥३२६॥

दन्तिदन्तैः स यानानि, भरित्वा वारिधौ क्रमात् । आयात् **सिंहः** सुराष्ट्रायाः, पार्श्वे द्वीपस्य सन्निधौ ॥३२७॥

वार्द्धिमध्यस्थदन्तेष्वास्फाल्य यानचतुष्टयम् । यदा भग्नं तदा **सिंहो**, ममज्ज वस्तुना समम् ॥३२८॥

गतप्राणोऽथ **सिंहः** स, प्रथमे नरके ययौ । ततः श्वभ्रगतं दुःखं, सेहे प्राणान्तकारकम् ॥३२९॥

यत: —

नरएसु जाइं अइकक्खडाइं दुक्खाइं परमतिक्खाइं । को वण्णेही ताइं ? जीवंतो वासकोडीवि ॥३३०॥

कक्खडदाहं सामलिअ सिवण वेअरणि पहरण सया । इंहिं जा जाउणा उपावंति नारया तं अहम्म-फलं ॥३३१॥

निर्गतोऽथ ततो व्याघ्रो, भूत्वा सिंहासुमान् क्रमात् । द्वितीये नरके दुःखतर्तिं सेहेऽतिदुःसहम् ॥३३२॥

ततः पारापतो भूत्वा, जीवान्हत्वा बहूनपि । तृतीये नरके **सिंह**-जीवः प्रापाऽसुखं बहु ॥३३३॥

ततो बिडालिका जाता, चतुर्थे नरके ततः । ततः श्वानस्ततः श्वभ्रे, पञ्चमेऽथ झषोऽभवद् ॥३३४॥

ततश्च नरके षष्ठे, ततोऽभूत्तन्दुलो झषः । ततः स सप्तमे श्वभ्रे, ततो भिल्लोऽभवद्वने ॥३३५॥

ततो व्याघ्रस्ततः पक्षी, ततः कुन्थुस्ततो झषः । ततः सर्पस्ततः सिंह-स्ततः शिवा ततो हरिः ॥३३६॥

ततो जलं ततो वह्नि-र्मक्षिका कौतिका ततः । ततः कीटस्ततः पारापतोऽथ भुजगोऽभवत् ॥३३७॥

पट्टयल्लस्ततो जात-स्ततः श्वभ्रे द्वितीयके । ततः **सिंह**पुरे भीष्मभावो **भीष्माभिधो** नृपः ॥३३८॥

तत्राऽन्यायाज्जनान् कारागारे क्षिप्त्वा धनं बहु । तथाऽऽदात् स यथा तेन, दुःखिनो मनुजाः पुनः ॥३३९॥

दुःखिनो मनुजाः प्रोचुः, कदाऽयं दुष्टभूपतिः । मृत्वा गमिष्यति श्वभ्रे, दारुणे दारुणाऽघतः ॥३४०॥

यत: —

अकरे करकर्ता च, गोसहस्रवधः स्मृतः । प्रवृत्तकरविच्छेदे, गवां कोटिफलं लभेत् ॥३४१॥

इत**श्चित्राभिधे** कूटे, **चित्रा**पुर्यां वरश्रियि । **चन्द्रादित्यो** नृपः पृथ्वीं, पपाल न्यायवर्त्मना ॥३४२॥

पूर्वोपार्जितदुष्कर्मो-दयात्तस्य नरेशितुः । कुष्ठरोगोऽभवन्नैव, गतश्चौषधयोगतः ॥३४३॥

पापिसङ्गान्नृपस्तादृक्शरीरोऽपि भटैर्वृतः । पापर्द्धौ निर्गतो भूरि-मृगान् जघान निर्दयम् ॥३४४॥

एकदा मृगयूथस्य, पृष्ठौ धावन् कृतत्वरः । गते मृगे यतिं कायोत्सर्गस्थं च व्यलोकत ॥३४५॥

उक्तं च भूभुजा कस्यां, दिशि साधो ! मृगो गतः । पापभीः स यतिर्मौनं, कृत्वा जजल्प नो मनाक् ॥३४६॥

अजल्पति यतौ खड्गमाकृष्य कोशतः क्षणात् । अधावन्नृपतिर्हन्तुं, मुनिं यावद् रुषारुणः ॥३४७॥
तावत्स कीलितस्तम्भ, इव चित्रस्थरूपवत् । तस्थौ भूपो न तत्स्थाना-च्चलितुं शक्त एव तु ॥३४८॥
राजा जगौ कृपागार !, बद्धोऽहं भवता कथम् । साधवः समचित्ताः स्युः, शत्रौ मित्रे मणौ मृदि ॥३४९॥
त्वां निहन्तुं मया मौढ्या-त्खड्ग उत्पाटितोऽधुना । क्षमस्व त्वं कृपां कृत्वाऽपराधं मयका कृतम् ॥३५०॥
यतः –
आनन्दमधुरा दृष्टि-र्मनः प्रतीतितरङ्गितम् । सतामेतावदौचित्यं, शेषस्त्वाचारडम्बरः ॥३५१॥
पात्रार्थं भोजनं येषां, दानार्थं च धनार्जनम् । धर्मार्थं जीवितं येषां, ते नराः स्वर्गगामिनः ॥३५२॥
आकर्ण्येति नमो अरिहंताणमिति जल्पता । साधुनोक्तं च भो भद्र !, पूर्वनिर्मितपातकम् ॥३५३॥
अद्य-यावद् गतं नास्ति, नवं पापं किमर्ज्यते । साधूनां कुर्वते रक्षां, भूपा एव निरन्तरम् ॥३५४॥ युग्मम् ॥
यतः –
दुर्बलानामनाथानां, बाल-वृद्ध-तपस्विनाम् । अन्यायैः परिभूतानां, सर्वेषां पार्थिवो गुरुः ॥३५५॥
ततः प्रसन्नचित्तः सन्, भूपो मुत्कलविग्रहः । उत्तीर्याश्चाद्यतिं नत्वा-ऽप्राक्षीत्प्राग्भवमात्मनः ॥३५६॥
स ज्ञानी प्राह भूनाथ !, शृणु त्वं वचनं मम । **नागगोष्ठी**कजीवः स, भ्रमन् संसारकानने ॥३५७॥
क्रमात्स व्यन्तरीभूत-स्तीर्थे **शत्रुञ्जया**चले । तीर्थसेवां व्यधात्षष्टिसहस्राब्दानि सन्ततम् ॥३५८॥
काङ्क्षन् सदैव भोगं तु, देवसत्कं स्वलौल्यतः । मनसा विदधे देवभोगं संसारवर्धकम् ॥३५९॥
क्रमादायुःक्षये **नागगोष्ठि**को व्यन्तरो ननु । काञ्च्यां पुर्यां सुतः **सोमो, रुद्रदत्त**स्य चाभवत् ॥३६०॥
एकस्मिन् हायने जाते, तस्य माता मृता किल । ततः स दुःखितो बालोऽभवत्स्तन्याद्यभावतः ॥३६१॥
यतः –
बालस्स माइमरणं, भज्जामरणं जुव्वणसमयंमि । थेरस्स पुत्तमरणं, तिन्निवि गुरूआइं दुक्खाइं ॥३६२॥
पञ्चमे हायने जाते, पितापि मृतिमीयिवान् । निराधारस्ततः प्रातिवेश्मिकौकसि संस्थितः ॥३६३॥
प्रातिवेश्मिकवीरस्य, देवपूजाविधायिनः । गृहे तिष्ठन् ववृधे स, रमते तत्सुतैः सह ॥३६४॥
**सोमो** देवगृहे गच्छन्, खाद्यं देवस्य सन्ततम् । आदाऽन्येद्युर्धनं देवसत्कं लात्वाऽनशत्स च ॥३६५॥
**सोमो** गच्छन्वने चौरै-र्मुषितोऽर्हद्धनं च तत् । गृहीतोऽब्धितटे तैश्च, विक्रीतो म्लेच्छसन्निधौ ॥३६६॥
तं पारसिकदेशे च, **सोमं** नीत्वाऽब्धिवर्त्मना । विचिक्रियुर्नृणां पारसिकानां सन्निधौ धनात् ॥३६७॥
पोषयित्वा वराहारैर्मत्तं चक्रुश्च ते तकम् । छेदं छेदं तदङ्गं च, कर्षयन्ति स्म शोणितम् ॥३६८॥
शोणितैः पट्टसूत्रं तु, रङ्गयन्ति स्म ते सदा । एवं **सोमो** महादुःखं, सेहे श्वभ्राधिकं तदा ॥३६९॥
एकदावसरं प्राप्य, **सोमो** नष्टस्तदालयात् । चटित्वा वहने वार्द्धिमुत्ततार शुभोदयात् ॥३७०॥
ततः **सोमस्य** मार्गे तु, गच्छतो विपिनेऽन्यदा । **वीरः** कौटुम्बिकोऽकस्मान्मिलितस्तौ तु मोदितौ ॥३७१॥
मार्गे सम्मुखमायातं, यतिमेकं निरीक्ष्य तौ । हन्तुकामौ शये यष्टिं, दृढं जगृहतुः खलु ॥३७२॥
आदौ **वीरो** यतिं यष्ट्या, जघान कर्कशं दृढम् । ततः **सोमो**ऽपि तं यष्ट्या, ताडयामास निर्दयम् ॥३७३॥
पतितं भूतलेऽकस्मात्तदा साधुं निरीक्ष्य तौ । नश्यन्तौ भूपतेर्भृत्यैस्तत्र किञ्चिद् विलोकितौ ॥३७४॥

ताभ्यां साधुं हतं ज्ञात्वा, राज्ञोक्तं पापिनावमू । हन्येतां चौरदण्डेन, नीत्वा प्रेतवने द्रुतम् ॥३७५॥
हन्यमानौ च तौ साधूपासकैर्मोचितौ नृपात् । उक्तं चात: परं पापं, नेदृक्कार्यं कदाचन ॥३७६॥
यत: –
यति-गो-बाल-वामाक्षी-विप्र-तीर्थादिहत्यया । नरकादौ सहन्ते स्म, चिरं तीव्रतमां व्यथाम् ॥३७७॥
गच्छन्तौ कानने दावाग्निना दग्धौ मृतौ च तौ । सप्तमं नरकं यातौ, यतिहत्यातमोभरात् ॥३७८॥
स **वीरो** नरके दु:खं, भुक्त्वा **भीमपुरे** वरे । श्वानोऽभूत्क्रूरकर्मा तु, तत: श्वभ्रं ययौ पुन: ॥३७९॥
**वीर**जीवश्चिरं कालं, भ्रामं भ्रामं भवान् बहून् । यतिहत्याऽघत: सेहे, प्राणान्तकारिणीं व्यथाम् ॥३८०॥
**नागगोष्ठि**कजीवोऽथ, **सोमो** नरकनिर्गत: । श्वानोऽभूच्**चन्दनापुर्यां**, देवद्रव्यादनात्क्रमात् ॥३८१॥
क्रमात्स कीटजग्धोऽभू-त्सेहे च वेदनां भृशम् । ततोऽजनि वने व्याघ्रो, जीवहिंसाकरो भृशम् ॥३८२॥
तत: पारापतो भूत्वा, जीवादनाद् बहून् पुन: । तत: स जम्बुको जात-स्तत: काकोऽभवत्पुन: ॥३८३॥
अकामनिर्जरायोगात्, क्षपन् कर्मततिं क्रमात् । **सोम**जीव: **कलापुर्यां**, वृषभ: प्रवरोऽभवत् ॥३८४॥
शकटं भूरिभारेण, भृत्वा कौटुम्बिकोऽन्यदा । तं वृषं वाहयामास, तीव्रारक्षेपणात्तनौ ॥३८५॥
यत: –
तिरिआ कसंकुसारानिवाय **बहु** बंध मारण सयाइं । न वि इहयं पावंति परत्थजइनिअमीआ हुंति ॥३८६॥
मृत्वा स वृषभोऽकाम-निर्जराकामसङ्गत: । **पद्म**पुर्यामभून्मन्त्री, **पद्म**नामामहीपते: ॥३८७॥
यत: –
संसारबीजभूतानां, कर्मणां जरणादिह । निर्जरा सा स्मृता द्वेधा, सकामाऽकामनिर्जरा ॥३८८॥
ज्ञेया सकामा यमिनामकामा त्वन्यदेहिनाम् । कर्मणां फलवत्पाको, यदुपायात् स्वतोऽपि हि ॥३८९॥
एकदा सचिव: सोऽथापराधे विहिते सति । क्षिप्त्वा कारागृहे मारै-र्विविधैर्मारितो भृशम् ॥३९०॥
यत: –
चारगनिरोह वह बंध रोग धणहरण मरण वसणाइं । मणसंतावो अयसो विग्गो वणयाय माणुस्से ॥३९१॥
चिंतासंतावेहिं अ दारिद्दरुआहिं दुप्पउत्ताहिं । लद्धूण वि माणुस्सं मरंति केई मुनि विन्ना ॥३९२॥
मृत्वा ग्रामेऽम्बरे मन्त्रि-जीव**श्चन्द्रपुरे** क्रमात् । कौटुम्बिकोऽभवद् दु:स्थ:, **कौशिकाह्व**श्च कर्मकृत् ॥३९३॥
स च ग्रामपतेर्गेहे, कुर्वन् कर्म निरन्तरम् । भक्तं च नयते क्षेत्रे, हालिकानां कृते ध्रुवम् ॥३९४॥
एकदा धर्मशालायां, गत: स कर्मक: किल । दानधर्मं शिवश्रीदं, शुश्रावेति कृतादरम् ॥३९५॥
दानेन भूतानि वशीभवन्ति, दानेन वैराण्यपि यान्ति नाशम् ।
परोऽपि बन्धुत्वमुपैति दानात्, दानेन मुक्तिं श्रयते जनो हि ।३९६।
पश्चाद् दत्तं परैर्दत्तं, लभ्यते वा न लभ्यते । स्वहस्तेन च यद् दत्तं, लभ्यते तत्र संशय: ॥३९७॥
**नागगोष्ठि**कजीव: स, **कौशिक:** कर्मकृत् क्रमात् । स्वभागागतमन्नं तु, साधुभ्य: प्रददौ मुदा ॥३९८॥
मृत्वाऽथ **कौशिको** नागगोष्ठिकस्यासुमान् ध्रुवम् । **चन्द्रादित्य**नरेशोऽभूद्द्रवान् वर्यतनुच्छवि: ॥३९९॥
देवद्रव्यादनाद् येन, कुष्ठरोगस्तवागत: । तत्पापं नाधुना यातं, नवीनं किं करोषि भो: ॥४००॥

देवद्रव्यादनोद्भूतमग्रे ते विद्यते तमः । जीवहिंसाकृतं पापं, नवीनमर्ज्यते कथम् ॥४०१॥
पापभीतो नृपः प्राह, योजयित्वा करद्वयम् । प्राग्भवार्जितमेनो मे, कथं यातीति जल्पतम् ॥४०२॥
यतिः प्राह नमस्कारान्, लक्षमेकं विधिं करन् । गणयाऽऽदिजिनेन्द्रौकः, स्फारं च कारयोच्चकैः ॥४०३॥
ततस्तव तनोः कुष्ठं, गमिष्यति नरेश्वर ! । नमस्कारश्रुतेः पापं, याति पूर्वार्जितं यतः ॥४०४॥
यतः –
नवकार इक अक्खर, पावं फेडेइ सत्त अयराणं । पन्नासं च पएण, सागरपणसय समग्गेण ॥४०५॥
जो गणइ लक्खमेगं, पूरेइ विहीइ जिणनमुक्कारं । तित्थयरनामगोअं, सो बंधइ नत्थि संदेहो ॥४०६॥
अट्ठेवय अट्ठसया, अट्ठसहस्सं च अट्ठकोडीओ । जो गिणइ भत्तिजुतो, सो पावइ सासयं ठाणं ॥४०७॥
गणयित्वा नमस्कारान्, लक्षविधिविधानतः । यावत्तस्थौ तनोस्ताव-त्कुष्ठं दूरे समागमत् ॥४०८॥
ततस्तस्य मुनेर्वाणीं, निशम्य मेदिनीपतिः । चिकीर्षुर्जिनपागारं, बभूव विभवव्ययात् ॥४०९॥
तस्मिन् जिनालये कार्यमाण एकः खरो द्रुतम् । नीरं प्रद्वरमार्गेण, नयते मृत्तिकां पुनः ॥४१०॥
प्रातः प्रातः प्रभुं नत्वा, खरं गच्छन्तमादरात् । दृष्ट्वा नृपो जगौ ज्ञानि-पार्श्वे कोऽसौ खरो वरः ॥४११॥
मुनिः प्राहामुना सिंह-भवे समुद्रसोदरात् । अर्कसङ्ख्यसहस्त्राहर्द्दीनारा भक्षिता हठात् ॥४१२॥
ततो भूरिभवान्भ्रान्त्वा, श्वभ्रादिषु पुनः पुनः । सिंहजीवोऽधुना जातः, खरो देवधनादनात् ॥४१३॥
एकादश भवास्त्वस्य, खरस्य खरजातिषु । जाता अतो न भोक्तव्यं, देवद्रव्यं कदाचन ॥४१४॥
देवद्रव्यादनोद्भूतं, पापं जातिस्मृतेरयम् । ज्ञात्वा खरो वहत्येष, मृत्स्नादि जिनसद्मसु ॥४१५॥
मृत्स्नाम्बुनयने देव-गृहे प्रद्वरवर्त्मना । खरो देवधनस्यैव, भक्षितस्य च्छिदे ध्रुवम् ॥४१६॥
ज्ञात्वेति नृपतिः साधो-रास्यात्तस्य खरस्य तु । वारिपानादिना सारां, विशेषाद्विदधे तदा ॥४१७॥
ततः खरो विशेषेण, विज्ञाय प्राग्भवं निजम् । जग्राहानशनं देवद्रव्यादनतमश्छिदे ॥४१८॥
प्रान्ते मृत्वा खरो ग्रामे, **गुडस्थलाभिधे** वरे । पाद्रभः क्षत्रियो भ्रातु-रन्यायकारकोऽभवत् ॥४१९॥
तत्र गोवालहत्यादि, पापं कृत्वा यथा पुनः । निवृत्तोऽभूत्तथा साधो-रास्यात् श्रुतं त्वया पुरा ॥४२०॥
ततो मृत्वा भवान् सिंहजीवो **नाभाक**भूपतिः । बभूव पूर्वसंसारकर्मराजीं क्षिपन् क्रमात् ॥४२१॥
**नागगोष्ठिक**जीवोऽथ, **चन्द्रादित्य**नरेश्वरः । मृत्वाऽयमभवद्देवो, भवतस्तूपकारकृत् ॥४२२॥
एवं सीमन्धरात्तस्य, मुखान्**नाभाक**भूपतिः । देवद्रव्यादनोद्भूत-पापस्य फलमशृणोत् ॥४२३॥
नत्वा **सीमन्धरं** देवं, **नाभाक**भूपतिर्मुदा । सान्निध्यात्तस्य देवस्य, **शत्रुञ्जये** समागमत् ॥४२४॥
तत्र कोटिमितं द्रव्यं, व्ययितं भावतस्तदा । देवद्रव्यादनोद्भूत-पापच्छेदाय तेन च ॥४२५॥
नत्वाऽऽदिमं जिनं तत्र, पूजयित्वा सुमैर्वरैः । देवयुक्तः पुरे स्वीये, समागात्सुमहोत्सवम् ॥४२६॥
तस्य देवस्य सान्निध्यात्, **नाभाक**नृपतिस्तदा । त्रिखण्डां मेदिनीं चक्रे, स्ववशां वैरिनिर्जयात् ॥४२७॥
विभूषणानि देवानां, कारयामास भूपतिः । देवपूजाकृते ग्रामान्, मुमोच च वरांस्तदा ॥४२८॥
पुनः पुनर्महातीर्थे, गत्वा **नाभाक**भूपतिः । पूजास्नात्र-विधानेन, स्वं धनं सफलं व्यधात् ॥४२९॥
अनृणां पृथिवीं कृत्वा, भूरिद्रव्यार्पणाज्जने । वर्षं नाभाकनाम्ना तु, प्रावर्तत स भूपतिः ॥४३०॥

गुरोः पार्श्वे सदा धर्मं, शृण्वन् देशेऽखिले निजे । अमार्युद्घोषणां भूपः, कारयामास मोदतः ॥४३१॥
खण्डत्रयेऽथ भूपालो, **नाभाको** बहुधनव्ययात् । ग्रामे ग्रामे जिनागार-श्रेणीं पृथ्वीमकारयत् ॥४३२॥
प्रासादेषु ततस्तेषु, छत्र-चामर-घण्टिकाः । अमुचन्नृपतिः स्वामि-पूजाहेतोः पृथक् पृथक् ॥४३३॥
ऊर्द्ध्वं जिनौकसां हेम-दण्डा हेमघटान्विताः । सध्वजा दापिताः पुण्य-हेतो**र्नाभाक**भूभुजा ॥४३४॥
तेषु तेषु जिनौकस्सु, मङ्गलारात्रिके उभे । सन्ध्याद्वये महीपालो, **नाभाको**ऽकारयत्सदा ॥४३५॥
दीपमालां नृपो नित्यं, जिनानामग्रतः सदा । कारयन् निर्वृतेर्यान-योग्यं पुण्यं समर्जयत् ॥४३६॥
**युगन्धरगुरोः** पाद-वन्दनं विदधन्नृपः । अर्जयामास कल्याण-गतियोग्यं वृषं बहु ॥४३७॥
अर्हतां प्रतिमालक्षा-ष्टकमश्ममयं वरम् । रैमयीः प्रतिमा भारमिताः शतत्रयी पुनः ॥४३८॥
राजतीप्रतिमा भारमिता अष्टशती वरा । कारयन्नृपतिश्चक्रे, निर्मलं स्वं मनस्तदा ॥४३९॥ युग्मम् ॥
सुप्रवालमयी सार्वप्रतिमा द्वादशायुतम् । कारयामास भूपालः, स्वस्य कल्याण-हेतवे ॥४४०॥
देवद्रव्यादनोद्भूत-पापानां पिष्टयेऽर्हताम् । प्रासादान् षोडश प्रौढान्, कारयामास भूपतिः ॥४४१॥
द्वासप्ततिर्वरा देव-कुलिका भूमिभूषकाः । प्रासादेषु जिनेन्द्राणां, तेषु तेषु क्षमापतिः ॥४४२॥
एकं देवगृहं वर्यस्फटिकाश्ममयं वरम् । निजौकसोऽग्रतो भूपो-ऽचीकर**दादि**देवयुग् ॥४४३॥
धर्मशालासहस्राणि, बहून्यकारयन्नृपः । सत्रागारसहस्रेषु, दापयामास भोजनम् ॥४४४॥
स्वर्णरूप्यमयैर्वर्णैः, सर्वसिद्धान्तपुस्तकान् । लेखयामास मोदेन, भूपो भूरिधनव्ययात् ॥४४५॥
वर्षं वर्षं प्रति क्ष्मापः, सुसाधर्मिकवत्सलैः । अष्टभिर्जेमयामास, जनान् साधर्मिकान् बहून् ॥४४६॥
सङ्घपूजाष्टकं श्रीमद्-गुरूणां प्रतिहायनम् । चकार भूपतिर्वर्य-भूरिवस्त्रप्रदानतः ॥४४७॥
जघन्यतो वरश्राद्ध-शतत्रयसमन्वितः । विदधेभोजनं भूपो, वर्याहारप्रदानतः ॥४४८॥
एवं धर्मं नृपः कुर्वन्, विहिताराधनाक्रमः । स्वपुत्रं स्वपदे न्यस्य, जग्राहानशनं क्रमात् ॥४४९॥
प्रपाल्यानशनं सम्यग्, वर्यध्यानपरायणः । **नाभाक**क्षितिभुक् स्वर्गेऽच्युते जगाम सत्वरम् ॥४५०॥
ततश्च्युतः स **नाभाक**भूपदेवः शुभोदयात् । सम्प्राप्य मानुषं जन्म, मुक्तिमासादयिष्यति ॥४५१॥

**॥ सिंहजीवसम्बन्धः ॥**

**नागगोष्ठिक**जीवोऽपि, सम्प्राप्य मानुषं जनुः । सप्ताष्टभवमध्ये तु, गमिष्यति महोदयम् ॥४५२॥
योऽत्र **शत्रुञ्जये** तीर्थे, समेत्य भव्यभावतः । प्रभोः पूजां करोति स्म, स याति परमं पदम् ॥४५३॥
यत उक्तम् —
नमस्कारसमो मन्त्रः, शत्रुञ्जयसमो गिरिः । गजेन्द्रपदजं नीरं, निर्द्वन्द्वं भुवनत्रये ॥४५४॥
कृत्वा पापसहस्राणि, हत्वा जन्तुशतानि च । इदं तीर्थं समाराध्य, तिर्यञ्चोऽपि दिवं गताः ॥४५५॥
स्पृष्ट्वा शत्रुञ्जयं तीर्थं, नत्वा रैवतकाचलम् । स्नात्वा गजपदे कुण्डे, पुनर्जन्म न विद्यते ॥४५६॥
पल्योपमसहस्रं तु, ध्यानाल्लक्षमभिग्रहात् । दुष्कर्म क्षीयते मार्गे, सागरोपमसञ्चितम् ॥४५७॥
पञ्चाशद् योजने मुक्ति-दर्शनस्पर्शनादपि । गमिष्यन्ति जना मुक्तिं, याता यान्ति न संशयम् ॥४५८॥

आरम्भाणां निवृत्तिर्द्रविणसफलता, सङ्घवात्सल्यमुच्चै-नैर्मल्यं दर्शनस्य प्रणयिजनहितं, जीर्णचैत्यादिकृत्यम् ।
तीर्थौन्नत्यं जिनवचन-कृतिस्तीर्थसत्कर्मसत्कं, सिद्धेरासन्नभावः सुरनर-पदवी-तीर्थयात्राफलानि ॥४५९॥
नउकारसिपोरिसिएपुरिमड्ढेगासणं च आयामं । तिगरणसुद्धो अ लहइ सित्तुंजं संभरंतो अ ॥४६०॥
छट्ठट्ठदसमदुवालसाइं, मासद्धमास खमणाइं । तिगरणसुद्धो लहई, सत्तुंजं संभरंतो अ ॥४६१॥
एअं जम्मफलं सारं, विहवस्स इत्तिअं चेय । जं अच्चिज्जइ गंतुं, सित्तुंजे रिसहतित्थयरो ॥४६२॥
छट्ठेणं भत्तेणं अपाणएणं तु सत्तजत्ताण । जो कुणइ सित्तुंजे, सो तईअभवे लहइ सिद्धिं ॥४६३॥
नवि तं सुवन्नभूमीभूसणदाणेण अन्नतित्थेसु । जं पावइ पुन्नफलं पूआ न्हवणेण सित्तुंजे ॥४६४॥
श्रुत्वेति देशनां भावात्, प्रभोररस्य सन्निधौ । भिमभूपो ललौ श्राद्ध-धर्मं सम्यक्त्वसंयुतम् ॥४६५॥
**भीम**भूमीपतिः कृत्वाऽञ्जलिं प्राह जिनं प्रति । एका यात्रा मया कार्या, हायनं हायनं प्रति ॥४६६॥
वर्षमध्ये मया साधर्मिकवात्सलपञ्चकम् । सङ्घपूजायुतं कार्यं, कल्याणसात-हेतवे ॥४६७॥
वर्षं प्रति जिनाधीश-प्रासादपञ्चविंशतिः । भूरिलक्ष्मीव्ययात्कारयितव्या बिम्बसंयुता ॥४६८॥
वर्तमानाखिलग्रन्था, लिखाप्या मयका पुनः । दीनादिभ्यः सदा देयं, दानं वदनमार्गितम् ॥४६९॥
इत्यादि भूरिशो लात्वाऽभिग्रहान् **भीम**भूपतिः । **श्रीयुगादि**जिनं नत्वा, स्वपुर्यां समुपेयिवान् ॥४७०॥
भृगुकच्छपुराधीश**भीमाभिध**महीपतिः । **अरस्य** देशनां श्रुत्वा, जैनं धर्ममवाप्तवान् ॥४७१॥

**इति तपागच्छाधिराज-श्री-लक्ष्मीसागरसूरि-शिष्य-**
**पं.शुभशीलगणि-विरचिते श्रीअरजिनेशचरित्रे भृगुकच्छपुरगमन-तदर्पित-भीमभूपधर्मोपदेशश्रवणधर्माङ्गीकारादि-रोचिते**

**अष्टमः सर्गः समाप्तः ।**

● ● ●

**योगसार - द्वितीयः प्रस्तावः**

**तत्त्वसारोपदेशकः**

सुकरं मलधारित्वं, सुकरं दुस्तपं तपः ।
सुकरोऽक्षनिरोधश्च, दुष्करं चित्तशोधनम् ॥ ३० ॥
पापबुद्धया भवेत् पापं, को मुग्धोऽपि न वेत्त्यदः ।
धर्मबुद्ध्या तु यत् पापं, तच्चिन्त्यं निपुणैर्बुधैः ॥ ३१ ॥
अणुमात्रा अपि गुणा, दृश्यन्ते स्वधियात्मनि ।
दोषास्तु पर्वतस्थूला, अपि नैव कथंचन ॥ ३२ ॥

## ॥ नवमः सर्गः ॥

ततः श्री**अर**तीर्थेशो, बोधयन् भविनो बहून् । **हस्तिनाग**पुरोद्याने, मनोज्ञे समवासरत् ॥१॥
प्रभोरागमनं श्रुत्वो-द्यानपालाननात्तदा । **पद्मसेनो** नृपस्तस्मै, ददौ स्वं पारितोषिकम् ॥२॥
ततः सारपरीवारो, धर्मं श्रोतुं जिनान्तिके । यदा ययौ तदा स्वामी, दिदेश धर्मदेशनाम् ॥३॥
**प्रजापालनृपे**णेव, परीक्ष्य धर्म आर्हतः । अपुनर्भवसौख्याय, ग्रहीतव्यो जनेन तु ॥४॥
*तथाहि* –
अत्रैव **भरत**क्षेत्रे, **श्रीपुरे** नगरे वरे । भूपालोऽभूत्**प्रजापाला**भिधो दानी धनी नयी ॥५॥
चार्वाकमतसंसेवी, पुण्यापुण्यादिकं मनाक् । मन्यते न हि संसार-सातं भुङ्क्ते स्म साम्प्रतम् ॥६॥
तस्यामात्योऽभवद्**धर्मबुद्धि**र्बुद्धिमहोदधिः । जीवाजीवादितत्त्वानि, जानाति स्म जिनार्चकः ॥७॥
यतः –
जीवाजीवापुण्णपापाऽऽसवसंवरनिज्जरा । बंधमुक्खो अ तहा नव तत्ता हुंति नायव्वा ॥८॥

॥ **इत्यादितत्त्वविस्तारोऽत्र ज्ञेयः** ॥

तस्य **प्रीतिमती** पत्नी, बभूव शीलशालिनी । जिनेन्द्रक्रमणैः शश्वदर्चयामास सत्सुमैः ॥९॥
श्रुत्वा धर्मं गुरूपान्ते, सम्यक्त्वं मुक्तिशर्मदम् । जग्राह मन्त्रिराट् सर्व-कुटुम्बसहितो ध्रुवम् ॥१०॥
एकदा पुण्यपापादि-विचारं भूप-मन्त्रिणोः । कुर्वाणयोः सतोर्भूपः, प्राहेति मन्त्रिणं प्रति ॥११॥
पुण्यपापे न विद्येते, बन्धमोक्षावपि ध्रुवम् । नेहलोकोऽस्ति नैवास्ति, परलोकोऽपि धीसख ! ॥१२॥
उक्तं च –
लोकायिता वदन्त्येवं, नास्ति जीवो न निर्वृतिः । धर्माधर्मौ न विद्येते, न फलं पुण्यपापयोः ॥१३॥

॥ **इत्यादि नास्तिकमतम्** ॥

मन्त्र्याचष्ट यदुच्येत, स्वामिना वचनं किल । रोच्यमानमरोच्यं वा, मन्यते सेवकेन तत् ॥१४॥
तथापि प्रोच्यते किञ्चित्, मयेति स्वामिनः पुरः । भावात् स्वाम्यनुगोऽहं तु, धर्माधर्मफलं ह्यदः ॥१५॥
यतः –
केऽपि सहस्रंभरयो, लक्षंभरयश्च केऽपि केऽपि नराः । नात्मंभरयः केचित्, फलमेतत्सुकृतदुष्कृतयोः ॥१६॥
नृपः प्रोवाच यद्येवं, मन्यसे त्वं तदा ह्यतः । देशादन्यत्र गत्वा च, प्रियमानय सत्वरम् ॥१७॥
न गन्तव्यं गृहे कोऽपि, कार्यो भृत्यः सखा त्वया । न लातव्यं धनं किञ्चित्, स्तोकं चापि निजालयात् ॥१८॥
एवं ते गच्छतो दूर-देशे यदि रमां बहु । सम्पत्स्यते तदा धर्म-सत्ताऽस्ति सचिवेश्वर ! ॥१९॥
इत्याकर्ण्य नृपप्रोक्तं, मन्त्री बाहुसखा पुनः । मुत्कलाप्य नृपं दूर-देशं प्रत्यचलत्ततः ॥२०॥
स्मरन् पञ्चनमस्कारान्, पश्यन् ग्रामपुरादिकम् । मन्त्री अयादरण्यानीं, महतीं श्वापदाकुलाम् ॥२१॥
तत्राकस्मात्स मन्त्रीशो, बुभुक्षितेन रक्षसा । दृष्टः प्रोक्तश्च लग्ना क्षुद्, भृशं प्राणापहारकृत् ॥२२॥

मम भाग्योदयादत्र, भवान् समागतः पुनः । भवन्तं कवलीकृत्या-ऽऽशितं भवामि सत्वरम् ॥२३॥
योग्यं यद् यस्य जायेत, दूरेऽपि जगतीतले । तत्तस्मै घटयत्येव, दूरादपि विधिः खलु ॥२४॥
यतः –
योऽस्ति ते निर्जरः स्वामी, स्मर्यतां स्मर्यतां स च । मन्त्र्याह श्रीयुगादीशः, शरणं मरणेऽपि मे ॥२५॥
अत्रासन्नं युगादीश-प्रासादो विद्यते पृथुः । तत्र गत्वा युगादीशं, नत्वाऽत्रैष्यामि सत्वरम् ॥२६॥
ततो यद्रोचते ते च, भक्षणीयस्ततोऽहकम् । अथवा साम्प्रतं सद्यो, मां भक्षयाशितंभवः ॥२७॥
यदि मे नरदेहेन, भ्रियते चोदरं तव । तदा जन्म ममेदानीं, त्वद्दानात्सफलं भवेत् ॥२८॥
ततोऽवग् राक्षसस्तुष्टो-ऽस्म्यहं गच्छोपकारकृत् । नत्वा देवं त्वयाऽऽगम्यं, तृप्तये वपुषो मम ॥२९॥
ततो राक्षसमापृच्छ्य, गत्वाऽऽद्यार्हन्निकेतने । मन्त्री नत्वा प्रभुं भक्त्या, स्तवनैरस्तवीदिति ॥३०॥

॥ **अत्र स्तुतिर्वाच्या** ॥

मन्त्रिणः स्तवनैर्वर्यै-स्तुष्टोऽधिष्ठायकः सुरः । दत्वा कामघटं प्राह, भृत्योऽहं **वृषभार्ह**तः ॥३१॥
प्रपूज्याऽमुं घटं भोज्यं, याचनीयं त्वयाऽपि यत् । यथेष्टं रोच्यमानं ते, भोजनं तच्च दास्यति ॥३२॥
प्रणम्या**ऽऽदि**जिनं कामघटमादाय सत्वरम् । आयास्तद्दत्तभोज्येन, मन्त्र्यासीदाशितंभवः ॥३३॥
ततो मन्त्री चलन् रक्षःसन्निधावेत्य सत्वरम् । अर्हन्नत्यादिसम्बन्धं, सर्वं निर्भय ऊचिवान् ॥३४॥
तस्य सत्त्वं निरीक्ष्याऽवग्, राक्षसो यष्टिरेकका । सप्रभावाऽस्ति मे पार्श्वे, सद्यः शात्रवहन्तृका ॥३५॥
त्वमेनां यष्टिकां लाहि, कामकुम्भं प्रदेहि मे । अहं कामघटात्प्राप्य, भोज्यं तृप्तो भवामि च ॥३६॥
ततो मुक्तो मया त्वां तु, सुखीभव चिरं नर ! । मन्त्र्याचष्ट मया दत्तो, घटो न स्थास्यते चिरम् ॥३७॥
राक्षसः प्रोक्तवान् देहि, मह्यं कामघटं द्रुतम् । करिष्येऽहं तथा नैव, यथा यास्यति मे शयात् ॥३८॥
ततः कामघटं मन्त्री राक्षसाय ददौ द्रुतम् । राक्षसोऽपि च दत्ते, यष्टिं तां मन्त्रिणे तदा ॥३९॥
लात्वा यष्टिं स मन्त्रीशो, देशवीक्षणहेतवे । चलन् भीमवने यष्टिपार्श्वे भोज्यमयाचत ॥४०॥
यष्टिकाऽऽह गते घस्रे, कथं भोज्यं कृतं त्वया । मन्त्र्याहादायि मे कामघटेन भोजनं द्रुतम् ॥४१॥
स च कामघटो रक्षः-सन्निधौ विद्यतेऽधुना । यष्टिः प्राहैति सोऽत्रैव, तदा भोज्यं भवेत्तव ॥४२॥
मन्त्री प्राह कथं सोऽत्र, कामकुम्भः समेष्यति । यष्टिस्तत्र समेत्य स्राग्, कामकुम्भं समानयत् ॥४३॥
ततः कामघटोपान्तात्, पूर्ववत्प्राप्य भोजनम् । तृप्तोऽजनि स मन्त्रीशः, पूर्वपुण्योदयात्तदा ॥४४॥
यष्टि-कामघटौ लात्वा, मन्त्री मार्गेऽचलत्ततः । सङ्घमायातं वीक्ष्याऽवक्, कुतः सङ्घोऽयमागतः ॥४५॥
सङ्घलोका जगुः **शत्रुञ्जये** तीर्थे शिवप्रदे । श्री**युगादि**जिनाधीशं, नत्वाऽयं चलितस्ततः ॥४६॥
मन्त्री दध्यावयं सङ्घो, जेम्यते यदि साम्प्रतम् । तदा मे सफलं जन्म, जायते भवकोटिषु ॥४७॥
स्वाधीनः कामकुम्भोऽस्ति, सर्वभोज्यप्रदो मम । अतः सङ्घस्य भक्तादिदा-नाद्भक्तिं करोम्यहम् ॥४८॥
धने सत्यपि नो येन, दानधर्मोऽर्जितो ध्रुवम् । तेनैव हारितं जन्म, प्राप्तं भवशतैरपि ॥४९॥
विमृश्येति स मन्त्रीशो, यात्वा सङ्घेशसन्निधौ । प्रोवाच मम वाञ्छाऽस्ति, सङ्घभोजनदापने ॥५०॥
सङ्घेशेनोदितं त्वं तु, दृश्यसे एककोऽत्र हि । सङ्घः कथमिव भूरि-र्भोज्यते भवता वद ॥५१॥

मन्त्री जगौ न कर्तव्यो, विचारः सङ्घप ! त्वया । करिष्येऽहं तथा सर्वः, सङ्घो भुक्तो यथा भवेत् ॥५२॥
मानिते सङ्घनाथेन, मन्त्री स्वस्थानके ययौ । क्रमाद् भोजनवेलायां, जातायां मनुजा जगुः ॥५३॥
एष धूर्तो निमन्त्र्यैव, सङ्घभोजनहेतवे । निश्चिन्त उपविष्टोऽस्ति, सङ्घं हनिष्यति क्षुधा ॥५४॥
सकाल एव ये कुर्यु-र्भोजनं ते मृता ध्रुवम् । अथापि सर्वसङ्घस्य, भावी तीर्थोपवस्त्रकः ॥५५॥
जल्पं जल्पमिति प्रोच्चैर्भोज्यनिष्पत्तिज्ञप्तये । मन्त्र्यन्ते प्रेषितः पश्चादेत्येति मनुजो जगौ ॥५६॥
क्रियतां क्रियतां भोज्य-सामग्री सकलैर्जनैः । नो चेत्प्राणाः करिष्यन्ति, परलोकप्रयाणकम् ॥५७॥
तथापि सचिवः सोऽपि, सुप्तो निश्चिन्त एव तु । न मन्यते वचः कस्य, पुंसो बहु प्रजल्पितम् ॥५८॥
इतः कामघटोपान्ते, गदितं मन्त्रिणा त्विति । अधुना भोजनीयोऽयं, सङ्घः सर्वस्त्वया द्रुतम् ॥५९॥
कामकुम्भो जगौ मन्त्रिन् !, चिन्ता कार्या त्वया नहि । आनय त्वं समं सङ्घं, भोजयिष्याम्यहं द्रुतम् ॥६०॥
उद्यमं रन्धितुं धान्यं, यावत्कुर्वन्ति ते जनाः । तावदेत्य स मन्त्रीशः, प्रोवाचोत्थीयतां जनैः ॥६०॥
ततः सङ्घपतिर्यावदुत्थितो भूरिसङ्घयुक् । तावद्विलोकते सप्त-भौमं गेहं ततोऽग्रगम् ॥६१॥
यावन्मध्येगृहं सङ्घनायकः प्राविशत्क्रमात् । तावद्भाजनपङ्क्तीश्च, मण्डिता दृष्ट्वान् पृथु ॥६२॥
ततो नीरे समायाते, प्रक्षाल्य चरणौ द्रुतम् । सङ्घ उपाविशत्पङ्क्तौ, भोक्तुं स्थाने यथोचिते ॥६३॥
तदा रसवती या या, वीक्ष्यते स्म यदा यदा । तदा तदा समायाता, सङ्घस्य भक्तिहेतवे ॥६४॥
भोजनान्ते तु कर्पूरवासिनीरे समागते । आचमनं ललुस्ते तु, हृष्टाः सङ्घजनाः समम् ॥६५॥
ततः सङ्घपतिं मन्त्रिनाथो न्यस्य वरासने । वर्यताम्बूलदानेन, प्रीणयामास सादरम् ॥६६॥
सङ्घेशोऽवक् कथं मन्त्रिन् !, सङ्घोऽयं भोजितस्त्वया । मन्त्री कामघटप्राप्ति-स्वरूपं प्रोक्तवांस्ततः ॥६७॥
ततः सङ्घपतिः प्राह, ममास्ति चामरद्वयी । सर्वरोगभिदा सर्वक्ष्वेडादिदोषहारिणी ॥६८॥
तां त्वं गृहाण मह्यं तु, देहि कामघटं द्रुतम् । ततः सङ्घः सुखेनैव, भुङ्क्ते पुण्यमतस्तव ॥६९॥
मन्त्र्यवग् न तवोपान्ते स्थाता कामघटश्चिरम् । सङ्घपोऽवक् प्रदेहि त्वं, रक्षिष्यामि बलाद् घटम् ॥७०॥
आग्रहे विहिते सङ्घपतिना चामरद्वयीम् । लात्वा कामघटं तस्मै, दत्त्वा मन्त्री ततोऽचलत् ॥७१॥
भोजनावसरे पूर्ववदेव यष्टिकाबलात् । पार्श्वात्सङ्घपतेः कामघटं मन्त्र्यन्तकेऽनयत् ॥७२॥
यतः —
कामकुम्भादिकं वस्तुत्रिकं वरप्रभावभृत् । प्राप्य पुण्योदयान्मन्त्री, स्वपुरीपार्श्वमागमत् ॥७३॥
इतो मन्त्रीश्वरे जाते, दूरं भूपोऽखिलं धनम् । मन्त्रिणः सद्मतो नीत्वा, स्वकोशेऽस्थापयद् हठात् ॥७४॥
पुनर्धर्मपरीक्षार्थं, रत्नद्वितयमर्पितम् । मोदकद्वयमर्पित्वा, स्वभृत्यायावदन्नृपः ॥७५॥
विक्रेतव्यं त्वया मूल्यात्, पुरीमध्ये त्विदं द्रुतम् । हस्ते पुण्यवतः पुंसश्चटिष्यति वृषोदयात् ॥७६॥
भूपभृत्योऽद्य विक्रीयाऽऽपणे तन्मोदकद्वयम् । यावद् गतस्तदा मन्त्री, निजावासं समीयिवान् ॥७७॥
आयाते सचिवे मन्त्रिपत्नी गत्वापणे द्रुतम् । आनेतुं भोजनायाथ, मोदकाद्यं मनोहरम् ॥७८॥
तदेव मोदकद्वन्द्वमानीय मन्त्रिगेहिनी । भोक्तुं मुमोच कान्तस्य, भाजने प्रथमं द्रुतम् ॥७९॥
मन्त्री भनक्ति यावत्तत्, तावदत्र मणिद्वयम् । सपादलक्षमूल्यं च, दृष्ट्वा मन्त्री जगौ प्रियाम् ॥८०॥
एवंविधौ कुतो नीतौ, मोदकौ साम्प्रतं त्वया ? । मोदकानयनोदन्ते, पत्न्योक्ते प्राह धीसखः ॥८१॥

इदानीं संयतद्वन्द्वं, यथायाति तदा द्रुतम् । तस्मै मोदकयुग्मं तु, दास्येऽहं पुण्यहेतवे ॥८२॥
तदाकस्मात्समायाते, साधवे मोदकद्वयम् । वितीर्य भुक्तवान् मन्त्री, कामकुम्भकृतादनात् ॥८३॥
ततः कामघटोपान्तात्, जिमन् रसवतीं वराम् । मन्त्रीशः कारयामास, नृत्तं नर्तकपार्श्वतः ॥८४॥
रात्रौ मन्त्रिगृहे नृत्यं, जायमानं वरं सदा । श्रुत्वाऽपृच्छन्नृपो भृत्यान्, श्रूयते कुत्र नर्तनम् ? ॥८५॥
भृत्या जगुरिदं नृत्तं, मन्त्रिगेहे प्रवर्तते । गत्वाऽथ नृपतिस्तत्रालिलिङ्ग मन्त्रिणम् यदा ॥८६॥
ततो मणिद्वये तस्मिन्, दत्तेऽथ मन्त्रिणा ध्रुवम् । चमत्कृतोऽपि भूपालो, धर्मं न मन्यते स्म सः ॥८७॥
प्रातः कामघटोपान्ताद, भूरिभृत्ययुतं नृपम् । भोजयामास मन्त्रीशो, दिव्याहारप्रदानतः ॥८८॥
पृष्टं भूमीभूजा मन्त्रिन् !, कुतोऽगाद्भोज्यमीदृशम् । कामकुम्भादिसम्प्राप्त्युदन्तं मन्त्रिवृषो जगौ ॥८९॥
दृष्ट्वा पुण्योदयं भूपो, मिथ्यात्वविषघूर्णितः । पूर्वार्जितं वृषं नैव, मन्यते स्म सतामपि ॥९०॥
यतः –
ततो धर्मस्वरूपस्य, स्थापनाय स मन्त्रिराट् । कामकुम्भादिकं भूमीभुजे दत्त्वा जगावदः ॥९१॥
धर्मप्रभावतः प्राप्तं, मया कामघटादिकम् । न मन्यसे त्वयाऽतोऽहं, यामि देशान्तरे पुनः ॥९२॥
पुनः स्थापयितुं पुण्यं, भूपस्य हृदये दृढम् । पत्नीयुतोऽचलन्मन्त्री, निर्द्रव्यो देशवीक्षया ॥९३॥
चलन्साहसिको मन्त्री, गत्वा **रत्नपुरा**न्तिके । बहिर्मुक्त्वा प्रियां पुर्यां, प्रविष्टोऽदनहेतवे ॥९४॥
मन्त्र्यप्राक्षीन्नरं ह्येकं, यो निःस्वोऽत्रैति मानवः । कथं निर्वहते सोऽथ, पुमान् मन्त्रीश्वरं जगौ ॥९५॥
एकः सांयात्रिकोऽत्रैव, भीमो यानं प्रपूरयन् । दुःस्थानां ददते टङ्कशतं निर्वाहहेतवे ॥९६॥
तेन तत्र व्रजाह्वाय, लघु चिचलिषुः स च । ततो मन्त्री ययौ तस्य, पार्श्वे मार्गयितुं धनम् ॥९७॥
कर्मयोगात्स मन्त्रीशः, सांयात्रिकयुतस्तदा । यानपात्रे चटन् वार्तां, कुर्वाणो हर्षदायिनीम् ॥९८॥
सांयात्रिकेन भीमेन, सार्धं प्रीतिं दृढां करन् । मणिद्वीपे ययौ मन्त्री, वर्यरत्नखनीधरे ॥९९॥
तत्र रत्नपुरे **रत्नचूडस्य** मेदिनीपतेः । सांयात्रिकोऽमिलद्वर्यो-पदादानेन सद्दिने ॥१००॥
नियोज्य मन्त्रिणं वस्तु-क्रयविक्रयकर्मणि । सांयात्रिकोऽभवत्कामसेनावेश्यावशंवदः ॥१०१॥
मन्त्रीश्वरस्तदा कुर्वन्, वस्तूनां क्रयविक्रये । प्रेषयामास द्रव्यं तु, बहु सांयात्रिकान्तिके ॥१०२॥
मन्त्री वेश्यागृहे नीचगेहत्वान्न कदाचन । याति स्वोत्तारके तिष्ठन्, धर्मं चक्रे दयामयम् ॥१०३॥
कुलीनश्चतुरश्चारुगुणै रूपजितस्मरः । चक्रे पुण्यवतां सङ्गं, न नीचमानवादिषु ॥१०४॥
एवंविधगुणं मन्त्रिमुख्यं श्रुत्वा पणाङ्गना । दध्यौ तथा करिष्येऽहं, यथाऽऽयाति ममालये ॥१०५॥
छलं कृत्वाऽन्यदा मन्त्रिपार्श्वे तं मन्त्रिणं द्रुतम् । आनीय हावभावादि, चक्रे वेश्या कटाक्षितैः ॥१०६॥
अध्यायि मन्त्रिणा धिग् धिग्, मामेव मूर्खशेखरम् । यतस्तया कृतं छद्म, न ज्ञातं दुर्धिया मया ॥१०७॥
ततो वेश्यां प्रति प्राह, मन्त्री स्यां निर्धनोऽहकम् । भवादृशां विलोक्येत, धनं स्वजीविकाकृते ॥१०८॥
श्रुत्वेति वेश्यया त्यक्तो, मन्त्री स्वोत्तारके ततः । आगत्य विदधे धर्मकृत्यानि शिवशर्मणे ॥१०९॥
एवं कियत्सु घस्रेषु, गतेषु तत्र पत्तने । खन्यमाने तटाकेऽथ, निर्ययौ बीजपत्रकम् ॥११०॥
तद्बीजपत्रकं कोऽपि, बुधो नावीवचत् यदा । तदा खिन्नो नृपो मध्येपुरं चाज्ञापयज्जनान् ॥१११॥

पत्रं वाचयते यस्तु, स्वर्णकोटियुतां सुताम् । तस्मै दास्यति भूपालो, वाद्यते पटहस्त्विति ॥११२॥
स्थाने स्थाने पुरीमध्ये, वादितः पटहो यदा । न स्पृष्टः केन पुंसा च, पस्पृशे मन्त्रिणा तदा ॥११३॥
बीजपत्रं तदा मन्त्री, वाचयित्वेत्यवग् नृपम् । खान्यते यत्सरो देवपादैः सम्प्रति सुन्दरम् ॥११४॥
तस्योत्तरककुब्भागाद्, हस्ताष्टकगते सति । अधस्तात्खन्यतां भूमिं, सप्तहस्तप्रमाणतः ॥११५॥
तत्रास्ति रैमयं गेहं, सप्तभूमिमनोहरम् । मणिमुक्तासुवर्णादिद्रविणैः पूरितं समम् ॥११६॥
ततो मन्त्र्युदिते स्थाने, मन्त्र्युक्तं रैगृहादिकम् । लब्ध्वा तुष्टो नृपस्तस्मै, स्वोदितं निखिलं ददौ ॥११७॥
भूपालनन्दिनीं स्वर्णकोटियुक्तां स मन्त्रिराट् । परिणीयाभवत्ख्यातः, सर्वत्र पुण्ययोगतः ॥११८॥
अथ श्रेष्ठी स विक्रीय, क्रयाणकानि मूल्यतः । लात्वा तत्रत्यभाण्डानि, बभार वाहनानि तैः ॥११९॥
यियासुः स्वपुरे श्रेष्ठी, चलनोद्घोषणां पुनः । मध्येपुरं व्यधाच्चाथ, सज्जोऽभूत् पथिकव्रजः ॥१२०॥
मुत्कलाप्य नृपं मन्त्री, सप्रियः स्वपुरं प्रति । यियासुरमुचत् सिन्धुतीरे प्रस्थानकं यदा ॥१२१॥
तदा कूटे कृते शुल्के, चौरोऽयं याननायकः । कृत्वेति भूमिभुग्भृत्यैर्बद्धो निबिडबन्धनैः ॥१२२॥
एतज्ज्ञात्वा स मन्त्रीशः, परोपकृतिहेतवे । मोचयामास बोहित्थ-नाथं भूपतिपार्श्वतः ॥१२३॥
अब्धिमार्गे तयोर्मन्त्रिनाथ-बोहित्थनाथयोः । ऋजुकूटहृदोर्घस्रा, ययुश्चतुर्दश क्रमात् ॥१२४॥
श्रेष्ठी दध्यावयं मेऽभूज्जनमात्रोऽतिदुःस्थितः । प्राप्तभूरिरमाराज-कन्यकाकलितोऽधुना ॥१२५॥
क्वाप्येनं विषमे स्थाने, पातयित्वा नृपाङ्गजाम् । श्रीसुन्दरीं रमायुक्तां, ग्रहीष्येऽहं तदा सुखम् ॥१२६॥
रममाणोऽन्यदा यान-तटे मन्त्रियुतो धनी । प्राहेति मन्त्रिणं पश्य, यात्येष त्रिमुखो झषः ॥१२७॥
विलोकयन् स मन्त्रीशो, झषं कौतुकितोऽम्बुधौ । क्षिप्तो बोहित्थनाथेन, रुदितं चेति मायया ॥१२८॥
हा मित्राब्धौ कथं मुक्त्वा, मामेकं ब्रूडितोऽधुना । त्वां विना मम यास्यन्ति, प्राणाः सम्प्रति सत्वरम् ॥१२९॥
इत्यादि विलपन् श्रेष्ठी, परिवारेण बोधितः । तदाऽब्धौ पतितं कान्तं, मत्वा कन्याऽरुदत्तमाम् ॥१३०॥
स्वस्थीकृत्य च तां कन्यां, श्रेष्ठी प्राह रहोऽन्यदा । न राज्यं लभ्यते नैव, रुदितेन कदाचन ॥१३१॥
शुचं मुक्त्वा मया सार्धं, भुङ्क्ष्व भोगान् यथेप्सितम् । **श्रीसुन्दर्या** ततोऽध्यायि, रक्ष्यं शीलं मया निजम् ॥१३२॥
एवं ध्यात्वा तया प्रोचे, नैवं वाच्यं त्वया धनिन् ! । शीलमेव महारत्नं, स्त्रीणां सुगतिहेतुकम् ॥१३३॥
श्रुत्वेति यानपो दध्यावधुनेयं मन्यते नहि । क्रमान्मदुदितं काले, मानयिष्यति कन्यका ॥१३४॥
ध्यायत्वेवं हृदि श्रेष्ठि-मुख्ये यानानि वारिधौ । चलन्ति च गतान्येव, क्रमाद् रत्नपुरान्तिके ॥१३५॥
इतः **प्रीतिमती** मन्त्रिपत्नी पुरबहिःस्थिता । वीक्ष्य कान्ताऽऽगमं पुर्याः, प्रान्ते च वीक्ष्यतेऽभितः ॥१३६॥
अदृष्ट्वा स्वपतिं मासे, याते सा मन्त्रिगेहिनी । यानारूढं पतिं जज्ञौ, गतं द्वीपान्तरे क्वचित् ॥१३७॥
यदा कान्तास्यमैक्ष्येऽहं, कायोत्सर्गस्तदा मया । पारयितव्य इत्येवं, ध्यायन्ती यक्षसद्मनि ॥१३८॥
गत्वा मन्त्रिप्रिया मध्येयक्षगेहं प्रविश्य तु । दत्त्वाऽररे स्थिता कायोत्सर्गे निजाऽऽपदाच्छिदे ॥१३९॥ युग्मम् ॥

**॥ एकपत्नीसम्बन्धः । प्रीतिमती ॥**

प्राभृतं नृपतेः कृत्वोत्तार्य वस्तूनि सद्मनि । श्रेष्ठी मन्त्रिप्रियोपान्ते, याति मानयितुं सदा ॥१४०॥
तावच्छ्रीसुन्दरी पुर्या, बहिरन्यसुरालये । प्रविश्याऽथाररे दत्त्वा-ऽवग् मे पतिर्मिलिष्यति ॥१४१॥
यदा तदा तनूत्सर्गः, पारणीयो मया ध्रुवम् । ततो ध्यानपरा तत्र, तस्थौ **श्रीसुन्दरी** दृढम् ॥१४२॥

॥ इति श्रीसुन्दरीप्रिया ॥

कृते यत्नेऽपि भूयिष्ठे, लोकैस्तयोः सुरौकसोः । द्वाराणि नोद्घटन् सत्यो-स्तयोः शीलप्रभावतः ॥१४३॥
इतोऽम्भोधौ पतन्मन्त्री, मत्स्यपृष्ठौ पपात सः । स झषोऽब्धेस्तटे प्राप्तो, निरगान्मन्त्रिपस्ततः ॥१४४॥
भ्रमंस्ततः पुरं शून्यं, दृष्ट्वा मध्येपुरं क्रमात् । ददर्शोष्ट्रीं सितामेकां, मन्त्री मध्येनृपालयम् ॥१४५॥
श्वेतकृष्णाञ्जनभृतं, कुम्पिकाद्वितयं वरम् । तस्याः पार्श्वे निरीक्ष्याक्ष्णोः, सोऽक्षिपत् कृष्णमञ्जनम् ॥१४६॥
नारीभूता ततः साथ, पृष्टेति मन्त्रिणा तदा । कथं शून्यपुरं ह्येतत्, जातं चेति निगद्यताम् ॥१४७॥
नारी प्राह पुरे **रत्नाकराह्वे**ऽत्र महीपतेः । **शक्तिसिंहस्य** पत्न्यासीत्, **शक्तिमत्य**भिधा सती ॥१४८॥
क्रमात्तयोरभूत्पुत्री, **मदनाह्वा** रतिप्रभा । न्यमन्त्रयन्नृपो भोक्तुं, कुम्भं तापसमन्यदा ॥१४९॥
भुञ्जानस्तापसो भूप-नन्दिनीं **मदना**भिधाम् । कुर्वाणां गौरवं वात-क्षेपाद् दृष्ट्वाऽभवत्स्मरी ॥१५०॥
ततः स तापसः कालमुखः पृष्टो महीभुजा । किं तेऽस्ति हृदये दुःखं, सोऽप्याह नृपतिं रहः ॥१५१॥
देवैषा ते सुता क्ष्वेड-कन्या कुलद्वयापहा । परिणीता सती नूनं, भविष्यति मृतेस्तव ॥१५२॥
अतो मे विद्यते दुःखं, राजन् ! कुलद्वयक्षयात् । यजमानान् विनाऽस्माकं, निर्वाहो नैव दृश्यते ॥१५३॥
राजाऽवक् तापसेदानीं, तथा बुद्धिं प्रदेहि मे । यथा स्याच्छर्म मे पुत्र्या, सार्द्धं मेऽग्रे निवेदय ॥१५४॥
जटी प्रोवाच मञ्जूषा-मध्ये क्षिप्त्वां रहः सुताम् । यदि प्रक्षिप्यते गङ्गा-प्रवाहेऽर्चापुरःसरम् ॥१५५॥
तदा ते च सुतायाश्च, पुण्यं भवति पुष्कलम् । गङ्गायाः पूजनेऽनन्तं, पुण्यं यतो निगद्यते ॥१५६॥
वचोयुक्त्या महीशेन, जटिनो रागवन्मनः । ज्ञातं ततोऽक्षिपद्रिञ्छी-युग्मं रहस्ततोऽनयत् ॥१५७॥
रिञ्छीयुग्मयुतां पेटां, भूपतिर्जटिसंयुतः । गत्वा गङ्गातटे तस्याः, प्रवाहे प्राक्षिपद् द्रुतम् ॥१५८॥
जट्यथ स्वर्नदीकूले-ऽग्रेतने सरलाध्वना । गत्वा तां कर्षयामास, कन्यासम्प्राप्तिहेतवे ॥१५९॥ युग्मम् ॥
पेटामुद्घाटयामास यावत्स तापसो रहः । तावत्ताभ्यां स कवली-चक्रे भक्षणतो द्रुतम् ॥१६०॥
मृत्वा स तापसो जाता, राक्षसी **रमणा**ऽभिधा । भूभुक्कृतापराधं तं, जज्ञाववधितस्ततः ॥१६१॥
राक्षस्याऽथ तया लोको, राजाद्यो दुष्टचेतसा । व्यापादितः कियान् भीतो, नष्टो लोकचयः पुनः ॥१६२॥
रक्षित्वा स्नेहतो मां सा, प्रीणयन्ती सगौरवम् । भाषते प्रत्यहं तेऽहं, दास्ये वर्यवराय तु ॥१६३॥
यदि तुभ्यं न दास्येऽहं, वराय रुचिराय तु । तदा स्यात्सफलो धातुः, प्रयासो विहितो न हि ॥१६४॥
यदा सा राक्षसी तुभ्यं, मां दत्ते च कदाचन । तदा त्वया च वस्तूनि, याच्यान्येतानि निश्चितम् ॥१६५॥
पल्यङ्कः कम्बिकाद्वन्द्वं, मञ्जूषा रत्नपूरिता । एतद्वस्तुचतुष्कं च, याचनीयं त्वया ननु ॥१६६॥
एकया कम्बया स्पृष्टः, पल्यङ्कः खे प्रयात्यरम् । द्वितीययाऽवनौ तिष्ठेत्, स्थिरदेवविमानवत् ॥१६७॥
एवं तया समं वार्तां, कृत्वोष्ट्रीं(च) विधाय सः । प्रच्छन्नस्थानके क्वाऽपि, तस्थौ मन्त्री स्मरन् जिनम् ॥१६८॥
इतस्तत्र समागत्य, राक्षस्यवक् कनीनिके ! । आरोग्यं विद्यते तेऽङ्गे, कन्याऽवक् त्वत्प्रसादतः ॥१६९॥
तस्या विनयसन्तुष्टा, राक्षस्यवक् कनीनिके ! । रोचते यो वरश्चित्ते, तवाहं तं ददाम्यहम् ॥॥१७०॥
कन्यावग् यदि तुष्टाऽसि, मातर्मयि कृपापरे ! । तदा मयेप्सितं मह्यं, वरं प्रसद्य देहि भो ! ॥१७१॥
राक्षस्यवग् वरं वक्षि, यं तं तुभ्यं ददाम्यहम् । सन्देहो न त्वया कार्य-श्चिन्तितं ते भविष्यति ॥१७२॥

कन्याऽऽह यदि तुष्टाऽसि, त्वं मातर्मयि साम्प्रतम् । तदाऽधुना य आयाति, स मह्यं देय एव तु ॥१७३॥
ततः कन्योदितो मन्त्री, प्रादुर्भूतो वरो वरः । परिणिन्ये तया भूप-नन्दिन्या राक्षसीगिरा ॥१७४॥
कन्या सङ्केतितं वस्तु-चतुष्कं शयनादिकम् । मार्गितं मन्त्रिणा तस्मै, राक्षसी प्रददौ मुदा ॥१७५॥
राक्षसी प्राह मन्त्रीश !, यदा स्यात्ते प्रयोजनम् । तदा स्मृताऽप्यहं चैत्य, साहाय्यं ते करोमि तु ॥१७६॥
वस्तुचतुष्टयं दत्तं, राक्षस्या तत्स मन्त्रिराट् । लात्वा पल्यङ्कमारूढः, स्वबालप्रेयसीसखः ॥१७७॥
क्रमाद्**रत्नपुरो**द्याने, प्राप्तस्तत्र प्रियां च ताम् । मुक्त्वा वेषान्तरं कृत्वा, मन्त्री पुर्यन्तरे ययौ ॥१७८॥
पश्यन् पुरस्वरूपं स, भुक्तं चानयितुं वरम् । भ्रमन् मन्त्री गतो रत्नापणश्रेणौ समाहितः ॥१७९॥
इतः पुर्या बहिर्वेश्यापेटकं समुपागतम् । मन्त्रिपत्न्यङ्गमालोक्य, जिगृहीषुर्बभूव तत् ॥१८०॥
मुख्यपण्याङ्गना प्राह, भद्रे ! भद्राशयेऽधुना । मध्येपुरं समागच्छ, विघ्नं तेऽत्र भविष्यति ॥१८१॥
कन्या प्राह पतिर्मे तु, भुक्तमानयितुं द्रुतम् । गतो मध्येपुरं चात्र, समेष्यति पणाङ्गने ! ॥१८२॥
वेश्यावग् रमणस्ते तु, गेहेऽस्माकं स्थितोऽधुना । त्वामाकारयति क्षिप्रं, तेनाऽस्माभिः सहाव्रज ॥१८३॥
इत्यादियुक्तिभिर्वेश्या, विप्रतार्य कनीं च ताम् । वस्तुचतुष्कसंयुक्ता-मनैषीन्निजसद्मनि ॥१८४॥
वेश्याऽऽचष्ट वरं वासः, परिधेहि कुरुष्व भोः । स्वाहारं स्वेच्छया हिण्ड, मध्येपुरं गृहे गृहे ॥१८५॥
इतः कान्तो गतोऽन्यत्र, रुष्टस्तवोपरि ध्रुवम् । भविष्यति न ते दुःखं, तिष्ठन्त्या इह सन्ततम् ॥१८६॥
श्रुत्वेति श्रवसो दुःख-कारकं वचनं तदा । कन्या दध्यावहो कूटपेटेयं पणभामिनी ॥१८७॥
धिगस्तु मां यतो ऽकारि-वचोऽस्या दुष्टचेतसः । लभिष्यते कथं कान्तः, स्फारेऽस्मिन् नगरे ध्रुवम् ॥१८८॥
एवं ध्यात्वा कनी यक्षालये प्रविश्य सत्वरम् । दत्त्वा द्वारं जगौ यावन्मिलिष्यति पतिर्न मे ॥१८९॥
तावन्मया तनूत्सर्गः, पारणीयो मनाग् न हि । इत्युक्त्वा च स्थिता कायोत्सर्गे मन्त्रिप्रिया च सा ॥१९०॥

**॥ इति तृतीया कन्या राक्षसीदत्ता ॥**

अथात्तभोजनो मन्त्री, पुर्या बहिः समागतः । अनीक्ष्य प्रेयसीं द्रष्टुं, स्थाने स्थानेऽभ्रमत्तदा ॥१९१॥
ततः पुण्यपरो मन्त्री, भुक्ताहारो भ्रमन् पुरे । रञ्जयामास तत्रत्यं, भूपं सूक्तकथादिभिः ॥१९२॥
अन्यदा भूपतिः प्राह, यक्षगेहान्तरस्थिताः । कन्याश्चालाप्य यो ह्युद्घाटयिष्यत्वरराणि तु ॥१९३॥
तस्मै राज्यार्धरोचिष्णुं, पुत्रीं **पद्मावतीं** वराम् । दास्येऽहकं ततश्चक्रे, पटहोद्घोषणां पुरे ॥१९४॥
पटहोद्घोषणां श्रुत्वा, मन्त्री भूपजनान्वितः । प्रथमं भूर्गृहद्वारे, गत्वाऽऽचष्ट इति स्फुटम् ॥१९५॥
श्रीपुरात् सचिवो **धर्मबुद्धिः** कामघटादिकम् । उपार्ज्य पुण्यतोऽभ्येत्य, स्वपुरेऽदान्महीभुजे ॥१९६॥
ततः **प्रीतिमती**पत्नी-युतो धर्मं स्मरन् हृदि । **धर्मबुद्धिः** पुरात्तस्मान्निर्ययौ स्थापयन् वृषम् ॥१९७॥
चलन् रत्नपुरोपान्ते, बाह्योद्याने प्रियां च ताम् । मुक्त्वा ऽगान्नगरीमध्ये, भुक्तानयनहेतवे ॥१९८॥
तदाऽकस्मात् बोहित्थे, चटित्वा दूरनीवृति । गत्वाऽत्र नगरे वर्ये, समागात्पुण्ययोगतः ॥१९९॥
तत उद्घटिते द्वारे, पत्नी **प्रीतिमती** तदा । कान्तं दृष्ट्वाऽकरोन्मोदं, मन्त्री पत्नीं पुनस्तथा ॥२००॥

**॥ इति प्रीतिमतीपत्नीप्राप्तिसम्बन्धः प्रथमः ॥**

द्वितीयेऽह्नि पुनर्यक्षालयेऽन्यस्मिन् स मन्त्रिराट् । पुरे **रत्नपुरे** रत्नचूडभूपतिरक्षिते ॥२०१॥

तटाकखनने प्रादुर्भूतं च ताम्रपत्रकम् । वाचयित्वा वरां भूपपुत्रीं च परिणीतवान् ॥२०२॥ युग्मम् ॥
स्वर्णकोटियुतां भूप-पुत्रीमादाय वारिधौ । गच्छन् यानादधस्तात्स, पपात पातकोदयात् ॥२०३॥
मत्स्यपृष्ठसमारूढः, शुभकर्मोदयात्तदा । प्राप्याम्बुधेस्तटं चात्र, नगरे समुपागमत् ॥२०४॥
श्रुत्वेति च तदा कन्या, हृष्टा पत्युः समागमात् । द्वारे उद्घटिते कान्तं, दृष्ट्वा चाभूदधोमुखी ॥२०५॥
तदा **भीमस्य** बोहित्थ-वाहिनो धनिनोऽन्तिकात् । रत्नादिकं धनं सर्वं, जग्राह मन्त्रिपुङ्गवः ॥२०६॥

**॥ इति श्रीसुन्दरीपत्नीप्राप्तिसम्बन्धः द्वितीयः ॥**

तृतीये दिवसे यक्ष-गृहेऽन्यस्मिन् समेत्य सः । प्राह शून्यपुरोदन्त-मुष्ट्रिकावीक्षणादिकम् ॥२०७॥
**शक्तिसिंहस्य** भूपस्य, **मदनां** नन्दिनीं वराम् । विश्राणितां च राक्षस्या, मन्त्री स परिणीतवान् ॥२०८॥
पल्यङ्कं कम्बिकाद्वन्द्वं, मञ्जूषां रत्नपूरिताम् । प्राप्य मन्त्री प्रियायुक्तः, पल्यङ्के न्यविशत्तदा ॥२०९॥
पल्यङ्के व्योमगे मन्त्री, पत्नीयुक्तो निविश्य सः । व्योमाध्वना ययौ रत्नपुरोपान्ते मनोहरे ॥२१०॥
यक्षालये त्रये गर्भगृहस्थितकनीनिके । द्वारे तूद्घटिते जातश्चमत्कारो नृणां तदा ॥

**॥ इति मदनापत्नीप्राप्तिसम्बन्धः तृतीयः ॥**

कन्याचतुष्करोचिष्णुः, स्वर्णकोटिसमन्वितः । मन्त्री समागतो भूमीभुजा तेन श्रुतस्तदा ॥२११॥
इत्यादिबहुभूत्या तं, भूषितं मन्त्रिपुङ्गवम् । श्रुत्वाऽऽयातं पुरोद्याने, समागान्मेदिनीपतिः ॥२१२॥
कन्यकात्रितयं पेटां, वर्यरत्नप्रपूरिताम् । कोटिमितं धनं दृष्ट्वा, चमच्चक्रे नरेश्वरः ॥२१३॥
जायमाने पुरीमध्ये, प्रवेशे रुचिरोत्सवे । मन्त्रिणो विभवं दृष्ट्वा, लोका एवं जगुस्तदा ॥२१४॥
पुण्यप्रभावतः पत्नी-चतुष्कं निर्जरीसमम् । अन्यत्कोटिमितं द्रव्यं, सञ्जातं मन्त्रिणोऽधुना ॥२१५॥
एवं पुर्यां गृहे हट्टे, स्थाने स्थाने पदे पदे । निशम्य भूपतिर्धर्मं, मेने स्वर्गादिसौख्यकृत् ॥२१६॥
धर्मप्रभावतो मन्त्रि-मुख्यं मुख्यं च मन्त्रिषु । कृत्वा पूर्वार्जितान्येव, कामकुम्भादिकानि च ॥२१७॥
वस्तूनि मन्त्रिणो दत्त्वा, मन्वानो धर्ममार्हतम् । चकार मन्त्रिणा सार्धं, धर्मं चादात्सुदर्शनम् ॥२१८॥
अन्यदा भूपतिर्मन्त्रि-युक्तो गुरोः पुरो गतः । धर्मोपदेशनां श्रुत्वा, धर्मं जैनं ललौ मुदा ॥२१९॥
मन्त्री प्राह गुरो ! पूर्व-भवे धर्मः कृतश्च कः । येनेह सम्पदो बह्व्यो, ममाभवन् पदे पदे ॥२२०॥
गुरुराह **रमापुर्यां**, **भीम-सोमौ** सहोदरौ । युवामभवतं प्रीति-युक्तौपरस्परं सदा ॥२२१॥
कर्मस्थायमहं गेहे, जायमानं निरीक्ष्य च । लघुर्भ्राता जगौ वृद्धं, प्रत्यत्र व्ययते धनम् ॥२२२॥
ततः परत्र जायेत, भवे भवे धनं बहु । वृद्धो भ्राता जगौ वेत्ति, को धर्मस्य फलं ह्यदः ॥२२३॥
एवं वृद्धोदिते भ्राता, लघुर्द्रम्मांश्च विंशतिम् । मुमोचार्हद्गृहे कर्मस्थायार्थं भक्तिभावितः ॥२२४॥
वृद्धः क्रुद्धस्ततो भ्राता, भ्रातुः पृथग् बभूव सः । तथापि सोदरे तस्मिन्, लघुः प्रीतिं व्यधात्तमाम् ॥२२५॥
कायोत्सर्गस्थितं साधुं, चतस्रो बालिका वने । दृष्ट्वा पराभवन् हस्यमाना यत्तत्प्रजल्पनैः ॥२२६॥
दृष्ट्वा **सोमो** जगौ साधुं, पराभवति योऽसुमान् । नरके सहते चालं, दुःख-पङ्क्ति स सन्ततम् ॥२२७॥
ततस्ताभिर्मुनेः पादौ, प्रणम्य क्षमितो मुनिः । स्नेहः **सोमे** कृतस्ताभि-र्बोधिबीजमभूत्ततः ॥२२८॥

क्रमात्**सोमो** व्रतं लात्वा, प्रपाल्य यतनापरः । भवानीदृग् **धनो** जातः, पूर्वपुण्यसमर्जनात् ॥२२९॥
चतस्रो बालिकास्तास्तु, मृत्वा पत्न्योऽभवंस्तव । यद्भवान्पतितो वार्धौ, तत्कर्मान्यभवार्जितम् ॥२३०॥
यतस्त्वया भवे षष्ठे, बोलयित्वा मुनिर्जले । कर्षितोऽतोऽम्बुधेस्तस्माद्द्रुन्निर्गमनं तव ॥२३१॥
**भीम**स्तु तापसीं दीक्षां, लात्वा कष्टविधानतः । राज्यं प्राप **प्रजापाल**-नृपोऽभूद् भक्तिकस्त्वयि ॥२३२॥
धर्मान्तरायकं वाक्यं, भवे पूर्वे जजल्प यत् । **भीम**स्तेन भवेऽत्रैव, धर्मास्तिर्दुःशकाऽभवत् ॥२३३॥
तत्र गुर्वन्तिके भूपो, मन्त्रीश्वरसमन्वितः । धर्मं विशेषतो लात्वा, निजसद्म समीयिवान् ॥२३४॥
क्रमाद्राजा जिनागार-कारणादि वृषं बहु । कुर्वन् राज्यं ददौ **भूमिवल्लभाय** स्वसूनवे ॥२३५॥
**धर्मशेखरसूरीश**-पार्श्वे मन्त्रियुतो नृपः । लात्वा दीक्षां तपस्तीव्रं, चक्रे शुद्धक्रियापरः ॥२३६॥
**प्रजापाल**नृपालर्षि-**धर्मबुद्धि**समन्वितः । तपः कृत्वा ययौ स्वर्गं, ततो मुक्तिं गमिष्यति ॥२३७॥
**भूमिवल्लभ**भूपस्य, भूमिं पालयतो नयात् । मन्त्रियुतो धनो राज्य-चिन्तां वितनुते स्म सः ॥२३८॥
कलावानन्यदा कोऽपि, पुमानेत्य नृपक्रमौ । सेवते स्म तथा राजा, तुष्टोऽजनि तथा भृशम् ॥२३९॥
सर्वेषां मन्त्रिणां नृणामन्येषां रोषणं मिथः । जातं बुद्ध्या भनक्ति स्म, कलावान्स नरस्तदा ॥२४०॥
ततो हृष्टेन भूपेन, ग्रामा अष्टौ मनोहराः । ददिरे भक्तितस्तस्मै, पुंसे कलावते दृढम् ॥२४१॥
भूपालोऽवसरे तस्य, वाचा हृष्टो धनं यदा । दत्ते तदा तदा राज्ञी, वृद्धाऽवग् नृपतिं प्रति ॥२४२॥
एतेन विभवेनैव, लभ्यन्ते बहवो भटाः । तैस्तु द्विषो व्यजीयन्त, ततो राज्यं विवर्धते ॥२४३॥
राज्ञोक्तं धीधना एवं-विधा भूरिश्रिया नहि । लभ्यन्ते स्म यतो राज्यं, वर्धते स्म दिने दिने ॥२४४॥
राज्याहाहं कलिं कूटं, त्वया सहाद्य वासरे । कृत्वा पितुर्गृहं गच्छन्नस्मि मार्गे कृतत्वरा ॥२४५॥
वालयिष्यति चेन्मार्गा-न्मामेष सुभटो धिया । तदाऽस्य धिषणा वर्या, ज्ञास्यते मयका खलु ॥२४६॥
एवं सङ्केतमाधाय, राज्ञा सार्धं नृपप्रिया । चलिताऽभूद्यदा राज्ञा, तदोक्तं सुभटं प्रति ॥२४७॥
रुष्टा राज्ञी मया सार्धं, कलिं कृत्वा पितृगृहे । यान्ती ततस्त्वया वाल्या, धीविस्तारविधानतः ॥२४८॥
अथ रोषभिदा प्रोक्तं, वर्याश्वद्वितयं मम । देहि सातासनं चापि, वालयिष्याम्यतश्च ताम् ॥२४९॥
भूपदत्ताश्वमारूढः, पञ्चषैः सेवकैर्युतः । लात्वा सुखासनं रोषभञ्जकश्चलितोऽध्वनि ॥२५०॥
भूत्वा राज्या दृशोरग्रे, मार्गे शीघ्रं स धीधनः । यदाचलत्तदा राज्ञी, प्राहेति स्वां सखीं प्रति ॥२५१॥
एष कुत्र त्वरायाति, धीधनः पृच्छ्यते त्वया । ततः सख्यग्रतो गत्वा, पृष्टः क्व यासि धीधन ! ॥२५२॥
स प्राह नाधुना वक्तुं, गमनोदन्तमादितः । शक्यते मयका राज-कार्यं च विद्यते महत् ॥२५३॥
अथ राज्या बलात्पृष्टो, धीधनः प्रोक्तवानिति । चन्द्रभूपसुता **चन्द्रवत्य**स्ति रूपशालिनी ॥२५४॥
तां नेतुं याम्यहं लात्वा, सातासनमिदं द्रुतम् । परिणीय च भूपालः, पट्टराज्ञीं करिष्यति ॥२५५॥
तामानायितुमह्नाय, प्रेषितोऽहं महीभुजा । तेनाधुना क्षणं स्थातुं, शक्यते वक्तुमेव न ॥२५६॥
एवं प्रोच्य यदा श्राक् स, धीधनो वालितो बलात् । राज्या न वलितो राज्ञी, तदा दध्याविदं हृदि ॥२५७॥
कान्तो मे कपटी ह्येष, कृत्वा कलिं मया सह । मुधा छलादहं गेहान्निजान्निष्कासिता यतः ॥२५८॥
तामानीय प्रियां कृत्वा, पट्टराज्ञीं करिष्यति । तदाऽहं रुलिता नूनं, मुधा यामि पितुर्गृहे ॥२५९॥

यतः –

समुद्रस्य यदा पारः, पार्यते यदि मानवैः । तदा पुंसा कृतस्यैव, कपटस्य छलात्मनः ॥२६०॥
तदा विस्मृत्य सङ्केतं, कृतं वज्राहतेव सा । पश्चादेत्य नृपोपान्ते, सरोषमूचुषी त्विति ॥२६१॥
भवत्तुल्यो न धूर्तोऽस्ति, भूपाल ! कपटात्मक ! । कर्षयित्वा छलान्मां तु, प्रियामन्यां करिष्यसि ॥२६२॥
राजाऽऽह वरितुं कन्यां, नान्यां वाञ्छामि कर्हिचित् । त्वमेव वर्तसे चित्ते, साक्ष्यत्र तरणिर्मम ॥२६३॥
राज्ञी जगौ त्वया प्रैषि, धीधनः कन्यकां नवाम् । आनेतुं तु ममैवाग्रे, वक्षीति कपटं नृप ! ॥२६४॥
एवं दोषं मिथो भूप-राज्योः प्रजल्पतोः सतोः । धीधनोऽभ्येत्य भूपाग्रे, पश्चाद्राज्यागमत्कथम् ॥२६५॥
राजाऽऽचष्ट त्वया बुद्धया, वालिता मे प्रिया ध्रुवम् । श्रुत्वेति चकिता राज्ञी, यदाऽजनि स्वचेतसि ॥२६६॥
तदा राजा जगौ यत्त्वं, प्रियेऽवादीर्मुधाऽधुना । धीधनस्य बहुर्ग्रासो, दीयते भवता कथम् ॥२६७॥
ततो राज्ञा च राज्या च, धीधनो मानितो भृशम् । प्रसिद्धोऽजनि सर्वत्र, स्व**स्व**कार्यविधानतः ॥२६८॥
**भूमिवल्लभ**भूपस्य, पत्नी शोभनवासरे । असूत तनयं वर्यतमस्वप्नप्रसूचितम् ॥२६९॥
जन्मोत्सवे कृते तस्य, सूनोर्भूपः प्रियायुतः । **जिनदत्त** इति प्रादादभिधां सज्जनेप्सिताम् ॥२७०॥
वर्धमानः क्रमाच्छस्त्र-शास्त्रादिरुचिराः कलाः । पाठितः पण्डितोपान्ते, भूमिनाथेन सादरम् ॥२७१॥
क्रमेण भूमिभुक्पुत्रीं, परिणाय्य वरोत्सवम् । युवराजपदं भूपः, प्रददौ मन्त्रिसाक्षिकम् ॥२७२॥
अन्यदा श्रीगुरूपान्ते, श्रुत्वा धर्मं महीपतिः । राज्यं प्रदाय पुत्राय, जग्राह संयमश्रियम् ॥२७३॥
राजर्षिः सततं कृत्वा, तपस्तीव्रं गुरूदितम् । लभते स्मावधिज्ञानं, ततः केवलमप्यहो ॥२७४॥
प्रबोध्य भविनो भूरीन्, **भूमिवल्लभ**संयतः । आयुःक्षये ययौ मुक्तिं, भूरिसाधुसमन्वितः ॥२७५॥
**जिनदत्तः** प्रजा न्यायात्, रक्षन् धर्मपरायणः । चक्रे राजन्वतीं स्तोक-करादानान्महीं निजाम् ॥२७६॥
विशुद्धकुलसम्भूतां, पत्नीमङ्गीकरन् नृपः । जगौ मन्त्रिन् ! परीक्ष्य त्वमानयैकां कनीनिकाम् ॥२७७॥
ततोऽनेकैस्तु मन्त्रीशैः, पक्षद्वयविनिर्मला । न ज्ञाता कन्यका सम्यग्, मन्त्र्येकोऽन्धस्तदा जगौ ॥२७८॥
निवेश्याहं कनीं स्वस्योत्सङ्गे हस्तस्पृशाद्वयम् । पक्षद्वयविशुद्धां तु, जानाम्यन्यां पुनर्धिया ॥२७९॥
कनीनां कुर्वता तेन, मन्त्रीशेन परीक्षणम् । चन्द्रभूपसुता **पद्मा**, स्वाङ्केऽस्थापि सुतेव तु ॥२८०॥
पुत्रीबुद्धया यदा हस्तं, मन्त्री तस्याः स्तने व्यधात् । तदा मर्दलकं वाद्य-वादकैर्वादितं दृढम् ॥२८१॥
तदा सा त्रिश्चतुर्वारान्, स्वजङ्घायां कनीनिका । आजघ्ने तालिकादानात्, ततो मन्त्री जगाविति ॥२८२॥
इयं कनी निजाङ्गस्य, संवृतेः शुद्धबीजजा । जङ्घाहस्ताहतेर्वेश्याक्षेत्रं वेश्यासमुद्भवा ॥२८३॥ प्रथमकनी ॥
तत**श्चन्द्रमहीशेन**, वेश्या या प्राक् कृता प्रिया । तया सा जनिताऽज्ञायि, पृष्ट्वा तेनाऽथ भूपतिम् ॥२८४॥
ततोऽन्यभूपतेः पुत्र्या-श्चक्रे तेन परीक्षणम् । ततश्चोक्तमियं दासी-जनिता भूपनन्दिनी ॥२८५॥
यतोऽस्या उदरे लग्ने, मम हस्ते सति द्रुतम् । वक्षः सङ्कोचितं तस्मात्, दासीजातेति कथ्यते ॥२८६॥
बीजं तुं भूपतेः शुद्धं, स्थिरगात्रविधानतः । अतो नेयं कनी पक्ष-द्वयशुद्धा निगद्यते ॥२८७॥

द्वितीयकन्यापरीक्षणम् ॥

ततः श्रीनगरस्वामिमहामल्लमहीपतेः । पुत्र्याः परीक्षणं कृत्वा, जगावन्धः स मन्त्रिराट् ॥२८८॥

सङ्कोचितं तनुर्नैवाऽनयाऽऽच्छाद्युदरं पुनः । एषा समस्ति कन्या द्विकुलशुद्धा नृपाङ्गजा ॥२८९॥

पृष्ट्वा तत्रत्यभूयिष्ठ-नरान् शुद्धद्विवंशजाम् । ज्ञात्वा कन्यां महीपालः, परिणिन्ये सदुत्सवम् ॥२९०॥

ततो महीभुजा मन्त्रीश्वरोऽथोऽपि धीधनः । भूरिग्रामप्रदानेन, मानितोऽजनि शर्मवान् ॥२९१॥

**जिनदत्तो**ऽथ भूपालो, धर्मं जैनं दयामयम् । श्रुत्वा सम्यक्त्वमादाय, जिनावासान् बहून्व्यधात् ॥२९२॥

**जिनदत्तो** नृपो जैनं, धर्ममाराध्य भावतः । जगाम सप्तमे स्वर्गे, समस्तायुःक्षयाद् ध्रुवम् ॥२९३॥

**जिनदत्तसुरो** देवलोकात् च्युत्वा **रमापुरे** । श्रेष्ठिनो **वीरचन्द्र**स्य, पुत्रोऽभूत्**कमलाभिधः** ॥२९४॥

**कमलः** श्रेष्ठिपुत्रोऽथ, गतोऽन्यदान्तिके गुरोः । शुश्रावेति जिनेन्द्रोक्तं, धर्मं जीवदयामयम् ॥२९५॥

यतः –

पूआ पच्चक्खाणं पडिक्कमणं पोसहो परोवयारो अ । पंच पयारा जस्स य, न पयारो तस्स संसारे ॥२९५॥

देवार्चनादिविधिना गुरुवन्दनेन, सम्यक् तपोभिरसमैः समयामृतेन ।

आलोचनाप्रभृतिभिश्च शुभक्रियाभिः, संवत्सरप्रभृति पर्व कृतार्थयन्ति ॥२९७॥

इत्यादि धर्ममाकर्ण्य, **कमलो** मुदिताशयः । श्राद्धधर्मं ललौ सम्यग्-भावात् कल्याणशर्मदम् ॥२९८॥

पालयित्वा चिरं धर्म-मार्हतं **कमलो** वणिक् । स्वर्लोके दशमे देवो-ऽजनि भासुरदेहभाक् ॥२९९॥

ततश्च्युत्वा नरभवं, प्राप्य लात्वा च संयमम् । सर्वकर्मक्षयान्मुक्ति-सातमासादयिष्यति ॥३००॥

निशम्येत्यर्हतो वाणीं, **पद्मसेनमहीपतिः** । भूरिलोकयुतो धर्मं, दानाद्यं विदधेतमाम् ॥३०१॥

श्रुत्वेति धर्ममाप्तोक्तं, **पद्मचन्द्रो**नृपो व्रतम् । लात्वा क्षिप्त्वाऽखिलं कर्म, प्राप मुक्तिसुखं क्रमात् ॥३०२॥

हस्तिनागपुराधीशः, **पद्मसेन**महीपतिः । **अरास्याद्**धर्ममाकर्ण्य, पुण्यं चक्रे शिवप्रदम् ॥३०३॥

**॥ इति तपागच्छाधिपश्रीलक्ष्मीसागरसूरि-शिष्य-**
**पं. शुभशीलगणि-विरचिते [ श्रीअरनाथ चरित्रे ] हस्तिनागपुरेशपद्मसेन भूपधर्माङ्गीकार-**
**धर्मो( नामा )नवमः सर्गः समाप्तः ॥**

**योगसार - द्वितीयः प्रस्तावः**

**तत्त्वसारोपदेशकः**

त एव वैपरीत्येन, विज्ञातव्याः परं वचः ।
दिङ्मोह इव कोऽप्येष, महामोहो महाबलः ॥ ३३ ॥
धर्मस्य बहुधाध्वानो, लोके विभ्रमहेतवः ।
तेषु बाह्यफटाटोपा-, त्तत्त्वविभ्रान्तदृष्टयः ॥ ३४ ॥
स्वस्वदर्शनरागेण, विवदन्तो मिथो जनाः ।

## ॥ दशमः सर्गः ॥

अथ श्री**अर**तीर्थेशो, विहरन् वसुधातले । काम्पील्यपत्तनोद्याने, मनोज्ञे समवासरत् ॥१॥
प्रभुमागतमाकर्ण्य, **वीरचन्द्र**स्तदीश्वरः । धर्मं श्रोतुमगात्स्वामिसमीपे सपरिच्छदः ॥२॥
**अरस्वामी** जगौ धर्मं, जैनं जीवदयात्मकम् । आराध्यो **धनदेवादि-देवपालै**रिवाङ्गिना ॥३॥यतः –
धनदो धनमिच्छूनां, कामदः काममिच्छताम् । धर्म एवापवर्गस्य, पारम्पर्येण साधकः ॥४॥तथाहि –
**पद्मानन्दपुरे** राजा, **धनदेवा**ऽभिधो नयात् । पालयन् पृथिवीं चक्रे, सुखिनीं निखिलां प्रजाम् ॥५॥यतः –
दुष्टस्य दण्डः स्वजनस्य पूजा, न्यायेन कोशस्य समस्य वृद्धिः ।
अपक्षपातो रिपुराष्ट्रचिन्ता, पञ्चैव यज्ञाः कथिता नृपाणाम् ॥६॥
अन्येद्यु **धनदेवः स** गुरूपान्ते गतो नृपः । धर्मस्य देशनां मुक्ति-सातदामशृणोदिति ॥७॥
अट्ठविहकम्मबद्धो, जीवो परिभमइ दीहसंसारं । दुक्खाणि अणुहवंतो, उदएणं वेअणिज्जस्स ॥८॥
पुरुषः कुरुते पापं, बन्धुनिमित्तं वपुर्निमित्तं च । वेदयते तत्सर्वं, नरकादौ पुनरसावेकः ॥९॥
श्रुत्वा जिनोदितं धर्मं, न जग्राह महीपतिः । यतो मोहावृतो जीवो, न जानाति हिताहितम् ॥१०॥यतः –
पुत्रो मे भ्राता मे स्वजनो मे गृहकलत्रवर्गो मे । इति कृतं मे मे शब्दं पशुमिव मोहो जनं हरते ॥११॥
यदयं स्वामी यदिदं सद्म, सर्वं चैतन्मिथ्या छद्म । यदयं कान्तो यदियं कान्ता, सोऽयं मोहो हन्त दुरन्तः ॥१२॥
जाताः कति नहि सुखसम्बन्धा, येन विदन्ते जीवा अन्धाः ।
कटरे मोहनटस्य विलासः, सर्वो नव इव पुनराभासः ॥१३॥
पापर्द्धिं नृपतिः कुर्वन्, मृगादीन् सततं बहून् । हिंसन् न वेत्ति तद्दुःखं, मोहमद्यावृत्तेक्षणः ॥१४॥
साधयित्वा बहून्देशान्, प्रत्यर्थिमेदिनीपतीन् । ग्राहयित्वा नृपः स्वाज्ञां, स्वपुरोद्यानमागमत् ॥१५॥
तदा तत्रागतान् **जीवदेवसूरीन्** निशम्य च । गत्वा नत्वा वृषं श्रोतुमुपाविशन्महीपतिः ॥१६॥
ददानेषूपदेशं तु, गुरुषु क्ष्मापतेः पुरः । देवद्वन्द्वं नभोमार्गात्, समागाद् गुरुसन्निधौ ॥१७॥
प्रदक्षिणात्रयं दत्त्वा, नत्वा गुरुपदाम्बुजम् । ढालयामासतुश्चारु-चामरे तौ सुरौ गुरोः ॥१८॥
गुरूणोक्तं न साधूनां, छत्रचामरढालनम् । कल्पतेऽतो युवां (वाभ्यां) तूपवेष्टव्यं क्ष्मातले ॥१९॥
यतः –
उद्देसिअं कीयगडं, निआगमभिहडाणि अ । राइभत्ते सिणाणे य, गंधमल्ले अ वीअणे ॥२०॥
संनिहिगिहिमत्ते अ, रायपिंडे किमिच्छए । संवाहणा दंतपहोअणा य, संपुच्छणा देहपलोअणा य ॥२१॥
अट्ठावए य नालीए, छत्तस्स य धारणट्ठाए । तेगिच्छं पाहणापाए, समारंभं च जोइणो ॥२२॥
गुरुणा वारितौ देवौ, न निवृत्तौ यदा तदा । नृपो जगौ युवां देवौ, कुतः किमर्थमागतौ ? ॥२३॥
निर्जरावूचतुर्वां ते, सम्बन्धं पूर्वजं मिथः । प्रष्टुकामौ समायातौ, भवतो बोधिहेतवे ॥२४॥
ततो भूमिभुजा पृष्टा, गुरवो जगदुस्त्विति । अस्मिन्नेव पुरे **देवपालो**ऽजनि नरेश्वरः ॥२५॥

**चन्द्रदेवो** वणिक् श्राद्ध-द्वादशव्रतधारकः । सत्यवादी बभूवात्र, नादत्तं कस्यचिल्ललौ ॥२६॥
अन्येद्युर्**मण्डलपुरात्**, रत्नो वणिग् रमाकृते । रत्नद्वीपे गतो रत्न-दशकं समुपार्जयत् ॥२७॥
यतः –
दीसई विविहं चरिअं, जाणिज्जइ सज्जणदुज्जणविसेसो । अप्पाणं च कलिज्जइ, हिंडिज्जइ तेण पुहवीए ॥२८॥
ततो **रत्न**श्चलन्नत्र, पुरे लाभस्य हेतवे । समायातो व्यधा-द्वर्यं, व्यवसायं वणिग्वरः ॥२९॥
रत्नानां प्रतिबन्धेन, गन्तुं नेशोऽन्यनीवृति । **रत्नो** मोचयितुं कस्य, पार्श्वे सदा व्यचिन्तयत् ॥३०॥
**चन्द्रदेवं** वणिग्वर्यं, परद्रव्यपराङ्मुखम् । ज्ञात्वा न्यास्यकरोद्**रत्नो**, रत्नानि तस्य सन्निधौ ॥३१॥
धनार्थं कुङ्कणद्वीपे, गतो **रत्नो** धनं बहु । अर्जयित्वाम्बुधावायाद्, भग्नयानोऽभवत्पुनः ॥३२॥
निर्गम्य निखिलं वस्तु, सम्प्राप्तफलकः स च । आगतोऽस्मिन् पुरे **चन्द्र**-पार्श्वे रत्नान्ययाचत ॥३३॥
लोभाच्छ्रेष्ठी जगौ कस्त्वं ?, केन त्वं वीक्षितो वणिक् ? । मणयो भवता मह्यं, दत्ताः कोऽत्रास्ति साक्षिकः ॥३४॥
यतः –
क्षणं शक्तः क्षणं मुक्तः, क्षणं क्रुद्धः क्षणं क्षमी । मोहाद्यैः क्रीडयेवाहं, कारितः कपिचापलम् ॥३५॥
**रत्नो** जगावहं त्वं च, साक्षिणौ स्तः किमुच्यते । **चन्द्रदेवो** जगौ नाहं, साक्ष्यत्र विभवार्पणे ॥३६॥
हट्टाद् भ्रष्टोऽसि मूढ ! त्वं, हट्टमन्यं विलोकय । अहं कस्यापि नो लामि, तृणमेव धनं कुतः ? ॥३७॥
**रत्नो** जगौ भवान् पापमयं वक्षि वचः कथम् । **चन्द्रो**ऽवग् यो ददात्यालं, मुधा स याति दुर्गतौ ॥३८॥
यतः –
असत्यमप्रत्ययमूलकारणं, कुवासनासद्मसमृद्धिवारणम् । विपन्निदानं परवञ्चनोर्जितं, कृपापराधं कृतिभिर्विवर्जितम् ॥३९॥
पारदारिक-चौराणामस्ति काचित्प्रतिक्रिया । असत्यवादिनः पुंसः, प्रतीकारो न विद्यते ॥४०॥
ज्ञात्वा मणीन् गतान् **रत्नो**, ग्रथिलीभूय मायया । सुप्तो रात्रौ जगौ कस्यचिद् हट्टे प्रकटस्वरम् ॥४१॥
**चन्द्रदेवो** ह्यसौ सत्येतरवादी मणीन् दश । लात्वा मेऽपलपत्कोऽपि, नास्ति वालयिता नरः ॥४२॥
कदाचिन्**मतिसाराह्वो**, मन्त्र्यध्वनि व्रजन् निशि । **रत्न**मेवं वदन्तं च, श्रुत्वाऽऽहेदं कथं वद ॥४३॥
किं ते रत्नानि यातानि, किं वा त्वं ग्रथिलोऽभवः । **रत्नो**ऽवग् ग्रथिलो नाहं, सत्यं जल्पाम्यहं ध्रुवम् ॥४४॥
रत्नानां गमनोदन्ते, कथिते तेन तत्क्षणात् । मन्त्री दध्यौ कथं **चन्द्रदेव**मेवं करोति सः ॥८५॥
आदौ रेखामसौ प्राप्तः, सर्वेषां सत्यवादिनाम् । अथवा ज्ञायते नैव, पुंसां चित्तं सुबुद्धिभिः ॥४६॥
एष तेषां मणीनां त्वभिधानानि प्रजल्पति । न ज्ञायतेऽत्र कः सत्यः, कः कूटो विद्यतेऽनयोः ॥४७॥
सत्यवादी वराकोऽयं, विद्यते श्रेष्ठिराट् पुनः । तथाऽप्यत्र विधातव्या, परीक्षा मयकाऽनयोः ॥४८॥
आपदापतितं दीन-स्वरं दुःखार्दितं नरम् । यो नैवोद्धरते सत्यं, शक्तौ सोऽधम उच्यते ॥४९॥
यतः –
वदनं प्रसादसदनं, सदयं हृदयं सुधामुधो वाचः । करणं परोपकरणं, येषां ते न कथं वन्द्याः ? ॥५०॥
आपत्स्वेव हि महतां, शक्तिरभिव्यज्यते न सम्पत्सु । अगरोस्तथा न गन्धः प्रागस्ति यथाऽग्निपतितस्य ॥५१॥

**मतिसारो**ऽथ मन्त्रीशो, नीत्वा **रत्नं** नृपान्तिके । माणिक्यगमनोदन्तं, ज्ञापयामास तेन तु ॥५२॥
**रत्नस्य** रत्नगमनं, ज्ञात्वा सम्यग् महीपतिः । दध्यावेष नरो सत्यवादी न श्रेष्ठिराट् स च ॥५३॥
यदि पूर्वां रविस्त्यक्त्वा, पश्चिमायामुदेति चेत् । मेरुश्चलेत्स्थिरौ वायुर्वह्निः शीतलतां व्रजेत् ॥५४॥
तथाप्येष वणिक् **चन्द्रदेवो**ऽन्यस्य धनं क्वचित् । गृह्णात्यपलपत्येव, न कूटं वक्ति कर्हिचित् ॥५५॥
असौ वैदेशिकः सत्यवादी निरीक्ष्यते ध्रुवम् । तथापि मयका कार्या, परीक्षाऽत्रानयोर्मया ॥५६॥
शिष्टाशिष्टनराणां तु, परीक्षां मेदिनीपतिः । न करोति यदा पापं, जायते तस्य निश्चितम् ॥५७॥
धनलोभान्महात्माऽपि, चकाराकार्यमेव तु । किं किं सम्भाव्यते नैव, वर्ये वर्ये नरे बुधैः ॥५८॥
निमित्तज्ञस्ततो राज्ञा, पृष्टोऽवग् वणिजोऽस्य तु । रत्नानि **चन्द्रदेवेन**, गृहीतानि ध्रुवं नृप ! ॥५९॥
**रत्नस्य** रत्नग्रन्थिस्तु, स्वभार्यायै यथास्थितः । **चन्द्रदेवेन** घस्रान्ते, व्यश्राणि न्यासहेतवे ॥६०॥
तया च कोष्ठिकामध्ये, मुक्तोऽस्ति सोऽधुना ध्रुवम् । उपायाद्भवतो हस्ते, समेष्यति नरेश्वर ! ॥६१॥
अन्यदा नृपति**श्चन्द्रदेवस्य** पुरतो जगौ । या मुद्राऽस्ति शये ते तु, दीयतां सा ममाधुना ॥६२॥
अनया विद्यते कार्यं, मदीयान्तःपुरेऽधुना । सिद्धे कार्ये पुनः पश्चाद्दास्यते तुभ्यमेव च ॥६३॥
उत्तार्य श्रेष्ठिना हस्ताद्दत्ता मुद्रा महिपतेः । भूपोऽथ स्वानुगं छन्नं, प्रोक्तः श्रेष्ठिगृहे व्रज ॥६४॥
प्रोच्यं तत्र त्वया श्रेष्ठिपत्न्या अग्रे भवत्पतिः । राज्ञः पार्श्वे निविष्टोऽस्ति, जगौ च मे मुखादिदम् ॥६५॥
यो ग्रन्थिर्मयका तुभ्यं, दत्तोऽस्ति दिवसात्यये । स त्वया कोष्ठिकामध्ये, तदाऽमोचि गृहान्तरे ॥६६॥
अस्या एव च मुद्राया, अभिधाननिरीक्षणात् । सोऽस्य हस्तान्ममोपान्ते, प्रेषितव्योऽधुनैव तु ॥६७॥
तया दत्तोऽथ स ग्रन्थि-र्लात्वा सद्यो नृपानुगः । मुमोच भूपतेर्हस्ते, भूपोऽथ न्यस्तवान् रहः ॥६८॥
भूपेन रत्नवर्णादि, पृष्टो **रत्नो** वणिक् तदा । यथास्थितं समं सत्यं, प्रोक्तवान् निर्भयस्तदा ॥६९॥
ततो भूपो जगौ **चन्द्रदेवस्य** पुरतस्तदा । **रत्नेन** रत्नग्रन्थिर्यो दत्तोऽस्ति भवतः शये ॥७०॥
स **रत्नाय** प्रदातव्य, आनीय भवता गृहात् । **चन्द्रदेवो** जगौ कोऽथ, पापी लाति धनं नृप ! ॥७१॥
राजा जगौ त्वया सत्यं, प्रोक्तं श्रेष्ठिशिरोमणे ! । भवदीयेन हस्तेन, रत्नग्रन्थिर्लले खलु ॥७२॥
ततो मणीन् दश क्षिप्त्वा, ग्रन्थौ ग्रन्थौ नृपो रहः । बन्धयामास मन्त्रीशपार्श्वात् ग्रन्थीन् दशाचिरात् ॥७३॥
तेनैव ग्रन्थिना सार्धं, दशाप्यानीय तत्क्षणम् । आनाय्यावग् नृपो **रत्नं**, स्वं ग्रन्थिं तं विलोकय ॥७४॥
छोटयित्वा मणीन् स्वीयानुपलक्ष्य दृढं वणिक् ! । लाहि चेद्यदि कूटं स्यात्तदा त्वं हत एव तु ॥७५॥
भूपेन दर्शितेष्वेवाखिलेषु ग्रन्थिषु ध्रुवम् । **रत्नः** स्वं ग्रन्थिमालोक्य प्राह मे ग्रन्थिरेष तु ॥७६॥
ग्रन्थावुद्धाहितो तस्मिन्, रत्नवर्णादिकं समम् । **रत्नेन** जल्पितं दृष्ट्वा, भूपश्चमत्कृतो जगौ ॥७७॥
एष **रत्नो**ऽधुना सत्यवादी भुवि निरीक्ष्यते । **चन्द्रदेवो**ऽभवत्सत्येतरवादीति विश्रुतः ॥७८॥
भूपोऽवक् **चन्द्रदेव** ! त्वं, सत्यवादीति विश्रुतः । कथमेतत्तमश्चक्रे, त्वयाऽन्यस्वापहारतः ॥७९॥
त्वयावलपिते ग्रन्थौ, मया ग्रन्थिस्त्वदालयात् । प्रपञ्चेन समानिन्ये, प्रेष्य स्वं सेवकं रहः ॥८०॥
त्वमेव सत्यवादी चेत्, कार्यमीदृग् करोषि भोः । तदा सोऽत्र नरः सत्यवादी भवति मे पुरे ॥८१॥
परद्रव्यापहारेणाकीर्त्तिरत्र प्रजायते । परत्र नरके घोरे, पातः पापाद्भविष्यति ॥८२॥

यतः –

पतितं विस्मृतं नष्टं, स्थितं स्थापितमाहितम् । अदत्तं नाददीत स्वं, परकीयं क्वचित् सुधीः ॥८३॥[१]

दौर्भाग्यं प्रेष्यतां दास्यमङ्गच्छेदं दरिद्रताम् । अदत्तात्तफलं ज्ञात्वा, स्थूलस्तेयं विवर्जयेत् ॥८४॥

तत उत्थाय स श्रेष्ठी, सरलो धर्मिशेखरः । भूपाल-**रत्नयोरं**ह्र्योः, पतित्वेति जगौ तदा ॥८५॥

मया पापं कृतं घोरं, **रत्न**रत्नापहारतः । छोटितोऽघादतोऽहं तु, गुरूभूय त्वया नृप ! ॥८६॥

अतः प्रभृति भूप ! त्वं, गुरुरेव ममोत्तमः । तवोपकारतोऽहं तु, च्छुटिष्यामि कथं वद ॥८७॥

यतः –

अवद्यमुक्ते पथि यः प्रवर्तते, प्रवर्तयत्यन्यजनं च निःस्पृहः ।
स एव सेव्यः स्वहितैषिणा गुरुः, स्वयं तरंस्तारयितुं क्षमः परम्॥८८॥

धन्ना तच्चिअ पुरिसा, जे गुरुवयणं करंति पच्चक्खं । धन्नाणवि ते धन्ना, कुणंति देसंतरगया जे ॥८९॥

धर्मज्ञो धर्मकर्ता च, सदा धर्मप्रवर्तकः । सत्त्वेभ्यो धर्मशास्त्रार्थदेशको गुरूच्यते ॥९०॥

ततः स्वं विहितं पापं, निन्दन् श्रेष्ठी निरन्तरम् । भूपालं स्वगुरुं चक्रे, संसाराम्बुधितारकम् ॥९१॥

तस्यैनसो विशुद्ध्यर्थं, प्रासादोऽभ्रंलिहोऽर्हतः । कारित**श्चन्द्रदेवेन**, युगादिजिनबिम्बयुग् ॥९२॥

**रत्नो** रत्नत्रयं तत्र, विक्रीय जिनमन्दिरम् । कारयामास कल्याण-सुखसन्ततिहेतवे ॥९३॥

यतः –

जिणवरभवणाइं, जे उद्धरंति सडिअ-पडिआइं । ते उद्धरंति अप्पा, भीमाओ भवसमुद्दाओ ॥९४॥

अङ्गुष्ठमानमपि यः प्रकरोति बिम्बं, वीरावसानवृषभादिजिनेश्वराणाम् ।
स्वर्गप्रधानविपुलर्द्धिसुखानि भुक्त्वा, पश्चादनुत्तरगतिः समुपैति धीरः ॥९५॥

भूपाल**चन्द्ररत्नानां**, मिथ्यादुष्कृतिदानतः । मिथः प्रीतिरभू**द्राम-लक्ष्मणा**दिनृणामिव ॥९६॥

तेषु तेषु जिनौकस्सु, जिनेन्द्राणां प्रपूजनम् । कुर्वाणा गमयन्ति स्म, कालं भूपादयश्च तौ ॥९७॥

**देवपालो** नृपो मृत्वा, **श्रीपुरे भीमभूपतेः । जीवदेवा**भिधः पुत्रो-ऽभवद्धर्मपरायणः ॥९८॥

स च बाल्येऽपि सम्प्राप्त-वैराग्यो गुरुसन्निधौ । आपृच्छ्य पितरौ दीक्षां, जग्राह शिवशर्मदाम् ॥९९॥

सोऽहं प्राप्तचतुर्ज्ञानी, **जीवदेवाभिधो**ऽधुना । विहरन् प्राग्भवोद्भूतं, नन्दनं ज्ञातवान् क्रमात् ॥१००॥

**धनदेवस्य** ते पाप-परस्य बोधहेतवे । प्राग्भवीयाङ्गजप्रीत्याऽधुनेहाहं समागमम् ॥१०१॥

**चन्द्रदेवो**ऽथ **रत्नो**ऽथ, मृत्वाऽभूतां सुरौ दिवि । मिथः प्रीतिजुषौ जातौ, भासुराङ्गद्युतिवरौ ॥१०२॥

**चन्द्रदेव**सुरो **रत्न**सुरो प्राग्भवसम्भवम् । मित्रं मत्वा गुरुं स्थाने, समेतौ सेवितुं दिवः ॥१०३॥

हर्षेण पूरितौ देवावेतौ चामरढालनम् । कुर्वाणौ तस्थतुर्नैव, निषिद्धावपि साम्प्रतम् ॥१०४॥

श्रुत्वैत**द्धनदेव**स्तु, ज्ञात्वा तातं निजं गुरुम् । नत्वा पादौ ललावादौ, मोदतः प्रथमं व्रतम् ॥१०५॥

ततः सम्यक्त्वमादाय, श्राद्ध-धर्मं समं नृपः । गृहीत्वा च नयात्पृथ्वीं, धर्ममार्गे न्ययोजयत् ॥१०६॥

---

१. मुषितं सर्वमप्यदः इति योगशास्त्रे

यतः –

आसन्ने परमपए पावे-अव्वंमि सयलकल्लाणे । जीवो जिणिंदधम्मो, पडिवज्जई भावओ धम्मं ॥१०७॥
आगत्यागत्य तौ देवौ, **जीवदेव**गुरुक्रमौ । सेवेते स्म सदा छत्र-चामरादिकधारणात् ॥१०८॥
अष्टोत्तरशतीचारु-मण्डपैर्जिनमन्दिरम् । विराजितं चतुर्द्वारं, **धनदेवो** व्यधापयत् ॥१०९॥
प्रासादे तत्र नाभेयं, जिनेन्द्रं मूलनायकम् । अतिष्ठिपन्नृपोऽन्यत्र, ऋषभादिजिनाधिपान् ॥११०॥
ज्ञानिनो **जीवदेवस्य,** स्वपितुः प्रतिमां नृपः । सचामरौ सुरौ कारयामासोभयपार्श्वतः ॥१११॥
**धनदेवो** नृपः सार्वप्रासादानां शताष्टकम् । कारयामास कैलास-भूमीधरसहोदरौ ॥११२॥

यतः –

प्रासादप्रतिमायात्रा, प्रतिष्ठादिप्रभावना । अमार्युद्घोषणादीनि, महापुण्यानि गेहिनाम् ॥११३॥
बोधयन् भविनो भूरीन् ग्रामे ग्रामे पुरे पुरे । **जीवदेवो** गुरूत्तंसः, कोशलोदद्यानमीयिवान् ॥११४॥
धर्मोपदेशनांश्रोतुमात्रते भूरिमानवे । **मतिसारं** स्वमन्त्रीशं, प्राग्भवीयं स्वभक्तिकम् ॥११५॥
**सोम**नैगमसञ्ज्ञातं मिथ्यात्ववासिताशयम् । जीवदेवो गुरुर्ज्ञात्वा देशनामिति दत्तवान् ॥११६॥ युग्मम् ॥

यतः –

मिथ्यात्वं परमो रोगो, मिथ्यात्वं परमं तमः । मिथ्यात्वं परमः शत्रुर्मिथ्यात्वं परमं विषं ॥११७॥
जन्मन्येकस्य दुःखाय, रोगो ध्वान्त रिपुर्विषम् । अपि जन्मसहस्रेषु, मिथ्यात्वमचिकित्सितम् ॥११८॥
इत्यादिधर्मकथनात्, प्रबोध्य **सोम**नैगमम् । ग्राहयामास सम्यक्त्वं, मूलं श्राद्धवृषं गुरुः ॥११९॥
पापशुद्ध्यै जिनागारं, महान्तं **सोमनैगमः** । कारयामास कल्याणमयं बिम्बसमन्वितम् ॥१२०॥
क्रमात् **सोमो**ऽपि सम्प्राप्तवैराग्यो गुरुसन्निधौ । गृहीत्वा चरणं शुद्धं, पालयामास सन्ततम् ॥१२१॥
सोऽपि **सोम**श्चतुर्ज्ञानी, भूत्वा भव्यजनान् बहून् । बोधयामास सर्वज्ञ-धर्मे मुक्तिसुखप्रदे ॥१२२॥
स ज्ञानी **जीवदेवो**ऽथ, प्रबोध्य भविनो बहून् । ययौ **सर्वार्थसिद्धयाह्वे,** विमाने **सोम**साधुयुग् ॥१२३॥
**धनदेवो**ऽपि भूपालो, गृहीत्वा संयमं क्रमात् । गत्वा स्वर्गे पुनः प्राप्य, नृभवं सेत्स्यति ध्रुवम् ॥१२४॥
**देवपालाह्वगीर्वाणो, मतिसागर**देवयुक् । च्युत्वा **काशीपुरे चन्द्र**-श्रेष्ठिपुत्रावजायताम् ॥१२५॥
जन्मोत्सवं विधायाथ, तयोर्नन्दनयोस्तदा । **धीर-वीरे**ति नामादात्, **चन्द्रश्रेष्ठी** स सज्जनः ॥१२६॥
वर्धमानौ क्रमाच्छस्त्र-शास्त्राणि भूरिशश्च तौ । पठन्तौ कोविदौ जातौ, **धीर-वीर**तनूभवौ ॥१२७॥
पूर्वपुण्योदयाद्बाल्ये, धर्मं शुद्धं जिनोदितम् । लब्ध्वा त्रिकालमाप्तार्चां, कुर्वाते श्रेष्ठिनन्दनौ ॥१२८॥
प्रासादानर्हतां भूरीन्, कारयन्तौ प्रमोदतः । यात्रां विमलशैले तु, चक्राते तौ वणिक्सुतौ ॥१२९॥
क्रमाच्चारित्रमादाय, सर्वकर्मततिक्षयात् । **धीर-वीरौ** वणिक्पुत्रौ, मुक्तिपुर्यां समीयतुः ॥१३०॥

**॥ इति देवपालजीव-मतिसारमन्त्रिमुक्तिगमनस्वरूपम् ॥**

**चन्द्रदेवस्य रत्नस्य,** जीवौ देवौ दिवश्च्युतौ । **कलापुरे महासेन**भूपसूनू अजायताम् ॥१३१॥
जन्मोत्सवं पिता कृत्वा, **हर-हीरा**भिधे तयोः । वितीर्य पोषयामास, विशिष्टाहारदानतः ॥१३२॥
क्रमात्तयोर्मृता माता, पूर्वाशुभोदयात्तदा । सपत्नी जननी चक्रे, कार्मणं मृत्युहेतवे ॥१३३॥

तयोः शुभोदयान्नैव, ललगे कार्मणं क्वचित् । सपत्नी जननी स्वीयसूनूनां राज्यमिच्छति ॥१३४॥

यतः –

कारणात्प्रियतामेति, द्वेष्यो भवति कारणात् । स्वार्थार्थी जीवलोकोऽयं, न कश्चित्कस्यचित्प्रियः ॥१३५॥

वंचिअ सयल जणो, नेहं दरिसेइ जाव नियकज्जं । निअकज्जसमवत्ते, विरला नेहे पवट्टंति ॥१३६॥

सपत्नीजननीपुत्रा, जनन्या रक्षिता अपि । क्रमाद्यमालये जाताः, स्वीयाशुभोदयाद् ध्रुवम् ॥१३७॥

यतः –

जं विहि करइ स होइ, होइ न जं जिअ चींतवइ । इमहि चिंत पडेइ, आहट-दोहट केवले ॥१३८॥

यन्न मनोरथशतैरगोचरं, यं न स्पृशन्ति गिरः कवेरपि । स्वप्नवृत्तिरपि यत्र दुर्लभा, लीलयैव विदधाति तद्विधिः ॥१३९॥

अनित्यतां महीपालो, ज्ञात्वा **हराय** सूनवे । राज्यं दत्त्वा तु **हीराय**, युवराजपदं ददौ ॥१४०॥

**महासेनो** नृपः सप्तक्षेत्र्यां स्वं विभवं बहु । व्ययित्वा सूत्सवं दीक्षां, ललौ **सोमगुरोः** शयात् ॥१४१॥

चक्षुर्दग्धं परस्त्रीभि-र्हस्तौ दग्धौ प्रतिग्रहे । जिह्वा दग्धाऽपरान्नेन, गतं जन्म निरर्थकम् ॥१४२॥

एगदिवसंपि जीवो, पव्वज्जमुवागओ अनन्नमणो । जइवि न पावइ मुक्खं, अवस्स वेमाणीओ होइ ॥१४३॥

सिंहत्वेन व्रतं लात्वा, सिंहवत्पालयन्सदा । **महासेन**नृपः साधु-र्ज्ञानं पञ्चममाप्तवान् ॥१४४॥

यतः –

अस्ततन्द्रैरतः पुम्भिर्निर्वाणपदकाङ्क्षिभिः । विधातव्यः समत्वेन, रागद्वेषद्विषज्जयः ॥१४५॥

अमन्दानन्दजनने, साम्यवारिणि मज्जताम् । जायते सहसा पुंसां, रागद्वेषमलक्षयः ॥१४६॥

बोधयित्वा विशेषेण, भव्यान् भूरीन् सुतावपि । आयुःक्षये ययौ मुक्तिं, **महासेन**मुनीश्वरः ॥१४७॥

यतः –

पच्छावि ते पयाया, खिप्पं गच्छंति अमरभवणाइं । जेसिं पीओ तवो संजमो अ, खंती अ बंभचेरं च ॥१४८॥

भ्रातरौ **हर-हीरौ** तु, मिथः प्रीतिपरायणौ । धर्मकर्माणि चक्राते, प्रजाः कारयतः स्म च ॥१४९॥

यतः –

कर्तुः स्वयं कारयितुः परेण, तुल्येन वित्तेन तथानुमन्तुः ।
साहाय्यकर्तुश्च साहाय्यदानात् तुल्यं फलं तत्त्वविदो वदन्ति ।१५०।

प्रासादानर्हतां सप्त-सहस्त्रीं भूविभूषणम् । कारयामासतुस्तौ तु, कीर्तिस्तम्भाविवाभितः ॥१५१॥

एकस्मिंश्च जिनागारे, स्वर्णभारैश्चतुर्दशैः । **श्रीसम्भवा**र्हतो बिम्बं, स्थापयामासतुश्च तौ ॥१५२॥

मध्याह्ने मुत्कलं गेह-द्वारं मुक्त्वाऽऽशनैर्वरैः । जेमयामासतुस्तौ तु, जनान् लक्षमितान् सदा ॥१५३॥

साधूनां संविभागं तु, विना नात्तः स्म कर्हिचित् । प्रभोः पूजां विना नीरं, न पातः स्म नृपाङ्गजौ ॥१५४॥

यतः –

वंदई पडिपुच्छइ, पज्जुवासेइ य साहुणो सययमेव । पढइ सुणइ गुणेई, जणस्स धम्मं परिकहेइ ॥१५५॥

दढसीलव्वयनियमो, पोसह आवस्सएसु अखलीओ । महुमज्जमंसपंचविहबहुविहफलेसु पडिक्कंतो ॥१५६॥

नाहम्मकम्मजीवी, पच्छक्खाणे अभिक्खमुज्जुतो । सव्वं परिमाणकडं, अवरज्झइ तंपि संकंतो ॥१५७॥

पढमं जईण दाऊण, अप्पणा पणमिऊण पारेइ । असई सुविहीआणं, भुंजेइ य कय दिसालोओ ॥१५८॥
साधूणं कप्पणिज्जं जं, न विदिन्नं कहंपि किंचि तहि । धीरा जहत्तकारी, सुसावगा तं न भुंजंति ॥१५९॥
अन्यदा वैरिणं **भीमसेनं** दुर्दान्तमानसम् । जेतुं **हीरो**ऽचलत् पृष्ट्वा, स्वकीयं वृद्धसोदरम् ॥१६०॥
मार्गेऽचलन् रिपून् जित्वा, भ्रातुराज्ञा जिनस्य च । ग्राहयामास भूयिष्ठ-दण्डग्रहणपूर्वकम् ॥१६१॥
ये ये स्वसोदराज्ञां न, धरन्ते निजमस्तके । तेषां देशान् गृहीत्वा स, तत्रामुञ्चन् निजानुगान् ॥१६२॥
एकदा तटिनीकूले, **हीरो** मध्यंदिने नृपम् । दत्त्वाऽऽवासं कृतस्नानो, जगाद मन्त्रिणं प्रति ॥१६३॥
प्रतिमा श्रीजिनेन्द्रस्य, विद्यते कुत्र साम्प्रतम् । पूज्यते मयका पुष्पैः, प्रवरैर्जिम्यते ततः ॥१६४॥
मन्त्रिणोक्तं जिनेन्द्रस्य, प्रतिमा दृश्यते नहि । न ज्ञायते गतो हृत्वा, कोऽपि यो गतवासरे ॥१६५॥
राजाऽऽचष्ट यदा सैव, लभ्यते प्रतिमार्हतः । तदा मया तु भोक्तव्यं, शयित्वं(तव्यं) शयने तदा ॥१६६॥
विलोकिताऽपि पाश्चात्यप्रयाणकक्षितिर्जनैः । न लब्धा प्रतिमा सा तु, ततः प्रोक्तं च मन्त्रिणा ॥१६७॥
स्वसैन्ये प्रतिमा बह्व्यो, विद्यन्ते श्रीजिनेशितुः । ता एव पूजयित्वाऽऽशु, जिम्यते प्रभुणाऽधुना ॥१६८॥
हीरः प्राहार्चनां तस्याः, प्रतिमाया विधाय च । जिमिष्यते मया नैव, वक्तव्यं भवताऽधिकम् ॥१६९॥
उपवासत्रये जाते, तस्य **हीरस्य** भूपतेः । मस्तके पुष्पवृष्टिं तु, कृत्वा कश्चित्सुरो जगौ ॥१७०॥
तामेव प्रतिमां मुक्त्वा, जगौ जीया महीपते ! । यस्य ते भक्तिरीदृक्षा, विद्यते श्रीजिनेश्वरे ॥१७१॥
मया भवत्परीक्षायै, प्रतिमेयं हृता नृप ! । त्वं तु निर्जरभूमिध्र, इवाचाल्योऽसि निश्चितम् ॥१७२॥
विधायार्चां प्रभोः सद्यः, कुरु पारणकं नृप ! । यतस्ते विद्यते देहं, सुकुमालं क्लमिष्यति ॥१७३॥
राजा प्रोवाच जीवेनामुना बम्भ्रमता भृशम् । भुक्तं भवे भवे भूरि, तृप्तो जातो न कर्हिचित् ॥१७४॥
भक्षितो दिवसान् भूरीन्, प्राप्यान्नं च स संसृतौ । जीवोऽयं मरणं प्राप्तः, ततः किं प्रोच्यते बहु ॥१७५॥
प्रभोरर्थे कदाचिच्च, यान्ति प्राणा अशाश्वताः । तदा किं किं न जायेत, सुखं स्वर्गादिकं नृणाम् ॥१७६॥
यतः —
हिमवंत मलयमंदर दिवोदहि धरणि सरिसराशीओ । अहीययरो आहारो छुहीएणाहारिओ हुज्जा ॥१७७॥
जन्नेण जलं पीअं घम्मायव जगडीएण तंपि इहं । सव्वेसु वि अगडतलाय नइ-समुद्देसु नवि हुज्जा ॥१७८॥
भूपस्य सात्विकीं वाणीं, श्रुत्वा देवो जगावदः । त्वमेव कृतकृत्योऽसि, श्लाघनीयोऽसि चान्वहम् ॥१७९॥
ततः स निर्जरः खड्गमजेयं तस्य भूपतेः । वितीर्य गतवान् स्वीय-स्थानके मुदिताशयः ॥१८०॥
राजाऽथ कुसुमैर्वर्यैर्विस्तरादर्चनं प्रभोः । विधाय भूरिभिः श्राद्धैः, समं जेमितवांस्तदा ॥१८१॥
ततश्चलन् नृपो **भीमसेनं** शत्रुं सुदुर्दमम् । मत्वादौ ज्ञापयामास, स्वागमं तस्य दूततः ॥१८२॥
**भीमसेनो**ऽथ भूपालो, **हीरं** वैरिणमागतम् । ज्ञात्वाऽरुणेक्षणः प्राह, स्वकीयान्सेवकान्प्रति ॥१८३॥
संनह्य त्वरितं यूयं, चलताचलमानसाः । यतः क्षणेन वो हस्तैर्जेष्यते रिपुरेष तु ॥१८४॥
सन्नह्येभतुरङ्गादीन्, **भीमसेनो** महीपतिः । आगत्य नगरोद्याने, स्थित्वाऽचालीत् क्षणात्ततः ॥१८५॥
मार्गे त्वशकुनश्रेणीं, जायमानां पदे पदे । नाजीगणन्महीपालो, **भीमसेनो**ऽरुणेक्षणः ॥१८६॥

यतः –

भस्मरजस्तुषागारगुडतैलखलोपलाः । गुर्विणी तैलदिग्धाङ्गा, नग्नमुण्डा रजस्वला ॥१८७॥
मुक्तकेशास्थिकर्पासमार्जारोरगवामनाः । रोदनं रुदमानस्य बालकस्य पलायनम् ॥१८८॥
एवंविधान् बहून् वीक्ष्याशकुनौघान् स भूपतिः । निराकृत्य रणं कर्तु, लग्नो **हीरेण** वैरिणा ॥१८९॥
भूपेन **भीमसेनेन**, भग्नं निजं बलं क्षणात् । दृष्ट्वोत्थितः स्वयं **हीरः**, कृत्वार्चां श्रीजिनेशितुः ॥१९०॥
तेनाजयेन खड्गेन, छित्त्वा वैरिशिरः क्षणात् । **हीरो** जयश्रियं प्राप, तादृक्षवैरिभिर्जयात् ॥१९१॥
तस्य देशे स्वकीयस्य, भ्रातुराज्ञां प्रवर्तयन् । तत्र स्वसेवकान् मुक्त्वा, **हीरः** पश्चादथाचलत् ॥१९२॥
सर्वान्शत्रून्क्रमाज्जित्वा, **हीरः** कुर्वन् जिनार्चनाम् । समेत्य स्वपुरे भ्रातु-श्चरणावनमन्मुदा ॥१९३॥
**हर-हीरौ** ततो भक्त्या, पूजयन्तौ जिनेश्वरौ(रम्) । दृष्ट्वा विशेषतो भृत्याः, कुर्वते स्म जिनार्चनाम् ॥१९४॥
राज्यभारं क्रमात् स्व स्व-तनयोर्वृद्धयोः खलु । दत्त्वा दीक्षां गुरूपान्ते, ललतुर्लसदाशयैः ॥१९५॥
गुरूदितां क्रियां शुद्धां, शिक्षयन्तौ तु सोदरौ । पालयामासतुः सम्यग्-चारित्रं शिवशर्मदम् ॥१९६॥
चन्द्रदेवस्य रत्नस्य, जीवौ **हर-हीरौ** यती । तपस्यन्तौ तपस्तीव्रं, केवलज्ञानमापतुः ॥१९७॥
पृथक् पृथक् विहारं तौ, कुर्वाणौ भविनो बहून् । प्रबोध्यायुःक्षयान्मुक्ति-नगर्यां समुपेयतुः ॥१९८॥

**॥ इति प्रभोः पूजाविषये धनदेव-देवपाल-चन्द्रदेवादि-कथाः ॥**

आकर्ण्येति जिनप्रोक्तं, धर्मं श्री**अर**सन्निधौ । **वीरचन्द्र**नृपः श्राद्ध-धर्मं गृहीतवान् मुदा ॥१९९॥
धर्मं श्रुण्वन् सदा जैनं, वैराग्यवासिताशयः राज्ये न्यस्य सुतं दीक्षां, लला**वर**जिनान्तिके ॥२००॥
पालयंश्चरणं शुद्धं, तथेर्यापथिकां स च । प्रतिक्रमन् क्षणादाप, ज्ञानं पञ्चमकं ध्रुवम् ॥२०१॥
अन्यदा **पद्मिनीखण्डपत्तने** स्वःपुरोपमे । **ईशानचन्द्र**भूपालपालिते न्यायवर्त्मना ॥२०२॥
प्रबोधयन् जनान् स्वामी, श्री**अरो**ऽभ्येत्य तत्र तु । व्याख्यां प्रथमपौरुष्यां, चकार गणभृद्युतः ॥२०३॥
अथ द्वितीयपौरुष्यां, **कुम्भनामा** गणाधिपः । धर्मोपदेशनां कर्तुमुपविष्टः शुभाशयः ॥२०४॥

उक्तं च –

खेअविणोओसीसगुणदीवणा पच्चओ भयओवि । सीसारिअकमोवी अ गणहरकहणे गुणा हुंति ॥२०५॥
राउवणीए सीहासणे निविट्ठो व पायपीढंमि । जिट्ठो अन्नयरो वा गणहारि कहेइ बीआए ॥२०६॥
ये जीवा कुर्वते पापं, स्वकुटुम्बकृते खलु । तत्फलं श्रयते श्वभ्रे, तीव्रदुःखादिलब्धितः ॥२०७॥यतः –
हसन्तो हेलया कर्म, न कुर्वन्ति प्रमादिनः । जन्मान्तरशतैरेते, शोचन्तेऽनुभवन्ति च ॥२०८॥
संसारम्मि असारे, नत्थि सुहं वाहिवेअणापउरे । जाणंतो इह जीवो, न कुणइ जिणदेसीअं धम्मं ॥२०९॥
पुरुषः कुरुते पापं, बन्धुनिमित्तं वपुर्निमितं च । वेदयते तत्सर्वं, नरकादौ पुनरसावेकः ॥२१०॥
श्रुत्वेति देशनां धर्मसत्कां **सागरदत्तकः** । श्रेष्ठी तत्र स्थितं कुब्जं, वीक्ष्यावग् गच्छपं प्रति ॥२११॥
अस्मिन् दुःखशताकीर्णे, भवे मम विशेषतः । सुखलेशोऽस्ति नो चिन्तावारिधौ पतितस्य हि ॥२१२॥
अस्ति रूपवती पुत्री, ममेह **प्रियदर्शना** । तस्यास्तुल्यो वरः क्वापि, नेक्ष्यते विज्ञवादिभिः ॥२१३॥
अतः सत्यपि भूयिष्ठे, धने तादृग्वरे वरम् । **अनवीक्ष्या**भवद् दुःखं, मम प्राणापहारकम् ॥२१४॥

यत: –

जंमंतीए सोगो, वड्ढंतीए वड्ढए चिन्ता । परिणीयाए दंडो, जुवइपिआ दुक्खिओ निच्चा ॥२१५॥ इत्यादि ॥
**ताम्रलिप्तीपुरो**ऽन्येद्युः, श्रेष्ठी **ऋषभदत्तकः** । धर्मिष्ठो मे गृहे चागात्, प्रीतिश्चासीद् द्वयोः पुनः ॥२१६॥
श्रेष्ठी कुर्वन् ममावासे, भोजनं **प्रियदर्शनाम्** । वीक्ष्याप्राक्षीत् कनी कस्य, विद्यतेऽथाहमब्रवम् ॥२१७॥
श्रेष्ठिंश्चिरं कनी केन, हेतुनेयं निरीक्षिता । प्रोवाच**र्षभदत्तो**ऽथ, **वीरभद्रो**ऽस्ति मेऽङ्गजः ॥२१८॥
रूपेण विजितो मारः, काव्यशक्त्या जितः कविः । चातुर्येण जितो देव-गुरुर्मे सूनुना ध्रुवम् ॥२१९॥
मन्त्र-तन्त्र-कलाः शिष्टा, या याः सन्ति महीतले । तास्ताः सर्वाः समायाता-स्तस्य सूनोर्ममाचिरात् ॥२२०॥
मत्सूनोर्भवतः पुत्र्या, संयोगो यदि जायते । तदा विधिर्विनिर्माता, श्लाघ्यतां समुपैति हि ॥२२१॥
मयोक्तं यदि ते पुत्रः, समेत्यत्र पुरे ध्रुवम् । तदा तं वीक्ष्य दास्येऽहं, पुत्रं तस्मै सदुत्सवम् ॥२२२॥
ततः श्रेष्ठी समेत्य स्व-पुरे स्वं नन्दनं द्रुतम् । अनैषीदत्र तस्मै तु, पुत्री दत्ता मयोत्सवात् ॥२२३॥
वरान्नपानसद्वस्त्रैः, श्रेष्ठी गौरवितो भृशम् । सपुत्रः स्वां स्नुषां लात्वा, स्वपुर्यां समुपेयिवान् ॥२२४॥
कतिष्वहःसु यातेषु, वार्तां दुःखप्रदामहम् । अश्रौषमिति कस्यास्या**द्वीरभद्रः** सुतापतिः ॥२२५॥
स्वावासे गेहिनीं सुप्तां, कुतो हेतोर्विमुच्यताम् । निशीथसमये **वीरभद्रः** क्वचित्समीयिवान् ॥२२६॥युग्मम् ॥
तत**श्चर्षभदत्तेन**, मयापि जनप्रेषणैः । **वीरभद्रो** नहि ज्ञात-स्ततोऽहं दुःखितो भृशम् ॥२२७॥
अधुना कोऽपि कुब्जो ना, **वीरभद्र**स्थितिं वदन् । स्फुटं नो वक्ति तेन त्वं, सन्देहं भिन्धि मे द्रुतम् ॥२२८॥
एवं **सागरदत्तेन**, पृष्टः **कुम्भो** गणी जगौ । एकदा निशि जामाता, **वीरभद्रो** व्यचिन्तयत् ॥२२९॥
मन्त्रसिद्धाः कलाः सर्वा-स्तन्त्र-यन्त्राश्च भूरिशः । समायान्ति न कस्यापि, शक्या दर्शयितुं न च ॥२३०॥
देशाभ्रमणतः कूपभेकतुल्योऽस्म्यहं ध्रुवम् । गत्वाऽन्यत्र कलाः सर्वा, दर्शयिष्ये नृपादिषु ॥२३१॥
ध्यात्वेति स प्रियां सुप्तां, समुदस्थापयत् शनैः । सा पत्न्यवक् शिरोर्तिर्मे, कदर्थयसि किं प्रिय ! ॥२३२॥
**वीरभद्रो** जगौ कस्माद्दोषाच्छिरोर्तिरस्ति ते । पत्न्यवक् तव दोषेण, सोऽवग् दोषोऽस्ति को मम ॥२३३॥
प्रियावग् यन्न वैदग्ध्यवाक् कदापि तवेक्ष्यते । सोऽप्याह मा कुपः कान्ते !, करिष्ये नेदृशं पुनः ॥२३४॥
साभिप्रायं वचः प्रोच्य, **वीरभद्रः** प्रियां च ताम् । रमयामास वक्रोक्ति-जल्पनादधिकं तदा ॥२३५॥
निद्राणां गेहिनीं मत्वा, देशवीक्षणहेतवे । **वीरभद्रो**ऽचलद्रात्रावेककः स्वनिकेतनात् ॥२३६॥
गुटिकानां प्रयोगेण, श्यामवर्णं वपुर्निजम् । कुर्वन् कुब्जादिरूपेण, कलाः स स्वा अदर्शयत् ॥२३७॥
ग्रामे पुरे पुरे ग्रामे, स स्वाः कलाः प्रदर्शयन् । विद्याधर इव ज्ञातो, न केनापि सुतापतिः ॥२३८॥
इतः पतिं गतं मत्वा, रुदित्वा सा चिरं पुनः । सखीत्याजितशुक् जाता, कालेन **प्रियदर्शना** ॥२३९॥
श्वशुरावित आपृच्छ्य, त्वत्पुत्री **प्रियदर्शना** । आगात् त्वत्सदने कान्तं, विना वासः पितुर्गृहे ॥२४०॥
**वीरभद्रो** भ्रमन् द्वीपे, **सिंहले**ऽथ गतः क्रमात् । तत्र **रत्नपुरे** रत्नाकरभूपपतौ ययौ ॥२४१॥
हट्टवीथ्यां व्रजन् **शङ्ख**-श्रेष्ठिनोऽट्टे न्यवीविशत् । **वीरभद्रो** यदा तावच्छ्रेष्ठ्याह कुत आगतः ? ॥२४२॥
**वीरभद्रो**ऽवदत् **ताम्रलिप्त्याः** पुर्याः पितुर्गृहात् । निर्गत्य देशवीक्षार्थ-मिहागां च तवापणे ॥२४३॥
श्रेष्ठ्याचष्ट कुमार ! त्वं सुकुमालो निरीक्ष्यसे । विदेशाः कर्कशाः सन्ति, शिशूनां शैशवे सति ॥२४४॥

इत्युक्त्वा स्वगृहे नीत्वा, भोजयित्वा वराशनैः । अपुत्रः श्रेष्ठिराट् **शङ्खः**, पुत्रस्थाने चकार तम् ॥२४५॥
ततः **शङ्ख**गृहे तिष्ठन्, सुखं पुत्रतया तदा । पौरान् व्यस्मापयत् स्वीय-कलाभि**र्वीरभद्रकः** ॥२४६॥
**शङ्खस्य** श्रेष्ठिनः पुत्री, **विनय**श्रीर्मनोहरा । यान्ती क्वचिद् गृहे पृष्टा, **वीरभद्रेण** तत्क्षणम् ॥२४७॥
गमिष्यसि स्वसः कुत्रेत्युक्ते सा श्रेष्ठिसूर्जगौ । **रत्नाकरनृप**स्यास्ति, तनूजा**ऽनङ्गसुन्दरी** ॥२४८॥
रूपनिर्जितकन्दर्प-प्रिया सौन्दर्यशालिनी । पुरुषद्वेषिणी पाणिग्रहकृत्यपराङ्मुखी ॥२४९॥ युग्मम् ॥
तस्याः पार्श्वे समेत्याहं, स्नेहात्प्रतिदिनं मिथः । मानसं रञ्जयामास, विनोदवर्धनादिभिः ॥२५०॥
वीणाया वादनेऽतीव, कुशला विद्यते च सा । वीणाविदि वरे तस्या, मनस्तिष्ठति सन्ततम् ॥२५१॥
**वीरभद्रो** जगौ तर्हि, स्वस्रा सार्धमहं पुनः । राजपुत्र्याः समीपे तु, गन्तुमिच्छाऽस्ति(मि) मे(चा) धुना ॥२५२॥
**विनय**श्रीर्जगौ तस्या, बालोऽपि ना न रोचते । अतः [कथं] त्वं मयका, सार्धं तत्रैष्यसि सहोदर ! ॥२५३॥
**वीरभद्रो**ऽवदत् नारी-रूपं कृत्वा त्वया समम् । तत्रैष्यामि सुखं तस्या, वीक्षितुं साम्प्रतं स्वसः ! ॥२५४॥
आगच्छेति तया प्रोक्ते, नारीवेषधरः स च । राजपुत्र्याः समीपे तु, **वीरभद्रः** समागमत् ॥२५५॥
राजाङ्गजा जगौ केयं, नारी कुत इहागमत् ? । श्रेष्ठ्यङ्गजा जगावेषा, स्वसा समस्ति मे सखि ! ॥२५६॥
वर्णकै रुचिरैर्हंसी, फलकेऽतिमनोहरे । लिखिता राजनन्दिन्या, कला दर्शयितुं निजाः ॥२५७॥
**वीरभद्रो**ऽगदत् राजपुत्रि ! हंसी त्वया वरा । आलेखिता परं नेत्रं, वामं न हि वरं कृतम् ॥२५८॥
राजपुत्र्यगदत्तर्हि, एतै रुचिरवर्णकैः । हंसीं मनोहरां पट्टे, आलेखय सखि ! द्रुतम् ॥२५९॥
हंस्या आलेखितं रूपं, निर्दोषं चित्तहर्षदम् । **वीरभद्रेण** वीक्ष्यावग्, राजपुत्री चमत्कृता ॥२६०॥
अहो आलेख्यनैपुण्यमन्तर्भावप्रकाशकम् । अहो अस्याः कलानां तु, लुञ्छनाय भवाम्यहम् ॥२६१॥
येषां रूपाणि यादृंशि, प्रोवाचा**नङ्गसुन्दरी** । तादृंशि सत्वरं तेना-लिखितान्येकहेलया ॥२६२॥
तुष्टाऽथ राजपुत्री स्वं, बहु दत्त्वा जगावदः । अतः परं त्वयाऽत्रैत्यं, श्रेष्ठिराट्सुतया समम् ॥२६३॥
राजपुत्री जगौ किं ते, नामोच्येत सखि ! द्रुतम् । **वीरभद्रो** जगौ **वीरमती**त्याह्वा ममास्ति भोः ॥२६४॥
दिने दिनेऽतिसन्तुष्टा, राजपुत्री धनं बहुम् । प्रददौ **वीरभद्राय**, ततः स हर्षितोऽभवत् ॥२६५॥
**वीरभद्रो** गृहायातो, नरवेषधरः पुनः । भृशं भक्तिं व्यधाच्छ्रेष्ठिपुङ्गवस्य निरन्तरम् ॥२६६॥
**वीरभद्रो**ऽन्यदा**ऽनङ्गसुन्दरीं** सुन्दराकृतिम् । वादयन्तीं च वीणां तामालोक्य प्रोक्तवानिति ॥२६७॥
केशः स्यूतस्तनुश्चास्या, वीणायास्तन्तुमध्यतः । अतो न रुचिरो रावो, वीणाया विद्यते सखि ! ॥२६८॥
राजाङ्गजा जगौ चैवं, भवत्या ज्ञायते कथम् । जगौ **वीरमती** सर्वे, जानामि गुरुभक्तितः ॥२६९॥
ततो वीणां समादायापसार्य तन्त्रिकां पुनः । **वीरभद्रेण** नुर्बालो, राजपुत्र्याः प्रदर्शितः ॥२७०॥
**वीरमत्यां** भृशं प्रीतिं, दधानाऽऽह नृपाङ्गजा । यद्येकत्राऽऽवयोर्यावज्जीवं वासो भवेद् दृढम् ॥२७१॥
तदा मम तवोत्पत्तिः, सफला जायते ननु । प्रयासो विहितो धातुः, सुश्लाघ्यो भवति ध्रुवम् ॥२७२॥
ततो द्वाभ्यां कृता प्रीतिः, स्वस्वहस्तप्रदानतः । जगौ **वीरमती** पुंसि, द्वेषं त्यज सखि ! द्रुतम् ॥२७३॥
यदि चेदावयोश्चारु-कलावान् जायते पतिः । वरणीयस्तदावाभ्यां, नात्र कार्या विचारणा ॥२७४॥
आवाभ्यां व्रियते कान्तो, यदि ते रोचते सखि ! । राजाङ्गजा जगौ मूर्खे, पत्यावेव मृतिर्वरम् ॥२७५॥

केवलैव मणिर्वर्यो, न तु काचाङ्गुलीयगो । नदी रिक्तजला वर्या, न तु यादः समाकुला ॥२७६॥
शून्यैव हि वरा शाला, न तु तस्करपूरिता । अवृक्षैव वरं वाटी, न तु विषद्रुमाकुला ॥२७७॥
अनूढा रुचिरा नारी, रूपयौवनवत्यपि । निष्कुलैन(ना) कुलीनेन, न तु पत्या विडम्बिता ॥२७८॥
आबाल्यान्मयका वर्यकलावान्नेक्षितो नरः । अतो मया कृतः पुंसि, द्वेषः सखि ! सुनिश्चलः ॥२७९॥
जगौ **वीरमती** राजपुत्र्येवं वद माधुना । कलावन्तो नराः सन्ति, यतो रत्नधरा मही ॥२८०॥
यतः –
पदे पदे निधानानि, योजने रसकूपिका । पुण्यहीना न पश्यन्ति, बहुरत्ना वसुंधरा ॥२८१॥
नरारोचकतां चेत्त्वं, त्यक्ष्यसि भोगमीहसे । अनुरूपं वरं सम्पादयिष्याम्यहकं तव ॥२८२॥
भूपपुत्री जगौ भाग्यं, विद्यते चावयोरिदम् । येन सङ्घटते कान्तो, मनोऽभीष्टो महीतले ॥२८३॥
आनेष्यते वरो वर्यकलावान् साम्प्रतं त्वया । वरिष्यामि तदा तं च, तस्याहं किङ्करी पुनः ॥२८४॥
तस्या दृढं मनः कृत्वा, **वीरभद्रो** वराशयः । अदीदृशत् निजं रूपं, मुखे गुटीप्रदानतः ॥२८५॥
महीपालाङ्गजा **वीरभद्रं** पद्माभवोपमम् । दृष्ट्वाऽऽह त्वं पतिर्भूर्यान्ममाथवा **वसुः** पुनः ॥२८६॥
**वीरभद्रो** जगौ नाहं, पित्रनुज्ञां विना किल । कस्या अपि स्त्रियः पाणिग्रहं कुर्वे कदापि च ॥२८७॥
राजपुत्री जगौ चेत्त्वं, मन्यसे न वचो मम । तदा तुभ्यमहं दास्ये, स्वहत्यां शस्त्रघाततः ॥२८८॥
यदा न मन्यते **वीरभद्रस्**तस्या वचो मनाक् । तदा नृपाङ्गजा शस्त्रीं, कुक्षौ क्षेप्तुं समुत्थिता ॥२८९॥
क्षिपन्तीं हृदये शस्त्रीं, राजपुत्रीं करे द्रुतम् । धृत्वा च **वीरभद्रो**ऽवक्, साहसं कुरु माऽबले ! ॥२९०॥
न मे मनोऽस्ति ते पाणिग्रहेऽद्य भूपनन्दिनि ! । प्राणहत्याभयात्किन्तु, करिष्येऽहं वचस्तव ॥२९१॥
ततश्चाधोमुखी राजपुत्री प्रोवाच तं प्रति । कृत्वा यासि छलं चेत् त्वं, तदाऽहकं मृता ध्रुवम् ॥२९२॥
**वीरभद्रो**ऽगदत् **शङ्ख**-श्रेष्ठिनोऽहं सुतास्पदम् । स्थितोऽस्मि साम्प्रतं तेन, तस्यानुज्ञा विलोक्यते ॥२९३॥
नृपपुत्री जगौ तातो, मदीयो मेदिनीपतिः । **शङ्खं** श्रेष्ठिनमाकार्य, तुभ्यं दास्यति मां पुनः ॥२९४॥
एवं सङ्केतमाधाय, **वीरभद्रो** वराशयः । शङ्खश्रेष्ठिगृहे गत्वा, तस्थौ सुस्थितमानसः ॥२९५॥
क्ष्मापपुत्री निजं स्वान्तस्वरूपं पितुरग्रतः । प्रोचे यदा तदा राजा, सकुटुम्बो मुदं व्यधात् ॥२९६॥
भूपोऽथ श्रेष्ठिनं **शङ्खं**, सन्मान्य वचनादिना । **वीरभद्राय** पुत्रीं स्वां, ददौ भूरिधनार्पणात् ॥२९७॥
परस्परं तयोर्भूपनन्दिनी-वीरभद्रयोः । प्रीतिरासीद्यथा लोहे, रेखा वज्रे यथा पुनः ॥२९८॥
जिनधर्मस्वरूपं च, देवादितत्त्वसंयुतम् । प्रोच्य राजसुतां श्राद्धीं, वर्यां **वीरो** व्यधात्तदा ॥२९९॥
यतः –
अंबस्स य निंबस्स य, दुण्हं पि समागयाइं मूलाइं । संसग्गीए विणट्ठो, अंबो निंबत्तणं पत्तो ॥३००॥
उत्तमानां नृणां सङ्गान्नीचा अपि स्युरुत्तमाः । गङ्गामध्यगतं वर्यमशुच्यपि शुचिर्भवेत् ॥३०१॥
सङ्घं चतुर्विधं सार्वप्रतिमासहितं तदा । लिखित्वा सोऽर्पयत्पत्न्या, **वीरो**ऽद्य बोधहेतवे ॥३०२॥
विषमं विद्यते देश-भ्रमणं सर्वदेहिनाम् । महिलानां विशेषेण, दुष्करं भवति ध्रुवम् ॥३०४॥
**अनङ्गसुन्दरी** प्राह, सुखे दुःखेऽपि भो पते ! । त्वत्पार्श्वं नैव मुञ्चामि, विना मृत्युं कदाचन ॥३०५॥

यतः —

प्रीणाति यः सुचरितैः पितरं स पुत्रो, यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं यदेतत् त्रयं जगति पुण्यकृतो लभन्ते ॥३०६॥

आपृच्छ्याथ नृपं **शङ्खं**, श्रेष्ठिनं पितरं पुनः । भूपालदत्तबोहित्थारूढो भूरिधनान्वितः ॥३०७॥

**वीरभद्रः** प्रियायुक्तो, विसृज्य श्वशुरादिकम् । पाथोधिवर्त्मनाऽचालीत्, स्वदेशं प्रति सत्वरम् ॥३०८॥युग्मम् ॥

चलतो यानपात्रस्य, प्रचण्डानिलयोगतः । कल्पान्तकालतुल्याभोऽम्भोधिर्बभूव वीचिभिः ॥३०९॥

क्वचित्पर्वतपाषाणाहतं बोहित्थमञ्जसा । शतखण्डमभूत्तादृक्पानीयनिधिमध्यतः ॥३१०॥

**अनङ्गसुन्दरी** वीच्योच्छाल्यमाना पदे पदे । सम्प्राप्तपट्टिका पञ्चरात्रेणाऽऽपाऽम्बुधेस्तटम् ॥३११॥

मातापितृवियोगेन, विदेशगमनेन च । पत्युश्च विप्रयोगेन, यानभङ्गेन च ध्रुवम् ॥३१२॥

धनक्षयेण तन्वङ्गी, मृतप्रायाऽम्बुधेस्तटे । पतिता वीक्षिताऽ**नङ्गसुन्दरी** तापसाङ्गजैः ॥३१३॥युग्मम् ॥

तापसाः स्वाश्रमे नीत्वा, कृत्वा सचेतनां च ताम् । विधाय भगिनीं सद्यः, स्थापयामासुरादरात् ॥३१४॥

तापसीभिः समं शश्वत्, तिष्ठन्त्य**नङ्गसुन्दरी** । तस्थौ कर्म निजं चित्ते, स्मरन्ती तापसाश्रमे ॥३१५॥

यतः —

अन्यदा तापसो वृद्धः, प्राह भूपाङ्गजां प्रति । इतश्चासन्नमस्त्येव, **पद्मिनीखण्ड**पत्तनम् ॥३१६॥

तत्र सन्ति जनाः प्रायः, सकृपाः सधनाः पुनः । सदाचाराः सुशीलाश्च, धर्मकर्मणि कर्मठाः ॥३१७॥

गच्छ वत्से ! द्रुतं तत्र, स्वास्थ्यमुत्पद्यते तव । अवश्यं तत्र तिष्ठन्त्या, भर्तृयोगो भविष्यति ॥३१८॥

एवं प्रोच्य कुलाधीशो, जरत्तापसपार्श्वतः । मोचयामास तां तत्र, **पद्मिनीखण्ड**सन्निधौ ॥३१९॥

**अनङ्गसुन्दरी** तत्र, तिष्ठन्ती व्याकुलाशया । वपुश्चिन्तार्थमायान्तीं, व्रतिनीभिः परावृताम् ॥३२०॥

शान्तचित्तामधोवक्त्रं, पश्यन्तीं धरणीतलम् । गणिनीं **सुव्रतां** नाम्नीं, पश्यति स्म प्रसूमिव ॥३२१॥युग्मम् ॥

अस्मार्षीच्च पदे तास्ताः, पत्या मम स्वपाणिना । निष्पापा जगतीवन्द्या, लिखित्वा दर्शिताः पटे ॥३२२॥

संस्मृत्येति वचः पत्युर**नङ्गसुन्दरी** तदा । **सुव्रता**गणिनीपादौ, ववन्दे व्रतिनीः पुनः ॥३२३॥

दृष्ट्वा पुण्यवतीं तां च, धर्माशीर्वादपूर्वकम् । रञ्जयामास गणिनी, **सुव्रता** मधुरध्वनिः ॥३२४॥

**अनङ्गसुन्दरी** प्राह, मातर्वन्दस्व मद्गिरा । सिंहलद्वीपचैत्यानि, **सुव्रते !** त्वं महाव्रते ! ॥३२५॥

पप्रच्छ **सुव्रता**ऽगास्त्वं, **सिंहलद्वीपतः** किमु । कथं चैकाकिनी पुण्यवति ! सम्प्रति वीक्ष्यसे ॥३२६॥

कथयिष्याम्यहं स्वस्था, स्वं स्वरूपं च **सुव्रते** ! । इत्युक्ते च तया साध्वी, तद्युक्ताऽऽगान्निजालयम् ॥३२७॥

वन्दमाना लसद्भक्त्या, साध्वीः सर्वाश्च सा तदा । **प्रियदर्शनया** पुत्र्या, तदा तत्र निरीक्षिता ॥३२८॥

**अनङ्गसुन्दरी** पृष्टा, साध्व्या **सुव्रतया** तदा । **प्रियदर्शनया** चापि, नामस्थानादिकं समम् ॥३२९॥

स्वरूपं स्वपितुः पत्यु-**वीरभद्रस्य** च क्रमात् । **सुव्रता**वीक्षणप्रान्तं, साऽऽख्यद् वृत्तान्तमात्मजम् ॥३३०॥

**प्रियदर्शन**योचे सा, **वीरभद्रस्य** कीदृशम् । देहवर्णकलाद्यं तु, विद्यते तव सुन्दरि ! ॥३३१॥

**अनङ्गसुन्दरी** प्राह, श्यामाङ्गो विद्यते स च । **प्रियदर्शनया** प्रोचे, विसंवदति ते वचः ॥३३२॥

**सुव्रतो**वाच ते धर्म-स्वसेयं **प्रियदर्शना** । वत्से ! तिष्ठानया सार्धं, धर्मानुष्ठानतत्परा ॥३३३॥

एवं **सुव्रतया** प्रोक्ता, **प्रियदर्शनया** तया । वितीर्णात्यन्तवात्सल्या-ऽस्थात्तत्रा**नङ्गसुन्दरी** ॥३३४॥

यतः –

विहलं जो अवलंबइ, आवइ पडीअं च जो समुद्धरइ । सरणागयं च रक्खइ, तिसु तेसु अलंकिआ पुहवी ॥३३५॥
अकृतज्ञा असङ्ख्याताः, सङ्ख्याताः कृतवेदिनः । कृतोपकारिणः स्तोका, द्वित्रास्तेनोपकारिणः ॥३३६॥
भूभुक्सागरदत्ताङ्गभवे पुत्र्यौ च जामिवत् । **अनङ्गसुन्दरी-प्रियदर्शने** प्रीतिसुन्दरे ॥३३७॥
**सुव्रता**गणिनीपार्श्वे, धर्मध्यानैक-मानसे । तिष्ठन्त्यौ सर्वसाध्वीनां, वैयावृत्त्यं वितन्वतः ॥३३८॥युग्मम् ॥
भिक्षार्थमथ यातासु, व्रतिनीषु कदाचन । **सुव्रतो**पाश्रयद्वारे, शुश्राव रुदितध्वनिम् ॥३३९॥
शब्दानुसारतस्तत्र, गत्वा दृष्ट्वा स्त्रियं पुनः । पप्रच्छ **सुव्रता** कस्मा-द्धेतोस्त्वयाऽत्र रुद्यते ॥३४०॥
नारी प्राहाधुना पत्या-समं विद्याधराङ्गजा । **रत्नप्रभा**ऽभिधाऽत्राऽऽगां, वैताढ्यात्पर्वताद् ध्रुवम् ॥३४१॥
मुक्त्वा मामत्र सर्वज्ञ-पूजां चिकीर्षुरञ्जसा । ययावन्यैः खगैः सार्धं, सोऽद्यापि नैति **सुव्रते** ! ॥३४२॥
मां विना नैकमुहूर्तं, तिष्ठति प्राणवल्लभः । बहुवेला गतानेन, रुदिष्यामि सुसंयते ! ॥३४३॥
पत्या विनापि मे चेतः, कातरं समजायत । प्राणा अपि क्षणं स्थातुं, न तिष्ठन्ति करोमि किम् ॥३४४॥
**सुव्रता**ऽवक् कुरुष्व त्वं, मा दुःखं मा भयं पुनः । यावदेति पतिस्ते तु, तावत्तिष्ठान्तिके मम ॥३४५॥
गणिन्या जल्पितैवं सा, प्रविश्य धर्मसद्मनि । तयोस्त्रियोस्तृतीयाऽभू-त्सखी साधर्मिकी तदा ॥३४६॥
**प्रियदर्शनयाऽनङ्गसुन्दर्या** चोक्तमन्यदा । **रत्नप्रभे** ! पतिः कीदृग्, भवत्या विद्यते वद ॥३४७॥
**रत्नाप्रभा**ऽऽह गौराङ्गो, **बुद्धदासाभिधो** मम । सिंहलद्वीपवास्तव्यः, कलावान् विद्यते पतिः ॥३४८॥
प्रियदर्शनयोचेऽथ, स एव मे पतिर्ननु । सिंहलवासिना **बुद्धदासाह्वेन** श्रुते क्वचित् ॥३४९॥
**अनङ्गसुन्दरी** प्राह, वर्णः सिंहलवासिना । **बुद्धदासाऽभिधा** चेति, विसंवदति मत्पतेः ॥३५०॥
सोदर्य इव तास्तिस्र-स्तपःकरणतत्पराः । अकुर्वन्त्यो नरोदन्तं, तस्थुस्तस्मिन् प्रतिश्रये ॥३५१॥
राज्ञ **ईशानचन्द्रस्य**, सभायामन्यदोदितम् । नरेण केनचित्पुर्यामस्यां शृण्वति भूपतौ ॥३५२॥
**सुव्रता**गणिनी पार्श्वे, तिस्रो नार्यो मनोहराः । सतीमतल्लिका धर्मपरा एत्य कुतः श्रिताः ॥३५३॥
उपाश्रयेऽवतिष्ठन्त्यो, मौनं चक्रुर्निरन्तरम् । केनापि जल्पितुं शक्तास्ता एव विदुषा मनाक् ॥३५४॥
राज्ञोक्तं विद्यते कोऽत्र, विज्ञो यः सुकलाम्बुधिः । ताः कन्याः जल्पयेच्चाथ, पुमानेको जगौ तदा ॥३५५॥
सभायां यस्तवक्रीडापात्रं वामनमानवः । विद्यते स हसत्येव, तासां मौनावलम्बने ॥३५६॥
ततो राज्ञा समाकार्य, वामनो जल्पितस्त्विति । **सुव्रतो**पाश्रये नार्यस्तिस्रो मौनाश्रिताः स्थिताः ॥३५७॥
ता एव जल्पयेः सद्यः, कथादिकथनादिना । वामनोऽवक् प्रभुप्रोक्तं, मया करिष्यते द्रुतम् ॥३५८॥
कतिचिन्मानवैर्युक्तो, वामनः **सुव्रता**श्रये । गच्छन्नशिक्षयत् पार्श्वस्थितान्नरानिति स्फुटम् ॥३५९॥
मयि तत्र स्थिते सद्यः, प्रष्टव्यं भवता ध्रुवम् । ताः कथाः कथयेदानीं याभिर्जल्पन्ति योषितः ॥३६०॥
गत्वाऽथ वामनस्तत्र, वन्दित्वा यतिनीः समाः । कथाः कथयितुं तस्थौ, चमत्कारकरीः पुनः ॥३६१॥
भूभुक्पुमान् जगौ कल्य [जल्प], ताः कथा वामनाधुना । याभिरेताः स्त्रियो मौनं, विमुञ्चन्ति स्म सत्वरम् ॥३६२॥
साध्वीषु तासु नारीषु, शृण्वतीषु कृतादरम् । वामनो वर्तमानं तु, जगादेति कथानकम् ॥३६३॥
**ताम्रलिप्त्याः** पुरः श्रेष्ठी, नाम्ना **ऋषभदत्तकः** । वणिज्यायै गतोऽन्येद्युः, **पद्मिनीखण्ड**पत्तने ॥३६४॥

पुत्रीं **सागरदत्तस्य**, तत्रैक्ष्य **प्रियदर्शनाम्** । **वीरभद्रेण** पुत्रेण, स्वेनोदवाहयत्स च ॥३६५॥
निजौकःस्थेऽन्यदा रात्रौ, प्रसुप्तां **प्रियदर्शनाम्** । उत्थाप्य कथयामास, कथं निद्रासि हे प्रिये ! ॥३६६॥
पत्नी प्राह पते ! किं त्वं, कदर्थयसि मामिह । शिरोर्त्तिर्मे भृशं जाता, दोषो न तव साम्प्रतम् ॥३६७॥
यतो निद्राभरादेवेदानीं त्वया पते ! द्रुतम् । उत्थापिताऽस्म्यहं तेन, शिरोर्त्तिरभवन्मम ॥३६८॥
पुनर्नैव करिष्यामीत्युक्त्वा सोऽरमयच्च ताम् । पुनः सुप्तां प्रियां मुक्त्वा, विदेशं तत्पतिर्गतः ॥३६९॥
आख्यायेति कथां प्राह, वामनोऽथ प्रयाम्यहम् । कार्यं राजकुले मेऽस्ति, समुत्तस्थौ ततः स च ॥३७०॥
मुक्त्वा मौनं तदा सद्यः, **प्रियदर्शनयो**दितम् । **वीरभद्रः** क्व यातोऽस्ति, कथां वदाग्रतः पुनः ॥३७१॥
वामनोऽथ जगौ नाऽहं, परस्त्रिया समं क्वचित् । आलापनं करिष्यामि, कलङ्कभयतः स्फुटम् ॥३७२॥
**प्रियदर्शनया** प्रोचे, जल्पनेन कुलं तव । उत्कृष्टं ज्ञातमेवेह, प्रजल्प त्वं यथारुचि ॥३७३॥
अग्रतः कथयिष्यामि, कथां कल्ये सुशीलिनि ! । प्रोच्येति वामनो भूपं, रञ्जयामास सूक्तिभिः ॥३७४॥

**॥ इति प्रियदर्शनापत्नीजल्पनसम्बन्धः ॥**

द्वितीयेऽह्नि पुनर्गत्वा, **सुव्रतायाः** प्रतिश्रये । वामनः कथयामास, कथामेवं तदग्रतः ॥३७५॥
ताम्रलिप्त्याः पुरो **वीरभद्रो** निर्याय वर्त्मनि । गच्छन् गुटिकया कृष्णदेहोऽजनिष्ट भक्षणात् ॥३७६॥
गत्वाऽथ **सिंहलद्वीपे**, पुरे **रत्नपुरा**भिधे । **वीरभद्रो** गतो हट्टे, **शङ्खस्य** श्रेष्ठिनः क्रमात् ॥३७७॥
**शङ्खस्त**मुत्तमं ज्ञात्वा, नीत्वा स्वीयनिकेतने । सन्मानदानतः पुत्रस्थाने चास्थापयत्तदा ॥३७८॥
श्रेष्ठिपुत्र्याऽन्यदा **विनयवत्या** सह नृपालये । नारीवेषधरो **वीरभद्रः**[स]समुपेयिवान् ॥३७९॥
**अनङ्गसुन्दरी** राजपुत्री तेनातिरञ्जिता । पितुः साक्ष्यं वरं **वीरभद्रं** वव्रे सदुत्सवम् ॥३८०॥
तत्र स्थित्वा कियत्कालं **वीरभद्रः** प्रियान्वितः । आपृच्छ्य श्वशुरं यानारूढोऽचालीज्जलाध्वना ॥३८१॥
गच्छतो **वीरभद्रस्य**, भग्नं यानं गिरौ हतम् । इत्युक्त्वा वामनः प्राह, गमिष्यामि नृपालये ॥३८२॥
विद्यते राजकार्यं मे, राजकार्यक्रमं विना । लभ्यते भोजनं नैव, सेवकै रुचिरैरपि ॥३८३॥
ततश्चा**नङ्गसुन्दर्या**, मुक्त्वा मौनं प्रजल्पितम् । क्वाऽधुना **वीरभद्रो**ऽस्ति, जल्प्यतामग्रतस्त्वया ॥३८४॥
कल्येऽग्रतो गदिष्यामीत्युक्त्वा सोऽगान्नृपालये । ज्ञाते तस्मिंश्च वृत्तान्ते, हृष्टो राजाऽभवत्तमाम् ॥३८५॥

**॥ इति अनङ्गसुन्दरीमौनमोचनसम्बन्धः ॥**

तृतीयेऽह्नि पुनः प्रात-र्गत्वा स वामनो नरः । यावत्तस्थौ तदा ताभ्यां, प्रोक्तं जल्पाग्रतः कथाम् ॥३८६॥
वामनः प्रोक्तवान् याने, भग्ने स **वीरभद्रकः** । एकं फलकमासाद्य, चचालाम्भोधिवर्त्मनि ॥३८७॥
तं तथा यान्तमालोक्य, विद्याभृद्**रतिवल्लभः** । सप्तमेऽहनि वैताढ्ये, निन्ये निजपुरे द्रुतम् ॥३८८॥
स खगोऽपुत्रकस्तं च, पुत्रस्थाने मनोहरम् । अस्थापयत्ततोऽतीव, **वीरभद्रो**ऽभवत्सुखी ॥३८९॥
विद्याभृता स पृष्टोऽब्धि-पातोदन्तमशेषतः । आत्मनः सकलत्रस्य, प्रोच्येति स जगौ पुनः ॥३९०॥
अहं त्वयाम्बुधेः पातादत्रानीतोऽस्मि साम्प्रतम् । सा**ऽनङ्गसुन्दरी** पत्नी, जीवत्यथ मृताऽथवा ॥३९१॥
ज्ञात्वाद्याभोगिनीविद्याबलात्स खग ऊचिवान् । गेहिन्यौ भवता**ऽनङ्गसुन्दरी-प्रियदर्शने** ॥३९२॥
**पद्मिनीखण्डपुर्यां** तु, **सुव्रतायाः** प्रतिश्रये । धर्मध्यानपरे विज्ञे, भगिन्याविव च स्थिते ॥३९३॥युग्मम् ॥

पत्योर्द्वयोः शुभोदन्तं, श्रुत्वा स **वीरभद्रकः** । गुटिकाकर्षणादास्यात्, गौराङ्गोऽजनि तत्क्षणात् ॥३९४॥
वज्रवेगाप्रियाकुक्षिभवां **रत्नप्रभा**ऽभिधाम् । पुत्रीं प्रदत्तवांस्तस्मै, खगामी **रतिवल्लभः** ॥३९५॥
**बुद्धदासे**ति नाम स्वं, जल्पयामास तत्र सः । सुखं वैषयिकं सोऽथ, भुङ्क्ते स्म प्रियया समम् ॥३९६॥
**वीरभद्रो**ऽन्यदा विद्याधरैः सार्धं प्रियायुतः । तत्र शाश्वतचैत्यानि, ववन्दे भक्तिपूरितः ॥३९७॥
**वीरभद्रः** सपत्नीको, नृत्यं कृत्वा प्रभोः पुरः । परीक्षार्थं जगौ पत्न्याः, पुरस्तादिति सादरम् ॥३९८॥
अस्मत्कुले समस्त्येव, **बुद्धदेवो** महामनाः । चल्यतां वन्द्यते भक्त्या, स एव च त्वया सह ॥३९९॥
**रत्नप्रभा** जगौ देवात्, रागाद्यरिविवर्जितात् । न विद्यते परो देवो, मुक्तिभुक्तिप्रदायकः ॥४००॥
यतः –
सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः । यथास्थितार्थवादी च, देवोऽर्हन्परमेश्वरः ॥४०१॥
ये स्त्रीशस्त्राक्षसूत्रादिरागाद्यङ्ककलङ्किताः । निग्रहानुग्रहपरास्ते देवाः स्युर्न मुक्तये ॥४०२॥
नाट्याट्टहाससङ्गीताद्युपप्लवविसंस्थुलाः । लम्भयेयुः पदं शान्तं, प्रपन्नान् प्राणिनः कथम् ? ॥४०३॥
बुद्ध-ब्रह्मादयो देवाः, संसाराब्धिप्रपातिनः । रागद्वेषादिभिर्युक्ता, वद्यन्ते न कदाचन ॥४०४॥
सर्वज्ञधर्मसंसक्तां, पत्नीं धर्मिष्ठमानसाम् । विज्ञाय **वीरभद्रो**ऽथ, मेने कल्पलतामिव ॥४०५॥
तत्र स्थित्वा कियत्कालं, निशाशेषेऽन्यदोत्थितः । **रत्नप्रभां** प्रति प्राह, वन्दिताः शाश्वता जिनाः ॥४०६॥
दक्षिणे भरतार्धेऽथ, विद्यन्ते जिननायकाः । इत्युक्त्वा प्रेयसीयुक्तो, **वीरभद्रो**ऽचलत्ततः ॥४०७॥
वन्दमानो जिनान्वर्ये, **पद्मिनीखण्ड**पत्तने । स ययौ **सुव्रता**साध्वी-प्रतिश्रयस्य सन्निधौ ॥४०८॥
तत्र स्थित्वा क्षणं **वीरभद्रः** प्राह प्रियां प्रति । स्थेयं त्वयाऽत्र गत्वाऽहं, यावदायामि कार्यकृत् ॥४०९॥
इत्युक्त्वा सोऽल्पिकां पृथ्वीं, गत्वा पत्नीपरीक्षणम् । कर्तुकामः स्थितो राजकीयः स्पश[१] इव ध्रुवम् ॥४१०॥
मिषं कृत्वा गतं कान्तं, ज्ञात्वा तां रुदतीं भृशम् । सम्बोध्य सूक्तिभिर्निन्ये, गणिनी स्वप्रतिश्रये ॥४११॥
प्रियाचेष्टितमालोक्य, **वीरभद्र**स्ततोऽचलत् । इत्युक्त्वा वामनो यावदुत्तस्थाविति ता जगुः ॥४१२॥
भद्र ! त्वं ज्ञानवानेव, विद्यसे सत्यजल्पनात् । साम्प्रतं **वीरभद्रः** स, पवित्रयति कां भुवम् ॥४१३॥
आख्यास्याम्यग्रतः प्रातरित्युक्त्वा वामनो गतः । एकं पतिं च विज्ञाय, तिस्रोऽपि रुरुदुः स्त्रियः ॥४१४॥

**॥ इति रत्नप्रभापत्नीसम्बन्धः ॥**

वामनस्ताः स्त्रियस्तिस्रो, जल्पयित्वोत्थितस्ततः । **ईशानचन्द्र**भूपालात्सम्प्राप पारितोषिकम् ॥४१५॥
ततः स वामनो व्याख्यां, श्रोतुमस्मिन् सभान्तरे । आगतोऽस्त्यधुना श्रेष्ठिन् !, इति सम्यग् निरीक्ष्यताम् ॥४१६॥
तवैष स सुताकान्तः, पत्नीनां चरितं स्फुटम् । पश्यन्वामनरूपेण, क्रीडया विरहं व्यधात् ॥४१७॥
एवं **सागरदत्तस्य**, प्रष्टव्यस्योत्तरे सति । दत्ते **कुम्भ**गणेशेन, श्रेष्ठी हृष्टोऽभवद् भृशम् ॥४१८॥
वन्दित्वाऽथ गणाधीशं, **कुम्भं** वामनसंयुतः । श्रेष्ठी **सागरदत्तो**ऽगात्, **सुव्रतायाः** प्रतिश्रयम् ॥४१९॥
तिस्रोऽपि ताः स्त्रियस्तत्रा-ऽऽयातं वामनमानवम् । दृष्ट्वा प्रेक्ष्याग्रतः प्रष्टुमुद्यता अभवंस्तदा ॥४२०॥
स्वरूपं **वीरभद्रस्याग्रतः** पृच्छन्ति ता यदा । तदा **सागरदत्तो**ऽवग्, वामनोऽयं पतिस्तु वः ॥४२१॥

---
१. गुप्तचरः

ताभिश्चोक्तं कथं वो(नो)ऽस्ति पतिरेष पितर्वद । ततः श्रेष्ठी जगौ **कुम्भ**गच्छेशोक्तमशेषतः ॥४२२॥
ततस्ता योषितस्तिस्रो लज्जाऽधोवदनाः स्थिताः । वामनोऽपि निजं रूपं, कृत्वाऽभूद्**वीरभद्रकः** ॥४२३॥
उवाच गणिनी तासां, नारीणां पुरतस्त्विवति । युष्माकं शीलमाहात्म्यात्, कुशली पतिरागतः ॥४२४॥
धर्मप्रभावतोऽवश्यं, चिन्तितं ज्ञा(जा)यते नृणाम् । निर्जरा अपि जायन्ते, वश्याः कल्पद्रुमादयः ॥४२५॥
श्रेष्ठी **सागरदत्तोऽथ, वीरभद्रं** सुतापतिम् । युक्तं ताभिर्गृहीताभिः, सूत्सवं स्वगृहेऽनयत् ॥४२६॥
तदाऽर्हन्तः प्रपूज्यन्ते, चारुपुष्पफलादिभिः । साधवः प्रतिलाभ्यन्ते, शुद्धान्नवसनादिभिः ॥४२७॥
सुसाधर्मिकवात्सल्यं, श्रेष्ठिना विदधे पृथुम् । दीनादिभ्यः प्रदीयेत, दानं सन्मानदानतः ॥४२८॥
**वीरभद्राय** भाग्येन, पूर्वार्जितेन तत्क्षणात् । निधानानि तु जीर्णानि, प्रादुष्कृत्य मही ददौ ॥४२९॥
**वीरभद्रः** प्रियायुक्तः, श्रेष्ठि**सागरदत्तकः** । **सुव्रता** च ययुर्नन्तु**मरनाथ**क्रमाम्बुजम् ॥४३०॥
दत्ते धर्मोपदेशे तु, पप्रच्छ **सुव्रता** प्रभुम् । प्राग्भवे **वीरभद्रः** किं, शुभं कर्माऽर्जयत्तमाम् ॥४३१॥
**अरस्वामी** जगौ रम्ये, प्राग्विदेहे भवादितः । तृतीयेऽहमलां दीक्षां, त्यक्त्वा राज्यं च पुष्कलम् ॥४३२॥
चतुर्मासोपवासान्ते, विहरन्नहकं भुवि । अगां **रत्नपुरे** भिक्षाहेतोर्भ्रमन् गृहे गृहे ॥४३३॥
तत्र मह्यं ददे भिक्षा, **जिनदासेन** भावतः । तेन पुण्येन मृत्वाऽभूद्, **ब्रह्मलोके** सुरो महान् ॥४३४॥
ततश्च्युतोऽभवज्जम्बूद्वीपस्यैरावतक्षितौ । **काम्पील्ये** नगरे पुत्रो, **धने**भ्यस्य **वनाभिधः** ॥४३५॥
तत्र श्रीमान् क्रमाद् भूत्वा, श्राद्धधर्मं प्रपाल्य च । मृत्वा स्वर्गेऽच्युते देवोऽजनिष्ट भासुरद्युतिः ॥४३६॥
ततश्च्युत्वाऽभवद्**वीरभद्रो**ऽसौ श्रेष्ठिनन्दनः । पुण्यानुबन्धिना तेन, पुण्येनाप श्रियं बहुम् ॥४३७॥
**वीरभद्रो** निशम्याह, पुण्यं पुण्यानुबन्धिजम् । यद्येकस्यातिथेर्दानात्फलं वेदृक्प्रजायते ॥४३८॥
तदा मह्यं प्रदेहि त्वं, व्रतानि द्वादशाधुना । एवंविधाः श्रियः पुम्भिर्लभ्यन्ते यैः पदे पदे ॥४३९॥
ततः श्री**अर**तीर्थेशो, द्वादशापि व्रतानि तु । सम्यक्त्वसहितान्यस्मै, **वीरभद्राय** दत्तवान् ॥४४०॥
तथाहि –
अर्हद्देवो गुरुः साधुर्धर्मो जिनेन्द्रभाषितः । अस्तु मे **वीरभद्र**स्य, यावज्जीव**मर**प्रभो ! ॥४४१॥
त्रिविधं त्रिविधेनापि, मिथ्यात्वं तु त्यजाम्यहम् । स्वगेहे जिनगेहे वा, विधाय श्रीजिनार्चनाम् ॥४४२॥
भोक्ष्येऽहं तदभावे तु, प्रणिधाय च तीर्थपम् । कुर्वे जिनालये नैवा-शातनामेककामपि ॥४४३॥
सूक्ष्मबादरजीवेषु, यत्ना कार्या मया सदा । कनी-गो-भूम्यलीकाद्यं, कूट नोच्यं मया क्वचित् ॥४४४॥
लास्यामि नो क्वचिद्द्रव्यं, परकीयं तमोमयम् । शुक्लेधातृणनिध्यादौ, करिष्ये यतनां सदा ॥४४५॥
सुरीं द्विधा त्रिधा नैव, तिरश्चीं न त्रिधैकधा । परिणीतां स्त्रियं नाना, नान्यां देहेन कामये ॥४४६॥
वास्तु क्षेत्रं धनं स्वर्णकुप्यरूप्यान्नसङ्ग्रहाः । चतुष्पाद् द्विपदं चेति, नवधा स्युः परिग्रहे ॥४४७॥
क्षेत्राणां द्विशती ह्येकशतं च सद्मनां पुनः । हट्टानां वाटिकानां च, मुत्कलं शतपञ्चकम् ॥४४८॥
धनं चतुर्धा पूगाद्यं, गुण्यं धार्यं गुडादिकम् । परिच्छेद्यं तु वस्त्राद्यं, मेयं जीरादिकं तथा ॥४४९॥
उक्तं च –
कोटीलक्षं धने स्वर्णे, रूप्ये कूप्ये च सन्ततम् । धान्ये मूटसहस्रे द्वे, नियमो मे तिलसङ्ग्रहे ॥४५०॥

स्नेहे घटसहस्रं तु, रथानां शतपञ्चकम् । चतुष्पदास्त्रयस्त्रिंशत्, सहस्राणि प्रियात्रयम् ॥४५१॥
पुरादितश्चतुर्दिक्षु, योजनानां शताष्टकम् । ऊर्द्धं द्वियोजनेऽधस्तात्, कोशमेकं व्रजाम्यहम् ॥४५२॥
मद्ये मांसे तथा क्षौद्रे, नवनीते त्वभिग्रहः । वृन्ताकफलमज्ञातफलान्यपि त्यजाम्यहम् ॥४५३॥
रजनीभोजनक्ष्वेडं, धान्यं चलितमेव च । हिमं च करकाश्चापि, त्यजामि सर्वथाऽहकम् ॥४५४॥
इत्यादि नियमाः सन्तु, बहवो मम सद्गुरो ! । सावद्यं वचनं त्याज्यं, सततं मयका पुनः ॥४५५॥
एवं प्रभोः पुरो लात्वा, नियमान् भूरिशस्तदा । **वीरभद्रो** व्यधाद् धर्मं, शुद्धं पत्नीत्रयान्वितः ॥४५६॥
संसारासारतां मत्वा, तदा **सागरदत्त**कः । लात्वा व्रतं तपस्तप्त्वा, स्वर्गलोकं समागमत् ॥४५७॥
अन्येऽपि बहवो भव्यलोका **अर**जिनान्तिके । श्राद्धधर्मं प्रपद्याऽयुः, शनैर्निजे निजे गृहे ॥४५८॥
आपृच्छ्य श्वशुरौ **वीरभद्रः** पत्नीत्रयान्वितः । ताम्रलिप्तीपुरे गत्वा, मातापित्रोर्व्यधान्मुदम् ॥४५९॥
भुक्त्वा भोगांश्चिरं ताभिः, पत्नीभिः सह सन्ततम् । प्रान्ते श्री**अर**सार्वान्ते, जग्राह संयमश्रियम् ॥४६०॥
चारित्रं पालयन् शुद्धं, मृत्वा प्रान्ते सुरालये । गत्वा च्युत्वा गमी मुक्तिपुर्यां स **वीरभद्र**कः ॥४६१॥
वीरभद्रप्रियाः सर्वा, लात्वा व्रत**मरा**न्तिके । **सुव्रता**गणिनीपार्श्वे, स्थितास्तीव्रं तपो व्यधुः ॥४६२॥
आराध्य संयमं **वीरभद्र**पत्नीत्रयं तदा । जगाम प्रथमे स्वर्गे, सर्वायुषः क्षयात्क्रमात् ॥४६३॥
सप्ताष्टभवमध्ये ता, **वीरभद्र**प्रियाः समाः । न्यक्षकर्मक्षयान्मुक्तिं, गमिष्यन्ति न संशयः ॥४६४॥
प्रबोध्येशानचन्द्रादि-वीरभद्रादिभाविनः । पद्मिनीखण्डतः स्वामी, विजहारामरार्चितः ॥४६५॥
प्रभोर्गणधराः सर्वे, बोधयन्तो जनान् बहून् । ग्राहयन्ति व्रतं केचित्, श्राद्धधर्मं च केचन ॥४६६॥
त्रिंशद् गणधराः स्वामिन्**यरे** जीवति निर्वृतिम् । प्रययुर्भविनो भूरीन्, प्रबोध्य जिनधर्मतः ॥४६७॥
गच्छाधिपास्त्रयस्त्रिंशत्, **जम्भ**गच्छाधिपादयः । स्वाम्यंह्रिसेवका-सङ्ख्यातीतसंशयभेदिनः ॥४६८॥
पञ्चाशत् षष्टिसहस्राः, साधु-साध्व्यो यथाक्रमम् । त्रिसप्तनिशतसङ्ख्याकाः, साधवो वैक्रियाः स्मृताः ॥४६९॥
वादिनः षोडश शतं, सर्वत्राप्तजयश्रियः । षड्विंशतिसहस्राः स्युरवधिज्ञानिनोऽनघाः ॥४७०॥
अष्टाविंशशतानि स्युः, केवलज्ञानिनः पुनः । दशाधिकं च षट्शतं, स्युश्चतुर्दशपूर्विणः ॥४७१॥
पञ्चविंशशतं पञ्चदशाधिकं तपोधनाः । मनःपर्यविनः स्वामिहस्तात्तसंयमाः पुनः ॥४७२॥
लक्षमेकं च चतुरशीतिसहस्रसंयुताः । सुश्रावकाः प्रभुतत-धर्मा सुदर्शनाः स्मृताः ॥४७३॥
द्वाविंशति सहस्राणि, लक्षाणां त्रितयं तथा । सुश्राविकाः प्रभुततधर्म्माः सुदर्शनाः स्मृताः ॥४७४॥
एवंविधपरीवारसंसेवितक्रमद्वयः । **अरनाथो**ऽमरेन्द्रार्च्यः, प्राबोधयज्जनान् बहून् ॥४७५॥
काम्पील्यनगरस्वामी, **वीरचन्द्र**महीपतिः । **अरा**स्याद्धर्ममाकर्ण्य, पुण्यं चक्रे शिवप्रदम् ॥४७६॥
**कुम्भ**स्यादिमगच्छाधिनाथस्य धर्मदेशनाम् । श्रुत्वा **सागरदत्ता**द्याः, धर्मं के न प्रपेदिरे ॥४७७॥

**॥ इति तपागच्छाधिराजश्रीलक्ष्मीसागरशिष्यपं.-**
**शुभशीलविरचिते श्रीअरजिनेशचरिते काम्पील्यपुरविहारकरणवीरचन्द्र-सागरदत्तप्रबोधरुचिते**
**दशमः सर्गः ॥**

● ● ●

# ॥ एकादशमः सर्गः ॥

**अरो**ऽथ विहरन् स्वामी, भूरिसाधुनिषेवितः । सम्मेतशिखरक्षोणीधरस्याधित्यकां ययौ ॥१॥
चतुर्विधैः सुरैस्तत्राभ्येत्य वप्रत्रयी तदा । विदधेऽथ वरे सिंहासने उपाविशत्प्रभुः ॥२॥
ततो योजनगामिन्या, गिरा श्री**अर**तीर्थकृत् । धर्मोपदेशनां दातुं, प्रववृते जनाग्रतः ॥३॥
तदा तत्र नरा नार्यो, भूपालाः शतशः पुनः । नन्तुं तीर्थं तथा स्वामिवचः श्रोतुं समाययुः ॥४॥
नत्वा तीर्थं प्रभोः पार्श्वे, नृपालाद्या नरास्तदा । अश्रौषुरर्हतः पूजाफलमेवं कृतादराः ॥५॥
जिनपूजादिकं धर्मं, यः करोति सुभावतः । स जनो लभते मुक्तिसातं **कमलवत्** क्रमात् ॥६॥
तथाहि –
**कल्याणनगरे पद्म**भूपतेः **श्रीमती** सुता । पठितुं लेखशालायां, याति पण्डितसन्निधौ ॥७॥
तत्र **धीर**महेभ्यस्य, पुत्रः **कमल**नामभृत् । पपाठ भूरिशास्त्राणि, विनयेन बुधान्तिके ॥८॥
परिणिन्ये क्रमाद् भूप-नन्दिनीं **कमलो**ऽन्यदा । **कमलेन** समं पत्न्या, क्रियते कलहः किल ॥९॥
पत्न्याऽन्यदोदितं मे स्याद्, विज्ञत्वं तु तदा किल । यदा त्वां पातयिष्यामि, स्वीययोः पदयोरधः ॥१०॥
**कमलो**ऽवग् मदीयं तु, पाण्डित्यं जायते तदा । भवतीं पातयिष्यामि, लुठन्तीं पदयोस्तले ॥११॥
**कमलो** दीर्घरोषः सन्, वहनं सुक्रयाणकैः । बभार यातुमम्भोधौ, श्रिये सज्जोऽभवत्क्रमात् ॥१२॥
विश्वास्य वचसा पत्नीं, सार्धं नीत्वा पयोनिधौ । क्षेप्तुं स **कमलो** दुष्टधिषणोऽचलदञ्जसा ॥१३॥
यतः –
षट्कर्णो भिद्यते मन्त्र-श्चतुष्कर्णस्तु धार्यते । द्विकर्णस्य तु मन्त्रस्य, ब्रह्माप्यन्तं न गच्छति ॥१४॥
यानपात्रे चलत्यब्धौ, भूयोऽपि कलहे सति । **कमलः श्रीमतीं** छत्रं, चिक्षेप निष्कृपोऽम्बुधौ ॥१५॥
यतः –
ईर्ष्यया पातकं कर्तुं, जनोऽन्धो जायते ध्रुवम् । न पत्नीं न सुतं नैव, पितरं मन्यते नरः ॥१६॥
अपूर्वः कोऽपि कोपाग्निः, सज्जनस्य खलस्य च । एकस्य शाम्यति स्नेहाद्, वर्धतेऽन्यस्य वारितः ॥१७॥
नाकारणरुषां सङ्ख्या, सङ्ख्याताः कारणात्क्रुधः । कारणेऽपि न कुप्यन्ति, ये ते जगति पञ्चषाः ॥१८॥
तं नत्थि घरं तं नत्थि राउलं, देउलं पि तं नत्थि । जत्थ अकारणकुविआ, दो तिन्नि नरा न दीसंति ॥१९॥
पतन्ती **श्रीमती** वार्धौ, मत्स्यस्याशूदरेऽपतत् । मत्स्योऽपि दैवयोगेन, भ्रमन् वार्द्धितटेऽगमत् ॥२०॥
मत्स्येनोद्घाटिते वक्त्रे, **श्रीमती** निर्गता ततः । भ्रमन्त्यब्धितटे देवगृहं ददर्श सुन्दरम् ॥२१॥
तत्र यक्षं प्रणम्यापि, **श्रीमती** सिद्धयोगिनीम् । वीक्ष्य भक्तिं तथा चक्रे, प्रसन्ना साऽभवद्यथा ॥२२॥
नृरूपकारिणीमेकामन्यां स्त्रीरूपकारिणीम् । तृतीयां निखिलक्ष्वेडापहारकारिकां वराम् ॥२३॥
अन्धत्वस्फेटिकां तुर्यां, पञ्चमीं वश्यकारिणीम् । आकाशगामिनीं षष्ठीं, सप्तमीं धनधान्यदाम् ॥२४॥
सम्प्राप्य गुटिका एताः, **श्रीमती** योगिनीक्रमौ । प्रणम्याथ वलन्ती सा, ययौ **श्रीपुर**सन्निधौ ॥२५॥
तत्रस्था **श्रीमती** दध्यौ, कान्तो यदि मिलिष्यति । तदा सोऽस्तु पतिर्मेऽत्र, भवे नो चेन्ममानलः ॥२६॥
एवं ध्यात्वा स्वशीलस्य, रक्षार्थं **श्रीमती** तदा । चकार त्वरितं पुंसो, रूपं गुटिकयैकया ॥२७॥

गुटिकां धनदां सम्यगाराध्य **श्रीमती** तदा । धनी भूत्वा **धनाह्वां** स्वां, तस्थौ तस्मिन् पुरे तदा ॥२८॥
महान्तं व्यवसायं तु, कुर्वाणः स **धनः** क्रमात् । भूपादिसर्वलोकानामभीष्टोऽजनि सन्ततम् ॥२९॥
तत्रैव **श्रीपुरे देवधीरस्य** मेदिनीपतेः । अपुत्रिणः सुता **लक्ष्मीवत्य**भीष्टतमा भवत् ॥३०॥
क्रमादन्धत्वमापन्ना, मा भूत्सज्जौषधैरपि । ततः साऽयाचत काष्ठभक्षणं तातसन्निधौ ॥३१॥
तदा तया समं तस्याः, सखीनां तु चतुष्टयम् । याचते स्म सदा काष्टभक्षणं विरहासहम् ॥३२॥
ततो राज्ञोदितं योऽस्याः, पुत्र्या अन्धत्वमञ्जसा । स्फेटयेत्तस्य दास्यामि, राज्यार्धं स्वसुतान्वितम् ॥३३॥
एवं मध्येपुरं वाद्यमाने च पटहे सति । पस्पर्श पटहं सद्यः, कुमारः स **धनाभिधः** ॥३४॥
**लक्ष्मीवतीं धनेभ्यो**ऽथ, पश्यन्तीं दिवि तारकाः । चकार गुटिकायोगात्, जयकारोऽभवत्ततः ॥३५॥
ततो राजा जगौ पुत्र्या, धन ! पाणिग्रहं कुरु । राज्यार्द्धं च मदीयं त्वं, पवित्रीकुरु सत्वरम् ॥३६॥
**धनेभ्यः** प्राह सिद्धाद्रौ, यावन्न नम्यते जिनः । तावद् ब्रह्मव्रतं पाल्यं, भोक्तव्यमेकशः पुनः ॥३७॥
शयितव्यं क्षितौ नित्यं, परिधेयं सिताम्बरम् । न भूषणं तनौ धार्यं, सम्पूर्णं सवनं नवम् ॥३८॥
श्रुत्वेति भूपतिः प्राहाङ्गीकुरुष्व सुतां मम । मुत्कलोऽभिग्रहस्तेऽस्तु, सिद्धाद्रिगमनादनु ॥३९॥
परिणीय **धनो** भूपपुत्रीं राज्यार्धसंयुताम् । शुल्कमुद्ग्राहयामास, सर्वं स्वयं यथावधि ॥४०॥
तदा **लक्ष्मीवती**सख्यश्चतस्रो **धन**भूपतिम् । परिणीयाभवन् प्रीतिभाजो विशेषतो ध्रुवम् ॥४१॥
इतः स **कमलो** हेमद्वीपे गत्वा धनं बहु । उपार्ज्य दैवयोगेन, **श्रीपुरो**पान्तमीयिवान् ॥४२॥
**कमलः श्रीपुरे** शुल्क-मर्धं मोचयितुं स्वयम् । **धनस्य** मिलितो वर्यो, यदा हस्तः शुभे क्षणे ॥४३॥
**धनेन** स्वपतिर्ज्ञात-स्ततो ध्यातं तवेति च । यत्प्रोक्तमहकं त्वां तु, पातयिष्ये पदोस्तले ॥४४॥
तदहं विपरीतं तु, करिष्यामि स्वबुद्धितः । ममाऽयं साम्प्रतं हस्ते, चटितोऽस्ति पतिः स्वयम् ॥४५॥
ध्यात्वेति स **धनः** प्राह, भो श्रेष्ठिननृतं यदि । वदिष्यसि तदा द्रव्यं, सर्वं मया ग्रहीष्यते ॥४६॥
यदि सत्यं त्वयोच्येत, तदार्द्धं शुल्कमर्पये । अतो न भवता कूटं, वक्तव्यं हितमिच्छुना ॥४७॥
आचष्ट **कमलः** कूटं, वचः स्यान्मामकं यदि । तदा त्वयाऽखिलं वस्तु, ग्राह्यं नैव नराधिप ! ॥४८॥
वहिकायां ततोऽलेखि, **कमले**नेति सत्वरम् । हेमभाराष्टकं रूप्य-भाराणां पञ्चविंशतिः ॥४९॥
सहस्रं जातहीराणां, प्रवालानां दशायुतम् । लवङ्गानां तु भाराः स्युः, शतान्यष्टौ शताधिकान् ॥५०॥
तजतमालपत्राणां, भारा एकाधिकं शतम् । ताम्रभारसहस्रं तु, त्रपूणां च तथायुतम् ॥५१॥
आम्लप्रमाणमुक्तानां, पलान्यष्ट शतानि च । पट्टकूलानि पञ्चाशत्, सहस्रं षष्टिसंयुतम् ॥५२॥
लिखितं **कमले**नेति, **धन** उत्थाय सत्वरम् । यावद्विलोकते यान-पात्रस्थं वस्तु सर्वतः ॥५३॥
ताव**द्धनो**ऽखिलं वस्तु, द्विगुणं वीक्ष्यते ध्रुवम् । ततो वस्तुषु तेष्वेव, स्वीयमुद्रामदापयत् ॥५४॥
नियोज्य निगडैः कारागृहे क्षिप्त्वा तदा दृढम् । स्तोकमेवान्नपाने तु, तस्मै दत्ते **धनः** सदा ॥५५॥
तत्र कारालये तिष्ठन्, **कमलो** नरकाधिकाम् । दुःखं चानुभवन् वस्तु, सर्वं गतं स विन्दते ॥५६॥
यतः –

कशाभिस्ताडितोऽन्येद्युः, **कमलः** प्रोक्तवानिति । भो **धनांह्र्योः** पतिष्यामि, तव मां मोचयाचिरात् ॥५७॥
गृहाण कमलां सर्वां, पतितोऽस्मि पदोस्तव । यत्तेऽत्र रोचते तन्मे, प्रसद्य दीयतां धनम् ॥५८॥
पतिते **कमले** भक्त्या, क्रमयो**र्धन** ऊचिवान् । तावकीनं धनं तुभ्यं, ददे गृहाण हेलया ॥५९॥
इदं गृहाण राज्यार्धं, सेवकं मां कुरु त्वकम् । **कमलो**ऽवग् यदि त्वं मां, मुञ्चे श्रिया सृतं तदा ॥६०॥

एवं तयोर्वचः श्रुत्वा, जगुर्लोका मुखे मुखे । **धनो**ऽयं करुणागारं, प्राप्तराज्यप्रदानतः ॥६१॥
यतः –
विवेकः सह सम्पत्त्या, विनयो विद्यया सह । प्रभुत्वं दानरोचिष्णु, चिह्नमेतन्महात्मनाम् ॥६२॥
**धनं** स्वीयप्रतिज्ञायां, पूर्णायां **कमल**क्रमौ । प्रक्षाल्य वारिणा प्राप्त-राज्यं **धन**युतं ददौ ॥६३॥
**धनो**ऽवक् **कमले**दानीं, गम्यते सिद्धपर्वते । नंस्यते श्री-युगादीशः, पूर्यतां स्वमनोरथः ॥६४॥
**कमलः** प्रोक्तवान् **शत्रुञ्जये** श्रीप्रथमं जिनम् । नन्तुं वाञ्छाऽस्ति मे पूर्वं, ततः सम्प्रति चल्यताम् ॥६५॥
इतस्तत्र **हरेभ्यस्य**, नन्दिनी **कमलावती** । सर्पेण भक्षिताऽजीवि, **धनेन** गुटिकाम्बुना ॥६६॥
सोऽपि श्रीमान् **हरः** पुत्रीं, स्वां **कमलावतीं** तदा । **धनाय** भूपजामात्रे, दत्तवान् समहोत्सवम् ॥६७॥
राजपत्न्यन्यदा विद्याभृता हृताऽङ्गणस्थिता । सोऽपि पश्चात्समानीता, **धनेन** गुटिकाबलात् ॥६८॥
एकस्या गुटिकायास्तु, पार्श्वात्प्राप्य धनं बहु । दत्त्वा दानं वशीचक्रे, जनता **धन**भूपतिः ॥६९॥
लोका जगुस्तदा भूप-जामाताऽयं **धनः** खलु । विश्वोत्तमोऽभवद्विश्वोपकारकरणाद् ध्रुवम् ॥७०॥
**लक्ष्मीवती** महीपालपुत्री प्राह पतिं प्रति । चल्यतां भवता सिद्धाचले नन्तुं जिनेश्वरान् ॥७१॥
ततः शत्रुञ्जये यात्रां, कृत्वा सर्वप्रियायुतः । **कमले**नान्वितः पश्चादाययौ श्वशुरान्तिके ॥७२॥
**लक्ष्मीवती** विशेषेण, नते तीर्थे जगाविति । स्वामिंस्तव प्रतिज्ञा तु, पूर्णा जाताऽधुना पते ! ॥७३॥
पूर्णा जाता प्रतिज्ञा मे, गदित्वेति **धन**स्तदा । मध्येगेहं प्रविश्यादाद्, द्वारमेकक एव च ॥७४॥
गुटिकायाः प्रभावेण, नररूपं **धन**स्तदा । त्यक्त्वा प्रपन्नवान्नारीरूपं भूपसुतापतिः ॥७५॥
**लक्ष्मीवती** जगौ स्वामिन् !, दत्तं द्वारं त्वया कथम् । प्रसद्योद्घाट्यतां सद्यो, दर्शनं त्वं प्रदर्शय ॥७६॥
संसारसुखहेतोस्ते, कथयिष्येऽहमेव न । यदा तव भवेद् वाञ्छा, तदा तत्पूर्यतां त्वया ॥७७॥
**लक्ष्मीवत्यो**दिते भूयो, भूयो गेहाररद्वयी । **धनेनो**द्घाटिता नारी-रूपेण रुचिरश्रिया ॥७८॥
**लक्ष्मीवती** पतिं नारीरूपं दृष्ट्वाऽतिलज्जिता । यावत्पश्चाद् व्रजत्येव, तावत्सा वनिता जगौ ॥७९॥
भो सखि ! त्वं कथं दृष्ट्वा, मां नारीं यासि दूरतः । अत्रागच्छ करिष्यावो, वार्तामावां यथारुचि ॥८०॥
**लक्ष्मीवती**पितुः पार्श्वे, गत्वा जगाविति द्रुतम् । त्वयाऽहं योषिते दत्ता, साम्प्रतं किं करिष्यते ॥८१॥
सकृदेव सुता मातापितृभ्यां परिणाय्यते । अतो मे दृश्यते वह्निः, शरणं मरणाय तु ॥८२॥
तदाऽन्याः कन्यकाः श्रुत्वा, पतिं नारीं मनोहराम् । राजपुत्री जजल्पेति, शरणं वह्निरेव माम् ॥८३॥
**देवधीरो** नृपोऽभ्येत्य, **श्रीमत्याः** सन्निधौ जगौ । त्वयाऽयं विहितः कूटप्रपञ्चः किं प्रजल्प्यताम् ॥८४॥
जगाद **श्रीमती** पूर्व-परिणीतवराप्तये । मयेदं मण्डितं सर्वं, नररूपविधानतः ॥८५॥
अमार्गिता सुता मह्यं, भवताऽदायि हर्षतः । अन्या अपि स्त्रियो मां तु, वव्रुः स्वयं यथारुचि ॥८६॥
वीक्षितोऽस्त्यधुना पूर्वपरिणीतः पतिर्मम । अतो मया नृरूपं तु, त्यक्तं जाताऽबला पुनः ॥८७॥
राज्ञोक्तं कः पतिस्ते तु, समेतोऽस्त्यत्र कथ्यताम् । जगाद **श्रीमती** यस्मै, राज्यार्धं प्रददे मया ॥८८॥
स मह्यं **कमलः** कान्तो, जनकेन ददे पुरा । अतो मे रमणः सोऽस्तु, यावज्जीवं नराधिप ! ॥८९॥
त्वमेव मे पितुः स्थाने, विद्यसे राज्यदानतः । **धनं** स्वप्रेयसीं ज्ञात्वा, **कमल**श्चकितोऽजनि ॥९०॥
यदाऽगात्**कमलो** मध्येगेहं तावत्स्त्रियं वराम् । **श्रीमतीं** स्वां प्रियां दृष्ट्वा, चकितोऽभूत्स्वचेतसि ॥९१॥
स्थगिताऽऽस्याथ नीरङ्ग्या, जगाद **श्रीमती** पतिम् । मया तवापराधो यः, कृतः स क्षम्यताम् त्वया ॥९२॥

यन्मया गदितं पूर्वमंह्योस्त्वां पातयाम्यहम् । तदर्थं विहितं ह्येतत्, क्षम्यतां क्षम्यतामतः ॥९३॥
**कमलो**ऽवग् मया क्रोध-चाण्डालग्रसितात्मना । क्षिप्ता त्वं जलधौ यच्च, तत्त्वया क्षम्यतां प्रिये ! ॥९४॥
ततो मिथः समुत्थाय, मुक्त्वाऽभिमानमञ्जसा । योजयित्वाञ्जलिं तौ तु, क्षमेते स्म प्रमोदतः ॥९५॥
ज्ञात्वा **धन**स्वरूपं तु, वृद्धान् पप्रच्छ भूपतिः । **धनेन** परिणीता याः, स्त्रियस्तासां गतिश्च का ॥९६॥
वृद्धैरूचे **धनो** या याः, कन्यकाः परिणीतवान् । तास्ता **लक्ष्मीवती**युक्ता, भवन्ति **कमलस्य** हि ॥९७॥
**श्रीमत्या** नररूपेण, परिणीताः स्त्रियश्च याः । तासामन्यः पतिर्नैव, विमुच्य **कमलं** क्वचित् ॥९८॥
यतः –

सकृज्जल्पन्ति राजानः, सकृज्जल्पन्ति साधवः । सकृत्कन्याः प्रदीयन्ते, त्रीण्येतानि सकृत् सकृत् ॥९९॥
विचार्येति महीपालो, **वृद्धामात्येनसंयुतः** । **लक्ष्मीवती**युताः सर्वाः, कन्याः स्वजनसाक्षिकम् ॥१००॥
**कमलाय** ददौ भूरि-लक्ष्मीप्रदानतस्तदा । ततो लोका जगुर्योगो, जातोऽयं रुचिरः खलु ॥१०१॥
ततः स **कमलः** कन्याषट्कस्वाम्यजनि ध्रुवम् । अर्धराज्यधरोऽभीष्टो, बभूव नृपतेः पुनः ॥१०२॥
क्रमात्तेन महीशेन, **देवधीरेण** धीमता । राज्यं वितीर्य जामात्रे, जगृहे संयमेन्दिरा ॥१०३॥
ततः स **कमलो** मातापितरौ तत्र पत्तने । नीत्वा भक्तिं व्यधाद्राज्यं, कुर्वाणो न्यायवर्त्मना ॥१०४॥
तत्राऽन्यदा पुरोद्याने, ज्ञानी **चन्द्रः** समागमत् । **कमलः** सकुटुम्बः स, धर्मं श्रोतुं ययौ मुदा ॥१०५॥
ज्ञानी जगौ प्रभोः पूजां, यः करोति सदाऽऽदरात् । स एव लभते मुक्तिं, प्राप्य राज्यश्रियं क्रमात् ॥१०६॥
यतः –

**॥ पूजासूक्तानि ॥**

कमलोऽवग् मया पूर्व-भवे पुण्यं कृतं किमु । येन वाञ्छां विना राज्यमभूद् ज्ञानी ततो जगौ ॥१०७॥
**पद्म**पुर्यामभूत्**कृष्णो**, विप्रो धर्म-विना कृतः । सचान्यदा गुरोरास्याच्छुश्रावार्चाफलं प्रभोः ॥१०८॥
एकमपि येन कुसुमं, भगवत्युपयुज्यते सबहुमानम् । तस्य नरामरशिवसुखफलानि करपल्लवस्थानि ॥१०९॥
प्रभोः सर्वार्चनां कृत्वा, डुढौके षट् फलानि च । तेन पुण्येन **कृष्णः** स, मृतोऽत्र त्वमभूर्नृपः ॥११०॥
फलानि षट् त्वया पूर्वं, ढौकितानि प्रभोः पुरः । तेन पुण्येन षट् पत्न्यो, बभूवुस्तव साम्प्रतम् ॥१११॥
श्रुत्वेति **कमलो** गेह-वासे पूजापरः सदा । अवाप्य केवलज्ञानं, मुक्तिपुर्यां समीयिवान् ॥११२॥

**॥ इति कमलकथा ॥**

**कमलस्य** कथां श्रुत्वा, मिथिलानगरीपतिः । **जितशत्रु**र्नृपः प्राह, कीदृग् मुक्तिपुरी प्रभो ! ॥११३॥
यत्र नास्त्यसुखं किञ्चित्, न बाधा न मृतिः पुनः । न जरा न क्षुधा नाधिर्न शोको न जनुः पुनः ॥११४॥
यतः –

पणयाललक्ख जोअणविक्खंभा सिद्धसिला फलिहविमला । तदुवरिगजोअणं तेलोगं ते तत्थ सिद्धठिई ॥११५॥
ईसी पब्भाराए सीआए जोअणंमि लोगंता । बारसहिं जोअणेहिं सिद्धी सव्वट्ठसिद्धाओ ॥११६॥
निम्मल दगरयवन्ना, तुषारगोखीरहारसरिसवन्ना । उत्ताणय छत्त संठीआयभणीआय जिणवरेहिं ॥११७॥
इसी पब्भाराए सीआए जोअणंमि जो कोसो । कोसस्स छब्भाए सिद्धाणोगाहणा भणीआ ॥११८॥
तिन्निसया तित्तीसा, धणुत्तिभागो अ होइ बोधव्वो । एसा खलु सिद्धाणं, उक्कोसा ओगाहणा भणिआ ॥११९॥
चत्तारि अ रयणीओ, रयणि तिभागोणीआय बोधव्वा । एसा खलु सिद्धाणं, मज्झिम ओगाहणा भणीआ ॥१२०॥
एगाय होइ रयणी, अट्ठेवय अंगुलाइं साहीआ । एसा खलु सिद्धाणं, जहन्न ओगाहणा भणीआ ॥१२१॥

ओगाहणाइ सिद्‌धा, भव त्तिभागेण हुंति परिहीणा । संठाणमणित्थं त्थं, जरामरणविप्पमुक्काणं ॥१२२॥
दीहकालरयं जंतु, कम्मसेसिअमट्ठहा । सिअं धंतं ति सिद्धस्स सिद्धत्तमुवजाइई ॥१२३॥
नाऊण वेअणिज्जं अइबहूअं आउअं च थोवागं । गंतूण समुग्घायं खवंति कम्मं निरवसेसं ॥१२४॥
दंडकवाडे मंथंतरेअ साहरणाय सरीरत्थे । भासाजोगनिरोहे सेलेसी सिज्जणा चेव ॥१२५॥
जह उल्ला साडीआ आसुं सुक्कइ विरल्लिआ संती । तह कम्मलहुअ समए वच्चंति जिणा समुग्घायं ॥१२६॥
लाउअ एरंडफले अग्गी धूमेउ सुधण विमुक्को । गइ पुव्वपओगेणं एवं सिद्धाणं विगईओ ॥१२७॥
एगा जोअण कोडी, बायालीसं च सयसाहस्सा । तीसं चेव सहस्सा, दो चेव सया अउण चत्ता ॥१२८॥
ओगाहणाइ सिद्धा, भव त्तिभागेण हुंति परिहीणा । संठाण मणि त्थं त्थं, जरामरणविप्पमुक्काणं ॥१२९॥
जत्थ य एगो सिद्धो, तत्थ अणंता भवक्खयविमुक्का । अन्नुन्नसमोगाढा, उड्ढा सव्वे अलोगंते ॥१३०॥
नवि अत्थि माणुसाणं, तं सुक्खं नेव सव्वदेवाणं । जं सिद्धाणय सुक्खं, अव्वाबाहं उवगयाणं ॥१३१॥
इत्यादि मुक्तिसातं तु, निराबाधं निरन्तरम् । भुञ्जन् जीवः क्वचित्काले, दुःखी भवति न पुनः ॥१३२॥
उक्तं च –
सिवमयलमरुअमणंतमक्खयमव्वाहमप्पुणराविति । सिद्धिगईनामधेयं ठाणं संपत्ताणं नमोजिणाणं ॥१३३॥
इत्यादि मुक्तिशर्म्माणि, वर्ण्यमानानि तत्र तु । **अरेण** तीर्थनाथेन, जीवानां हितहेतवे ॥१३४॥
निशम्य गेहवासं तु, विमुच्य जीर्णवस्त्रवत् । सहस्त्रद्वितयं भव्य-जना ललुर्व्रतं द्रुतम् ॥१३५॥ युग्मम् ॥
प्रभुः प्राहाग्रतस्तेषामिति शुद्धं व्रतं सदा । पालनीयं क्षमाक्षान्तितपः शान्तिविधानतः ॥१३६॥
अनन्तशो व्रतं लात्वा, नाऽपालि शुद्धभावतः । अतोऽस्मिन् संसृतौ जीवा, भ्रमन्ति दुःखपूरिताः ॥१३७॥
उक्तं च –
संसारसागरमिणं परिभमंतेहिं सव्वजीवेहिं । गहिआणीअ मुक्काणीअ अणंतसो दव्वलिंगाइं ॥१३८॥
उक्तं च ग्रन्थान्तरे –
कषाया अपसर्पन्ति, यावत्क्षान्त्यादिताडिताः । तावदात्मैव शुद्धोऽयं, भजते परमात्मताम् ॥१३९॥
अपसर्पन्ति ते यावत्, प्रबलीभूय देहिषु । स तावन्मलिनीभूतो, जहाति परमात्मताम् ॥१४०॥
हन्तव्यः क्षमया क्रोधो, मानो मार्दवयोगतः । माया चार्जवभावेन, लोभः सन्तोषपोषतः ॥१४१॥
हर्ष-शोकौ जुगुप्सा च, भयं रत्यरती तथा । वेदत्रयं च हन्तव्यं, तत्त्वज्ञैर्दृढधैर्यतः ॥१४२॥
कृतं पापं तपो-देवपूजा-ध्यानविधानतः । छिनत्ति तनुमानेव, देहकष्टादिना पुनः ॥१४३॥
उक्तं च –
कृतकर्मक्षयो नास्ति, कल्पकोटिशतैरपि । अवश्यमेव हि भोक्तव्यं, कृतं कर्म शुभाशुभम् ॥१४४॥
अत्र कथा –
अन्यदा **श्रीपुरो**द्याने, तपस्व्येकस्तपस्तपन् । समेत्य कुरुते ध्यान-मौनमेव निरन्तरम् ॥१४५॥
एकदा तत्र भूपाल-कोशाद्भूषणसञ्चयम् । लात्वा स्तेनो रहो गच्छन्, **श्रीपुरो**द्यानमीयिवान् ॥१४६॥
इतो ज्ञात्वा गतं कोशाद्, भूषणादि नृपानुगाः । वेष्टयित्वा तमु(दु)द्यानं, स्थिताश्च चिक्षिपुः शरान् ॥१४७॥
क्षिपत्सु विशिखांस्तेषु, बाण एको यतेः क्रमम् । विध्यति स्म दृढं पीडा-ऽभवत्तस्याऽशुभोदयात् ॥१४८॥
चौरो नंष्ट्वा गतो लात्वा, भूषणौघं महीपतेः । ततो भूपादयस्तत्रागतास्तं ददृशुर्यतिम् ॥१४९॥
भूपोऽप्राक्षीद्यते ! पापं, क्रियते न त्वया मनाक् । अतः कथं मुधा विद्धः, क्रमस्ते कथ्यतामिह ॥१५०॥

तदोत्पन्नावधिज्ञानो, यतिः प्राह नृपं प्रति । इतो भवादसङ्ख्यातभवे गोपोऽभवं द्रुतम् ॥१५१॥
वने स्थितोऽन्यदा शीर्षाद्यूकामादाय पाणिना । बब्बूलकण्टकेनाऽहमविध्यमकृपात्मकः ॥१५२॥
तत्कर्म शतशः प्राप्तं, शूलादिक्षेपणान्मया । यत्कर्म साम्प्रतं स्तोकं, तिष्ठन्नासीद् भवे त्विह ॥१५३॥
शेषेण कर्मणा तेन, विद्धोऽहं क्रमशो नृप ! । न च्छुटन्ति कृतात्पापात्, जीवा वेदनया विना ॥१५४॥
उक्तं च –
इत एकनवते कल्पे, शक्त्या मे पुरुषो हतः । तेन कर्मविपाकेन, पादे विद्धोऽस्मि भूपते ! ॥१५५॥
स यतिः स्वकृतं कर्म, वेदयित्वाऽखिलं क्रमात् । स्वर्गसातमवापाथ, शिवं गमी तमःक्षयात् ॥१५६॥
यतः –
वह मारण अब्भक्खाण दाण परधण विलोवणाईणं । सव्व जहन्नो उदओ दसगुणीओ इक्कसि कयाणं ॥१५७॥
तिव्व पउरे पओंसे, सयगुणीओ सयसहस्स कोडिगुणो । कोडाकोडिगुणो वा, हुज्ज विवागो बहुतरो वा ॥१५८॥
**जितशत्रु**र्नृपः श्रुत्वा, प्रभूक्तां धर्मदेशनाम् । लात्वा व्रतं तपस्तप्त्वा, क्षिप्त्वा कर्म शिवं गतः ॥१५९॥
तदा तत्र जनाः केचिज्जीवहिंसाव्रतं ललुः । केचिद् व्रतं द्वितीयं तु, तृतीयं तु चतुर्थकम् ॥१६०॥
पञ्चमं तु व्रतं केचित्, देशभागेन भावतः । संयमं जगृहुः केचिद्, गृहवासं विमुच्य च ॥१६१॥
निर्वाणसमयं स्वीयं, ज्ञात्वा प्रभु**ररस्**तदा । धर्मोपदेशनां चक्रे, बहून् घस्रान् कृपात्मकः ॥१६२॥
विज्ञायात्मनि निर्वाण-गमनार्हः प्रभुः स्वयम् । **अर** उच्चीर्णवान् मासक्षपणं क्षीणपातकः ॥१६३॥
सहस्रैर्दशभिर्वाचं-यमैः स्वाम्यान्तिके तदा । मासक्षपणमुच्चीर्णं, स्वामिभक्तिपरायणैः ॥१६४॥
**अरनाथस्य** कल्याणगतिवेलां सुरेश्वरः । अवधिज्ञानतो ज्ञात्वा, तत्र कर्तुं महोऽगमत् ॥१६५॥
यक्षोऽथ षण्मुखः शङ्खवाहनो धरिणीयुतः । वैयावृत्त्यं प्रभोः कर्तुं, समागात्स्थानकात् स्वकात् ॥१६६॥
गृहीतानशनं सार्व**मरं** तत्र महीधरे । **पद्मसेनो** नृपो ज्ञात्वा, प्रभूपान्ते समागमत् ॥१६७॥
कोटाकोटिप्रमाणासु, स्वस्वस्थानकतः सुराः । विज्ञायान्तिमकल्याणं, प्रभोः समाययुः पुनः ॥१६८॥
मार्गशीर्षे वलक्षाया, दशम्याः प्रहरे गते । प्रभुः शुक्लतमध्यानारूढः सहस्रसाधुयुक् ॥१६९॥
क्षिप्त्वा शेषं तमः पुण्यराशिं ध्यानासिनाऽऽशु च । चतुरष्टसहस्राब्दायुषोऽन्ते मुक्तिमीयिवान् ॥१७०॥
यतः –
एमेव अरजिणिंदस्स, चउसु वि ठाणेसु हुंति पत्तेअं । इगवीससहस्साइं, वासाणं हुंति नायव्वा ॥१७१॥
लाओअ दंड फले अग्गी धूमेउसुधणु विमुक्को । गइ पुव्व पओगेणं एवं सिद्धाणं विगईओ ॥१७२॥
नवि अत्थि माणुसाणं, तं सुक्खं नेव सव्वदेवाणं । जं सिद्धाणं सुक्खं, अव्वाबाहं उवगयाणं ॥१७३॥
इन्द्रश्चर्चितवान् स्वामिवपुः कुसुमचन्दनैः । व्यधाच्छक्राज्ञया श्रीदः, शिबिकां **रुचिराभिधाम्** ॥१७४॥
उत्पाट्य वासवो देवपद्मासनं नृपान्वितः । चोक्षस्थाने निनायाशु, स्वामिनं शिबिकाश्रितम् ॥१७५॥
गोशीर्षचन्दनैर्वर्यैरिन्धनैश्च सुगन्धिभिः । चितां व्यरचयन् देवाः, पुरन्दराज्ञया तदा ॥१७६॥
चितामध्ये सुराः स्वामि-शरीरं मुमुचुः शनैः । चितामाचिक्षिपुर्वह्निकुमारा ज्वलनं पुनः ॥१७७॥
तामथ ज्वलयामासु-र्द्रुतं वायुकुमारकाः । काले निर्वापयामासुः, क्षीरोदैर्मेघनन्दनाः ॥१७८॥
प्रभोर्दंष्ट्रा ललुः शक्रेशानादिवासवास्तदा । आलुरस्थीनि गीर्वाणा, देवाश्च प्रभुभक्तितः ॥१७९॥
सर्वेषामपि देवानां स्वस्वसुधर्मासु माणवकचैत्यस्तम्भे निक्षिप्तानि श्रीजिनास्थीनि तेषां पूजनाय यानि स्युः । इति तासु मैथुनादि कृत्यानि न कुर्वन्ति । भगवती ५० शतके च उद्देशे ।

रक्षाहेतोः प्रभोर्देहभस्माऽदुर्नरपादयः । मुक्तिगतिक्षिते नेमुरिन्द्रामरनृपादयः ॥१८०॥
दाहस्थाने प्रभोः पुष्पैर्नन्दनादिवनोद्भवैः । वृष्टिं व्यरचयन् वानमन्तरा निर्जरा मुदा ॥१८१॥
स्वामी संस्कारभूमौ तु, देवाः शक्राज्ञया तदा । वैडूर्यादिलसद्रत्नैः, पीठं व्यरचयन्मुदा ॥१८२॥
**पद्मसेनो** नृपो हेममयं प्रौढं जिनालयम् । कारयित्वा प्रभोर्बिम्बं, न्यवीविशिद्वरोत्सवम् ॥१८३॥
तत्रान्येषां यतीनां तुं, गतानां सिद्धिमन्दिरे । निर्जरा अग्निसंस्कारं, विदधुर्भक्तिपूर्वकम् ॥१८४॥
तदा वाचंयमाः केचित्, प्रययुः शिवपत्तनम् । केचित्सौधर्मगीर्वाणालयादिषु च केचन ॥१८५॥
प्रभोरन्तिमकल्याणोत्सवं कृत्वा सुरेश्वरः । नन्दीश्वरे विधायाद्योत्सवं स्वर्गे समीयिवान् ॥१८६॥
**पद्मसेन**नृपस्तत्र, तीर्थे सिद्धांश्च तीर्थपान् । नत्वा शोकं परित्यज्य, **हस्तिनागपुरं** ययौ ॥१८७॥
**अरे** तीर्थंकरे मुक्तिं, गते वैताढ्यभूभृतः । द्वयोर्गह्वरयोर्द्वारा(रे) स्वयं सङ्कुटिता(ते) द्रुतम् ॥१८८॥
ततश्चक्रादिरत्नानि, स्वयं चतुर्दश क्रमात् । स्वस्वस्थानं ययुः सार्वभौमे मुक्तिं गते सति ॥१८९॥
**पद्मसेन**नृपः खण्डत्रयराज्यं प्रपालयन् । प्रासादानर्हतोऽनेकान्, कारयामास रैव्ययात् ॥१९०॥
शत्रुञ्जयादितीर्थेषु, भूरिसङ्घसमन्वितः । यात्रा विस्तरतश्चक्रे, **पद्मसेन**महीपतिः ॥१९१॥
सम्मेतशिखरे शैले, सहस्रसंयतान्वितः । **अणकर्माष्टकोऽरोऽ**र्हज्जगाक्षी शिवपत्तने ॥१९२॥
ततोऽरनन्दनः **पद्मसेनो** भूपो नयाध्वना । पालयन्पृथिवीं धर्मकर्म चक्रे निरन्तरम् ॥१९३॥

**इती श्रीतपागच्छाधिराजश्रीलक्ष्मीसागरसूरि-शिष्य**
**पं. शुभशीलविरचिते श्रीअरजिनचरित्रे सम्मेतशिखर-सैलारनाथमुक्तिगमनस्वरूप एकादशमः सर्गः समाप्तः ॥**

श्रीविक्रमार्कनृपात् द्विद्विपञ्चेन्दुमितवत्सरे । (१५२२) **शुभशीलगणी** चक्रे, चरित्रं **श्रीअरार्हतः** ॥१॥
कूटाक्षरापसारेण, विधायानुग्रहं मयि । **अरार्हच्चरितं** शोध्यमिदं मध्यस्थितैर्बुधैः ॥२॥
बृहत्तपागणाधीशा, **लक्ष्मीसागरसूरयः** । विजयन्ते चटच्चारुप्रकर्षोदयराजिनः ॥३॥
विजयन्ते गणे तत्र, श्री**सोमदेवसूरयः** । **सुधानन्दनसूरीशा**, **रत्नमण्डनसूरयः** ॥४॥
**हेमहंसा** उपाध्याया, **शुभरत्ना**भिधास्तथा । विजयन्ते तथा **सोमजय**नामान एव तु ॥५॥

**शुभं भवतुं ॥ श्री ॥ श्री ॥**

● ● ●

**योगसार - द्वितीयः प्रस्तावः**

**तत्त्वसारोपदेशकः**

सर्वथैवात्मनो धर्मं, मन्यन्ते न परस्य तु ॥ ३५ ॥
यत्र साम्यं स तत्रैव, किमात्मपरचिन्तया ।
जानीत तद्विना हंहो !, नात्मनो न परस्य च ॥ ३६ ॥
क्षान्त्यादिर्दशधा धर्मः, सर्वधर्मशिरोमणिः ।
सोऽपि साम्यवतामेव, मैत्र्यादिकृतकर्मणाम् ॥ ३७ ॥
साम्यं समस्तधर्माणां, सारं ज्ञात्वा ततो बुधाः ।
बाह्यं दृष्टिग्रहं मुक्त्वा, चित्तं कुरुत निर्मलम् ॥ ३८ ॥

# सुभाषितस्म परीशिष्टम्


**प्रथमः सर्गः**

**त्रैकाल्यं जिनपूजनं प्रतिदिनं, ॥३७॥-२**
**दुष्टानां दमनं नयानुगमनं, ॥४२॥-३**
**पत्नी प्रेमवती सुतः ॥४४॥-३**
**धनदो धनमिच्छूनां, ॥५६॥-३**
दानादिसर्वधर्मेषु, ॥५७॥-३
पंथसमा नत्थि जरा,ऽ ॥६५॥-४
**सङ्ग्रहैकपरः प्राप ॥८५॥-५**
अस्ति जलं जलराशौ क्षारं, ॥८६॥-५
**अतिसञ्चयकर्तॄणां ॥८७॥-५**
**कदर्योपात्तवित्तानां ॥८८॥-५**
**भावो धर्मस्य हृन्मित्रं ॥११२॥-६**
**भावात् सुकृतलेशोऽपि ॥११३॥-६**
जा दव्वे होइ मई, ॥११४॥-६
तक्कविहूणो विज्जो, ॥११५॥-६
जायम्मि जीवलोए, ॥११८॥-६
**दानं भोगो नाशस्तिस्रो ॥१२०॥-६**
**इक्षुक्षेत्रं वंशजाली ॥१२३॥-६**
शनैर्मार्गः शनैः कन्था, ॥१२५॥-६
**उद्धारस्य समं पुण्यं ॥१२८॥-६**
**वृक्षं क्षीणफलं त्यजन्ति विहगाः, ॥१३४॥-६**
दीसइ विविहच्छरियं, ॥१३६॥-७
यो न निर्गत्य ॥१३७॥-७
वने रणे शत्रुजलाऽग्निमध्ये, ।१४३।-७
धम्मो मंगलमउलं, ॥१४५॥-७
क्षुधातृड्बाधितोऽत्यन्तं ॥१४७॥-७
**राज्यं सुसम्पदो भोगाः, ॥१६५॥-८**
**विद्यावृद्धास्तपोवृद्धा, ॥२०१॥-९**
**तस्मिन् जिनालये सार्व ॥२०३॥-९**
**जिणसासणस्स सारो ॥२१२॥-९**
वसही-सयणाऽऽसण-भत्त ॥२१६॥-१०
विनयं राजपुत्रेभ्यः, ॥२२१॥-१०
**वाजि-वारण-लोहानां ॥२२९॥-१०**
**हत्थी दम्मइ संवच्छरेण ॥२३४॥-१०**
**पदे पदे निधानानि ॥२४०॥-११**
**रागी बध्नाति कर्माणि ॥२४६॥-११**
सहसा विहितं कार्यम् ॥२६१॥-११
**यावद् विभूषणादीनि ॥२६९॥-१२**
**रज्जुग्गह-विसभक्खण ॥२७७॥-१२**
**अनालोच्य द्रुतं कार्यं ॥२७८॥-१२**
**समागते मृतिप्राये ॥२९९॥-१३**
त्यजेदेकं कुलस्याऽर्थे, ॥३००॥-१३
**माता-पित्रोर्वचो नृणां ॥३०४॥-१३**
**लक्ष्मीवन्तो न जानन्ति ॥३०९॥-१३**
**भक्ते द्वेषो जडे प्रीति ॥३१०॥-१३**
**यौवनं धनसम्पत्तिः ॥३११॥-१३**
**अणंताओ कम्मरासीओ ॥३१४॥-१३**
**सुखी न जानाति परस्य ॥३३२॥-१४**
**अक्खाण रसणी कम्माण ॥३३८॥-१४**
**देवदाणव-गंधव्वा ॥३४३॥-१४**
शीलं नाम नृणां कुलोन्नतिकरं ॥३४५॥-१४
**एगदिवसंपि जीवो, ॥३७४॥-१५**
**गुरुभत्ति खंति-करुणा ॥३८५॥-१६**
**प्रासाद-प्रतिमा-यात्रा-प्रतिष्ठादि- ॥३९२॥-१६**
**अट्ठविहकम्मबद्धो ॥४००॥-१७**
ते पुत्रा ये पितुर्भक्ताः, ॥४१०॥-१७
धन्यानामिह धर्मकर्मविषया, ॥४१८॥-१७
लक्ष्मीः परोपकाराय, ॥४१९॥-१७
ता छेओ ताव मुणी ता धम्मी ॥४२३॥-१७
**गीयं पलावपायं देहपरिस्समकरं ॥४२९॥-१८**
**इह भोगा विसमिव ॥४३७॥-१८**
**भोगा सुतिक्खबहुदुक्खा ॥४३८॥-१८**
**जन्नेण जलं पीयं घम्मायवज- ॥४४०॥-१८**
**जाणइ य जह मरिज्जइ ॥४४१॥-१८**
**भोगास्तुङ्गतरङ्गभङ्गचपलाः ॥४४७॥-१८**
**विना गुरुभ्यो गुणनीरधिभ्यो ॥४५२॥-१९**
**निबद्धो पुण पिसुणो ॥४५८॥-१९**
श्रृण्वन्ति पितुरादेशं, ॥४५६॥-१९
**अनित्यं जीवितं लक्ष्मी ॥४८७॥-१९**
ज्ञानदानाद्भवेज्ज्ञानी, ॥५५३॥-२२
**वन्दे जन्म मनुष्यसम्भवमहं ॥५४५॥-२२**
**पात्रमुत्तमगुणैरलङ्कृतं ॥५४६॥-२२**

**॥ द्वितीयः सर्गः ॥**

**सुलहो विमाणवासो ॥२॥-२५**
उत्तमाः सुखतो बोध्या, ॥३॥-२५
व्याकुलेनाऽपि मनसा, ॥४॥-२५

आकर्ण्येति महीपालभूपो ॥८॥-२५
राज्ञि धर्मिणि धर्मिष्ठाः ॥९॥-२५
सकला अपि कलाः कलावतां, ॥१७॥-२५
लालयेत् पञ्चवर्षाणि ॥१८॥-२५
भवन्ति नम्रास्तरवः फलौद्गमै, ॥२३॥-२६
आरोहन्ती शिरः स्वान्तादौन्नत्यं ॥३१॥-२६
पटु रटति पलितदूतो ॥३२॥-२६
दानं शीलं तपो भावं, ॥४१॥-२६
रम्यं रूपं करणपटुताऽऽ- ॥४२॥-२६
धम्मेण धणं विउलं आउं ॥४३॥-२७
पत्नी प्रेमवती सुतः सुविनयो ॥५९॥-२७
स्यातां सम्पद्विपत्ती सकलतनुमतां ॥६१॥-२७
कुसङ्गतेः कुबुद्धिः स्यात्, ॥६६॥-२७
तेजोमयोऽपि पूज्योऽपि, ॥६७॥-२८
प्रणिहन्ति क्षणार्धेन ॥८८॥-२८
जायतेऽवसरे वृष्टि-र्जायते- ॥११०॥-२९
न श्रीर्मे विपुलाऽजनि ॥११६॥-२९
आघ्रातं मरणेन जन्म ॥११७॥-२९
मिण गोणसंगुलीहिं गणेह ॥१२३॥-३०
जो गिण्हइ गुरुवयणं ॥१२५॥-३०
विना गुरुभ्यो गुणनीरधिभ्यो ॥१३०॥-३०
न दातुं नोपभोक्तुं वा, ॥१४१॥-३०
अस्ति जलं जलराशौ, ॥१४२॥-३०
अतिसञ्चयकर्तृणां, ॥१४३॥-३०
अधः क्षिपन्ति कृपणा ॥१४४॥-३०
सत्यामपि श्रियि प्रायः ॥१४६॥-३१
भवितव्यं भवत्येव ॥१७५॥-३१
दैवमुल्लङ्घ्य यत्कार्यं ॥१७६॥-३२
यद्धात्रा निजभालपट्टलिखितं, ॥१७७॥-३२
योऽर्जितं विभवं नैतं ॥१९४॥-३२
एकस्यैकं क्षणं दुःखं ॥२१०॥-३३
अर्थानामर्जने दुःख-मर्जितानां ॥२११॥-३३
क्लेशाय विस्तराः सर्वे ॥२१२॥-३३
पञ्च नश्यन्ति पद्माक्षि ! ॥२४१॥-३४
लज्जामुज्झति सेवते- ॥२४२॥-३४
दानेन चक्रित्वमुपैति जन्तुर्दा- ॥२४८॥-३४
सङ्ग्रहैकपरः प्राप ॥२४९॥-३४
कदर्योपात्तवित्तस्य ॥२५०॥-३४
अन्नोपाश्रय-भैषज्य- ॥२५७॥-३५
सासाईतंपि जलं पत्तविसेसे- ॥२५८॥-३५
सैव भूमिस्तदेवाम्भः ॥२५९॥-३५
जन्म लब्धमिदमुज्ज्वले ॥२७९॥-३५
भव्यभावमवगम्य लक्षणैर- ॥२८०॥-३५
शिक्षयन्ति गुरवः पदे पदे ॥२८१॥-३५
अत्थो अधम्मो अ तहेव ॥२८२॥-३६
धम्मेण अत्था पउरा भवंति ॥२८३॥-३६
अनित्यो विभवः सर्वः ॥२९७॥-३६
सत्त्वेषु मैत्रीं गुणिषु प्रमोदं, ॥२९९॥-३६
संयोगतो दुःखमनेकभेदं, ॥३०३॥-३६
गतसारेऽत्र संसारे ॥३०४॥-३७
दुःखं स्त्रीकुक्षिमध्ये प्रथममिह भवे, ।३११।-३७
सूक्ष्मबादरद्विभेदजन्तुषु, ॥३१२॥-३७
कोहाभिभूआ न सुहं लहंति, ।३१३।-३७

## ॥ चतुर्थः सर्गः ॥

परेण परिविख्यातो ॥११४॥-४४
रिसहेससमं पत्तं ॥१२८॥-४५
सम्पदो जलतरङ्गविलोला ॥२८४॥-५०
पितरं मातरं बन्धुं ॥३११॥-५१
संझरागजलबुब्बुओवमे ॥३२६॥-५२
स्तोकघस्रसुखस्यार्थमविवेकी ॥३२७॥-५२
कषाया वैरिणः कामं ॥३३३॥-५२
जले तैलं खले गुह्यं ॥३९७॥-५४
धर्म एव सदा सेव्यः ॥४३७॥-५५
एक एवाङ्गवानेति ॥४९०॥-५७
जगत्पूज्या वज्रकायाः ॥५०६॥-५८
सप्तधातुनिबद्धं यत् ॥५०७॥-५८
भ्रातृ-पुत्र-कलत्राद्याः ॥५०८॥-५८
जीवानां रक्षणाद्दीर्घा-युषो ॥५१६॥-५८
संसारकटुवृक्षस्य ॥५४६॥-५९
चन्दनं शीतलं लोके ॥५४७॥-५९
यो न निर्गत्य निःशेषा- ॥५४९॥-५९
दीसई विविहच्छरिअं ॥५५०॥-५९
स्त्रीहन्ता बालहन्ता वा ॥५५३॥-५९
उदीरितोऽर्थः पशुनाऽपि ॥५६९॥-६०
किवणाण धणं नागाण ॥५७८॥-६०
सीहस्स केसरि सइहउ ॥५७९॥-६०
भिक्षुका दासिका धात्री ॥५८३॥-६१
रोगिणां सुहृदो वैद्याः ॥६१२॥-६२
वैद्या वदन्ति कफपित्तमरुद्विकारं ॥६१३॥-६२
वरं वरयते कन्या ॥६२७॥-६२
प्रतिपच्चन्द्रं सुरभी ॥६४७॥-६३
कामकुम्भ-मरुद्वृक्ष ॥६४८॥-६३
अनृतं साहसं माया ॥६८५॥-६४
यौवनमुदयकाले ॥७१४॥-६५

सुस्नातं पुरुषं दृष्ट्वा ॥७१७॥-६५
घृतकुम्भसमा नारी ॥७१८॥-६५
न विश्वसेत् कृष्णसर्पस्य ॥७३७॥-६६
कवयः किं न पश्यन्ति ॥७३८॥-६६
प्रजानां पालनं सम्यग् ॥७४२॥-६६
साधूनां पालनं सम्यग् ॥७४३॥-६६
प्रजापीडनसन्तापात् ॥७४४॥-६६
शर्वरीदीपकश्चन्द्रः ॥७५२॥-६७
स एव पुत्रः पुत्रो यः ॥७५३॥-६७
नरएसु जाइं अइकक्खडाइं ॥७७३॥-६७
गोत्रविध्वंसतोऽनन्तं ॥७७४॥-६७
यो दद्यात्काञ्चनं मेरुं ॥८०५॥-६८
किं कायेन सुपुष्टेन ॥८०६॥-६८
परार्थे जीवितं यस्य ॥८०७॥-६८
देवपूजा गुरूपास्ति ॥८६८॥-७१
निच्चं नो तंबोलां( निच्चुणो तंबोलो ) ॥८६९॥-७१
मणिमंतओसहीणं जंतय ॥८७०॥-७१
मातरं पितरं वापि ॥९०१॥-७२
समीहितं यन्न लभामहे वयं ॥९२६॥-७३
यो मे गर्भस्थितस्यापि ॥९२७॥-७३
यावत्पुण्योदयः पुंसां ॥९२८॥-७३
आयुः कर्म च वित्तं च ॥९२९॥-७३
परं मृत्युर्न मां स्वीया ॥९३०॥-७३
तैलोदकाऽयोऽनल ॥१००३॥-७५
संसाराम्भोनिधौ सत्त्वाः ॥१००४॥-७५
सती पत्युः प्रभोः पत्ति-॥१०१६॥-७६
परवादे दशवदनः ॥१०२२॥-७६
खलः सत्क्रियमाणोऽपि ॥१०२३॥-७६
अकर्तव्यं न कर्तव्य ॥१०५४॥-७७
यत्नेन पापानि समाचरन्ति ॥१०५५॥-७७
पुरुषः कुरुते पापं ॥१०५६॥-७७
राज्यं सुसम्पदो भोगाः ॥१०६७॥-७८
धनदो धनमिच्छूनां ॥१०६८॥-७८
अभयं सुपत्तदाणं ॥१०९४॥-७९
न कयं दीणुद्धरणं ॥१०९५॥-७९
पोरिसिचउत्थभत्ते काउं कम्मं ॥१०९६॥-७९


## ॥ पञ्चमः सर्गः ॥


नारका अपि मोदन्ते ॥६॥-८०
रिक्तपाणिर्न पश्येत् ॥१६॥-८०
आरोग्यभाग्याऽभ्युदयप्रभुत्वं ॥५४॥-८२
पत्नी प्रेमवती सुतः सुविनयो, ॥२४६॥-८९
निर्दन्तः करटी हयो गतजवश्चन्द्रं ॥२४७॥-८९
न्यग्रोधे दुर्लभं पुष्पं, ॥२४८॥-८९
पुरुषः कुरुते पापं बन्धुनिमित्तं ॥२४९॥-८९
विग्रहमिच्छन्ति भटा ॥२८५॥-९०
दिने दिने मङ्गलमञ्जुलाली ॥२८७॥-९०
प्रणिपातावधिः क्रोधः ॥३५१॥-९२


## ॥ षष्ठः सर्गः ॥


माणुसखित्तजाइ कुल- ॥३॥-१०१
आलस्समोहवन्ना थंभा ॥४॥-१०१
अङ्कस्थाने भवेद् धर्मः, ॥५॥-१०१
दिवसनिसाघडिमालं आउं ॥७॥-१०१
आहारो द्विगुणः स्त्रीणां ॥१०॥-१०१
यः कूटं मनुजो वक्ति, ॥२७॥-१०२
अप्पउं धुलिहिं मेलीउं ॥२८॥-१०२
पंथसमा नत्थि जरा, ॥३५॥-१०२
दारा परिभवकारा, ॥६५॥-१०३
ये जनाः स्वं कृतं पापं ॥६७॥-१०७
जो देइ कणयकोडिं, ॥७२॥-१०३
देवदाणवगंधव्वा, ॥७३॥-१०३
तीयहं तिन्नि पीआरडां ॥१२५॥-१०५
जायंमि जीवलोए दो चेव ॥२३५॥-११०
विनयं राजपुत्रेभ्यः, ॥२३८॥-११०
सुख-दुःखानां कर्ता हर्ता ॥२४३॥-११०
जं विहि करइ स होइ, ॥२४७॥-११०
करोमि न करोमीति, ॥२५७॥-११०
आदौ धर्मधुरा कुटुम्बनिचये, ॥२६६॥-१११
पदे पदे निधानानि ॥२६९॥-१११
दुर्वारा वारणेन्द्रा जितपवनजवा, ।२७५।-१११
देवहीनं देवकुलं, ॥२८२॥-११२
किं करोति नरः प्रायः, ॥२८३॥-११२
गुणाः कुर्वन्ति दूतत्वं, ॥३१६॥-११३
जणणी जम्मभूमी य ॥३४०॥-११४
जंमंतीए सोगो, ॥३५५॥-११४
निअघरसोसा परगेहमंडणी ॥३५६॥-११४
जीवहत्या न कर्तव्या, ॥३६९॥-११५
कृपानदीमहातीरे, ॥३७०॥-११५
अहिंसासम्भवो धर्मः, ॥३७१॥-११५
इक्कह जीविअ कारणि मारि ॥३७२॥-११५
शतेषु जायते शूरः, ॥३७३॥-११५
न रणे निर्जिते शूरो, ॥३७४॥-११५

इन्द्रियाणां जये शूरो, ॥३७५॥-११५
ये प्राप्ते व्यसनेऽप्यनाकुलधियः, ॥३८८॥-११५
चेतः सार्द्रतरं वचः सुमधुरं दृष्टिः ॥३८९॥-११५
वने रणे शत्रुजलाग्निमध्ये, ॥३९३॥-११६
मोहो न क्रियते सद्भिः, ॥३९७॥-११६
रागोऽयं दोषपोषाय, ॥३९८॥-११६
मुखे पुरीषप्रक्षेपं, ॥३९९॥-११६
पात्रे धर्मनिबन्धनं तदितरे, ॥४०७॥-११६
**कर्तव्या देवपूजा शुभगुरुवचनं ॥४०९॥-११६**
**छायामिसेण कालो ॥४१०॥-११६**
सुहीओ न चयइ भोए चइज्जा ॥४२६॥-११७
**जह चयइ चक्कवट्टी ॥४२७॥-११७**
**अभयं सुपत्तदाणं ॥४३३॥-११७**
**सदोषमपि दीप्तेन ॥४३७॥-११७**
**चक्रे तीर्थकरैः स्वयं ॥४४८॥-११८**

## ॥ सप्तमः सर्गः ॥

**राज्यं सुसम्पदा भोगाः ॥५॥-११९**
**व्याकुलेनापि मनसा ॥६॥-११९**
**जायंमि जीवलोए दो ॥३०॥-१२०**
**जायंमि जीवलोए ॥३८॥-१२०**
सकलाऽपि कलावतां कला, ॥३९॥-१२०
पात्रार्थे भोजनं येषां, ॥४५॥-१२०
शैले शैले न माणिक्यं, ॥४६॥-१२०
वैरं वैश्वानरो व्याधिर्वाद-व्यसनलक्षणाः ॥५०॥-१२०
शास्त्रं बोधाय दानाय, ॥५२॥-१२१
पिबन्ति नद्यः स्वयमेव नाम्बु, ॥५३॥-१२१
उपाध्यायाद्दशाचार्य, ॥७४॥-१२१
आस्तन्यपानाज्जननी पशूनामा- ॥७५॥-१२२
श्वशुरगृहनिवासः, ॥८०॥-१२२
उत्तमाः स्वगुणैः ख्याता, ॥८१॥-१२२
वरं रेणुर्वरं भस्म, ॥८४॥-१२२
परीक्ष्य सत्कुलं विद्यां, ॥८५॥-१२२
यन्मनोरथशतैरगोचरं, ॥९१॥-१२२
करोमि न करोमीति, ॥९२॥-१२२
मज्जत्वम्भसि यातु मेरुशिखरं, ॥९९॥-१२३
सा सा सम्पद्यते बुद्धिः, ॥१०८॥-१२३
**छित्त्वा पाशमपास्य कूटरचनां ॥११५॥-१२३**
**दुर्जनः परिहर्तव्यो ॥११८॥-१२३**
**प्राणी प्राणितलोभेन ॥१२३॥-१२४**
पङ्गु-कुष्ठि-कुणित्वादि, ॥१३२॥-१२४
आत्मवत्सर्वभूतेषु, ॥१३३॥-१२४
अहिंसा दुःखदावाग्नि- ॥१३४॥-१२४
दीर्घमायुः परं रूप-मारोग्यं ॥१३५॥-१२४
नाहमेवंविधं पापं, ॥१३६॥-१२४
पंच नमुक्कार समायंते, ॥१३९॥-१२४
कृत्वा पापसहस्राणि, ॥१४०॥-१२४
अपुव्वो कप्पतरू एसो, ॥१४१॥-१२४
पुरुषः कुरुते पापं बन्धुनिमित्तं॥१४६॥-१२४
जामति पछइ सांभरइ साजइ ॥१४७॥-१२४
**काला कर्म न रूसीइ ॥१४८॥-१२४**
धनदो धनमिच्छूनां, ॥१५१॥-१२५
कुलं विश्वश्लाघ्यं वपुरपगदं ॥१७०॥-१२५
अनृतं साहसं माया, ॥१८१॥-१२६
ज्ञानं मददर्पहरं माद्यति ॥१९१॥-१२६
विषभारसहस्रेण, ॥१९२॥-१२६
त्यागिना किं दरिद्रेण, ॥१९३॥-१२६
ततः स धर्मबुद्ध्या तु, ॥२०२॥-१२७
कल्पयित्वा च शास्त्राणि, ॥२०३॥-१२७
यादृशं कल्प्यते शास्त्रं, ॥२०४॥-१२७
पापं शास्त्रं पठन् पाप-कर्माणि ॥२०५॥-१२७
अंबस्स य निंबस्स य, ॥२०६॥-१२७
**यादृशं क्रियते कर्म ॥२१३॥-१२७**
अज्ञानतिमिरान्धस्य, ॥२१८॥-१२७
विना गुरुभ्यो गुणनीरधिभ्यो, ॥२१९॥-१२७
**शास्त्रं बोधाय दानाय ॥२२५॥-१२८**
व्याघ्रीव तिष्ठति जरा, ॥२४८॥-१२८
क्षणं बालो भूत्वा क्षणमथ युवा, ॥२४९॥-१२८
**अभयं सुपत्तदाणं ॥२५५॥-१२९**
दुष्टानां दमनं नयानुगमनं, ॥२६९॥-१२९
बालसखित्वमकारणहास्यं, ॥२८१॥-१३०
हसन्नपि नृपो हन्ति, ॥२८२॥-१३०
**अनाज्यं भोज्यमप्राज्यं ॥२८५॥-१३०**
राजदण्डभयात्पापं, ॥२९२॥-१३०
कुसङ्गतेः कुबुद्धिः स्यात्, ॥२९६॥-१३०
पापी पापं वितन्वानो, ॥२९७॥-१३०
स्फुरन्त्युपायाः शान्त्यर्थ-मनुकूले ॥३०३॥-१३१
उपकर्तुं प्रियं वक्तुं, ॥३१०॥-१३१
केनाञ्जितानि नयनानि मृगा- ॥३१७॥-१३१
यस्मिन् दृष्टे मनस्तोषो, ॥३१९॥-१३१
**यथेक्षुहेतोः परिसिञ्चति ॥३२९॥-१३२**
**जीवो गेही वपुर्गेहं ॥३३०॥-१३२**
**या देवे देवताबुद्धि-र्गुरौ ॥३३३॥-१३२**
**अदेवे देवबुद्धिर्या ॥३३४॥-१३२**

**सम्यक्त्वपालनफलं ॥३३५॥-१३२**
**शमसंवेगनिर्वेदा ॥३३६॥-१३२**
**स्थैर्यं प्रभावना भक्तिः ॥३३७॥-१३२**
**शङ्का काङ्क्षा विचिकित्सा ॥३३८॥-१३२**
**विवेकी विनयी दानी ॥३३९॥-१३२**
**कर्तुः स्वयं कारयितुः परेण ॥३४०॥-१३२**
**आलोइसु अईआरे ॥३४७॥--१३२**
**चउसरणं गरहणं च ॥३४८॥-१३२**
**सृजति तावदशेषगुणालयं ॥३५०॥-१३३**
**परिहरति न मृत्युं ॥३५१॥-१३३**
अयं निजः परो वेति, ॥३५४॥-१३३
लोभमूलानि पापानि, ॥३५६॥-१३३
धनेषु जीवितव्येषु, ॥३५७॥-१३३
**दूधिइं सींचिउ लीबडउ ॥३६०॥-१३३**
**दुज्जणजण बब्बूलवण ॥३६१॥-१३३**
नउकार इक्क अक्खर, ॥३७०॥-१३३
**संयोगाः स्युर्वियोगान्ता ॥३८८॥-१३४**
**धर्म-शोक-भयाऽऽहार ॥३९१॥-१३४**
**क्षणं बालो भूत्वा क्षणमथ ॥४०२॥-१३५**
**जाई य उत्तमाए कुले ॥४१५॥-१३५**
**संसारमणवयग्गं ॥४१६॥-१३५**
**अपूर्वः कोऽपि कोपाग्निः ॥४२०॥-१३५**
**नाकारणरुषां सङ्ख्या ॥४२१॥-१३५**
तं नत्थि घरं तं नत्थि सउलं दे- ॥४२२॥-१३५
अइतज्जणा न कायव्वा, ॥४२९॥-१३६
**दया विना तपस्वित्वं ॥४४३॥-१३६**
खामेसु सव्वसत्ते खमेसु तेसु ॥४४८॥-१३६
क्षमावतामयं लोकः, ॥४४९॥-१३६
ददतु ददतु गालीर्गालिमन्तो ॥४५०॥-१३६
**पूआ पच्चक्खाणं पडिक्क- ॥४५८॥-१३७**
हस्तो दानविधौ मनो जिनमते, ॥४६०॥-१३७
वंदिज्जमाणा न समुक्कसंति, ॥४६९॥-१३७
नो समणो जइ समणो, ॥४७०॥-१३७
**मानाद्वा यदिवा क्रोधाद् ॥४७७॥-१३७**
लिङ्गिनां परमाधारो, ॥४८३॥-१३८
पारदारिकचौराणा-मस्ति काचि- ॥४८४॥-१३८
**जले तैलं खले गुह्यं ॥४९६॥-१३८**
**रम्यं रूपं करणपटुता- ॥५१४॥-१३९**
शर्वरीदीपकश्चन्द्रः, ॥५४१॥-१४०
विणए सिस्सपरीक्खा, ॥५४४॥-१४०
**थलि ऊपज्जइ जलिवसइ ॥५६१॥-१४१**
**गजा येन हताः सिंहाः ॥५६२॥-१४१**
**पांचे परिणी दसि धरी ॥५६३॥-१४१**
**वाम पमाणे लोअणे ॥५७१॥-१४१**
**रहि रहि चंदा दढ कर ॥५७३॥-१४१**
**स्वर्गच्युतानामिह जीवलोके ॥५७९॥-१४१**
**पुरुषः कुरुते पापं ॥५८०॥-१४१**
**शीलं नाम नृणां कुलोन्नतिकरं ॥५८२॥-१४१**

**॥ अष्टमः सर्गः ॥**

**दुष्टानां दमनं नयानुगमनं ॥६॥-१४३**
तीर्थानामुत्तमं तीर्थं, ॥१२॥-१४३
**भवन्ति भविनां भाग्यै ॥३७॥-१४४**
**आर्यदेशकुलरूप- ॥४२॥-१४४**
**पुरुषः कुरुते पापं ॥४४॥-१४४**
**यत्नेन पापानि समाचरन्ति ॥४५॥-१४४**
नरपतिहितकर्ता, ॥५१॥-१४५
**मृगमीनसज्जनानां ॥५४॥-१४५**
पापी रूपविवर्जितः पिशुनवाग्, ॥६०॥-१४५
**राज्यं तु जायते प्रायो ॥६५॥-१४५**
राज्यं कुर्वन् यतः प्रायः, ॥६६॥-१४५
लक्ष्मीवन्तो न जानन्ति, ॥६७॥-१४५
**निर्दयत्वमहंकार-स्तृष्णा ॥६८॥-१४५**
**भक्ते द्वेषो जडे प्रीति ॥६९॥-१४५**
सत्पात्रं महती श्रद्धा, ॥८४॥-१४६
**तैरात्मा स पवित्रितो निजकुलं ॥१००॥-१४७**
श्रेयांसि बहुविघ्नानि, ॥१०५॥-१४७
प्रारभ्यते न खलु विघ्नभयेन नीचैः, ॥१०६॥-१४७
**तावद्भयेभ्यो भेतव्यं ॥१३६॥-१४८**
**श्रियमनुभवन्ति धीरा ॥१३७॥-१४८**
राज्यं सुसम्पदो भोगाः, ॥१७१॥-१४९
सुलहो विमाणवासो, ॥१७२॥-१४९
**धम्मेण अत्था पउरा भवंति ॥१७६॥-१४९**
**कोहाभिभूआ न सुहं लहंते ॥१७७॥-१४९**
**कोहो विसं किं अमयं ॥१७८॥-१४९**
**एगे दो घड्घटा रहेसु ॥१९६॥-१५०**
**चेईअदव्वविणासे ॥१९७॥-१५०**
**वरं सेवा वरं दास्यं ॥१९८॥-१५०**
**पापी दोषं निजं नैव ॥२०९॥-१५०**
**शैले शैले न माणिक्यं ॥२२१॥-१५१**
**सम्पदो जलतरङ्गविलोला ॥२२५॥-१५१**
**चेतोहरा युवतयः ॥२२६॥-१५१**
यद्धात्रा निजभालपट्टलिखितं, ॥२२९॥-१५१
**वसुहाभरणं पुरिसा ॥२३१॥-१५१**

**स्वच्छाशयाः प्रकृत्या ॥२३३॥-१५१**
**व्यसनशतगतानां ॥२६१॥-१५२**
**दीपो हन्ति तमःस्तोमं ॥२६२॥-१५३**
**यद्वस्तु दीयते भावात् ॥२८४॥-१५३**
**श्राव्यते सुकृतं यावत् ॥२८६॥-१५३**
**अश्रावितोऽपि श्रद्धत्ते ॥२८८॥-१५३**
**धर्मो महामङ्गलमङ्गभाजां ॥२९९॥-१५४**
**दिवसनिसाघडिमालं ॥३००॥-१५४**
**छायामिसेण कालो ॥३०१॥-१५४**
**जे जिणधम्मह बाहिरा ॥३०२॥-१५४**
**वरिसह ते गणि दीहडा ॥३०३॥-१५४**
**अनित्यमारोग्यमनित्ययौवनं ॥३१२॥-१५४**
**उत्पत्तिरेवास्ति विपत्तिसंयुता ॥३१३॥-१५४**
**तृष्णा खानिरगाधेयं ॥३२०॥-१५५**
**शरीरं श्लथते नाऽऽशा ॥३२१॥-१५५**
**लोभमूलानि पापानि ॥३२६॥-१५५**
पात्रार्थं भोजनं येषां, ॥३५२॥-१५६
काङ्क्षन् सदैव भोगं तु, ॥३५९॥-१५६
**बालस्स माइमरणं ॥३६२॥-१५६**
**दानेन भूतानि वशीभवन्ति ॥३९६॥-१५७**
**पश्चाद् दत्तं परैर्दत्तं ॥३९७॥-१५७**
**नवकार इक अक्खर ॥४०५॥-१५८**
**जो गणइ लक्खमेगं ॥४०६॥-१५८**
**अट्ठेवय अट्ठसया ॥४०७॥-१५८**
**नमस्कारसमो मन्त्रः ॥४५४॥-१५९**

## ॥ नवमः सर्गः ॥

**धने सत्यपि नो येन ॥४९॥-१६२**
समुद्रस्य यदा पारः, ॥२६०॥-१७०
पूआ पच्चक्खाणं पडिक्कमणं पो- ॥२९६॥-१७१

## ॥ दशमः सर्गः ॥

**धनदो धनमिच्छूनां ॥४॥-१७२**
दुष्टस्य दण्डः स्वजनस्य पूजा, ॥६॥-१७२
**पुरुषः कुरुते पापं ॥९॥-१७२**
**श्रुत्वा जिनोदितं धर्मं ॥१०॥-१७२**
**पुत्रो मे भ्राता मे स्वजनो ॥११॥-१७२**
**दीसई विविहं चरिअं ॥२८॥-१७२**
**क्षणं शक्तः क्षणं मुक्तः ॥३५॥-१७३**
**असत्यमप्रत्ययमूलकारणं ॥३९॥-१७३**
**आपदापतितं दीन-स्वरं ॥४९॥-१७३**
**वदनं प्रसादसदनं ॥५०॥-१७३**
**आपत्स्वेव हि महतां ॥५१॥-१७३**
शिष्टाशिष्टनराणां तु, ॥५७॥-१७४
धनलोभान्महात्माऽपि, ॥५८॥-१७४
**परद्रव्यापहारेणाकीर्त्तिरत्र ॥८२॥-१७४**
पतितं विस्मृतं नष्टं, ॥८३॥-१७५
**अवद्यमुक्ते पथि यः ॥८८॥-१७५**
**धन्ना तच्चिअ पुरिसा ॥८९॥-१७५**
**धर्मज्ञो धर्मकर्ता च ॥९०॥-१७५**
जिणवरभवणाइं, ॥९४॥-१७५
**प्रासादप्रतिमायात्रा ॥११३॥-१७६**
**मिथ्यात्वं परमो रोगो ॥११७॥-१७६**
कारणात्प्रियतामेति, ॥१३५॥-१७७
**वंचिअ सयल जणो ॥१३६॥-१७७**
जं विहि करइ स होइ, ॥१३८॥-१७७
**चक्षुर्दग्धं परस्त्रीभि ॥१४२॥-१७७**
एगदिवसंपि जीवो, ॥१४३॥-१७७
**पच्छावि ते पयाया ॥१४८॥-१७७**
**कर्तुः स्वयं कारयितुः परेण ॥१५०॥-१७७**
**साधूणं कप्पणिज्जं जं ॥१५९॥-१७८**
**ये जीवा कुर्वते पापं ॥२०७॥-१७९**
**हसन्तो हेलया कर्म ॥२०८॥-१७९**
**संसारम्मि असारे ॥२०९॥-१७९**
**पुरुषः कुरुते पापं ॥२१०॥-१७९**
जंमंतीए सोगो, ॥२१५॥-१८०
पदे पदे निधानानि, ॥२८१॥-१८२
अंबस्स य निंबस्स य, ॥३००॥-१८२
उत्तमानां नृणां सङ्गान्नीचा अपि ॥३०१॥-१८२
विहलं जो अवलंबइ, ॥३३५॥-१८४

## ॥ एकादशमः सर्गः ॥

षट्कर्णो भिद्यते मन्त्र-श्चतुष्क- ॥१४॥-१८९
ईर्ष्यया पातकं कर्तुं, ॥१६॥-१८९
अपूर्वः कोऽपि कोपाग्निः, ॥१७॥-१८९
विवेकः सह सम्पत्त्या, ॥६२॥-१९१
**सकृज्जल्पन्ति राजानः ॥९९॥-१९२**
कषाया अपसर्पन्ति, ॥१३९॥-१९३

## Note


अरजिन चरित्रम्